नन्दो बहिर्निर्गत्यतेन समं युद्धं चकार भग्नश्चाणिक्यः मेलितो लोकः सर्वोपि इतस्ततो जगाम चन्द्रगुप्तं लात्वा चाणिक्यो नष्टः नन्दपुरुषा अश्वानुरूढ़ा स्तं विलोकयन्ति एते त्वागताः अहं तु सबालः पादचारी अश्वारूढ़ाणामे तेषां पुरः क्वयास्यामीति ध्यात्वा सरस्तीरस्थितं रजकं दृष्ट्वा चाणिक्यः प्राह भो रजकमारणाय नन्दभटाः समायान्ति तद्वचः श्रुत्वा रजको नष्टः चाणिक्यः स्वयं रजको जातः चन्द्रगुप्तस्तु सरसि प्रवेशितः एकोनन्दा श्ववारस्तत्रा यातः तेन पृष्टं भो रजकः चन्द्रगुप्तः क्व गत इति रजकःप्राह अस्मिन् सरसि प्रविष्टः अश्ववारेण स्व घोटकस्तस्यार्पितः खड्गमपि तस्यार्पितं स्वयं तु सरः प्रवेशाय यावत्सज्जो भवति तावता तं नैव खड्गेन स चाणिक्येन द्विधाकृतः पश्चात्सरसो निष्कासितश्चाणिक्येन चन्द्रगुप्तः अश्वम धिरोहितःपथि गच्छता चाणिक्येन चन्द्रगुप्तः पृष्टः भो यस्यां वेलायां त्वं मयाऽश्ववारस्य दर्शितः तदा तवमनसि किमभूत् चन्द्रगुप्तेनोक्तं मयैवं ज्ञातं ममहिताय एवं ततो दर्शयत्रस्तोति चाणिक्येन ज्ञातं योग्यो यमेव पश्चाच्चन्द्रगुप्तः क्षुधार्त्तो जातः ततश्चाणिक्येन क्वापि स्थाने सद्यो भुक्तस्य वटकस्य जठरं द्विधाकृत्य दधिकूरं गृहीतं भोजितश्चन्द्रगुप्तः ततो ग्रामे ग्रामे भिक्षां कुर्व्वन् चाणिक्यो भ्रमति एकदा कस्मिं श्चिद्ग्रामे चाणिक्य एकस्या वृद्धाया गृहे भिक्षार्थं गतः तत्र तया बालकानां भोजनाय भाजने खीरेयी क्षिप्ता एकेन बालेन मध्ये हस्तः क्षिप्तः दग्ध स रोदति तया उक्तं रे मूढ़ त्वमपि चाणिक्यवन्न जानासि चाणिक्येनोक्तं हे मातश्चाणिक्यः कस्मान्मूढ़ः तयोक्तं पूर्वं पार्श्वानि गृह्यन्ते ततो मध्ये हस्त पात्यते भोजने राज्यग्रहणे च तत् श्रुत्वा गतश्चाणिक्यो हिमवत्पार्श्वे तत्र पर्वत नामा परिव्राजको राजा तेन सह मैत्री कृता चाणिक्येन तस्य प्रस्तावे उक्तं नन्दराज्यं लात्वाऽर्द्धमर्द्धं त्वया चन्द्रगुप्तेन च भुज्यते प्रतिपन्नं परिव्राजक राजेन ततः सैन्येन सह द्वावपि चलितौ मार्गस्थ ग्राम नगराणि स्वायत्तीकुरुतः एकदा मार्गे महदेकं नगरमागतं तदग्रहीतुं न शक्यते परिव्राजकवेषेण चाणिक्यो नगर मध्ये प्रविष्टः तदन्तर्देवदेवीमूर्त्तयः सप्रभावा

दृष्टा: विचित्रया मायया पौरान्विप्रतार्य तासर्वा दूरीकृता: ततो नगरं गृहीतं क्रमेण स सेन्यो तौ पाटलीपुत्रपरिसरे गतौ रुद्धं तन्नगरं नन्दो धर्म्महारेण निर्गमं अमार्गयत् ताभ्यामुक्तं एकरथे यावन्मात्रं तावन्मात्राणं वित्तदारासुतादिकं लात्वा निर्गच्छ नन्देन तथैव कृतं एका नन्दपुत्री रथस्थितानिर्गच्छन्ती पुन: पुनश्चन्द्रगुप्तं पश्यति नन्देन भणितं याहीति सा रथादुत्तीर्य चन्द्रगुप्तरथे गत्वा यावदारुहति तावत्तद्रथे न व आरका भग्ना: अमङ्गलमिति ज्ञात्वा चन्द्रगुप्तेन सा निषिद्धा चाणिक्येनोक्तं इमां मा निवारय नवपुरुष युगानि यावत्तव वंशोभावीति प्रतिपन्नं तेन अथ परिव्राजकराज चंद्रगुप्तचाणिक्या पाटलिपुरमध्ये प्रविष्टा: गता राजगृहे राज्यं द्विधा विभज्य गृहीतं तत्रैका विषकन्यास्ति तां दृष्ट्वा परिव्राजकराज: कामविह्वलो जात: चाणिक्येन सा: तस्यैव दत्ता तस्या: प्रथमं परिष्वङ्गेनैव विषार्त्तो जात: यावता चन्द्रगुप्तो विषप्रतीकारं करोति तावता चाणिक्येन भ्रुकुटि: कृता कर्णे चेमं श्लोकं पठित वान् तुल्यार्थं तुलासामर्थ्यं मर्मज्ञं व्यवसायिनं अर्द्धराज्यहरं मित्रं यो न हन्यात् स हन्यते १ ततश्चन्द्रगुप्तस्तत्प्रतीकाराद्दूरे भूत: परिव्राजकराजस्तु मृत: ततश्चन्द्रगुप्त: संपूर्णं राज्यं करोति परं नन्द मनुष्याश्चौर्येण देशोपद्रवं कुर्वन्ति एकदा चाणिक्यश्चौरदमनोपायं चिन्तयन्नगराद्बहिर्गत: तत्र नलदामकुविन्द: स्वपुत्रं मल्लोटकैरुच्चारितं दृष्ट्वा कोपात्तेषां बिलं खनित्वा प्रज्वालयन् दृष्टश्चाणिक्येन चिन्तीतं योग्योयमिति तस्यैव तलारत्वं दत्तं पश्चात् स चौरनिग्रहं करोति प्रत्युत किञ्चिदुपकारादि न करोति तेन सर्वेपि चौरा: प्रकटीकृता: व्यापादिताश्च जातं निष्कण्टकं राज्यं अथ कोशार्थं चाणिक्य उपायं करोति एकदा पाटलिपुत्र सम्बन्धिनो व्यवहारिणो भोजनार्थमाकारिता: भोजनान्ते तेषां चन्द्रहासमदिरा दत्ता ते विह्वलीभूता: तावता चाणिक्य: समुत्थाय नृत्यन्नेवं पठति दीसइ धाउरत्ताइं कंचणकुडि आतिदंडंच राया विस्समि सत्थी इत्यवितामेहोलंवाएहि १ इदं श्रुत्वा पर: कश्चित् समुत्थाया जल्पतोपि यत्र प्रकटितं तद्वदति इत: सहस्रयोजने हस्तिपददेशे टंकानां लक्षं अस्ति अत्रार्थे ममापिहोलंवादय: अपर: पठति मयातिलाढ कडमोस्ति ततो मम

ते तिला बहुलत्वेन निष्पत्स्यन्ते अत्रार्थे ममापि होलं बादय अन्यः पठति तावन्त्यो मे गावः सन्ति यासां नवनीतेन महागिरिनदीप्रवाहो रुध्यते अपरः प्राह तावन्त्यो मे वडवाः सन्ति यासां एकदिनजातैः किशोरपुच्छकेशैः पाटलिपुरनगोमण्डलं छादयामि अन्यः प्राह तादृशमेशालयः सन्ति यद्दोजैः प्रत्यहं शालयो नवीना भवन्ति अत्रार्थे ममापि होलं बादय एवं सर्वेषां वित्तमर्यादां कृत्वा वाणिक्पेन यथायोग्यं वित्तं गृहीतं अथ वाणिक्पाः सुवर्णोपार्जनोपायं चिन्तयन् देवमाराध तुष्टेन देवेन तस्य जयिनः पाशकादत्ताः वाणिक्पेन तैः पासकैः कश्चिन्नरः शिक्षितः द्यूतार्थे प्रेरितः स गृहीत सुवर्णटङ्ककशालः पुराभ्यन्तरे भ्रमन्नेवं वक्ति अहं यदि जयामि तदा सुवर्णटङ्कं एकं गृह्णामि मां यदि अन्यो जयति तदा तस्य सुवर्णटङ्ककशालमिदं ददामीति श्रुत्वा बहवो जनास्तेन समं द्यूतक्रीडां कुर्वन्ति परं हारिमेतव जना आशृण्वन्ति स तु सर्व्वत्र जयति एवं पाशक युक्तस्य तत्पुरुषस्य पराजयो दुर्लभ स्तथा मनुष्यत्वप्राप्तिर्दुर्लभेति पाशकदृष्टान्तः २ धन्नेति भरतसत्कानि सर्वाण्यपि धान्यानि एकत्र संमीला मध्ये सर्षप प्रक्ष प्रक्षेपः केनचिद्देवेना भिधीयते सर्वं एकीकृत्य कस्याश्चिदतिवृद्धाया दीयते तस्या यथा सर्व धान्यानां प्रत्येकं पृथक्करणं दुष्करं तथा मनुष्यत्वमपि दुर्लभं ३ दूएत्ति एको राजा तस्य अष्टोत्तर शतस्थं भालं कृता सभास्ति स्तंभे स्तंभे च १०८ कोणाः सन्ति एकदा तस्य राज्ञः पुत्रो राजानं मारयित्वा स्वयं भोक्तुमीहति तस्याध्यवसा येमन्त्रिणाज्ञातः कथितश्च राज्ञे राज्ञापि पुत्रा योक्तं पुत्रयोस्माकमनुक्रमं न सहते स द्यूतं खेलति यदि जयति तदा तस्य राज्यं दीयते द्यूतक्रीडनविधि रयं वर्त्तते कुमारस्य एकवारंदायो भवति राज्ञो यथेच्छ दाया भवन्ति एवमष्टोत्तरशतस्तंभानां एकैकं कोणं अष्टोत्तरशतवारं जयति तदातस्य राज्यं दीयते त्वमप्येवं कुर्व्वति राज्ञा उक्तं कुमारस्य यथाऽस्य कुमारस्य एतत्करणं दुष्करं तथा मनुष्य त्वमपि दुर्लभं ४ रयणत्ति एकस्मिन्नगरे कश्चिद् व्यवहारिणो नानारत्नानि सं सलोभात्र व्यापारयति अन्यदा पितरिदेशान्तरं गतेपुत्रैः कोटिध्वजार्थं दूरदेशान्तरीय पुरुषाणां हस्तेतानि दत्तानि जाता:

पुत्रा: कोटिध्वजा: कियताकालेन पिता गृहमागत: ज्ञातवान् रत्नविक्रीणनं रोषं विधाय पुत्रानेव मूचे मम रत्नानि पश्चादापस्तु यथा तत्पश्चाद्गालनं दुष्करं तथा मनुष्यत्व मपि दुर्लभं सुविवेक्ति पाटलिपुरात् कला कुशलो मूलदेवो राजपुत्रोद्यूत व्यसनात् पित्रापराभूतो निर्गतो गुटिका कृत वामन रूप उज्जयनी गत: तत्र तादृशा रूपेणैव तेन वीणाकला जनानां दर्शिता विस्मिताजना: वीणाकलावार्त्ता सर्वत्र प्रसृता श्रुताच देवदत्तया वेश्यया ततस्तयास्तस्या कारणाय चेटी प्रहिता तया चागत्य एव मुक्तं भो वामन त्वां मत्स्वामिनी आकारयति तेनोक्तं १ याविचित्र विटकोटि निघृष्टा मद्यमांस निरत निकृष्ट कोमला वचसि चेतसि दुष्टातां भजन्ति गणिकां न विश्रिष्टा: वामनेन एवमुक्तेपि तया चेट्या विचित्रै: सामवचनैर्गृहमानीत: देवद त्तया च तेन समं वीणावादो विहित: वामनेन वीणा कलादिभि देवदत्ताजिता पादयोर्निपत्य एव मूचे भो पुरुष स्वरूपं प्रकटय: अनया कलया ज्ञायते त्वमो दृग्वामनरूपवान्नासि मूलरूपन्ते पृथग् भविष्यतीतिवातंरूपं प्रकटय वामनेन वेश्यावचनरक्षितेन स्वरूपं प्रकटितं सापिभृशं तद्रूप चम त्कृता प्रकाम मागच्छ स्वगृहेतं स्वभोगासक्तं चकार अतीवतत्रीति पात्रं बभूव अन्यदा पूर्वं तस्यां आसक्तवान् व्यवहारि पुत्रोऽचलना मागृहे समयात: अक्कया उक्तं वत्से दृश्य पुत्रं भज मुञ्चैनं निस्वं मूलदेवं तयाचोक्तं मूलदेवो गुणवान् अयमचलो निर्गुण: अक्कया उक्तं उभयो: परीक्षा क्रियते ताभ्यां उभयो: पार्श्वे दृत्तव: आनायिता: मूलदेवोनिस्वत्व कर्पूरवासिता: सुसंस्कृता आनीता अचलेन प्रकटं भूत्वा दृत्तव आनीता: तथाप्यक्का वचसा दृश्य पुत्रेण पराभूतो मूलदेवो बेन्नातटं प्रस्थित: अटव्यां गच्छतो मूलदेवस्योपवासत्रयं जातं चतुर्थ दिवसेकापिग्रामे भिक्षायां राह्मामाषालब्धा: मूलदेवेन तद्भक्षणार्थं सरसि गच्छता कश्चिन्महातपस्वी दृष्ट: तदभिमुखं गत्वा निस्तारयमां विस्तारय पात्रं द्रव्यादि शुद्धानिमान् माषान् गृहाणेत्युक्ता तेमाषा स्तस्मै दत्ता तदा तत्साधुस सन्तुष्टादेवी गगनमार्गेऽवदत् भो पथिकमार्गय यथेच्छं पदद्वयेन ततो मूलदेवोऽवदत् धन्नाणं खुनराणं कुम्मासाइन्ति साहु

पारणए गणि अच्च देवदत्तं रज्ज सइसच्च हत्थीणं १ तयाचोक्तं इयमपिते सद्यः सभवथति तस्यामेव रात्रौ देव कुत्यां मूलदेवेन सुप्तेन स्वदन प्रविश्यन्द्रः स्वप्ने दृष्टः तदानो मेव तत्रैव सुप्तेन एकेन कार्पटि केन तादृश एव स्वप्नोदृष्टः मूलदेवः स्वस्तरादुत्थितो यावत्स स्वप्नं विचारयति तावत् सोपि स्वस्तरादुत्थाय स्वगुरोः पुरस्तं स्वप्नमाचख्यौ गुरुरपि त्वमद्य घृत गुडसहित मण्डकं प्राप्तासीति बभाषे मूलदेवस्तत उत्थाय नगरान्तः स्वप्न पाठक गृहे गत्वा घनं विनयं कृत्वा स्वप्नपाठकाय स्व स्वप्नमाचख्यौ तेनोक्तं सप्तमदिवसे तव राज्यं भविष्यतीत्युक्ता स्वपुत्री तेन मूलदेवाय परि णायिता अपुत्रो तत्रगरस्वामी मृतः पञ्चदिव्यै र्मूलदेवस्य राज्यं दत्तं देवदत्ताञ्च गणिकान्तत्रानाय्य मूलदेव राजा स्वराज्ञीश्चकार अन्यदा तत्र व्यापा रार्थं मागतो चल व्यवहारी राज्ञा मूलदेवेनोपलक्षितः शुल्कमिषेण भृशं पराभूतः स्वतेजो मूलदेवेन दर्शितं अचलः स्वापराधं क्षमयामास राज्ञी वचसा मूलदेवेन मुक्तः अथ स कार्पटिकः स्वस्वप्नानुसारि स्वप्नदर्शनं मूलदेव कुमारं राजानं जातं श्रुत्वा पुनस्तादृश स्वप्नार्थी तस्यामेव देव कुत्यां सुप्तः परं तादृशं स्वप्नं न प्राप एवं यथास्य कार्पटिकस्य तादृश स्वप्नप्राप्तिर्दुःप्राप्या तथा मनुष्य त्वादभ्रष्टस्य जीवस्य मनुष्यत्व प्राप्तिर्दुःप्रापेति ६ चक्रेति इन्द्रपुरे इन्द्रदत्त राजा तस्य २२ पुत्राः अन्यदा तेन राज्ञा एका मन्त्रिपुत्री उढा सा वणिक पुत्रीति परिणीय उपेक्षिता कदापि न भुक्ता एकदा सा ऋतुस्नानं कुर्वती राज्ञा दृष्टा दृष्ट्वा सेवकानां कथ्येयं पत्नीतैरुक्तं वृथाकं पत्नी मन्त्रिपुत्री राज्ञा तदावासे गत्वा सा भुक्ता तस्याः पुत्रोजातः स राजसदृश एव यत उक्तं ऋतुस्नान समयेयं पश्यति नारी तत्सदृशं जनयति गर्भमिति तया स्व पितुर्मन्त्रिणो राजभोग सूचक गर्भप्रस्तावः प्रोक्तः मन्त्रिणा तु तद्दिनं राज्ञोक्तापाभि ज्ञानादिकं स्व वहिकायां लिखितं तस्याः पुत्रोजातः क्रमाद्वृद्धिङ्गतः सो मन्त्रिणैव पालितः कदापि राज्ञोनैव दर्शितः मन्त्रिणा कलाचार्य्यपार्श्वे ७२ कलाः पाठितः २२ पुत्रासु अविनीताः न पठन्ति अथ मथुरायां पुरिजित राजा पुत्री मिच्छति नाज्ञी कृत राधा वेध

वर प्रतिज्ञा स्वयं वर मण्डपे तिष्ठति तत्र २२ पुत्र परि करित इन्द्रदत्त राजागत: मन्त्री अपि स्वपुत्री पुत्र सार्द्धं लात्वा ते नैवसह तत्रगत: अनेक देशायात राजपुत्रेषूपविष्टेषु सत्सु इन्द्रदत्त राजा १२ स्वपुत्रा राधावेध साधनाय उत्थापितास्तैर्यथाक्रमं बाणावली मुक्ता परं नै केनापि राधावेधो साधित: बाणपात इव स्तंतो बभूव सर्वेष्वन्ये राजपुत्रा: परस्परं दत्ततालाहसिता इन्द्रदत्तस्य राज्ञो महान् खेदोजात: मन्त्रिणोक्तं राजन् कथं खेदो विधीयते मत्पुत्रीजातस्त्वत्पुत्रो वर्त्तते सोऽवश्यं राधावेधं साधयिष्यति प्रोचराज्ञं पुर: सपुत्र आनीत: यद्दिकालिखितं स्वाभिज्ञानं तद्दिन वर्णा दर्शिता: तेन पुत्रेण स्व पितरं राजानं प्रणम्य राधावेध स्थानेऽधस्तैल भृतकटाहि कासं धान्त ऊर्द्ध भ्रम चकार पुत्रिका मध्यस्थित कन्यादर्शन पुत्रिका निवेशित दृष्टिरधोवदनेन ऊर्द्ध बाहुनोर्द्धस्था पुत्रिका एके नैव बाणेन विद्धा साधितो राधावेध: कन्या च परिणीता पितु: परमोहर्षो बभूव २२ राजपुत्राणां महान्विषाद: अथ यथा राधावेधचक्रं दुर्भेद्यं तथा मनुष्य त्वमपि दु:प्राप्यमिति ७ चक्रेति कच्छप दृष्टान्तो यथा एकोद्रह: सहस्र योजन प्रमाण: सर्वत्र सैवालव्याप्त: क्वापिस्थाने एकं छिद्रं कच्छप ग्रीवा प्रमाणं एकेन कच्छपेन ग्रीवा प्रसारिता दृष्टं स चन्द्र नक्षत्रचक्रं दृष्ट्वा सस्वकुटम्बा करणाय मध्ये प्रविष्ट: स्वकुटम्ब सहित स्तच्छिद्र मितस्तो गवेषयति परं न पश्यति यथा तस्य तच्छिद्र दु:प्राप्यं तथा मनुष्य त्वमपि दु:प्रापमिति ८ जुगेति युगसमिला दृष्टान्त: तथाहि केनचिद्देवेन युगं समुद्रस्य पूर्वान्ते मुक्तं तच्छिद्रान्निष्काश्य समिला समुद्रस्य पश्चिमान्ते मुक्ता सासमिला सागरसलिले नेतस्तत: प्रेर्यमाणा कदाचिद्देव योगेन पुनस्तच्छिद्रं प्रविशेत् न पुनर्मनुष्य जन्म लभेतेति ९ परमाणुरिति केनचिद्देवेन कश्चित् स्तम्भचूर्णीकृत: तस्य परमाणवो नलिकायां भृता: सा नलिका तेनैव देवेन मेरुमारुह्य फूत्कृता उज्झीता चेतस्ततस्तत्परमाणव: सानेकत्र संमील्य पुन स्तत् स्तम्भस्य करणं यथा दुष्करं तथेदं मनुष्यत्वं भ्रष्टं सत् पुनरपि प्राप्तुं दुष्करमिति १० दृष्टान्ता: समावसाण संसारे नाणा गोत्ता मुजाइसु कम्मा

णाणाविहाकट्टु पुढोविस्सं भया पया १, संसारे समापन्ना: अत्रण शब्दोवाक्यालङ्कारे प्राप्ता: प्रजा: जन्तु समूहा: विश्व भूतो भवन्ति जगत्पूरका: भवन्ति किं कृत्वा नानाविधा सुपृथक् जातिषु एकेन्द्रियादिषु नाना विधानि कर्माणि कृत्वा कोट्टगीषु जातिषु नानागोत्रासु नाना बहु प्रकारेण गोत्रं नामया सान्ता नाना गोत्रास्तासु नानागोत्रासु बहुभिधानासु २ एगया देवलोएसु नरएसु वि एगया एगया आसुरकायं अहाकम्मेहिं गच्छई २ एकदा एकस्मिन्काले देवलोकेषु देव उत्पद्यते पुन: स एव जीव एकदा नरकेषु नारक उत्पद्यते एकदा आसुरंकायं असुर कुमारभावं प्राप्नोति एवं जीवो यथा कर्मभिर्गच्छति यस्मिन् समये जीवो यादृशानि यादृगति दायकानि कर्माणि बध्नाति तादृशीं गतिं जीवो व्रजतीत्यर्थ: ३ एगया

सूत्र

संसारे नाणागोत्तासु जाइसु । कम्मा नाणाविहा कट्टु पुढोविस्सं भयापया ॥२॥ एगया देवलोएसुनरए सुविएगया । एगया आसुरं कायं आहाकम्मेहिं गच्छई ॥३॥ एगया खत्तिओ होइ तओ चंडाल बुक्कुसो । तओकीड पयंगोय तओ

भाषा

समापन्ना: प्राप्ता: संसारे ए संसारने विषे जीव आवी उपना नाना गोत्रेषु जातिषु नानाप्रकारे गोत्रे अने जातिने विषे कर्म्माणि नानाविधानि कृत्वा विवधप्रकारना जूदा२ कर्म करीने पृथक् विस्तरिता जगत् पूरका प्रजा जाता: पछे जूदा२ लोकपूरक हुआ २ एकदा देवलोकेषु सौधर्मादिषु एकदा ए जीव देवलोके जाइ नरकेषु रत्नप्रभादिषु एकदा जीव आपणी करणीये नरगे जाय एकदा असुरकायं भुवनपत्यादिषु याति एकदा प्रस्तावे ए जीव असुरकुमार मांहि जाय यथाकरमभि: गच्छति जेहवां कर्म ए जीवे कीधा तेहवी गते जाय ३ एकदा क्षत्रियो भवती ह्म एकदा ए जीव मरीने क्षत्रिय हुवे तत चण्डाल: शूद्र बलीए जीव चण्डाल हुवे बुक्कसहुवे बाप शूद्र माता ब्राह्मणी ते बुक्क स कहीये तत कीटक: पतङ्ग: शलभ: वली कीडो

खत्ति ओहोइ तओ चण्डाल बोक्कसो तओ कोडयगं गोय तओ कुन्थु पिपीलिया ४ जीव: एकदा क्षत्रियोभवति ततोऽनन्तरं सजीवश्चाण्डालो भवति ततश्च बोक्कसोपि जीवो भवति यस्य शूद्र: पिता भवति माता ब्राह्मणी भवति तत्पुत्र बोक्कस उच्यते ततस्तत्र जातौ धर्मस्य दुर्लभ त्वात् कोटो भवति च पुन: पतङ्गो भवति ततश्च कुन्थुर्भवति पिपीलिका कोटिका भवति अन्यान्तरेपि जातिकुलभेदा: उक्ता: सन्ति यस्य ब्राह्मण: पिता शूद्री माता भवति सनिषाद उच्यते यस्य ब्राह्मण पिता वैश्य माता भवति स च अम्बुष्ट उच्यते यस्य च निषाद: पिता अम्बुष्टा च माता भवति स च बोक्कस इत्युच्यते ४ एव मावट्टजो णीसु पाणिणोकम्मकिव्विसान निव्विज्जन्ति संसारेसव्वट्ठेसु वखत्तिया ५ प्राणिनोजीवा: संसारे एवं अमुना प्रकारेण आवर्त्तयोनिषु न निर्विजन्ते न उद्विग्ना भवन्ति आवर्त्तेन पुन: पुन: परिभ्रमणेन स्पष्टायोनय: आवर्त्तयोनयस्तेषु चतुरशीति लक्षप्रकारेषु कोट्या: प्राणिन: कर्मकिल्विषा: कर्मभि: किल्विषा: मलिना: अधमावाकेषु केइ वन उद्विजन्ते सर्वार्थेषु क्षत्रियाइवसर्वेचते अर्थाश्च सर्वार्थास्तेषु धन कनकभूमिवनिता गजादि पदार्थेषु क्षत्रियाराजानइव

कुंथु पिपीलिया ॥४॥ वए मावट्ट जोणीसुपाणिणोकम्म किव्विसा । ननिब्बिज्जंतिसंसारे सव्वट्ठेसुवखत्तिया ॥५॥ कम्म
संगेहिं संमूढा दुक्खियाबहु वेयणा । असाणुसासुजोणीसु विणिहम्मंतिपाणिणो ।६। कम्माणं तु पहाणाए आणुपुव्वी

सूत्र

भाषा

पतङ्गोओ ए जोव हुओ तत कूंथू पिपलिका किटका ए जोव कूंथू कोटक हुवे ४ एवं आवर्त्तयोनिषु इम ए जीव जोनिने विषे परिभ्रमणकरतो प्राणिन: प्राणो कर्मकिल्विषा अधमा प्राणि जीवडा कर्मे मैला छे न उद्विग्ना भवन्ति संसारे परं जीव उद्विग्न नथी होता संसारमाहिं फरताज भगता नथी हवे काइं धर्म कोजे सर्वार्थेषु क्षत्रिया: जिम चक्रोराज ऋद्धि लेतो संतोष न पामे तिम ए जोव संसार फिरतो सन्तोष न पामे ५ कर्मसंयोगे संमूढा एजीव

तथा प्राणिनो पीत्यर्थः ५ कर्मसंगेहि संमूढा दुक्खिया बहुवे यणा अमाणु सासु जोणीसु विणिहम्मन्ति पाणिणो ६ प्राणिणो जीवाः अमानुषीषु मनुष्यवर्जितयोनिषु विणिहम्मन्ति विशेषेण निहन्यन्ते विशेषेण निपात्यन्ते अर्थात् एकेन्द्रिय द्वीन्द्रिय त्रीन्द्रिय चतुरिन्द्रियेषु वारवारं उत्पद्यन्ते इत्यर्थः कोट्टगाः प्राणिनः कर्मसङ्गैः कर्मसंयोगैः संमूढा संव्याप्ताः पुनः कोट्टगाः दुक्खिताः पुनः कोट्टगाः बहुवेदनाः ६ कम्माणंतुपहाणाए आणुपुव्वीकयाइओ जीवा सोहि मणुपत्ता आययन्ति मणुस्सयं ७ तु पुनर्जीवाः बोधिं दुष्टकर्मनाशस्वरूपां लघु कर्मतां अनुप्राप्ताः सन्तो मनुष्यत्वं आददते नृजन्म प्राप्नुवन्ति इत्यर्थः कया आनुपूर्व्या अनुक्रमेण शनैः शनैः कदाचित् कर्मणां मनुष्यगति विघ्नकराणां प्रकर्षेण हानि प्रहाणिस्तया प्रहाणा प्रकर्षेण क्षीणतया ७ माणुस्सं विग्गहं लद्धुं सुई धम्मस्स दुल्लहा जं सुच्चा पडिवज्जंति तवं खंति महिंसयं ८ मानुषं विग्रहं लब्धा मानुषं शरीरं प्राप्य तस्य धर्मस्य श्रुतिर्दुर्लभा धर्मश्रवणं दुःप्राप्यमित्यर्थः यं धर्मं श्रुत्वा जीवाः तपः उपवासादिकं क्षान्तिं क्षमां अहिंसतां सदयत्वं प्रतिपद्यन्ते अङ्गीकुर्वन्ति यस्य

सूत्र

कयाइओ । जीवा सोहि मणुपत्ता आययंति मणुस्सयं ।७। माणुस्सं विग्गहं लद्धुं सुई धम्मस्सदुल्लहा । जंसोच्चा पडि

भाषा

कर्मे करोने मूढ़ ते मूर्ख हुवा छे दुखयुक्ताः बहुवेदना स्युः जीवडा दूखियाइवे घणी वेदना संसार माहिं फीरतां खमे अमानुषीषु नरकतिर्यगादिषु योनिषु नरकतिर्यंच गतिने विषे जीवडा विशेषेण निपात्यं ते कर्मभिः प्राणिनः विशेषे करी निपातीइ घालीइ जीव आपणे कर्म ६ कर्मणां प्राधान्यात् कर्मने प्रधानपणे करोने अशुभ कर्म खीण हुवा थका आनुपूर्व्या अनुक्रमेण कदाचित् अनुक्रमे फीरतांर संसारमांहि भला कर्मने उदे जीवा शुद्धि मनुष्यां प्राप्ताः जीव निर्मल हुओ मनुष्यगति मांहि आवे आप्नुवन्ति स्वीकुर्वन्ति मनुष्यत्वं मनुष्यपणो पामे ७ मानुषं देहं लब्धा मनुष्य शरीर लाधू मनुष्य हुओ श्रुतिधर्मस्य दुर्लभा परं धर्मनू सांभलवो दोहिलोयं धर्मं

धर्मस्य श्रवणात् जीवास्तत्परिणतो भवन्ति क्षमावन्तो भवन्ति दयालवश्च भवन्ति इत्युक्तेन बौद्धादीनां धर्मविधिः कृतः आहच्च सवणं लद्धुं सद्धा परम दुल्लहा सुच्चा नेयाउअंमग्गं बहवे परिभस्सई ८ आहच्चेति कदाचित् श्रवणं धर्मश्रवणं लब्धं प्राप्तं तदा धर्मश्रवणं लब्धाऽपि श्रद्धाधर्मेरुचिः परमदुर्लभा अत्यन्तं दुःप्राप्या श्रद्धाया दुर्लभे हेतुमाह बहवो मनुष्याः नैयायिकं न्यायमार्गं जैनमार्गं श्रुत्वा परिभ्रस्यन्ति न्यायमार्गात् स्खलन्ते न्याये पञ्चसमवायकारणे भवं नैयायिकं पञ्चसमवायकारणवादकं जैनं दर्शनं अत्र सप्त निह्नवानां दृष्टान्ताः ९ तत्र प्रथमनिह्नवोदाहरणं यथा कुंडल पुरे श्रीवीरस्वसा सुदर्शना तस्याः पुत्रो जमालिः वीरपुत्री प्रियदर्शना तस्य पत्नी तया सह जमालि वीरपादान्ते दीक्षां जग्राह जमालिना सह पञ्चशत क्षत्रियाः प्रव्रज्याङ्गृहुः प्रियदर्शनया सहस्राः स्त्रियः प्रव्रज्याङ्गृहुः स्वामिनाम्ना विराणामर्पितः स्थविरैश्चास्य एकादशाङ्गान्यध्यापितानि अपि तश्च पञ्चशत साधु सहस्र साध्वी परिवारः अथ जमालिर्भगवताऽननुज्ञातः क्रमेण विहारं कुर्वन् श्रावस्तिङ्गतः तिन्दुकोद्याने कोष्टकचैत्ये समवसृतः अन्त प्रान्ताहारै स्तत्र तस्योत्पन्नोरोगः तेन न शक्नोति उपविष्टुं वदति च जमालिः शिष्यान् प्रतिमदर्थं संस्तारकं कुरुतः शिष्यैण संस्तारकः कर्तुं मारब्धः उपविष्टुम शक्नवता जमालिना भणितः शिष्यकृतः संस्तारकस्तेनोक्तं न कृतः किन्तु क्रियमाणोस्ति ततस्तेन चिन्तितं यद्भगवान् महावीर

वज्जंति तवं खंति महिंसयं ॥८॥ आहच्च सवणं लद्धुं सद्धा परम दुल्लहा । सुच्चा नेयाउयं मग्गं बहवे परिभस्सई । ९।

श्रुत्वा प्रतिपद्यन्ते जे धर्म सुणीने परिवर्जे अङ्गीकार करे तप खांति जीवदया तप बारे भेदे क्षमा जीवदया पडिवर्जे अंगीकार करे धर्मसांभ लवा थकी अथ कदाचित् धर्मस्य श्रवणं लब्धं कदाचित् धर्मसांभल्यो गुरुने संजोगे धर्मेच्छापरम दुर्लभाभवति धर्म उपरि सद्दहणा आववी दोहिली श्रुत्वानियायिकं मार्गं मोक्ष नोदेणहार शुद्ध मार्ग सांभल्यो अङ्गीकार करे जीवाः भ्रष्टाः भवन्ति अङ्गीकार करीने पछे घणाजीव धर्म थी भ्रष्ट होइ ९

आख्याति क्रियमाणं कृतमिति तन्मिथ्या प्रत्यक्षमिदं दृश्यते क्रियमाणेपि संस्तारके कार्त्स्न्ये नाऽनिष्पन्नत्वा कृतत्वा भावात् एवं स्व मनसि विचार्य सर्वान् स्व शिष्याना कार्यएव माचष्टे भो शिष्या यद्वगवान् एव माचष्टे कथमाणे कडे चलमाणे चलिए उदीरिज्जमाणे उदीरिए इत्यादि तत्सर्वं मिथ्या क्रियमा णेपि संस्तारके शयनरूपार्थे साधकत्वाभावेन कृतत्वा भावादिति जमालिना प्रोक्ते केचिन्निग्रन्थाएनमर्थं श्रद्दधति केचिन्न श्रद्दधते येच श्रद्दधति ते जमालिमेव अपसंपद्य विचरन्ति येचन श्रद्दधति तएवमाहुः हे जमाले श्रीमन्महा वीरस्या यमाशयः यत्क्रियमाणं खात्तदेवकृतं भवति क्रियमाणत्व पर्याय वशिष्टकृतत्वं क्रियमाणत्व कृतत्व पर्यायाभ्यां पूर्वोत्तरावस्थाभ्यामे कस्मिन्ने वार्थे सम्भवति ननुतयोः पृथक् पदार्था न्तरसंक्रमो भवतीति वीरवाक्य सत्यताऽस्तीति प्रतिपद्यस्व कयमाणे कडे चलिज्जमाणे चलिए इत्यादि एवन्तैः शिष्यैरुक्तोपि तत्र प्रतिपद्यते स्व वाक्कदाग्रहं न मुञ्चति जमालिः तदा ते मुक्ता जमालिं श्रीमन्महावीरं प्रतिपन्नाः शनैः शनै रपरैरपि महावीरं प्रति पन्नाः सहस्रसाध्वी परिवृता प्रियदर्शना जमालिवाक्यं सत्यं मन्यमाना पृथिव्यां विचरति एकदा साढङ्क कुम्भा रशालाया मुत्तीर्णा ढङ्केण तस्याः प्रति बोधनाय वस्त्रानेङ्गारः क्षिप्तस्तया च दह्यमानं स्व वस्त्रं दृष्ट्वा दग्धं मम वस्त्रमिति प्रोक्तं कुम्भकारेणोक्तं साध्वि भवद्भते डज्झमाणं डड्ढ इति नोचन्ते तत्कथमिदं प्रोक्तं भवत्या इत्यादि कुम्भकार युक्तिभिः साप्रति बुद्धाः जमालि प्रतिवीरवाक्य सत्यता युक्तीराख्यत् जमालिस्तु नैव प्रतिपद्यते तदा सहस्र साध्वी परिवृतया जमालिर्मुक्तः श्रीवीरः प्रतिपन्नः एकदा श्रीवीरश्चं पानगर्यां समवसृतः जमालि स्तत्समवसरणे समागतः श्रीमन्महावीरं प्रत्याह हे भगवन् तवशिष्या छद्मस्था एव विपत्स्यते अहं पुनः केवलीजातः अथतं गौतमः प्राह हे जमाले त्वं केवल्यसि तदा त्वं मत् प्रश्नद्वयव्याख्यानं कुरु केव लिनां छद्मानदर्शनेन क्वचित्स्खलतः प्रश्नद्वयं चेदं लोकः शाश्वतो वा शाश्वतो वा जीवः शाश्वतो वा शाश्वत इति गौतमेन पृष्टे जमालि मौनभागेवस्थितः

तद्दानीं श्रीमहा वीरः प्राह हे जमाले सन्ति मम शिष्या एके केचिद् ये प्रश्नइय मिदं व्याख्यान्ति तथाहि हे जमालेअयं लोकः पूर्वंनाभूत् अग्रे न भविष्यति साम्प्रतं नास्तीति वक्तु न शक्यते तस्मादयं लोक त्रिकालस्थायित्वेन शाश्वतः उत्सर्पिणी विषयो भूत्व सर्पिणी विषयो भवति इत्यादि पर्यायै रशाश्वत इति जीवोपि त्रिकालविषयत्वेन शाश्वतः देवत्व मनुष्यत्व पर्यायै रशाश्वत इति एव माख्यातं भगवतो वाक्यं जमालिमश्रद्धे ततो निष्क्रान्तः स आत्मानं परांश्च व्युद्ग्राहयन् बहून् वर्षान् यावत् श्रामण्यपर्यायं पालयित्वा बहुभिः षष्टाष्टमादिभिरात्मानं भावयित्वार्द्धमासिक्या संलेख नयाऽनशनमाराध्य कयमाणे कडेत्ति उत्सूत्रमालोच्य कालमासे कालं कृत्वालान्तक कल्पेत्रयो दशसागरोपमस्थित्याकिल्बिष देवत्वेनोत्पन्नः तदुत्सूत्र प्ररूपणेन चानं तं संसारं समुपार्जितवान् यदुक्तं भगवत्यां चत्तारि पञ्चतिरिक्ख जोणि यदेव मनुस्स भवग्गहणाइं संसारं अणुपरि यट्टित्ता तओ पच्छासिज्झिस्सइ बुज्झिस्सइ सव्वदुक्खाण मन्तं करिस्सई इति प्रथम निह्नव जमाल्युदाहरणं १ अथ द्वितीय निह्नवोदाहरणं कथ्यते राजगृहे नगरे गुण शिलके चैत्ये चतुर्दश पूर्वपाठीवसुनामा आचार्य समवसृतः तच्छिष्यस्तिष्य गुप्तोस्ति सोऽन्यदा सर्वात्म प्रवाद पूर्वस्थेद मालापकं पठति यथा एके भन्ते जीवप्पएसे जोवेत्तिवत्तव्वंसिआणोयणट्ठे समट्ठेएवन्दोजीवपएसेतिन्नि संखिज्जा असंखिज्जा वा जावए गपए सेणवि अणन्तो जीवत्ति वत्तव्वंसि आणोयणट्ठे समट्ठे एवं दोजीवपएसे तिन्निसंखिज्जा असंखिज्जा वा तम्हा किसणे पडिपुन्ने लोगा गासप एसु तुल्लपएसे जीवेत्ति वत्तव्वंसिआ इत्यादि अत्र स प्रतिपन्नः यदि सर्वे जीवप्रदेशा एकप्रदेशहीना जीव व्यपदेशं न लभन्ते सचै कैकः सर्वान्तिमो जीव इति वक्तव्यः स्यात्सद्भावना भावितत्वात् इति तस्यात्मदेशे जीवभ्रान्तिः ततः स आमलकप्पा नगर्याऽऽगतः तत्र मित्र श्रीनाम्नाश्रावकेण खण्डहेनि मन्त्रितः लड्डुकान्ति मप्रदेश एक सेवतिका खाद्यान्ति मप्रदेश एक एव घृतखण्डिका मध्यादेक एव कूरादिकरणं घृत घृतपात्र मध्यादेक एवबिन्दुः एवं सर्ववस्तु सम्बन्धी एकैक प्रदेशोदत्तः पुनः आर्द्रनाम्नं भगवन्

यूयं प्रतिलाभिताः वयं कृतार्था कृताः तेनोक्तं भो आर्द्र किं त्वयादत्तं आर्द्रेनोक्तं तव सिद्धान्तानुसारेण मया पूर्णं दत्तं अन्तिमे अवयवेदत्तेपूर्णो अवयवी दत्तः अन्तिमे प्रदेशे यथा जीवस्तथा सर्वोप्यवयवी दत्तः अन्तिमे प्रदेशे यथा जीवस्तथा सर्वोप्यवयवी अन्त्यावयवे वक्तव्य इति वीर सिद्धान्तानुसारेण न किञ्चिन्मयादत्तमस्तीत्यादि युक्तिभिर्भिन्न श्री आर्द्रेन स प्रतिबोधितः इति श्रीद्वितीय निह्नवतित्थ गुणोदाहरणं एतौ द्वौनिह्नवौ श्रीवीरे जीवन्त्ये वा भूतां अथ तृतीय निह्नवोदाहरणं कथ्यते श्रीवीर निर्वाणात् २१४ वर्षेषु गतेषु श्वेतां बिकायां प्रोलासोद्याने आषाढाचार्याः स्वशिष्यान् आगाढ योगानुद्वाह यन्तो हृदयशूले नरात्रौ अकस्माद्भूताः स्वर्गं जग्मुः तत्रोपयोगे दत्ते स्वेहात् स्वदेहमधिष्ठाय शिष्याणामागाढ योगक्रियाः पूर्णाचक्रुः अनाश्च नवीनमाचार्यं संस्थाप्य सर्वेषां स्वदृत्तान्त निवेद्य स्वस्थानंययुः तच्छिष्यास्तत्स्वरूपं दृष्ट्वा अव्यक्तमतं प्रतिपन्नाः न ज्ञायते कोदेवः कः श्रमणः इति चिन्तयन्ति वदन्ति च न कोपि किञ्चिदन्ते सर्वोपि व्यवहारस्तैर्नृपः एकदा ते सर्वेपि राजगृहं गताः तत्र परमश्रावकेण सूर्यवंशोत्पन्नेन बलभद्र नृपेण तत्प्रतिबोधाय चौरा एते इति कृत्वा धृताः यष्टि मुष्ट्यादिभिर्मारिताः ते कथयन्ति भो महाराज त्वं श्रमणोपासकः वयं श्रमणाः कस्मादस्माकमनर्थं कारयति राज्ञोक्तं एवं माव दन्तु युष्माकं अव्यक्तं मतं तदनुसारेण न विज्ञोवयं यद्यवन्तः श्रमणा भवन्मतापेक्षयावयं न श्रमणोपासकाः इत्यादि वाक् युक्तिभिः ते प्रतिबुद्धाइति तृतीय निह्नवा व्यक्तमत साधूदाहरणं ३ अथ चतुर्थं निह्नवोदाहरणं वीरात् २२० वर्षेषु गतेषु मिथिलायां लक्ष्मी गृहोद्यानेमहागिरि शिष्यः कोडिन्य नामास्ति तस्यापि शिष्योऽश्वमित्रः अनादाऽनुप्रवाद पूर्वस्थ नैपुणिक नामकं वस्तु पठन् इममालापकं पठितवान् यथा सर्वे पडुपन्ने रइया वुच्छिज्जिस्सन्ति एवं जावदे माणियन्ति एतदालाप कार्थमसौ इत्थं विचारितवान् सर्वेनैरयिका देवाश्च दिव्युच्छेदं प्राप्स्यन्तीत्यत्र रहस्यमुक्तं तदाऽवश्यं सर्वे नैरयिकादयः क्षणविनश्वराः सन्तीति क्षणक्षयवादं प्ररूपयन्नसौ एकदा राजगृहेगतः तत्र श्रौल्लिकैः कुट्टयि तु मारेभे सप्राह यूयं श्राद्धाः वयं साधवः कथं कुप्यते

श्रावका ऊचुः भवन्मतेन वयं श्राद्धा भवद्भिर्दृष्टास्ते विनष्टा वयन्तु नवीनाएवोत्पन्नाः ये भवन्तो यतयः पूर्वमस्माभिर्दृष्टास्ते विनष्टा यूयमुत नवीनाएव क्षणक्षय वादित्वाद्भवन्मतस्येति तैः श्रावकैः स शिक्षितः प्रतिबुद्धः इति चतुर्थ निह्नवोदाहरणं अथ पञ्चम निह्नवोदाहरणं वीरात् द्विशताष्टाविंशतिवर्षेषु २२८ गतेषु उल्लका नदीतीरे एकस्मिन् खेटवनपुरे उल्लकातीताभिधानं वनमस्ति तत्र महागिरिशिष्योधन उल्लकातीत परत्र तीरे तिष्ठति तस्य शिष्यो गङ्गाचार्यः पूर्व तीरे तिष्ठति स स्वगुरुवन्दनार्थं परत्रतीरे जिगमिषुर्नद्या मुत्तरन् खल्वाटमस्तकत्वेन अधः शीतं उपरिचातप इति क्रिया द्वयं युगपदेवाऽनु भवन् जुगवन्नो नत्थि उवओगा इति भगवचनमन्यथामन्यमानो निह्नवोजातः आचार्यैर्बहु युक्तिभिर्बोधितोपि न मन्यते एकदा स राज गृहे वीरप्रभोद्यानेमणिनायकस्य यक्षभवने उत्तीर्णः तत्र व्याख्या नागतलोकानां पुरः क्रियाद्वयस्य युगपदऽनुभवो भवतीति स्वमतं प्ररूपयन् यक्षेणसुद्गर मुत्पाट्याको पञ्चदर्शयित्वा तर्जितः अरे मयाऽत्रैवसमवसृत वीरमुखाच्छ्रुतं बत् क्रियाद्वयस्यानु भवोयुगपन्न भवति समय सूक्ष्मत्वेन युगपदनुभवाभिमानो भ्रमएवेति त्वं विराद्व्यधिक एवेति यक्षेणैव स प्रतिबोधितः इति पञ्चमनिह्नवकथा ५ अथषष्ट निह्नवोदाहरणं कथ्यते वीरात्षञ्च शतचतुश्चत्वारिं शद्वर्षेषु गतेषु अन्तरञ्जिकापुर्यांभूत गृह चैत्यं तत्र श्रीगुप्तनामआचार्याः समवसृताः तद्वन्दनार्थं प्रत्यासन्नग्राम रोहगुप्तः शिष्यः समागच्छन् एकं उदरवद्ध लोहपट्ट जम्बूवृक्ष शाखाकरञ्च परिव्राजकं दृष्ट्वा पप्रच्छ किमिदमिति स प्राह ज्ञानेन ममोदरं स्फुटति तेनात्र लोह पट्टोवद्धोस्ति जम्बू द्वीपे च मत्तुल्यः कोपि नास्तीति जम्बू शाखा करे बद्धास्तीति परिव्राजकेन तदानीमेव पटहोवादितः नास्ति विश्वे कश्चित् यो मयासमं वादं करोतीतिरोह गुप्तेन कथितः अहंवादः करिष्यामीति वदतापटहोवारितः स परिव्राजक स्ततो राजद्वारेगतः रोहगुप्तस्तु गुरुसमीपे समायातः पटहच्चोभकरण वृत्तान्तः कथितः गुरवः ऊचुः वरं न कृतं स विविध विद्या बलवान् यदित्वं स्याद्वाद युक्तिभिस्तं वादे पराजेष्यति तदासौ कुविद्याभि स्तवोपद्रवं करिष्यति रोहगुप्तः प्राह गुरुभिस्तथा मम प्रसादः कार्यः यथा ममवादजयः

स्यादुपद्रवश्चचयः स्यात् गुरुभिस्तस्य मयूरौ न कुलो प्रमुखा विद्या दत्ता रजो हरणञ्चाभि मन्त्रा दत्तश्च यदा इमाभिस्तवतस्य पराभवो न तिष्ठति तदा तत् कुविद्याभिमुखमिदं रजोहरणं भ्रामणीयं गुरुं वन्दित्वा स राज सभायां गतः तत्र मिलितौवादि प्रतिवादितौ रोहगुप्तेनोक्तं बराकीयं परिव्राजकः किं जानाति पूर्वपक्षो मयास्यैवदत्तः यथेष्टमसौमे प्रश्नयतु परिव्राजकेन चिन्तितं असौ पूर्णविद्यावान् मया जे तु मयक्यस्ततोऽस्यैव सिद्धान्त पक्षमहं गृह्णामि नश्चसौ स्व सिद्धान्तपक्ष मुत्थापयिष्यतीति ममैव जयो भविष्यतीति विचिन्त्य परिव्राजकेनोक्तं अहं राशित्रयमरूपी कुर्वे जीव राशिरजीवराशिश्च पुण्यराशिः पापराशिश्चेत्यादि बुद्धिमतारोहगुप्तेन तदानीं जीवोऽजीवो नो जीवश्चेति राशित्रय मुक्तं जीवास्त्र सादयः अजीवा घटादयः नो जीवाग्रह कोकिलाच्छिन्नपुच्छास्ति यथाहि एकस्य दण्डस्य आदिमध्यं अग्रञ्चेति प्रकारत्रयं एवं सर्वत्रेत्यादि वचोभिः स परिव्राजको निर्लोठितो रोहगुप्तस्याभिमुखं वृश्चिकान्मुमोच रोहगुप्तस्तु मयूरान् असुचत् मयूरैस्तते सर्वे भक्षिताः ततः परिव्राजकः सर्पान् असुचत् रोहगुप्तस्तु नकुलान् मुमोच न कुलैस्तु निर्नाशिताः सर्पाः ततः स परिव्राजक उन्दरान्मुमोच रोहगुप्तस्तु मार्जारान् मुमोच मार्जारैस्तते भक्षिताः ततः परिव्राजकेन मृगामुक्ताः रोहगुप्तेन तु व्याघ्राः व्याघ्रैर्मृगा भक्षिताः ततः परिव्राजकेन शूकरामुक्ताः रोहगुप्तेन तु सिंहैः शूकराः भक्षिताः एवं परिव्राजकेन येये जीवामुक्तास्तत्रतिपक्षा रोहगुप्तेन मुक्तास्तैश्चते विनाशिताः अथात्यन्त खिन्नेन परिव्राजकेन गर्दभी मुक्ता रोहगुप्तेन सारजोहरणे नहता परिव्राजकस्यैवो परिविष्टां कृत्वागता ततः सपरिव्राजको राजादिभिर्हीलितो राजद्वाराद्गले गृहीत्वा बहिःकृतः अथ रोहगुप्तः परिव्राजकं जित्वा गुरुसमीपे समागतः सर्वं वाद स्वरूपं जगौ गुरुणोक्तं वरं कृतं परं त्वया साम्प्रतं राजसभायां गत्वा राशित्रय स्थापना विषयं मिथ्यादुः कृतं देयच्छिन शासने राशित्रयस्यैव व्यवस्थापनात् रोहगुप्तोऽवदत् मया तादृग्यायां राजसभायां गत्वा मिथ्या दुष्कृतं दत्वा स्व वचनमप्रमाणीकृ र्तुं मयकं गुरुणा उक्तं नात्रचपाकार्या अवश्यं

तत्र गत्वा मिथ्या दुष्कृतं देहि एवं वारं २ गुरुणायमुक्तः खिन्नः प्रकामं दृष्टो भूत्वाऽवदत् राशित्रयमेवास्ति नात्रकश्चिद्दोष स्ततो गुरुशिष्ययोरेव वादो लग्नः आचार्याः राजद्वारं गताः शिष्येण समं वादकं कर्तुमारे भिरे वादं कुर्वतोस्तयोः षण्मासागताः राज्ञा उक्तं मम राजकार्यं सीदन्ति भवतां वाद समाप्तिर्नजाता ततोयां तु स्वस्थाने भवन्तः गुरुभिरुक्तं कल्यदिवसे वादनिर्णयं करिष्यामि ततः प्रभाते राजादि जनपरिवृताः गुरवः कुत्रिकापणेसमागताः तद्दनिकं जगुः देहि जीवान् इति गुरुभिरुक्ते तेन कुमार कुमारी हस्ताख्यानेके जीवादर्शिताः देहि अजीवानिति गुरुभिरुक्ते तेन घट पटादयोऽर्था दर्शिता देहिनो जीवानिति गुरुभिरुक्ते कुत्रिका पण धनिकः प्राह न सन्ति लोकत्रयेनो जीवाः यल्लोकत्रये भवति तदेव कुत्रिकापणे भवति नान्यत् एवं ४४०० चतुःचत्वारिंशच्छतप्रश्नकरणे न निर्लोठितोरोहः गुप्तो निर्विषयीकृतः सगणान्निह्नव इति ज्ञात्वा निष्कासितः तेन वैशेषिकमतं प्रकटी कृतं षट्पदार्था स्तेनैव प्ररूपिता इति षष्ठो निह्नवः ६ अथ सप्तम निह्नवः वीरात्पञ्चशतचतुरशीति ५८४ वर्षेषु गतेषु दशपुरे इक्षुगृहोद्याने आर्यरक्षितसूरिः समागतः तस्य गोष्ठा माहिल १ फल्गुरक्षितः २ दुर्बलिका पुष्य ३ वैतिशिष्य त्रयं वर्तते इतश्च मथुरायां अक्रौयावादी उत्थितः तत्र प्रतिवादी कोपि नास्तीति तत्रत्य सङ्घेन आर्यरक्षितसूरेर्ज्ञापितं तैश्च तत्र गोष्ठामाहिलो वादलब्धिमानिति प्रेषितः तेन तत्र गत्वा राजसभायां स पराजितः मथुरायाश्चैव गोष्ठामाहिलो वर्षाचतुर्मासकं रक्षितः तावता दशपुरे श्रीआर्यरक्षितसूरिः स्वमरणमासन्नं ज्ञात्वा स्वपट्टस्थापनायामेव चिन्तयति बूढोगणहरसड्ढो गो अममाई हिं धीरपुरिसेहिं जोतं ठवेइ अप्पत्ते जाणंतो सो महापावो १ एवं चिन्तयित्वा सर्वोपि संघ आकारितः तस्याग्रे सूरिणा उक्तं अहं गोष्ठा माहिलं प्रति घृतघटसदृशो जातः यथा घृतघटात् घृतमपनीयते तदा बहवो घृतबिन्दवस्तत्र लग्नास्तिष्ठन्ति तथा मया यदा गोष्ठामाहिलः पाठितस्तदा मया स्वकोष्ठे बहवो विद्यांशा रक्षिताः फल्गुरक्षितं प्रति अहं तैलघटसदृशो जातः यथा तैलघटात्तैलमपनीयते तदा तत्र

तैलबिन्दवः श्लोका एव तिष्ठन्ति तथा मया यदा फल्गुरक्षितः पाठितस्तदास्य कोष्ठे मया घना विद्या चिप्ताः श्लोका एव रक्षिताः दुर्बलिका पुष्यं प्रति अहं निष्पाव घटसदृशो जातः यथा निष्पावघटात् निष्पावा अपनीयन्ते तदा नैकोपि तत्र तिष्ठति तथा यदा मया दुर्बलिका पुष्यः पाठित स्तदास्य कोष्ठे सर्वाः विद्याः क्षिप्ताः नैकापि विद्या रक्षितास्तीति आर्यरक्षितसूरिणा उक्ते सङ्घः प्राह भगवन् दुर्बलिका पुष्य एवाचार्यः क्रियतां तस्यैव सर्वविद्या ग्रहणेन योग्यत्वात् तदा सङ्घवचः श्रुत्वा आर्यरक्षितसूरिभिः स्वपट्टे दुर्बलिका पुष्यसूरिः कृतः उक्तं च दुर्बलिका पुष्यस्य गुरुणा वत्स यथाहं फल्गुरक्षित गोष्ठामाहिलादीनां लालनपालनविधौ प्रवृत्तस्तथा त्वयापि प्रवर्तितव्यं फल्गुरक्षितादीनामपि गुरुणा उक्तं यथा भवन्तो मल्लेवाविधौ प्रवृत्ता स्तथा दुर्बलिकापुष्यस्यापि प्रवर्त्तितव्यं अपिचाहं सेवाविधौ कृतेप्यकृतेपि न रोषं गतः असौ तु न क्षमिष्यतीति सम्यक् प्रवर्तितव्यं द्वयोपरि पक्षयोरिव मुक्ता न यनं कृत्वा श्रीआर्यरक्षितसूरिर्देवलोकं गतः गोष्ठामाहिलेन श्रुतं गुरोर्देवलोकं गमनं त्वरितं तत्र समायातः जनान् पृच्छति को गणधरः स्थापितः जनै स्तु घृतघटादि दृष्टांत प्रतिपादन पूर्वं दुर्बलिका पुष्यो गणधरः कृतइति प्रोक्तं गोष्ठामाहिलः पृथगुपाश्रये कियत्कालं स्थित्वा वस्त्रादिमुक्ता दुर्बलिका पुष्योपाश्रये समागतः सर्वैरपि साधुभिरभ्युत्थानं कृतं आचार्येणापिकथितः कथं पृथगुपाश्रये स्थिताः अत्रैव तिष्ठन्तु स नेच्छति आचार्योपाश्रयाद्विर्गत्य स्वोपाश्रये गतः अथ गोष्ठामाहिलः पृथक् स्थितस्तान् जनान् व्युद्ग्राहयति परं न कोपि तद्वच प्रतिपद्यते अन्यदा दुर्बलिका पुष्यसूरयोऽर्थपौरुषीं कुर्वन्ति सर्वे साधवः शृण्वन्ति साधुभिराकारितोपि गोष्ठा माहिलस्तत्र नायाति न शृणोति च यूयमेव निष्पाव घटसमीपेऽर्थपौरुषीं कृत्वाचार्येषूत्थितेषु विच्छंसो नाम शिष्योऽनुभाषते अष्टमे कर्मप्रवादे पूर्वे कर्मप्ररूप्यते तत्र जीवस्य कर्मणः कथं बंधः आचार्या भणंति बद्ध१ स्पृष्ट२ निकाचित३ भेदैरात्मकर्मणोर्बंधः तत्रात्मप्रदेशैः सह आमतन्तु वद्वसूचिकलाप वद्धकर्म्म भवति निकाचितन्तुतापि तत्र कुट्टित शुचिकलाप वद्भवति प्रथमं हि जीवो रागद्वेष परिणामैः

कर्म्मबध्नाति पश्चात्तत्परिणामं अमुञ्चन् तत्कर्म्मसृष्टं करोति तेनैवात्यन्त संक्लिष्ट परिणामेन निकाचितं निरुपक्रमं करोति तद्धि उदयगतमेव वेद्यते इति विज्ञं सेनामशिष्य कृत प्रश्नस्योत्तरं दुर्बलिका पुष्याचार्यैः कृतं आसन्नोपाश्रयस्थेन गोष्ठामाहिलेन श्रुतं तत्रैवस्थेन तेनोक्तं दृष्टमस्माभिः गुरोः समीपेन श्रुतं यदेवं कर्म्मबद्धं सृष्टं निकाचितं स्यात्तदामोक्षोनस्यात्तदविज्ञं सेनामशिष्यो वक्ति कथं तर्हि कर्म्मबद्धं सृष्टं निकाचितं भवति स आह यथा कञ्चुकः कञ्चुकि शरीरं स्पृशति तथा कर्म्म आत्मप्रदेशान् स्पृशति न पुनः क्षीर नीरन्यायेन तत्कर्म्म आत्मप्रदेशैस्साहबद्ध सृष्टनिकाचि तत्वभवनेन न क्षीर नीरव देकी भावमापद्यते तथात्वे हि कर्म्मव्युच्छेद एवनस्यादिति गोष्ठा माहिलवचः श्रुत्वा विंज्झशिष्यः प्राह भो गोष्ठामाहिल दुर्बलिका पुष्य आचार्याः पूर्वोक्तमेवादिशन्ति गोष्टामाहिलः प्राह इमं न जानन्ति पुनर्विज्झ शिष्यः सूरीन् प्रश्नयति सूरिभिरुक्तं गोष्टामाहिलोक्तं असत्यमेव यथाऽस्माभिरुक्तं श्रीगुरुभिरुक्तं तत्रदृष्टान्तः यथायः पिण्डेवह्निः सर्वात्मना सम्बन्ध्यते वियुज्यते च तथात्मप्रदेशैः सह कर्म्मसम्बन्ध्यते वियुज्यन्ते चेत्यादि दृष्टान्त युक्त्या दिभिर्बद्धसृष्टनिकाचित कर्मस्थापना कृता परं गोष्टा माहिलो न मनाते अनादा नवमे पूर्वे प्रत्याख्यानाधि कारं गुरवः साधूनामेवं पाठयति साहूणं जावज्जीवाए तिविहं तिविहेणं पाणा इवायं पच्चक्खामि एवं पच्चक्खाणं वव्विज्जइ इत्यादि आचार्येणोक्ते गोष्टा माहिलः प्राह जावज्जीवाएत्ति न वक्तव्यं एवमुक्ते प्रत्याख्यानस्य सावधिकत्वेन पर लोकाशंसा भवनेन भंगसम्भवात् प्रत्याख्यानं निरवधिकं कार्यं तथाहि सव्वं पाणा इवायं पच्चक्खामि अपरि माणाए तिविहं तिविहेणं एवं प्रत्याख्यानं कार्यं गोष्टामाहिलेनैवमुक्ते विज्झादिशिष्याः सूरीन् प्रश्नयन्ति सूरयः प्राहुः प्रत्याख्यानस्य कालावधिकत्वमवश्यं कार्यं अनाया मर्यादापत्याऽकार्यत्वमेव स्यात् परलोकाशंसा सम्भवेन भङ्गो नैव स्यात् जीवन्नहं सावद्यं न सेविष्ये मृतस्य तु अवश्यंभाविनी अविरतिरिति यथोक्तनिर्वाहित्वेन न प्रत्याख्यानभङ्गः एवं श्रीदुर्बलिका पुष्योक्तं सर्वैरप्यङ्गीकृतं अनेन फल्गुरक्षितादयः स्थविरा एवमेव भणंति गोष्टामाहिलस्तु सर्व्वमेते

न किञ्चिज्जानन्नत वदति स्वोक्तमेव तीर्थंकरोक्तमिति स्थापयति आचार्योक्तं स्थविरोक्तं च न मनुते तदा समस्तसङ्घेन शासनदेव्या कायोत्सर्गः कृतः सासमागता भणति किं दर्शयति सङ्घेनोक्तं व्रज श्रीसीमन्धरतीर्थं करपार्श्वे एवञ्च पृच्छ यद्गोष्ठा माहिलो भणति तत्सत्यं उतयद्दुर्बलिकापुष्पादयो भणंति तत्सत्यं सा भणति मम पुनः कायोत्सर्गबलं ददत सङ्घेन पुनः कायोत्सर्गः कृतः सागता भगवत्समीपे भगवान् पृष्टः सङ्घोक्तं भगवान् प्राह दुर्बलिका पुष्पादयः सम्यग्वादिनः गोष्ठा माहिलस्तु मिथ्यावादी निह्नवः सप्तम इति भगवदुक्तमाकर्ण्य आगताशासनदेवता भगवदुक्त माचख्यौ गोष्ठामाहिलः प्राह एषा अल्पर्द्धिका तत्र गन्तुमेव न शक्नोति तदा गोष्ठामाहिलस्य एकान्ते दुर्बलिका पुष्पाचार्यैरेवमुक्तं आर्यप्रतिपद्यस्व भगवदुक्तं अन्यथा सङ्घेन त्वं बहिःकरिष्यते स न प्रतिपद्यते तदा सङ्घेन सप्तमोयं निह्नव इति कृत्वा द्वादशविधसम्भोगाद्बहिःकृतः द्वादशविध सम्भोगश्चायं पञ्चकल्पे उक्तः १ सुअ २ भत्तपाणे ३ अंजलिपग्गहे ४ वायणायणिकाएअ ६ अब्भुट्ठाणे ७ किइ कम्मकरणे ८ वेयावच्च करणेइय ९ समो सरणे सन्निसेज्जा १० कहाएअ ११ निमंतणे१२ इति सप्तमो निह्नवः प्रतिपादितः ७ समाप्तेते देशनिह्नवादिनो निह्नवाः सम्प्रति प्रसङ्गत एव बहुतरविसम्वादी बोटिका उच्यन्ते कृच्छ्रास सएहिं नव्वुत्तरेहिं ६०९ तइया सिद्धिगयस्स वीरस्स तीवीडि आणदिट्ठी रहवीरपुरे समुप्पण्णा १ वीरात् षट्शत नव ६०९ वर्षे रथवीरपुरे दीपकोद्याने समव सृताः आर्य कृष्णाचार्याः तत्र नगरे एकः शिवभूतिनामा सहस्रमल्लो राज्ञः समीपे समागतः वक्ति तव सेवां करोमि राज्ञोक्तं परीक्षां कृत्वा तव सेवा वसरो दास्यते अन्यदा कृष्णचतुर्दश्यां राज्ञा सावाकारितः उक्तं गच्छ अस्यां रात्रौ श्मशाने इदं मद्यं अयं पशुः खण्डलिर्देयः तद्द्वयं गृहीत्वा स तत्र गतः अन्ये पुरुषास्तद्रापनार्थं प्रच्छन्नवृत्त्या पश्चात्प्रेषिताः सहस्रमल्लेन क्षुधार्त्तेन पशुं निहत्य तन्मांसं भक्षितं मद्यंच पीतं तैः पुरुषैः शिवा फेत्कारशब्दैर्भाषितो सन बिभेति पश्चादागत्य सहस्रमल्लेन राज्ञ उक्तं मया बलिर्दत्तः सेवकैरपि तद्वीरत्वमुक्तं राज्ञा स्वसेवायां रक्षितः अन्यदा राज्ञा मथुराग्रहणार्थं स्वसेवकाः

प्रेषिताः तैः समं सहस्रमल्लोपि प्रेषितः मार्गेगच्छद्भिस्तैः परस्परमुक्तं भो अस्माभिः सम्यग् राज्ञो न पृष्टं का मथुरा याह्या सहस्रमल्लेनोक्तं हेऽपि मथुरे याह्ये यत्र दुष्करं तत्राहं यास्यामि एवमुक्ता स गतः पांडुमथुरायां गृहीता च सा बलेन उक्तं च सूरेत्यागिनि विदुषि च वसति जनः स च जनाद् गुणी भवति गुणवति धनं धनाच्छ्रीः श्रीमत्या जायते राज्यं १ नगरीं गृहीत्वा स पश्चादायातः राज्ञा तुष्टेन भणितं भो तुष्टोहं मार्गय मनोभीष्टं ततस्तेनोक्तं मम देहि सर्वत्र स्वेच्छा भ्रमणं दत्तं च राज्ञा अथासौ निरंतरं स्वेच्छया सर्वत्र भ्रमन् रात्रौ मध्याह्ने अन्त्यप्रहरे वा समायाति कदाचिन्नायात्यपि स्वगृहे दिवसे यावत्स गृहे नायाति तावत्तस्य भार्या न भुङ्क्ते रात्रौ यावन्नायाति तावन्न स्वपिति अन्यदा सा प्रकामं खिन्ना श्वश्रू प्रत्याह मातस्त्वत्पुत्रोऽरात्रे कदाचिदायाति कदाचिदन्त्यप्रहरे समायाति कदाचिन्नायात्यपि दिवसेपि रात्रावपि चायमकाल एव समायाति अहं निद्रार्त्ता क्षुधार्त्ता च तिष्ठामि तदा श्वश्वा भणितं अद्य त्वया द्वारं दत्वा शेयं अहं जाग्रती स्थास्यामि तद्दिवसं रात्रौ तथैव कृतं स मध्यरात्रौ समायातः द्वारमुद्घाटयेत्युक्तवान् मात्रा भणितं यत्रास्यां वेलायां द्वाराणि उद्घातानि भवन्ति तत्र व्रज स रोषान्निर्गतः क्षणाचार्योपाश्रय एवोद्घाटितो दृष्टः मध्ये प्रविष्टः वन्दित्वा भणति मां प्रव्राजय आचार्या न इच्छन्ति तेन स्वयमेवलोचः कृतः ततस्तस्याचार्यैर्लिंगं दत्तं आचार्या स्तमादाय ततो विहृताः कालांतरेण तत्रैव पुनरायाताः राजा तद्वन्दनार्थमायातः गुरूननुज्ञाप्य सहस्रमल्लः स्वगृहे आकारितः तस्य स्वगृहागतस्य रत्नकम्बलं राज्ञा दत्तं सोपि गुरुसमीपे समायातः गुरुभिस्तद्रत्नकम्बलं अनापृच्छ्य गृहीतं ज्ञात्वा सहस्रमल्लो उपाश्रयाद्बहिर्गते सति रत्नकम्बलं खण्डयः कृत्वा यतीनां पादप्रोञ्छनानि कृत्वा दत्तानि स आगतस्तत्स्वरूपं ज्ञातं स कषाय एव स्थितः अन्यदा गुरुभिर्व्याख्यायां जिनकल्पिका वर्ण्यन्ते जिन कल्पिका द्विविधा पाणिपात्राः पतद्ग्रहधराश्च स प्रावरणा अप्रावरणाश्चेत्यादि जिनकल्पिकमार्गो वर्णितः सहस्रमल्लेन पृष्टं किमसौ मार्गः साम्प्रतं न क्रियते गुरुभिरुक्तं स मार्गः साम्प्रतं व्युच्छिन्नोऽस्ति

तेनोक्तं यदेष मार्गोऽनुष्ठीयते तदा नास्यास्य व्युच्छेदः परलोकार्थिना एष एव मार्गोऽनुष्ठेयः सर्वथा निपरिग्रहत्वमेव श्रेयः सूरिभिरुक्तं धर्मोपकरणमेवेति ननु परिग्रहस्तथाहि जन्तवो बहवः सन्ति दुर्दृश्या मांसचक्षुषां तेभ्यः स्मृतं दयार्थं तु रजोहरणधारणं १ आसने शयने स्थाने निषेदे ग्रहणे तथा गात्र संकुचने चेष्टे तेन पूर्वं प्रमार्जनं २ तथा सम्मातिमा सत्वाः सूक्ष्माश्च व्यापिनो परे तेषां रक्षानिमित्तं च विज्ञेया मुखवस्त्रिका ३ भवन्ति जन्तवो यस्माद्व्रपानेषु कुत्रचित् तस्मात्तेषां परीक्षार्थं पात्रग्रहणमिष्यते ४ अपरञ्च सम्यक्त्व ज्ञानशीलानि तपश्चेतीह सिद्धये तेषामुपग्रहार्थाय स्मृतं चीवरधारणम् ५ शीतवातातपैर्दंशै र्मशकैश्चापि खेदिताः मासम्यक्तादिषु ध्यानं न सम्यक् सम्विधास्यति ६ तस्य त्वग्रहणे यस्मात् क्षुद्रप्राणिविनाशनं ज्ञानध्यानोपघातोवा महान् दोषस्तदैवतु ७ य एतान् वर्ज्जयेद्दोषान् धर्मोपकरणाद्दते तस्य त्वग्रहणं युक्तं यस्माज्जिन इव प्रभुः ८ जिन कल्पिकस्तु प्रथमसंहननएव भवति इदानीं प्रथम संहननाभावाज्जिनकल्पिकमार्गोऽनुष्ठीयते इत्यादि युक्तिभिर्गुरुणा प्रतिबोधितोपि नासौ प्रतिबुद्धः प्रत्युतामर्षात् स्वप्रावरणं त्यक्त्वा एकाकी व वने गतः तस्योद्याने स्थितस्य उत्तरानाम भगिनीवन्दनार्थं गता तं तथाविधं दृष्ट्वा तयापि चीवराणि त्यक्तानि अन्यदा भ्रात्रा समं सा नगर्यां भिक्षार्थं प्रविष्टा आवासोपरिस्थया एकया गणिकया दृष्टा अस्मज्जाते लोको मा विरक्तो भवत्विति मत्वा तस्या उरसि शाटिका व्युत्सृष्टा सा नेच्छति भ्रात्रा उक्तं एषा देवतया दत्तेति भ्रातृवचसा तया शाटिका परिहिता अथ शिवभूतिना कौण्डिन्यः कोट्टवीरश्चेति शिष्यद्वयं प्रतिबोध्य दीक्षितं ततो बोटिकमतं मिथ्या दर्शनं प्रवृत्तं सुज्ञाने आर्जयं मग्गं बहवे परिभस्सई एतत्पदद्वयो परिसप्त निह्नवोदाहरणानि सुदुंच लद्धुं सद्धंच वीरियं पुणदुल्लहं

सुदुंच लद्धु सद्धंच वीरियं पुण दुल्लहं । बहवे रोयमाणावि नोयणं पडिवज्जए ॥१०॥ माणुसत्तंमि आयाओ जोधम्मं

श्रुतिं लब्धां श्रद्धापि जाता जीवे धर्मसांभल्यो सांभलो सद्दह्यो धर्मभलो वीर्यंच पुनर्दुर्लभं पणिवीर्य फोरववुं दोहिलुं जीवजांणे छे धर्मभलो पिणथाइ नहीं

सूत्र भाषा

बहवे रोयमाणावि नोअणं पडिवज्जए १० च पुनः श्रुतिलब्धा च पुनः श्रद्धां लब्धावीर्यं पुनर्दुर्लभं चारित्र पालनेबलस्फोरणं दुर्लभं बलं स्फोरण दुर्लभत्वे हेतुमाह यतो बहवो जनारोचमानाः अपि धर्मेरुचिं कुर्वाणा अपि एतत् वीर्यं प्रतिनो प्रतिपद्यन्ते वीर्यं नो अङ्गी कुर्वते श्रेणिकादिवत् १० माणु सत्तंमि आयाओ जी धम्मं सुच्च सद्दहे तवस्सीवीरियं लद्धुं संवुडे निद्धुणेरयं ११ मनुष्यत्वे आगतः सन्यः धर्मं श्रुत्वा श्रद्दधे स तपस्वीवीर्यं लब्धा संवृतः सन् निरुद्धाश्रवः सन् रजः कर्ममलं निर्धुनोति निश्चयेन धुनोति दूरीकरोति मुक्तिं प्राप्नोतीत्यर्थः ११ चतुरं ग्याइहैव फलमाह सोही उज्जूय भूयस्स धम्मोसुद्धस्स चिट्ठई निव्वाणं परमं जायइ घयसित्तिव्वपावए १२ ऋजु भूतस्य चतुरङ्गो प्राप्यमोक्ष गमनार्थं सरलीभूतस्य शुद्धिर्भवति कषायकालुष्य रहितः स्यात् शुद्धस्य कषाय कालुष्य रहितस्य धर्मस्तिष्ठति क्षमादि दशविधधर्मः स्थिरो भवति धरमशुक्लस्य परमं उत्कृष्टं निर्वाणं मोक्षो जायते स जीवन्मुक्तो भवतीत्यर्थः तपस्तेजसा जाज्वल्यमानो भवति कदवदृतसिक्तः पावकइव घृतेन हुतोग्निरिव १२ विगिंच कम्मुणोहेउं जसं संचिणु खंतिए पाढवं सरीरं हिच्चा उड्ढं परक्कमई

सूत्र

सोच्च सद्दहे। तवस्सी वीरियं लद्धु संवुडे निद्धुणेरयं ॥११॥ सोही उज्जुय भूयस्स धम्मो सुद्धस्स चिट्ठई। निव्वाणं परमं जाइ घयं सित्तव्व पावए ॥१२॥ विगिंच कम्मुणो हेउं जसं संचिणु खंतिए पाढवं सरीरं हिच्चा उड्ढं परक्कमई

भाषा

बहवः श्रद्दधानापि घणां जीवने धमरुचे छे धमभलो जाणे छे न पुनः एनं धर्मप्रतिपद्यन्ते पणि धर्मअङ्गीकार करे नहीं १० मानुषत्वे समागतो मनुष्यत्व पणुं पाम्यो मनुष्य हुओ यः जीवः धर्मं श्रुत्वा सद्दहणा करोतिधर्मसुणीने सद्दहणा करे तपस्वी वीर्यं लब्धा आपणो वीर्य तपजपने विषे फोरवे संवृतो निरुद्धा श्रवः कर्मरजं धुनोति तो संवृत होइ आश्रवद्वाररुंधे कर्मरजने फेडे दूरी करे ११ शोधि ऋजूभूतस्य मायाइं करीने रहित शुद्ध निर्मल होइ

खन्तिए सरीरं पाढवं हिच्चा उड्ढं परक्कमई दिसं १२ शिथं प्रति गुरुर्वदति हे साधोत्वं कर्म्मणोहेतुं मिथ्यात्वा विरति कषाय योगादिकं विगिच्च विवेन्धि विवेकं कुरु पृथक् कुरु पुनः खान्त्या क्षमया क्षत्वा यशः संयमं विनयं वासंचिनुसञ्चय: पुनरेवं कुर्वन् पार्थिवं शरीरं हित्वा उर्वदिशंमोक्षं प्रतिप्रक्रामति भवान् व्रजतित्वं प्रयासि इत्यर्थः पृथिव्याः भवं पार्थिवं पृथ्वी विकारं १३ विसालसेहिं सीलेहिं जक्खा उत्तर उत्तरा महासुक्कावदिप्पन्ता मन्नन्ता अपुणव्वयं इव साधवः विसदृशैः अत्युत्कृष्टैः शीलैः साधुव्रतैः यक्षाः देवाः उत्तरोत्तराः सौधर्मादिषु अच्युतान्तेषु तिष्टन्ति इति क्रिया सम्बन्धः कौटशास्ते देवाः महाशुक्राइव चन्द्रादित्यादय इव देदीप्यमानाः पुनस्ते किं कुर्वाणाः अपुनश्चवं मन्यमानाः अतिसौख्यभाक् तया अपुनर्मरणं मन्यमानाः १४ अप्पियादेव कामाणं कामरूवविउव्विणो उड्ढं कप्पेसु चिट्ठंन्ति पुव्वावास सया बहू १५ पुनः कौटशास्ते यक्षाः देवकामान् प्रतिपूर्वं भवाचीर्णैः व्रतैर्देव कामान् देवसौख्यानि प्रति अर्पिताः पुनः कौटशाः कामरूप विकुर्विणः कामरूपं स्वेच्छारूपं विकुर्वन्ति विरचयन्तीत्येवं शीलाः कामरूप विकु

दिसं ॥ १३॥ विसालसेहिं सीलेहिं जक्खा उत्तर उत्तरा । महासुक्काव दिप्पंता मन्नंता अपुणव्वयं ॥१४॥ अप्पियादेव

सूत्र

धर्मः शुद्धिप्राप्तस्य तिष्ठति शुद्धधर्मने विषे रहे छे निर्वाणं परमं उत्कृष्टं याति ते जीव शुद्ध निर्मल हुओ थको मुक्ति जाय घृतसिक्त इव पावक अग्नि घृते सींचो जीम दीपे निर्मल होवे तिम जीव कर्म रहित निर्मल होइ १२ प्रथक् कुरु कर्मणो हेतु कर्मनुहेतु दूरि करीने यशः पुष्टि कुरु क्षमाया क्षमाये करी यश उपार्ज्या छे मृण्मयं शरीरं त्यक्त्वा पार्थिव सप्तधातुमय औदारिक शरीर छांड़ीने उर्द्धं गच्छति दिसि उर्द्ध देवलोके जाई १३ विस्तीर्णैः शीलैः अनुष्ठान विशेषै विस्तीर्ण जे अनुष्ठान क्रीयाकलाप तप जपे करीने देवाः उत्तरउत्तराः देवता होइ एकएक थी अधिक चढ़ता विमान स्थानं क चन्द्रार्क इव दीप्यमानाः चन्द्रमा सूर्यनी परे दीपता तेजे विराजमान मन्यमाना अपुनः चवे इम नथी जाणता जे अम्हे इहां थी चवस्युं १४ अर्पिता ढौकिताः

भाषा

कुर्विणः अथ तत्र देवलोकेषु कथं यावत्तिष्ठन्ति बहूनि पूर्ववर्षशतानि यावत् तिष्ठन्ति बहूनि इति शब्देन असंख्येयानि वर्षशतानि यावदेव सुखानि भुञ्जन्ति पूर्ववर्ष शतायुषा मेव चरणयोग्यत्वे विशेषतो देशनौ चित्यज्ञापनार्थं मित्य मुपन्यासः बहुभिः पूर्वैर्जघन्येन एकं पल्योपमं भवति बहुभिर्वर्ष शतैः पूर्व बहुभिः पूर्वशतैः सागरोपमं भवति तावत्तिष्ठन्ति देवत्व मनु भवन्ति १५ तत्थ ठिचा जहाठाणं जक्खा आउक्खये चुआ उवेन्ति माणुसञ्जोणिं सेदसङ्गे भिजायए १६ तत्र देवलोकेषु यथास्थानं स्थित्वा यत्तादेवा आयुः क्षयेच्युताः सन्तो मानुषं योनिं उत्पद्यन्ते प्राप्नुवन्ति तत्र दसांगाः अभि जायन्ते अत्र प्राकृतत्वात् एकवचनं दशभिरंगैः सहवर्त्तन्ते इति सदशांगाः अथवा स इतिते इत्यर्थे दशं अङ्गानि येषान्ते दशाङ्गा इति पृथक् पदं एक वचनेन कश्चिन्नवाङ्गादिरपीति ज्ञापनार्थङ्गानि दशाङ्गानि १५ खेत्तं वत्थु हिरण्णञ्च पसवो दासपोरुसं चत्तारि कामखन्धाणि तत्थसे उववज्जई १७ ते

सूत्र

कामाणं काम रूव विउव्विणा। उड्ढं कप्पेसु चिट्ठंति पुव्वा वाससया बहू ॥१५॥ तत्थट्ठिच्चा जहाठाणं जक्खा आउ क्खए चुया। उवेंति माणुसं जोणिंसेदसं गेभि जायइ ॥१६॥ खेत्तं वत्थु हिरण्णंच पसवो दास पोरुसं। चत्तारि काम

भाषा

देवस्त्रीसम्बन्धनादीनां पराकृतदेवता सम्बन्धिया भोगपाम्या छे पाछिले पुण्ये आणीदीया छे स्वेच्छारूपकारिणः आपणी इच्छाइ करी नवा२ रूप करी सुख भोगवे उर्द्ध कल्पो परिवर्तिषु ग्रैवेयक विमानेषु उंचादेवलोक उपरि नवग्रैवेयक उपरे छे पूर्वाणि वर्षशतानि च बहूनि वर्षनां सैकडा घणावर्ष आउखूं भोगवे १५ तत्र स्थिता यथास्थानं तेहस्थानकने विषे रहीने देवाः आयुक्षये च्युत्वा देवता आपणा आउखा भोगवी पूरा करी चव्या देवलोक थकी प्राप्नुवन्ती मानुष्यभवां योनि तिहां थकी चवीने मनुष्यनी योनि पामे मनुष्य होइ सश्रवशेषं पुण्यकर्म च दशाङ्गेषु जायते शेष पुण्य रह्या छे वाकी थाके छे ते

देवा स्तत्र उत्पद्यन्ते तत्र कुत्र यत्र चत्वार एते कामस्कन्धाः भवन्ति तत्र कुत यत्र क्षेत्रं सम्यक् भवति १ यत्र हिरण्यं स्वर्णं २ रूप्यं वा ३ यत्र पशवो घोटक हस्त्यादयो दास पौरुषं चेटकचेटी पत्ति प्रमुखादिकं ४ चत्वार एते स्कन्धा वर्त्तन्ते कामा मनोज्ञ शब्दादयस्तेषां हेतवः स्कन्धा स्तत्पुद्गल समूहाः अनेन एकं अङ्ग उक्तं १७ मित्तवं नाइवं होइ उच्चागोए यवण्णवं अप्पायंके महापन्ने अभिजाए जसोबले १८ मित्राणि विद्यन्ते यस्य मित्रवान् १ ज्ञातिर्विद्यते यस्य स ज्ञातिवान् स्वजवान् २ पुनरुच्चैर्गोत्रं यस्य स उच्चैर्गोत्रः ३ पुनर्वर्णवान् शरीरे सद्वर्णं युक्तः ४ पुनरल्पातङ्कः अल्प आतङ्को यस्य स अल्पातङ्कः ५ पुनः कोष्ठगो महाप्राज्ञः महती प्रज्ञायस्य समहाप्राज्ञः महाबुद्धिः ६ अभिजातो विनीतः ७ पुनर्यशस्वी ८ पुनर्बली बलवान् ९ जशोबले इत्युभयत्र मत्वर्थीय लोपः अङ्ग नवकं इहोक्तं १८ भुञ्जा माणुस्साए भोए अप्पडिरूवे अहाउयं पुव्वं विसुद्ध सद्धम्मे केवलं

सूत्र

खंधाणि तत्थ से उववज्जई ॥१७॥ मित्तवं नायवं होइ उच्चा गोएय वण्णवं अप्पायंके महापन्ने अभिजाए जसो बले ॥१८॥ भोच्चा माणुस्साए भोए अप्पडिरूवे अहाउयं। पुव्वं विसुद्ध सद्धम्मे केवलंबोहि बुज्झिया ॥१९॥ चउरंगं

भाषा

भोगवा निमोक्त दशाङ्ग सहीत मनुष्य होवे १६ क्षेत्र गृहं रूप्यं नः ग्रामा रामादिश्चेतुकेतु भयात्मकं क्षेत्रं षेतं १ गृह २ रूप्य ३ पशुदासपदातयः पुरुषः त्वग्दृढत्वात् पशुदाससेवक पौरुषत्वचत्वारः कामस्कन्धाः स्यु एचार कामनां खंधजीहां होय तत्र सकुलेषु उत्पद्यते तीहां ते पुण्यात्मा जीव आवी उपजे १७ मीत्रवान् जातिमान् भवति मित्रजातिवंत होवे घणा पुरषमित्र करवा बांछे उच्चैर्गोत्रः वर्णवान् देहवर्णउंचा गोत्रहोइ शरीर वर्ण भला होइ अल्पातंके नीरोगः महाप्राज्ञाः रोगरहित हुवे ५ महाबुद्धीवंत होइ अभिजातो विनीतः यशस्वी बलवान् यशवंत होई ८ बलवंत होइ १० एदशबोल

बोहिबुज्झिया १८ चउरङ्गं दुल्लभं नच्चा संजमं पडिवज्जिया तवसा धुयकम्मं से सिद्धे हवइ सासएत्तिबेमि २० युग्मं तत्र स मनुष्यः अप्रतिरूपः सर्वोत् कृष्टरूपधारी सन् यथायुषं मनुष्यायुषं यावत् मनुष्यस्य भोगान् भुक्त्वा पुनर्यथावसरे केवलां निष्कलङ्कां बोधिं सम्यक्त्वं बुद्ध्वा प्राप्य पुनश्चतुरङ्गीं दुर्लभां ज्ञात्वा संयमं प्रतिपद्य शाश्वतः सिद्धो भवति कौटुम्बः स पुरुषः पूर्वं विशुद्ध सद्धर्मः पूर्वं पूर्वजन्मनि विशुद्धो निदानरहितः सद्धर्मो यस्य स विशुद्ध सद्धर्मः पुनः कौटुम्बः सः तपसा धुतकर्मांशः तपसा दूरीकृतकर्मलेशः इति सुधर्मा स्वामी जंबू स्वामिनं प्रत्याह हे जंबू अहं इति ब्रवीमीति २० इति श्रीमदुत्तराध्ययन सूत्रार्थदीपिकायां उपाध्याय श्रीलक्ष्मीकीर्त्तिगणि शिष्य लक्ष्मीवल्लभगणि विरचितायां तृतीयाध्ययनस्यार्थः समाप्तः ॥३॥ अथ तृतीयाध्ययने चतुरंगी

सूत्र

दुल्लहं नच्चा संजमं पडिवज्जिया । तवसा धुय कम्मं सेसिद्धे हवइ सासएत्तिबेमि ॥२०॥ चाउरंगिज्जं समत्तं ॥३॥

असंखयं जीविय मा पमायए जरोवणीयस्स हु नत्थि ताणं । एवं वियाणाहि जणे पमत्ते कण्णुवि हिंसा अजया

भाषा

पामे २८ भुक्त्वा मानुषकान् भोगान् मनुष्यसम्बन्धिया भोग भोगवीने उपमारहितान् यथायुः जाव जीवं उपमाइं रहित एहवा मनुष्यना सुख जावजीव भोगवीने पूर्वजन्मनि निर्मले प्रशस्त धर्मपाखला भवांतरने विषे जे चारित्रपाख्यां हता ते चारीत्रवलीअङ्गीकार करे सम्यक्त्वं बुद्धा प्राप्य केवली भाखो धर्मसम्यक्त्व सहित लेई प्रति बूझे १८ चतुरङ्गं दुर्लभं ज्ञात्वा चार अंगधर्मनां दोहिलां जाणीने चारित्रं प्रतिपद्यन्ते चारित्र पडिवजे दिख्यालिइं तपसा क्षोटित कर्मभागः बारे भेदे तप करीने कर्मरजने धूणे दूरि करे सिद्धो भवति साश्वतः सिद्धि होइ साश्वतो इति समाप्तो ब्रवीमि २० इति श्रीचतुरंगी

दुर्लभोक्ता चतुर्थाध्ययने तां प्राप्य प्रमादस्त्याज्य इत्युच्यते । इति तृतीयचतुर्थाध्ययनयोः सम्बन्धः । असंखयं जीवियमापमायए जरो विणीयस्सइनत्थि ताणं एयं वियाणाहि जणे पमत्ते कयविहिंसा अजयागहिंति १ हे भव्या जीवितं आयुः असंस्कृतं वर्त्तते यत्नशतैरपि असतो वर्द्धयितुं त्रुटितस्य वा कर्णवत्सन्धानं कर्त्तुं अशक्यत्वात् जीवितं हि केनापि प्रकारेण सन्धातुं न शक्यते इत्यर्थः ततः मा प्रमादीः मा प्रमादं कृथा इदृति निश्चयेन जरया उप नीतो जरोपनीतः तस्य हृद्यत्वेन मरणसमीपं प्रापितस्य पुरुषस्य त्राणं शरणं नास्ति हे भव्य पुनरेवं विशेषेण जानीहि एवमिति किंविहिंसाः विहंसन शीलाः अति शयेन पापाः कं शरणं गृहीष्यन्ति तु इति वितर्के क्रौड्या विहिंसाः अजिताः अजितेन्द्रियाः पुनः क्रौड्याः प्रमत्ताः प्रमादिनः इंन्द्रियवश वर्त्तिनां प्रमादिनां पापानां जरामरणाद्युपद्रवे कश्चित् शरणो नास्ति जणे पमत्ते इति प्रथमा बहुवचनस्थाने प्राकृतत्वात्सप्तम्येकवचनं १ जे यावकम्मेहिं

सूत्र

गहिंति ॥१॥ जे पाव कम्मेहिंधणं मणूसा समाययंती अमयं गहाय पहायते पास पयट्टिए नरे वेराणुबद्धा नरयं

भाषा

अध्ययनं टव्वार्थं गद्यबंधे संपूर्णम् ३ असंस्कृतं जीवितं माप्रमादी प्रमादं मा कार्षी ए आउखुं असंस्कृत छे त्रूटो थको संध्यो न जाइ ते भणी जीवप्रमाद न करे जरोपनीतस्य त्राणं शरणं नास्ति जराजीवने आव्या पछे बढा हुआ उठी वेसी सके नहीं तिवारे सरण एहने कोइ नथी इत्येवं प्रकारं जानाहि प्रमादवंत लोका इम जाणीने अहोलोको प्रमाद छांडो विहंसन शीला असंयताः किंशरणं गच्छन्ति एतले हिंसा करो छो जीव मारो छो इन्द्री आपणा वसि नहो१ जे पाप कर्मभीः धनं मनुष्याः जेमनुष्या जेमनुष्यपापकरीधन उपार्जे छे समां ददत्येवं कुमतिं गृहीत्वा सम्यक् प्रकारे आदरी धनएकठु करो छो ते तुम्हने कोण कुमति लागी ते कुबधे करी त्यक्ता ते नराः पापयुक्ताः ते मनुष्य सर्वधन छांडीने ते मनुष्य किस्या छे पास करी बांध्या छे पास किस्या स्त्रीधन बेटाबेटी घर प्रमुख पासे करीज कह्या छे पाप कर्मानुबद्धा थाता नरकेषु यांति ते मनुष्य घणाओ पाप करीने घणा जीवसुं वयर उपार्जी

धणं मणूसा समाययन्ती अमइं गहाय पहाय ते पासपयट्ठिए नरे वेराणुबद्धा नरयं उविंति २ जे इति मनुष्याः पापकर्मभिधनं अर्जयन्ति ते मनुष्याः वैरानुबद्धाः पूर्वोपार्जितद्वेषबंधन बद्धाः नरकं व्रजन्ति किं कृत्वा धनं उपार्जयंति अमतिं गृहीत्वा न मतिः अमतिस्तां अमतिं कुमतिं अङ्गीकृत्य अथवा अमृतं आनन्दं आनन्दहेतुं गृहीत्वा ऐहिकसुखहेतुकं धनं विचार्य किं कृत्वा नरकं व्रजन्ति पापकर्मभिरुपार्जितं धनं प्रहाय त्यक्त्वा कीदृशास्ते मनुष्याः पाशप्रवर्त्तिताः पाशेषु पुत्रकलत्र धनप्रमुखबन्धनेषु प्रवर्त्तिताः पाशप्रवर्त्तिताः धनं हि नरके व्रजतो जीवस्य सार्धं नायाति एकाकी एवमहारम्भ महा परिग्रहवशात् नरकं यान्तीत्यर्थः जरोवणीयस्य हुनत्थिताणं अत्र कथा उज्जयिन्यां जितशत्रु नृपस्य अट्टणमल्लो वर्त्तते सच प्रतिवर्षं सो पारके गत्वा सिंह गिरिराज्ञः सभायां मल्लान् विजित्य जयपताकां लाति अन्यदा राज्ञा एवं चिन्तितं पर देशेाय मट्टणमल्लोमल्लभायां जित्वा बहुद्रव्यं प्राप्नोति मदीयः कोपि मल्लो न जीयते नैतद्वरं एवं हि ममैव महत्व क्षितिर्जायते इति मत्वा कश्चिद्बलवन्तं मल्लिनरं दृष्ट्वा स्वमल्लं चकार तस्य त्वरितमेव मल्लविद्याः समायाताः मल्ली मल्ल इति नाम कृतं अन्यदा अट्टणमल्लः सो पारके समायातस्तेन समं राज्ञा मल्ली मल्लस्य युद्धं कारितं जितो मल्लीमल्लः अट्टणः परा जितः स्वनगरे गतः एवं चिन्तयति मल्लोमल्लस्य तारुण्येन बलवृद्धिः मम तु वार्द्धक्येन बलहानिः ततोऽन्यं स्वपक्षपातिनं मल्लं करोमि ततोसौ बलवन्तं पुरुषं विलोकयन् भृगुकच्छदेशे समागतः तत्र हरिणीयामे एकः कर्षकः एकेन करेण हलं वाहयन् द्वितीयेन फलहीयमुत्पाटयन् दृष्टः स भोजनाय स्वस्थानके सार्धं नीतः तस्य बहुभोजनं दृष्टं उत्सर्गसमये च सुदृढ़मल्लं पुरीषं दृष्ट्वा मल्लविद्या ग्राहिता फलही मल्ल इति नाम कृतं अट्टणः सो पारके फल ही मल्लं गृहीत्वा गतः राज्ञा मल्लीमल्लेन समं फलहीमल्लस्य युद्धं कारितं प्रथमे दिवसे द्वयोः समतैव जाता अट्टणेन स्वोत्तारके फलहीमल्लः पृष्टः पुत्र तवाङ्गे क प्रहारा लग्नास्तेन स्वाङ्गप्रहारस्थानानि दर्शितानि अट्टणेन औषधिरसेन तानि स्थानानि तथा मर्दितानि अथासौ पुनर्नवीभूतः मल्लीमल्लस्यापि राज्ञा

पृष्टं क्व तवाङ्गे प्रहारा लग्ना स्तथा तं दर्शयः फलहीमल्लः पुनर्नवीभूतः श्रूयते मल्लीमल्लोऽभिमानात् स स्वस्थानं न दर्शयति वक्ति च अहं पुनर्नवीभूतः फलही पितरं जयामि द्वितीयदिवसे पुनः युद्धावसरे द्वयोरपि साम्यमेव जातं तृतीयदिवसे मल्लीमल्लो जितः फलही मल्लेन अट्टणेन स्वपराभवः स्मारितः ततो मल्लिमल्लेनान्याययुद्धाचरणेन फलहीमल्लस्य मस्तकं छिन्नं खिन्नोट्टणमल्लो गत उज्जयिनीं तत्र विमुक्तयुद्धव्यापारः स्वगृहे तिष्ठति परं जराक्रान्त इति न कस्मैचित् कार्याय चम इति स्वजनैः पराभूयते अन्यदा स्वजनाऽपमानं दृष्ट्वा तदनापृच्छ्यैव कोशाम्बीं नगरीं गतः तत्र वर्षमेकं यावद्रसायनं भक्षितवान् ततोऽत्यन्तं बलवान् जातः उज्जयिन्यां राजपर्षदि मल्लमहे प्रवर्त्तमाने पुनर्नवागतयौवनेन अट्टणमल्लेन समागत्य राज्ञो नीरङ्गण नाम महामल्लो जितः राज्ञा तु मदीयो यं मल्ल आगन्तुकेनानेन मल्लेन जित इति कृत्वा न प्रशंसितः लोकोपि राजप्रशंसामन्तरेण मौनभाक् जातः अट्टणस्तु स्वस्वरूपज्ञापनाय सभापक्षिणः प्रत्याह भो भो पक्षिणो ब्रुवन्तु अट्टणेन नीरङ्गणो जितः ततो राज्ञा उपलक्षितो मदीय एवायं अट्टणमल्ल इति कृत्वा सत्कृतः बहुद्रव्यं चास्मै राज्ञा दत्तं स्वजनैस्तं तथाभूतं श्रुत्वा सम्मुखमागत्य मिलितः सत्कारादि चकार अट्टणेन चिन्तितं द्रव्यलोभादेते मम साम्प्रतं सत्कारं कुर्वन्ति पश्चाद्रिद्रव्यमामपमानयिष्यति जरापरिगतस्य मे न कश्चित् त्राणाय भविष्यति यावदहं सावधान बलोस्मि तावत्प्रव्रज्यामीति विचार्य गुरोः समीपे अट्टणेन

सूत्र

उवेंति ।२। तेणे जहा संधि मुहे गहीए स कम्मुणा किच्चइ पावकारी । एवं पया पेच्च इहंच लोए कडाण कम्मा

भाषा

नरगने वीषे जाइ२ चोरः यथा क्षात्रमुखे गृहीतः जिम चोर खात्र पाडे माहे पेसतां धणीइं झाल्यो स्वकर्मना कृतं ते पापकारी आपणें कर्मे करी पाप नो करणहार चोरकृत्य ते कदर्थे मारीइ इम हे प्रजाः हे लोकः विलोकयध्वं एवं इहलोके परलोके अहोलोको देखो तुम्हें इणें चोरनें दृष्टान्तें इह लोकनें विषे जीव कदर्थी इहें कृतानां कर्मणां मोक्षं नास्ति इणें जीवें जे कर्म कीधोछे ते कर्मविणमो गयां छुटे नहीं २ संसार मापन्नः प्राप्तः परस्परं

दीचा गृहीता इति जरोवणी अस्मनदुस्थिताणं अत्र अट्टणमल्लकथा समाप्ता तेणे जहा संधिमुहे गहीए सकम्मुणा किच्चइ पावकारी एवं पया पेच्च इहं च लोए कडाण कम्माण न मुक्ख अत्थि ३ यथास्तेन चौरः सन्धिमुखे खात द्वारे गृहीतः स्वकर्मणा स्वकीय कृत खात चातुर्येण कृत्वा कृत्यते शरीरे च्छिद्यते काष्ठफलके कपि शौर्षाकार उत्कीर्ण खात संकीर्ण द्वारेण शरीरे विदार्यते इत्यर्थः कौदृशः चौरः पापकारी अत्र दृष्टान्तः कश्चिन्नगरे कस्य चिद्यवहारिणः फल कचिते गृहे केन चिच्चौरेण प्रकारकपि शौर्षाकृति छात्रं दत्तं तत्र प्रविशान्तः स्थ जागरूक गृहस्वामिना बहिः स्थ चौरेण चाकृष्यमाणो विलपन्नेव मृतः एवं अमुना दृष्टान्तेन प्रजालोकः प्रेत्य परलोके च पुनः इह इहलोके कृत्यते पीड्यते इत्यर्थः इहलोके च धनार्जनार्थं क्षुत् तृषा सीता तपसहन पर्वतारोहण जलधितरण नृपसेवन संग्रामे प्रहार सहनादि क्लेशेन परभवे च विविध नरकचेत्र वेदना परमाधार्मिक विनर्मित व्यथया कृत्यते इत्यर्थः कथं हि परलोके पीड्यते तत्र हेतुमाह कृतानां उपार्जितानां कर्मणां मोक्षो नास्ति ३ अत्र पुनश्चौरकथा कापि ग्रामे कोपि चौरो दुरारोहे मन्दिरे छात्रं दत्वा द्रव्यं लात्वा स्वगृहं गतः प्रत्यूषेकः किं वदन्तीति वार्त्ता श्रवणाय छात्रासन्न लोकमध्ये गतः लोकास्तु तत्र इत्थं वदन्ति कथमत्र लघीयसि छात्रे चौरः प्रविष्टो निर्गतोवेतिलोक वाक्यं श्रुत्वा स्वकटी बिलोकयन् भूप नरेर्धृतो व्यापादितश्च ३

सूत्र

ण न मोक्ख अत्थि ।३। संसार मावण्ण परस्स अट्ठा साहारणं जंच करेइ कम्म कम्मस्स ते तस्स उवेइ काले न बंध

भाषा

पुत्र कलत्रादि अर्थे संसार माहें फिरतुए जीव साधारण कर्म उपार्जे बाप बेटा स्त्री बेटी एहनें अर्थे वंचक द्रोह करेके पापे करी धन खावे सर्व कुटंब खाइके साधारणं यत्करोति कर्म पराइं अर्थे साधारणं कर्म करेके कर्मण ते तस्य कर्मफल विपाक समये जीवारे ते कर्म उदय आवे तिवारे न वांध वा वांधवतां प्राप्नुवंति ते बांधव बांधवपणं पाले नही अलगा जाइ उभा रहे एजीव आपणी कमाइ एकलो भोगवे४ द्रव्येणत्राणं न लभेत् प्रमादी

संसार मावन्न परस्य अट्ठा साहारणञ्चत्र करेइ कम्मं कम्मसते तस्सउवेयकाले न बन्धवा बन्धवयं उविन्ति ४ संसारं समापन्नः संसारी जीवः परस्य प्रमादी अर्थं परार्थं परनिमित्तं पुत्र मित्र कलत्र स्वबान्धवाद्यर्थं यत्साधारणं उभयार्थं आत्म परनिमित्तं यत्कर्म करोति ते मित्र पुत्र कलत्रादयः स्वबान्धवास्तस्य पापकर्मकारिणः पुरुषस्य तस्य पापकर्म फलवेदकाले विपाककाले बान्धवतां दुखवंटन भावं न उपयान्ति ४ अत्र आभीरीवञ्चक कथा क्वापि ग्रामे कोपि वणिक् हट्टे क्रयविक्रयं करोति अन्यदा एका आभीरीतद्धट्टे आगता तया भणितं भो रूपकद्वयस्य मेहतन्देहि तेनोक्तं अर्पयामि अर्पितं तया रूपकद्वयं तेन वणिजा एकस्यैव रूपकस्य घृतं वारद्वयन्तो लयित्वा अर्पितं सा जानाति ममरूपकद्वयस्य घृतं दत्तं वञ्चिता च सातस्याङ्गतायां सचिन्तयति एष रूपको मया सुधालब्धः ततोहमेव उपभुञ्जामि तस्य रूपकस्य घृतखण्डादि लात्वा स्वगृहे विसर्जितं भार्यायाः कथापितं अद्य घृतपूरा कुर्य्यात् तया घृतपूराः कृता तावता तद्गृहे समित्रो जामाता समायातः तस्यैव तया घृत पूराः परिवेषिताः समित्रेण तेन भक्षिताः गतः समित्रो जामाता वणिक् गृहे समायातः स्नानं कृत्वा भोजनार्थं सुपविष्टः तया स्वाभाविकमेव भोजनं परिवेषितं वणिग् वदति कथं न कृता घृतपूराः तया उक्तं कृताः परमागन्तुकेन स मित्रेण जामाता भक्षिताः स चिन्तयति मया सावराधी अभीरी वञ्चिता परार्थ मेवाय मात्मा पापेन संयोजितः एवं चिन्तयन्नेवासौ शरीर चिन्तार्थं बहिर्गतः तदानीं शीघ्रोवर्त्तते स मध्याह्नवेलायां कृत शरीरचिन्ता एकस्य वृक्षस्याधस्तात् विश्रामार्थं सुपविष्टः तेन मार्गेण गच्छन्तं साधुं दृष्टवान् वणिगुवाच भो साधो विश्राम्यतां साधुनोक्तं शीघ्रं मया स्वकार्यं गन्तव्यं वणिजा उक्तं भगवान् कोपि परकार्यं गच्छति साधुः प्राह यथा त्वं स्वजनार्थं क्लिश्यसि अनेन एकेनैव वचने सबुद्धः प्राह भगवन् यूयंक तिष्ठथ साधुना भणितं उद्याने स साधुना समं तद्गतः तन्मुखाद्धर्मं माकर्ण्य भणति भगवन्नहं प्रव्रजिष्यामि नवरं स्वजनमापृच्छामि गतो निजगृहे बान्ध

वान् भार्यांश्च भणति अत्रापणे व्यवहरतो मम तुच्छलाभोस्ति देशान्तरं यास्यामि सार्थं वाहदय मत्राया तमस्ति एकः सार्थवाहो मूलद्रव्यं अर्पयति इष्टपुरं नयति न च लाभं गृह्णति द्वितो मूलद्रव्य मर्पयति सह गमनात् लाभञ्च गृह्णाति तत्कीन सहगमनं युज्यते तैरुक्तं प्रथमेन सहव्रज अथ स वणिक् स्वजनैः समं वने गत्वा उवाच अयं मुनिः परलोक सार्थवाहः स्वकीय मूलद्रव्येण व्यवहारङ्कारयति मोक्षपुरञ्च नयतीति दृष्टान्त दर्शन पूर्वकं स्वजनाना पृच्छत् स वणिक् तस्य गुरोः समीपे दीक्षां जग्राहेति वित्तेण ताणं न लभे पमत्ते इमं मिलोए अदुवा परत्थ दीवप्पणट्ठेव अणंतमोहे ने आउ अन्दट्ठु मदट्ठुमेव ५ प्रमत्तः प्रमादी मनुष्यः वित्तेन द्रव्येण कृत्वा इमं मिलोए अस्मिन् लोके अथवा परलोकेत्राणं स्वकृतकर्मतो रक्षणं न लभेत न प्राप्नुयात् वेश्या गृहस्थ पुरोहित पुत्रवत् कस्मिंश्चिन्नगरे कोपि राजा इन्द्र महोत्सवेसान्तः पुरो निर्गच्छन् निर्घोषं कारयामास सर्वे पुरुषा नगराद्वहिरायां तुयोत्रस्थास्यति तस्य महादण्डो भविष्यति तत्र राजवल्लभः पुरोहित पुत्रो वेश्यागृहे प्रविष्टो राजपुरुषघोषणां श्रुत्वापि ततो न निर्गतः राजपुरुषैर्गृहीतोप्यसौ राजवल्लभत्वेन दर्पं कुर्वन्नतेभ्यः किञ्चिद्दत्वा तैस्तु राजसमीपेनीतः राज्ञा तु आज्ञाभञ्जकत्वेनास्य शूलादण्डः कथितः पुरोहितेन तत्पित्रा सर्वस्व मद्दं दद्दामीत्यक्तं तथापि राज्ञानायं मुक्तः शूलायामारोपित एवेति दीप प्रणष्टः प्रणष्टदीपः पुरुषो भावोद्योत रहितः

सूत्र

वावंधवयं उवेंति । ४। वित्तेणताणं नलभे पमत्ते इमम्मिलोए अदुवापरत्था । दीवप्पणट्ठेव अणंतमोहेनेयाउयं दट्ठुम

भाषा

जीवने लक्ष्मी पणिराखें नही प्रमादी जीवजाणें जिवारे कर्म उदय आवसे तिवारे लक्ष्मी देईने राखी स अस्मीन् लोके अथवा परलोके इहलोकने विषे अथवा परलोकने विषे राखी न सके जीवने यथा सम्यक्त रूप प्रदीपे प्रनष्टे अनन्त मोहनीयकर्माधिकारे जिमकोइक पुरुष हाथ मांहिंदी वीले इने रसकुपिका लेवाने अर्थे पेठादीवो गये मार्ग न दीसे ज्ञान दर्शन चारित्रात्मकं मुक्तिमार्गं दृष्ट्वापि अदृष्टमेव स्यात् तिम जीव मुक्तमार्ग दीठो छेपणि

पुरुषः यथानैयायिकं सम्यक् दर्शनादि तत्त्वं दृष्टाऽदृष्टादव करोति कौदृशः प्रणष्टदीपः पुरुषः अनन्तमोहः अनन्तोऽविनासी मोहो दर्शनावरण मोहनी यात्मको यस्य स अनन्तमोहः एतादृशः अग्यानी इत्यर्थः अत्र प्राकृतत्वात् षष्ठार्थे प्रथमापि प्रणष्ट दीपस्य प्रणष्ट सम्यक्तस्य अनंतमोहस्य उदिता मिथात्वस्य नैयायिकं सम्यग्दर्शन तत्वं लब्धामिव स्यात् प्राप्तं सम्यक्तं अप्राप्तमिव स्यात् तद्दर्शनफलस्याभावात् लब्धस्य सम्यक्तस्य हानितः अलब्धमेव न केवलं प्रमादी पुमान् वित्तं न त्राणं न लभेत किंतु प्रमादी त्राणकारणं नरकादिभयनिवारणहेतु मम्यक् ज्ञानादिरत्न त्रयमपि हन्ति इत्यर्थः अत्र खनिप्रविष्ट धातुर्वादी पुरुषो यथा प्रणष्टदीपो जातः तस्य दृष्टपूर्वोपि मार्गोऽदृष्टवत् जातः अत्र तत्कथा केचिद्धातुर्वादिनः सदीपाः सैंधवाः बिलं प्रविष्टा तत्रमादादीपे विध्याते महातमो मोहिताः इतस्ततो भ्रमन्तः प्रचण्डेन विषधरेण दष्टा गर्त्तायां पतिता मृताः एवं प्राप्त सम्यक्ता अपि जीवा महामोह वशात् पुनर्मिथात्वं गच्छन्तीति परमार्थः ५ सुत्ते सयावीपडिबुद्धजीवी न वीससे पंडिय आसुपन्ने घोरा मुहुत्ता अबलं सरीरं भारंडपक्खीवचरेपमत्ते ६ प्रतिबुद्धजीवी अनिद्रो अप्रमादी पुमान् अन्येषु सुप्तेष्वपि अविवेकिनरेषु निद्रायुक्तेषु सत्स्वपि न विश्वसेत् विश्वासं नैव

सूत्र

दट्ठुमेव ।५। सुत्ते सुयावी पडिबुद्ध जीवी नवीससे पंडिय आसु पन्ने । घोरा मुहुत्ता अबलं सरीरं भारंड पक्खी

भाषा

मोहनीय कर्मने वसे दीठो अणदीठो होय जाय५ सुप्तेष्वपि अविवेकी द्रव्यतो भावतोऽविद्वान् मूर्खलोक द्रव्यनिद्राइं भाव निद्राइं सूता छे अने पडिते द्रव्य निद्राभाव निद्रा छोडीने जाय छे पण्डितो न विश्वसेत् सीघ्रप्रज्ञः तीक्ष्णप्रज्ञाजूक्तः पण्डितसाधुविश्वास न करे प्रज्ञावन्त तीक्ष्णबुद्धिनो धणी रौद्राः मूहूर्त्ताः अबल मृत्युदायकं शरीरं घोर मूहूर्त्तरौद्र मुहूर्त्त जाय छे शरीर अबल दुर्बल छे मृत्युदायि मुहूर्त्तान् ज्ञात्वा अप्रमत्त सन् भारण्ड भारण्डपक्षिवत् अप्रमत्त चरेत् इम जाणीने भारंड पंखीनी परे अप्रमत थको वीचरे ६ चरेत् धर्मपदानि परिसंकमानः सन् पापथकी संकतो चाले संजम विराधे नही यत्

कुर्यात् कीदृशः स आशुप्राज्ञः तत्कालयोगा बुद्धिमान् आशु शीघ्रं कार्याकार्येषु प्रवृत्तिनिवृत्तिरूपा प्रज्ञा मतिर्यस्य आशुप्राज्ञः यतो मुहूर्त्ताः कालविशेषा घोराः प्राणापहारित्वात् रौद्राः शरीरं अबलं बलरहितं भवति मृत्युदायिमुहूर्त्तान् ज्ञात्वा अप्रमत्तः सन् भारण्ड पक्षीवचरः एकोदराः पृथग्ग्रीवाः अन्योन्यफलभक्षिणः प्रमादात्ते विनश्यन्ति यथा भारण्डपक्षिणः १ हे साधो तथा तवापि प्रमादात् संयमजीवितस्य भ्रंशो भविष्यति अत्र अगडदत्त राजपुत्र कथा उज्जयिन्यां जितशत्रु राज्ञोऽमोघरथो नाम रथिकोस्ति तस्य यशोमती नाम भार्यास्ति तयोः पुत्रोऽगडदत्तो नाम वर्त्तते अन्यदा तस्य बालभावेपि पिता मृतः सो अभीक्ष्णं रुदन्तो मातरं दृष्ट्वा पृच्छति मातर्वारं२ किं रोदिषि सा प्राह तव पितुः पदं विभूतिं चएषोऽमोघ प्रहारी रथिको भुंक्ते त्वं कलास्वकुसलस्तेन तव हस्ते पितुः पदं विभूतिश्च नायातेत्यहमत्यन्तं खिन्ना निरन्तरं रोदिमि बालेन भणितं सकोप्यस्ति यो मम कलाः शिक्षयति माता प्राह अस्ति कौशांब्यां दृढ़प्रहारी नामा कलाचार्यस्तत्र त्वामवश्यं कलाकुशलं करिष्यति अगड़दत्तो गतः कौशांब्यां दृष्टो दृढप्रहारी कलाचार्यः कथितं तेन तस्य मातुःखेदकारणं कलाचार्येण पुत्तइवासौ स्वपार्श्वे रक्षितः स्तोक कालेनैव कलासु कुशलः कृतः अन्यदा राजकुलेप्रेषितः तेन सभायां दर्शिताः कलाः चमत्कृतः सकलो लोकः पुनः पुनः साधुवादं अवदत् राजा तु नास्ति किञ्चिदाश्चर्यमिति वदन्न किञ्चिदधिकमुवाच उचिताचारपालना येदं पुनरुवाच कुमार तुभ्यं किञ्च ददामि कुमार आह राजंस्त्वं साधुकारमपि न दत्से किमन्येन दानेनेति अस्मिन्नेवावसरे राजा पौरैरेवं विज्ञप्तः राजन् भवत्पुरे अश्रुतपूर्वं चौरेण द्रव्यापहरणं वारं वारं क्रियमाणमस्ति एवञ्च राजलज्जा न तिष्ठति ततो नगररक्षायत्नः क्रियतां तदैव राज्ञा तलारक्षः आज्ञप्तः सप्ताहो रात्रिमध्ये यथा चौरो गृह्यते तथा कर्त्तव्यं तदानीं तत्रस्थोऽगडदत्तः प्राह राजन्नहं सप्ताहोरात्रिमध्ये चौरं तव चरणमूलमुपनेष्यामि राज्ञा तद्वचोङ्गीकृतं एवं कुर्व्विति वारं२ उक्तं ततो हृष्टोऽगडदत्तो राजकुलान्निर्गत्य चिन्तयति दुष्टपुरुषास्तस्कराश्च प्रायः पानीयस्थाने नानाविध

लिङ्गधारिणो भ्रमतीत्यहं तच्छ्रुत्वये तटाकोपवनेषु यामीति चिन्तयित्वा नगराद्बहिरेक एव एकस्य शीतलछायस्य सहकारपादपस्य तले मलिनांबर उपविष्टश्चौरग्रहणोपायं चिन्तयन्नस्ति तस्यैव सहकारस्य छायामायातः एकः परिव्राजकः स्थूलजानु र्दीर्घजङ्घः कुमारेण दृष्टश्चिन्तितश्च नूनमेभिर्लक्षणैरयं चौरएवेति भणितश्च तेन परिव्राजकेन वत्स कुतस्त्वमायातः किं निमित्तं भ्रमसि ततः कुमारेण भणितं भगवन्नहमुज्जयनीतोऽत्रागतः क्षीणविभवो भ्रमामि तेन भणितं पुत्र तवाहं विपुलमर्थं ददामि अगडदत्तेन भणितं तर्ह्ययमानुग्रहीतः सन्तोहिनिष्कारणमुपकारिणः स्युः एवं तयोरभिलापं कुर्वतोरेव सूर्योस्तङ्गतः रात्रौ तेन विदग्धात् ग्रस्तं कर्षितं बद्धः कच्छः नगरीं याम इति वदन्नेव समुत्थितः सः अगडदत्तोपि सशङ्कित स्तमनु गच्छति चिन्तयति च एष एव स तस्कर इति द्वावपि प्रविष्टौ नगरं तत्रातिप्रेक्षणीयमतीवोन्नतं कस्यापीभ्यस्य गृहं दृष्टं तत्रचात्वं दत्तं परिव्राजकस्त मध्ये प्रविष्टः अगडदत्तो बहिस्थश्चिन्तयति चौरस्तु मया ज्ञातः परमस्य स्वरूपं सर्वन्तावत्पश्यामीति परिव्राजके नानेक भाण्डभृताः पेट्यएव कर्षिताः अगडदत्तसमीपेताः स्थापयित्वा गतोदेव कुले ततोऽनेके भारवाहिनः आनीतास्तेषां शिरसिताः स्थापिताः सर्वेपिगताः पुराद्बहिः तापसः कुमारं प्रत्याह पुत्र अत्र जीर्णोद्याने निद्रासुख मनुभवामः इत्युक्त्वा सर्वेपिसुप्ताः निद्राणाश्च परिव्राजकश्च कपट निद्रया सुप्तः अगडदत्तस्तु नैतादृशानां विश्वासः कार्यः इत्यवधार्यैवणं कपटनिद्रया सुप्त्वा तत उत्थाय वृक्षान्तरितः स्थितः तान् पुरुषान् निद्रावसगतान् ज्ञात्वा सपरिव्राजकः कंकपत्रा मारितवान् अगडदत्तस्तस्तरे च समागत्यतं तत्रापश्यत् पश्चाद्वलितस्तावता अगडदत्तेन तदन्तिके समागत्य खड्गप्रहारेण प्रकामंहतः पतितः पृथिव्यां अगडदत्तं प्रत्याह वत्स गृहाणेमं मम खड्गं व्रजश्मसान पश्चिमे भागे तत्र भूमिगृहेभित्तौ स्थित्वा शब्दं कुर्याः तत्र मम भगिनीवसति तस्या इमं मम खड्गं दर्शयेः ततः संकेत कथनात् साते भार्या भविष्यति सर्व द्रव्यस्वामी त्वं भविष्यसि अहं तु गाढप्रहारान् मृत एवेति मत्स्वरूपं कथयेः अगडदत्तस्ततः

खड्गमादाय तत्रगतः यद्दिता सा आयाता तेन दृष्टा अतीव रूपवती अवदत् कुतस्त्वमायातः सप्राह गृहाणेमं खड्गं तद्दर्शनमात्रेणैवतया सर्वन्तस्य स्व भ्राट स्वरूपं ज्ञातं मनस्यैवगोक निगूहनं कृतं अगडदत्तस्तद्गृहाभ्यन्तरं नीतः दत्तमासनं तत्र स उपविष्टः तया विशिष्टादरेण शय्यारचिता भणितञ्च स्वामिन्नत्र विश्राम्यतां तयोक्तो सुप्तस्तत्रागड़दत्तः सा गृहाद्बहिर्निर्गता तावता अगड़दत्तेन चिन्तितं अस्यापि विश्वासो नैव कार्य इति शय्यात उत्थाय अन्यत्र गृहकोणे स्थितः सः तया तु शय्यो परिष्टात् पूर्वं यन्त्रचालनेनैव मुक्ता शिला पतन्त्या तया शय्यां चूर्णिता साऽत्यन्तं हर्षवती दत्ततालं भणति हतो मया भ्राटघातकस्ततोऽगड़ दत्तेन त्वरितं सा केशेषु गृहीता भणिता हा दासिकेयं ते धीस्त्वं मां हनिष्यन्ति सा तत्पादयोः पतिता तव चरणौ मे शरणमिति बभाण अथ तेन सा मा भयं कुर्व्विति आश्वासिता स्वकरे गृहीता राजकुले नीता कथितश्च समस्तो वृत्तान्तः राज्ञो सोऽगड़दत्तः पूजितः प्रशंसितश्च एवं अप्रमत्ता इहैव कल्याणभाजो भवन्ति उक्तो द्रव्यसप्तसु प्रतिबुद्धजीवि दृष्टान्तः एतावदुत्तराध्ययन बृहद्वृत्तिगतं अगड़दत्ताख्यानं लिखितं अथ कथाग्रन्थलिखितं अगड़दत्ताख्यानं लिख्यते शङ्खपुरे सुन्दरनृपः तस्य सुलसा प्रिया तत्सुतोऽगड़दत्तः स च सप्तव्यसनानि सेवते लोकानां गृहेष्वग्न्यायं करोति लोकैस्तदुपालम्भा राज्ञो दत्ताः राज्ञा स निर्वासितो गतो वाराणस्यां पवनचण्डोपाध्यायगृहे स्थितः द्विसप्तति ७२ कलावान्जातः गृहोद्याने कलाभ्यासं कुर्व्वन् प्रत्यासन्न गृहगवाक्षस्थया प्रधानश्रेष्ठिसुतया मदनमञ्जर्यास्तद्रूपमोहितया च तया प्रक्षिप्त पुष्पस्तवकः सञ्जातप्रीतिस्तन्मय एवजातः अन्यदा तुरगारूढः स नगरमध्ये गच्छन्नस्ति तावता दृष्टश्चो लोक कोलाहलः श्रुतः यथा किंच लिउच्च समुद्दो किंवा जलिउद्दु आसणो घोरो किं पत्तिरिउसेण तड़ि दंडो निवडिउ किंवा १ मंठेण विपरिचत्तो मारंतो सुंडिगोयरं पत्तो सवडं मुहं चलंतं कालुव्व अकारणे कुद्धो २ तावता तेन कुमारेण अस्त्रं मुक्ता सहस्तीगजमदनविद्यया दांत पश्चात्तमारुह्य राजकुलासन्न मायातो राज्ञा दृष्ट आकारितो मानपूर्वं कुमारेण तं गजमालानस्तम्भे

वद्धा राज्ञः प्रणामः कृतः राज्ञा चिन्तितं कश्चिन्महापुरुषोयं यतोत्यन्तविनीतो दृश्यते यतः सालीभरेण तोयेण जलहरा फलभरेण तरुसिहरा विणएण यसप्पुरिसा नमन्ति नदुकल्लाइभएण १ ततो विनय रञ्जितेन राज्ञा तस्य कुलादिकं पृष्टं कियान् कलाभ्यासकृत इत्यपि पृष्टं कुमारस्तुलज्जालु त्वेन न किञ्चिदुज्जगौ उपाध्यायेन तस्य कुलादिकं सर्वविद्या नैपुण्यं कथितं कुमार वृत्तान्तं श्रुत्वा चमत् कृतो भूपतिः अथ तस्मिन्नै वावसरे राज्ञः पुरो नगर लोकः प्राभृतं मुक्त्वा एव मूचिवान् हे देवत्वन्नगरं कुवेर सदृशं कियद्दिनानि यावदासीत् साम्प्रतं घोरपुर तुल्यमस्ति केनापि तस्करेण निरन्तरं पुष्यते अतस्त्वं रक्षां कुरु राज्ञातला रक्षा आकारिता भूयं वचोभिस्तर्जिताः तैरुक्तं महाराज किं क्रियते कोपि प्रचण्डस्तस्करोस्ति बहूपक्रमोपिन दृश्यते ततः कुमारेणोक्तं राजन्न हंसमदिन मध्ये तस्कर कर्षणं चेत्करोमि ततोऽग्नि प्रवेशं करोमीति प्रतिज्ञा कृता राज्ञा तु पुरलोक प्राभृतं कुमाराय दत्तं कुमारस्तत उत्थाय चौरस्थानानि विचारयति वेसाणं मन्दिरेसु पाणागारेसु यूयठाणेसु कुक्कूरियवणेसुअ उज्जाणनिवाण सालासु १ मठसुअ देवलेसुय चच्चर चउहट्टसुअ सालासु एएसु ठाणेसु पाएणंतक्करो होइ २ एवं चौरस्थानानि पश्यतः कुमारस्य षट्दिनागताः यद्यात्सप्तम दिने नगराद्वहि र्गत्वाधः स्थितः चिन्तयति किज्जउसीसं अह होउवं धणञ्चयउ सव्वहालच्छी पड़िवन्न पालणेसु पुरिसाणं जंहोइतं होउ १ एवं चिन्तयन्नसौ कुमार इतस्ततो दिगवलोकनं करोति तस्मिन्नवसरे एकः परिहित धातुवस्त्रो मुण्डित शिरः कुर्वन्नि दण्डधारी चामरहस्तः किमपि बुड़् बुड़् इति शब्दं मुखेन कुर्वाणः परिव्राजक स्तत्रायातः कुमारेण दृष्ट श्चिन्तितञ्च अयमवश्यञ्चौरः यतोस्य लक्षणानी दृश्यानि सन्ति करि सुण्डाभुयदण्डो विसाल वक्षत्थ लो पुरुसकेसो नव जुव्वणोरउद्दोरत्तत्थो दीह जङ्घोय १ एवं चिन्तयतः कुमारस्य तेन कथितं अहो सत्पुरुष कस्त्वमायातः केन कारणेन पृथिव्यां भ्रमसि कुमारेण भणितं उज्जयनी तोऽहमत्रायातः दारिद्र्य भग्नो भ्रमामि परिव्राजक उवाच पुत्रत्वं मा खेदं कुरु अद्य तव दारिद्र्यं छिनद्मि समी

हितमर्थं ददामि ततो दिवसं यावत्तौ तत्रस्थितौ रात्रौ कुमार सहित स्तौरः कस्यचिदिभ्य गृहे गतः तत्रचात्रं दत्तवान् तत्र स्वयं प्रविष्टः कुमारस्तु बहिस्थितः परिव्राजकेन द्रव्य भृताः पेटिकास्ततो बहिष्कर्षिताः ताः चात्रमुखे कुमार समीपे मुक्ता स्वयमन्यत्र क्वचिद्गत्वा दारिद्र्य भग्नाः पुरुषा अनेके आनीताः तेषां शिरसिताः पेटिका दत्वा कुमारेण समं स्वयं बहिर्गतः सतापसः कुमारं प्रत्येव मुवाच कुमार क्षणमात्रं वहे तिष्ठामः निद्रा सुखमनु भवामः परिव्राजकेनेत्युक्ते सर्वेपि पुरुषा स्तत्र सुप्ताः कपट निद्रया परिव्राजकोपि सुप्तः कुमारोपिनो तादृशाणां विश्वासः कार्य इति कपट निद्रयैव सुप्तः तावतासपरि व्राजक उत्थाय तान् सर्वान् कंकपत्रया मारयामास यावत् कुमार समीपे समायाति तावत् कुमार उत्थायतं खड्गेन जङ्घादये जघान छिन्ने जङ्घादये सतत्रैव पतितः कुमारं प्रत्येव मुवाच वत्साहं भुजङ्गनामा चौरः ममेह श्मशाने पाताल गृहमस्ति तत्र वीरपत्नी नाम्नी मम भग्न्यस्ति अटवटपादपस्य मूले गत्वा तस्याः शब्दं कुरु यथा साभूमि गृहद्वार मुद्घाटयति ताञ्चस्व स्वामिनं करोति सङ्केतदानार्थं मत् खड्गं गृहाणेत्युक्ते कुमारस्तत् खड्गं गृहीत्वा तत्र गतः सतु तत्रैव मृतः कुमारेण साशब्दिता आगता द्वार मुद्घाटयामास कुमारेण भ्रातुः खड्गं दर्शयित्वा स्वरूप मुक्तं तस्याः अन्तः खेदो जातः परत्रमुखे खेदं दर्शयामास मध्ये आकारितः कुमारः पल्यङ्के शायितः उत्तिष्ठ तव विलेपनाद्यर्थं चन्दनादिक महमानयामीति ततोनिर्गता कुमारेण चिन्तितं प्रायः स्त्रीणां विश्वासो न कार्यो यतः शास्त्रे इमे दोषाः प्रायो भवन्ति माया अलियं सीमो मूढत्तं साहसं असीयत्तं निस्सन्तियातहच्चिय महिलाणसहावया दोसा १ एतस्यास्तु तथाविध चौर भगिन्यां विश्वासोनैव कार्य इति विचिन्त्य कुमारः शय्यां मुक्ताऽन्यत्र गृहकोणेस्थितः सा बहिर्गत्वा यन्त्र प्रयोगेण शय्योपरि शिलां मुमोच तया शय्या चूर्णिता ततः कुमारेण सासथः साक्रोशं केशेषु धृता राज्ञः समीपे आनीता प्रोक्तः सर्वोपि वृत्तान्तः राज्ञातद्भूमि गृहात् समस्तं वित्तमानाय्य लोकेभ्यो दत्तं कुमारेण साजीवन्ती मोचिता पश्चात्पापगृहात् कुमारेण नृप

सुता कमल सेनानाम्नी परिणीता नृपेण कुमारस्य सहस्रं ग्रामादत्ताः शतं गजादत्ताः दश सहस्राणश्वादत्ताः लक्षं पादा तयो दत्ताः ततः सुखेन कुमार स्तत्र तिष्ठति अन्यदा कलाभ्या स समये यया श्रेष्ठिसुतया सह प्रीतिर्जातास्ति तया मदनमञ्जर्या कुमार समीपे दूती प्रेषिता तया उक्तं तव गुणानुरक्ता तवैवेयंपत्नीभवितुं वाञ्छति कुमारेणाप्युक्तं यदा अहं शङ्खपुरंयास्यामि तदात्वां गृहीत्वा यास्यामीति तस्यास्त्वया वक्तव्यं अथान्यदा तत्र पित्राप्रेषितानराः कुमाराकरणायसमेताः कुमारस्तु तेषां वचन माकर्ण्य पितुर्मिलनाय भृशमुत्कण्ठितः श्वशुरं पृष्ट्वा कमलसेनया समं चलितः चलनसमये च मदनमञ्जरी आकारितासापिकुमारेणसमं चलितास्ताभ्यां प्रियाभ्यां सहसैन्यवृतः कुमारः पथिचलन् बहून् भिल्लान् सन्मुखमापततो ददर्शतदा कुमार सैन्ये नतैः समं युद्धं कृतं भग्नं कुमारसैन्यं भिल्लैर्लुण्ठितः इतस्ततो गतं भिल्लपतिस्तु कुमार रथे समायातः उत्पन्न बुद्धिना कुमारेण स्वपत्नी रथाग्रभागे निवेशिता तस्याः रूपेण मोहङ्गतो भिल्लपतिः कुमारेणहतः पतिते च तस्मिन् सर्वेपि भिल्लानष्टाः कुमारस्तुतेनैव चैकेन रथेन सह गच्छन्नग्रे महतः सार्थस्य मिलितः सार्थोपि सनाथत्वमार्गे चलति कियन्मार्गं गत्वा सार्थिकैः कुमाराय एव मुक्तं कुमारवृतः प्रध्वरमार्गे भयं वर्त्तते ततः प्रध्वरमार्गं विहाय अपरेण मार्गेण गम्यते कुमारेणोक्तं किं भयन्ते कथयन्ति अस्मिन् प्रध्वरमार्गे महत्यटवी समेष्यति तस्याः मध्ये महानेकश्चौरो दुर्योधननामा वर्त्तते द्वितीयस्तु गर्जारवं कुर्वन् विषमोगजो वर्त्तते तृतीयो दृष्टि विषसर्पो वर्त्तते चतुर्थो दारुणो व्याघ्रो वर्त्तते एवं चत्वारि भयानि तत्र वर्त्तन्ते कुमारः प्राह एतेषां मध्ये नैकस्यापि भयं कुरुत चलत सत्वरं मार्गे कुशलेनैव शङ्खपुरे यास्यामः ततः सर्वेपि तस्मिन्नेवा ध्वनि चलिताः अग्रे गच्छतान्तेषां दुर्योधन चौरस्त्रिदण्डभागमिलितः सोपिपान्थोहं शङ्खपुरे समास्यामीति वदन् सार्थेन सार्द्धं चलति मार्गेचैकः सन्निवेशः समायात स्तदाचिदण्डिना उक्तं मम उप लक्षितोयं सन्निवेशो वर्त्तते तेनात्र गत्वा मया दध्यादि आनीयते यदि भवतां रुचिः स्यात् सार्थिकैरुक्तं आनीयतां ततस्तेन तदन्तर्गत्वादध्यादि आनीतं

विषमिश्रितं कृत्वा सर्वेषां पायिता: मृता: सर्वेसार्थिका: अगडदत्तेन भार्याद्वय युतेन न पीतमिति न मृत: स त्रिदण्डीपुन: सन्निवेस मध्ये गत्वा क्रि यत्परिवारयुतो गृहीत शस्त्र: कुमारमाणाय आयात: कुमारेण खड्गं गृहीत्वा सम्मुखं गत्वाघोरसंग्राम करणेन सहत: परिवारस्तु नष्ट: भूमौ पतता तेन चौरेण एव मुक्तं अहं दुर्योधनचौर: प्रसिद्ध: त्वयाहं हतो न जीविष्यामि परं मम बहुद्रव्यं वर्त्तते मम भगिनी जयश्रीनाम्नि अस्मिन् वनमध्येऽस्ति तत्त्वया गृहीतव्यं सा चपत्नी कार्या कुमारस्तत्रगत: सा आहूता समायाता दृष्ट: कुमारी भ्रातस्तया भ्रातृवृत्तान्त: तया कुमारोपि गुफामध्ये आकारित: तत्र गच्छन्मदनमञ्जर्या वारित: तां तत्रैवमुक्त्वा कुमारोग्रे चलित: कियन्मार्गं यावद्ततेन कुमारेण प्रचण्ड शुण्डादण्ड प्रभग्न तरुकोटि निघृष्ट गिरितट: सवेगं सम्मुख मागच्छन् यम इव रौद्ररूपो गजोदृष्ट: तत: कुमारो रथा दुत्तीर्य गजाभिमुखं प्रचलित: उत्तरीय वस्त्रवेष्टिकां कृत्वा गजाग्रे मुमोच गजस्तत् प्रहारार्थं शुण्डादण्ड मध: क्षिपन् यावद्दीयत्न तस्तावता कुमार स्तद्दन्तद्वये पादौ कृत्वा तत् स्कन्धेऽधिरूढ: वज्र कठिनाभ्यां स्वमुष्टिभ्यां तत् कुम्भस्थल द्वयं जघान कुमारेण प्रकाममिताडितस्ततो भ्रामयित्वा स गजो वशीकृत: पश्चात् स गजो गौरिव शान्तीकृतो मुक्तश्च तत्रैव पुन: कुमारो रथे निविष्टोग्रे चलित: कियन्मार्गं यावद्गच्छति कुमारस्तावत् कुण्डलीकृत लाङ्गूल: स्वरवेण गिरिप्रति छन्दान् विस्तारयन् विद्युच्चञ्चललोचन: सर्वोपमां रसनां स्वमुख कुहरान्निष्कासयन् सिंह: समायात: तेनापि सम कुमारोयुद्धं कृतवान् कुमारेण कर्कश प्रहारैर्जर्जरित: सिंहस्तत्रैव पतित: कुमारस्ततोग्रे चलित: सर्वोप्युपद्रवोपि मार्गे विद्ययैव निवर्त्तित: कुशलेन कुमार: स्त्रीहृदयसंवृत्त: शङ्खपुरे प्राप्त: प्रवेश महोत्सव: प्रकामं पितृभ्यां कृत: सर्वेषां पौराणां परमानन्द: सम्पन्न: तत्र सुखेन कुमार स्तिष्ठति अन्यदा वसन्ते मदन मञ्जर्या सह कुमार एकाक्येवक्रीडा वनेगत: तत्र रात्रौ मदनमञ्जरी सर्पेण दष्टा मृतेव सञ्जाता कुमारस्तु तन्मोहादग्नौ प्रविशन् गगनमार्गेण गच्छता विद्याधरेण

वारितः विद्याबलेन सा जीविता विद्याधरस्तु स्वस्थानं गतः कुमारस्तया समं रात्रिवासार्थं कस्मिंश्चिदेव कुलेगतः तत्र तां मुक्ता उद्योतकरणाय अग्नि मानेतुं कुमारी बहिर्गतः तदानीं तत्र पञ्चपुरुषा पूर्वं कुमार हत दुर्योधनचौर भ्रातरः कुमारबधाय दृष्टा वा गता इतस्ततो भ्रान्ताः कुमारच्छल मल भन्तस्तमाग तास्तन्ति तेषु तत्रदीपको विहितः मदनमंजर्या तेषां मध्ये लघुभ्रातु रूपं विलोकितं रूपाचिमया तस्यैव प्रार्थना विहिता त्वं मम भर्त्ताभव अहं तव पत्नी भवामि तेनोक्तं तव भर्त्तरि जीवतिसन्ति कथमेवं भवति सा प्राह तमहं मारयिष्यामि तदानीमग्निं गृहीत्वा कुमारस्तत्र प्राप्तः आगच्छन्तं कुमारं दृष्ट्वा तया तत्रस्थो दीपो विध्यापितः तदाया तेन कुमारेण मृच्छं अद्योद्योतः कथ मभूत् तया उक्तं तव हस्तस्याग्नेरेवोद्योतः सरलेन तेन तथैवाङ्गीकृतं मदनमञ्जर्या हस्ते खड्गं गृहित्वा कुमारोऽग्निप्रज्वालनार्थं ग्रीवामभ्यवकार तावता तया कुमारबधार्थं खड्गं प्रतीकारान्निष्कासितं तस्याश्चरित्रं दृष्ट्वा चौरलघुभ्रातुर्वैराग्यमुत्पन्नं पश्चादस्या हस्तात्तेन खड्गं अन्यत्र पातितं पश्चापि भ्रातर स्तत्तः कुराऽलचिताः शनैः शनैर्निर्गताः कस्मिंश्चिद्दने गता स्तत्र चैत्यमेकमुत्तुंगं दृष्टं तत्र सातिशयज्ञानी साधुर्दृष्टः तत्समीपे तैः पञ्चभिरपि दीक्षा गृहीता तदाज्ञां पालयन्तः संयमे रतास्तत्रैव तिष्ठन्ति कुमारेण नैतत्किमपि ज्ञातं अथ कुमारस्तत्र मदनमञ्जर्या रात्रिमेकामुषित्वा प्रभाते खगृहे समायातः कियद्दिनानन्तरमज्ञापहृतएकएवागड़दत्त कुमारस्तस्मिन्नेव वने तत्रैव चैत्ये गतस्तत्र देवान्नमस्कृत्य साधवो वन्दिताः गुरुणादेशनाकृता कुमारेण पृष्टं भगवन् कएते पञ्चापि भ्रातर इव साधवः कथमेषां वैराग्यमुत्पन्नं कथमेभि र्यौवनभरेपि व्रतं गृहीतं एवं कुमारेण पृष्टे गुरुः प्राह सर्व्वं तदीयं वृत्तान्तं कुमारस्तचरित्रं श्रुत्वा युवती स्वरूपमेवं विचिन्तयति अणुरज्जंति खणेणं जवईओ खणेण पुणो विरज्जंति अवसरागनिरया हलिद्दरागुव्व चलपेमा १ इति विचिन्त्य कुमारोपि वैराग्यात्प्रव्रजितः यथासौ अगड़दत्तः प्रतिबुद्धजीवी पूर्वं द्रव्या सुप्तः पश्चाज्जावा सुप्तोपि इह लोके परलोके च

सुखी जातः ६ चरेत् पदात्रं परिसंक्रमाणो जं किंचिपासं इहमन्यमाणो लाभंतरे जीवीयबूहइत्ता पच्छा परिन्नाय मलावधंसी ७ साधुः संयममार्गे यदानि धर्मस्थानानि परिगच्छमानः चारित्रदूषणानि विचारयन् चरेत् संयममार्गे विहरेत् किं कुर्वाणः यत् किञ्चिदपि गृहस्थपरिचयादिकं प्रमादपदं दुश्चिन्तनादिकं बन्धस्यहेतुत्वात्पाशं इव मन्यमानः पुनःसाधुर्लाभांतरे जीवितं ह्रंहयित्वा पश्चात्परिज्ञाय मलापध्वंसी स्यात् कोर्थःएकस्माल्लाभात्अन्योलाभो लाभांतरं तस्मिंलाभांतरे सति ज्ञानदर्शनचारित्रादीनां लाभविशेषे सति जीवितं शरीरं ह्रंहयित्वा आहारभाटकदानेन धारयित्वा पश्चाल्लाभप्राप्ते सभावं ज्ञपरिज्ञया ज्ञात्वा इमं मम शरीरं अतः परं ज्ञानादिगुणार्जकं नास्तीति परिचिन्त्य प्रत्याख्यान परिज्ञया भक्तं प्रत्याख्याय अष्टकर्मलक्षणमलस्य अपध्वंस कोनिवारकः स्यात् ७ अत्र मण्डकचौरोदाहरणं उत्तराध्यन हरिहरित्तिगतं प्राकृतं संस्कृतीकृत्य लिख्यते वेन्नातटे मंडिक नामा तुन्नकवीरः परद्रव्याहरणा सक्त आसीत् स च दिवसे राजमार्गमध्यस्थः पादयोर्मेंगंडानीति वदन् बद्ध पट्टकपादो मुखे भृशमाक्रन्दन् तुन्नक शिल्प मुपजीवति राचौ च व्यवहारि गृहे चात्रं दत्वा बहुधनं गृह्णाति नगरोद्यानान्तः स्थित भूमिगृह कूपे सर्वं क्षिपति तत्रचास्य भगिनी कन्या तिष्ठति यांश्चभारवाहकान सावानयति तान् स र्वानेषां स्वयं पाद शौचादि बहूपचारपूर्वक भोजनपंक्ता मुपवेश्य विषमिश्रित भोजनदानेन मारयति अपर कूपान्तरर्निक्षिपति एवं कालं

सूत्र

वचरे प्पमत्तो ॥६॥ चरे पयाइ परिसंकमाणो जंकिंचि पासं इहमन्नमाणो। लाभंतरे जीविय बूहइत्ता पच्छा परि

भाषा

किञ्चित् अन्यमपि गृहसंस्तवादिपाशं मन्यमानः इम जाणीने संसारनां काम काज गृहस्था न थुं परिचयपास रूपकरी जाणे इमनरेविशे लाभांतरे लाभविशेषे सति यावद्विशिष्टतरज्ञानाद्याप्तिः स्यात् तावत् जीवितं धारणीयं जोहांलगे शरीर थकी तप जप नोलाभ होइ तिहां लगे शरीर राखे पश्चात् शरीरं त्यक्ता कर्ममलं दूरिकुर्यात् पछे आपणी प्रज्ञा बुद्धिं करी सर्वपचखी अणसण लेइ पापरूप मलने फेडे ७ स्वच्छन्दतानिरोधेन उपैति मोक्षं जीव

व्रजति सति तेन चौरेण तन्नगरं भृशं मुषितं अन्यदा तत्र नगरे मूलदेवो राजा राज्ये उपविष्टः सकथं राजा तत्र संवृत इति तदाख्यान मुच्यते उज्जयिन्यां नगर्यां सर्वगणिका प्रधाना देवदत्ता नामा गणिकास्ति तस्या गृहेऽचलो नामा व्यवहारि पुत्रः परदेशायातो भोगान् भुंक्ते मार्गितमर्थञ्च ददाति तस्या एव गृहे परदेशायातो राजपुत्रो मूलदेवोऽतिरूप सौभाग्य स्तथैवगुणबृंद्रामानितोऽचलः प्रच्छन्नमायाति भोगानपि भुंक्ते सातु मूलदेवेन एकमेव प्रेमवती बभूव परं अचल स्तत्स्वरूपं न जानाति एकदा देवदत्ता जनन्या उक्तं पुत्रि किमेतेन मूलदेवेन निःस्वेन अचलमेव भज मूलदेवं त्यज देवदत्ता प्राह अयं पण्डितोऽतीव सौन्दर्य्यादि गुणवान् जननी प्राह अस्य मूलदेवस्य निःस्वत्वेन सर्वेपि गुणागताः अचलस्य स्वस्वत्वेन सर्वेष्वौदार्य्यादिगुणाः सन्ति यस्यौदार्य्यं तस्य सर्वगुणाधारत्वं चेन्न मन्यसे तदास्य मूलदेवस्य अचलस्यापि च औदार्यपरीक्षां कुरु ततो देवदत्तया एकादासी मूलदेवस्य पार्श्वे प्रेषिता एकाच अचलस्य पार्श्वे द्वयोरपि दासीद्वयं प्रत्येकमेव मुवाच देवदत्ता इक्षुयष्टिं मार्गयति तदा मूलदेवः इक्षुयष्टिं सुगन्धादिना संस्कारं कृत्वार्प्पयति तदा देवदत्ता अम्बां प्रत्याह पश्य मूलदेवस्य विवेकितां तदैव अचलेन इक्षुयष्टिर्भृतं शकटं प्रेषितं अथ अक्का मूलदेवस्य द्वेषिणी अचलस्य पार्श्वे गत्वा देवदत्ताया मूलदेवा सक्त स्वरूपमूचे अचलेनोक्तं तथा कुरु यथाहं मूलदेवं गृह्णामि तयोक्तमवश्यं मया तद्दोगावसरो ज्ञाप्यः अचलेन तस्यादीनाराष्टशतं दत्तं सा गृहे गत्वा देवदत्ताया इदमकथयत् अचलोऽद्य त्वरितकार्येसमुत्पन्ने क्वचिद्ग्रामे चलितोस्ति सोऽद्य नायास्यति तथाप्यद्य दिनसप्तकं भाटकं प्रेषितमस्ति एवमुक्त्वादीना राष्टशतं तया देवदत्ताया दत्तं देवदत्तयापि मूलदेवस्तदानीमाकारितः सोऽथागतस्तस्याः शयनीयेसु स्वाभोगे प्रवृत्तः तस्यां वेलायां तयाऽक्कया मूलदेव देव दत्ता संभोगस्वरूपं अचलस्य ज्ञापितं अचलोऽपि सपरिवार स्तत्रायातः देवदत्ता तं सपरिवारमायातं दृष्ट्वा मूलदेवं शयनीयाधश्चिक्षेपः इतस्ततो वस्त्राणि विस्तारयामास अचलस्तु द्वारि स्वपरिवारं मुक्त्वा तदा सद्गृहान्तर्गत्वा शयनीये उपविष्टं देवदत्ता तु न किञ्चिदुवाच नापि तस्य किञ्चिद्विलेपनाद्युपचारं

चकारअचलेन शयनीयाध: प्रविष्टो मूलदेवो ज्ञात: तस्या इदमूचे अद्य मयाऽत्रस्थेनैवाभ्यङ्गनस्नाने करिष्ये तदा देवदत्तयोक्तं शयनीयवस्त्रविनाशो भविष्यति स आख्यत् तवापूर्वं वस्त्रसहितं अपूर्वं शयनीयं दास्यामीत्युक्ता तत्रैवाभ्यङ्गं स्नानं चकार तन्मललिप्तो मूलदेव: शय्याधस्थ इतस्तत श्चलत् अचलेन शय्या वस्त्रमपसार्य केशेषु गृहीत्वानिष्कासित: उक्तमुच्चस्वरेणयाहित्वं जीवन्नेव मया मुक्त: अपराधस्तु तवेदृशोस्ति यस्मांप्रतमेव त्वं मयाहन्य से परं कृपया त्वं मुच्यते त्वमपि कदाचिन्ममापराधे ईदृशोभूया: एवमचलेनोक्तो लज्जितो मूलदेव: कुमार उज्जयिन्यानिर्गतोवेत्रा तटमार्गे प्रस्थापित: तदा तस्य एक: पुरुषो मिलित: मूलदेवेन पृष्टंक्व त्वं यास्यसि तेनोक्तं वेत्रा तटेयास्यामि मूलदेवेनोक्तं अहमपि तत्रैव प्रस्थितोस्मि आवां सहैव व्रजाम: तेनोक्तं एवं भवत्विति द्वावपि सहैव प्रस्थितौ तस्य पुरुषस्य शम्बलम्बर्त्तते मूलदेवस्य किमपि शम्बलं नास्ति अन्तरा अटवी समायाता द्वावप्यटव्यां प्रविष्टौ मूलदेवश्चिन्तयति एष मे सम्बलविभागं करिष्यते स च भोजनसमये स्वयं भुंक्ते न किञ्चिद्दाति मूलदेवस्तु चिन्तितं अद्यानेन न किञ्चिद्दत्तं परं कल्येदास्यति इत्याशयैवाग्रतो गच्छति एवं दिनत्रयं यावन्मूलदेवेन न किञ्चिल्लब्धं न किञ्चिद्भुक्तं चतुर्थदिने मूलदेवेन स पुरुष: पृष्ट: अत्र क्वचिद्गत्यासन्नो ग्रामोस्ति न वा तेनोक्तं इत स्तिर्यक् प्रदेशेनाति दूरे ग्रामो वर्त्तते परमहं तत्र नायास्यामि अग्रे यास्यामीत्युक्ता स पुरुषोऽग्रे चलित: मूलदेव एकाक्येव तत्रगत: भिक्षां भ्रमता च मूलदेवेन राज्ञा कुल्माषालब्धा: तान् वस्त्राञ्चले गृहीत्वा मूलदेवो ग्रामाद्बहिर्याति तावतामासोपवास पारणके यतिरेकोभिक्षार्थं ग्रामान्त: प्रविशन् मूलदेवेन दृष्ट: भक्त्युल्लासेनते कुल्माषा मूलदेवेन तस्मै साधवे दत्ता: साधुरपि द्रव्य क्षेत्रकालभावज्ञां स्तान् गृहीतवान् मूलदेवेन परमया भक्त्या भणितं धन्नाणं खुनराणं कुम्मासाइन्ति साहुपारणए अथ तत् प्रदेशाधिष्ठात्र्या देव्या मूलदेवस्योक्तं वत्स ए तस्या गाथाया द्वितीयार्द्धं यन्मार्गयसि तद्दामीति मूलदेवेन गाथा द्वितीयार्द्धमिदं श्रुतं गणि अश्वदेवदत्तं दन्ति सहस्रञ्च रज्ञञ्च देवतया भणितं एतत्तवाचिरेण भविष्यति ततो मूलदेवो वेत्रातटे गत:

देश्य कुत्यां सुप्तः तत्र कार्पटिकापि बहवः सुप्तास्सन्ति तेषां मध्ये एकेन कार्पटिकेन स्वमुखे प्रविशंश्चन्द्रो दृष्टः तादृश एव स्वप्नो मूलदेवेन दृष्टः कार्पटिकेनतु प्रातरुत्थाय गुरोः पुरः स्वप्न उक्तः गुरुणापित्व मथ घृत गुड सहितं भक्तकं प्राप्स्यसीति बभाषे मूलदेवस्तत उत्थाय नगराच्चलः स्वप्नपाठकगृहे गत्वा घनं विनयं कृत्वा स्वप्नपाठकाय स्वप्नमाचख्यौ तेनोक्तं सप्तमदिवसे तव राज्यं भविष्यतीति तस्मिन्नवसरे तत्रा पुत्रो राजामृतः सामन्तैमन्त्रिभिश्च पट्टाभिषिक्तः हस्ति सप्तमेदिवसे मूलदेव समीपे समायातो हेषारवञ्चक्रे स्वदृष्टौ मूलदेव मध्यारोपितवान् सामन्ताद्यैर्योग्योयमिति ज्ञात्वा राज्ये अभिषिक्तः सप्तमे दिवसे मूलदेव स्तत्र सहस्र दन्तिराज्यं प्राप्तः उज्जयनी नृपेण सार्द्धं प्रीतिञ्चकार अनेक द्रव्य लक्षप्राभृतानि प्रेषितवान् एकदा मूलदेवेन तत्पार्श्वे देवदत्ता मार्गिता तेन प्रीतियरवशेन प्रेषिता मूलदेवेन स्वपट्टराज्ञी कृता तया समं यथेष्टं मूलदेवो भोगान् भुंक्ते अन्यदा तत्र समुद्रमार्गा दचलः समायातः माण्डपिकैः शुल्कचौर्या बद्धो मूलदेवराज्ञः पुर आनीतः मूलदेवराजा उपलक्षितः कथितश्च त्वं मामुपलक्षयति सु आहकस्त्वां नोपलक्षयति त्वं महाराजः मूलदेवेनोक्तं सोहं मूलदेव इत्युक्त्वा बन्धनाच्चोचितो विसर्जितश्च एवं मूलदेवस्तत्र निश्चलो: राज्यं करोति स मूलदेवो नगर लोकेभ्य श्चौर पराभवं ज्ञात्वाऽन्यं नगर रक्षकं कृतवान् सोपि चौरं ग्रहीतुं न शक्तः तदा मूलदेवः स्वयं नीलपटं प्राहृत्य रात्रौ निर्गतः इतस्ततो भ्रमयन् यत्र सतुरको भण्डिकचौरोऽस्ति तत्रैवायातस्तत्पार्श्वे कपटनिद्रया सुप्तः अपरेपि दारिद्र्यभग्नाः पुरुषास्तत्र सुप्तास्सन्ति भक्तकेन तावता क्रन्द कृता यावन्मध्यरात्रिः समायाता तदानीं तत उत्थाय सर्वेष्यु त्थापितः मूलदेवोप्यु त्थापितः आयां तु मया सार्द्धं सर्वानपि धनवतः करोमीति वदन् तैः सार्द्धं पुरान्तर्भ्रान्त्वा एकस्य धनिकस्य गृहे चावं दत्वा बहूनि धनानि निष्काश्य सर्वेषां तेषां शिरसि पोट्टलकादत्ताः मूलदेवस्य शिरसि एकः पोट्टलिकादत्तः सर्वेष्यग्रे कृत्वा स्वयं खड्गपाणिः पृष्ठो स्थितः श्मशानान्तर्भूमिगृहे सर्वेपि प्रवेशिता पोट्टलकधनानि कूपान्तश्चिक्षेप सर्वेषामपि तेषां पाद

शौचं तत्रस्थया चौर भगिन्यादत्तं स्वयं पादक्षालनचक्रे मूलदेव पादक्षालनावसरे तत्पादतलेपद्मं दृष्ट्वा कुमार्यादिना चिन्तितं कोप्ययं महान् राजेति भ्रात वतीनायं मया विनास्य इति मत्वा तया मूलदेवस्य नेत्र संज्ञाकृता सततो मूलदेवो नष्टः पश्चात्तया चौरस्य स्व भ्रातुरुक्तं एषः पुरुषोनष्टः भ्रातापि गृहीत खड्गस्तत्पृष्ठौ चलितः मूलदेवोपि प्रत्यासन्नमायातं दृष्ट्वा क्वचित् स्थाने बब्बर पाषाण शिवलिङ्गं स्वोत्तरीय वस्त्रेणाच्छाद्य स्वयमन्तरितः स्थितः कोपा न्धेन चौरेण तत्रागत्य स एवायं पुरुष इति ज्ञात्वा शिवलिङ्ग मस्तके कङ्क लोहमय खड्गप्रहारोदत्तः तच्छिवलिङ्ग द्विधाभूतं हतो मया स पुरुषः इति जानन् स्वस्थाने गत्वा सुप्तः प्रभाते समण्डिक तुन्नकश्चतुः पथान्तः समागत्य तथैवक्रं दान् कुर्वन् स्थितः राज्ञा च प्रभाते स्वपुरुषैः स आकारितः राज पुरुषेषु तत्रायातेषु तेन चिन्तितं तदानीं मया स पुरुषो न हतः किन्तु दृषदावैव खड्गप्रहारोदत्तः योनष्टः पुरुषः सोवश्य मत्रत्यो राजा ते नैवमे पुरुष माङ्गातुं प्रेषिताः यामिता वृत्तत्र अथेतो न नष्टुं शक्यते यद्राज्यं तद्बलिति चिन्तयन्नेवासौतैः पुरुषैः शनै शनैर्व्रजन् राजसभायामानीतः राज्ञाप्यसौ अभ्युत्थानादिना मानितः अर्द्धासने निवेशितः आश्वासितः स्वनेपथ्य समस्तस्य नेपथ्योदत्तः सभोज्यसमंभोज्यमपिकारितः अन्यदातस्य उक्तं स्वभगिनीं मम देहि तेन सा दत्ता सा परिणीता राज्ञा स्वप्रेमपात्री कृता अन्यदा राज्ञा उक्तं द्रव्यं मे विलोकयस्व त्वं धना स्वकीयोसि ततो मे द्रव्यं देहि तत् चिन्ता तु ममैवास्ति तेनराजमार्गितं द्रव्यं दत्तं स राजपार्श्वे सुखेन तिष्ठति अन्यदा पुनरपि राज्ञाद्रव्यं मार्गितंतेन दत्तं राज्ञा तस्य पुनर्महान् सत्कारः कृतः पुनरपि राज्ञाद्रव्यं मार्गितं तेनापि दत्त एवमन्तरान्तरा राज्ञा सत्कारपूर्वंतस्य द्रव्यं गृहीतं भगिनी पृष्टा अथास्यस्य किञ्चिद्वनं सा प्राह अयं रक्षीकृतस्वया मातः परमस्य किञ्चिद्वनमस्तीति श्रुत्वा राज्ञासौ मण्डिकचौरः शूलायामारोपितः अन्यायमुपनयो यथाय मकार्यकार्यपि मण्डिकचौरो मूलदेवेन यावल्लाभं तावत् रक्षितः तथा धर्मार्थिनापि संयमलाभहेतुकं जीवितं रक्षणीयं यावत्कालं संयमलाभः तावत्कालं जीवितमौषधादिभिः कृत्वा रक्षणीयं मान्यथेति छंदं

निरोहेण उवेइ मोक्खं आसे जहा सिक्खियवम्मधारी पुव्वाइं वासाइं चरेप्पमत्तो तम्हामुणी खिप्प मुवेइ मुक्खं ८ साधुच्छंदो निरोधेन मोक्षं उपैति गुर्वादेशं विनैव प्रवर्त्तनं छन्दस्तस्य निरोधो निवारणं तेन गुर्वाज्ञया प्रवर्त्तनेन निर्भयस्थानं प्राप्नोति को यथा शिक्षित वर्मधारी अश्वो यथा यथा शब्द इवार्थे शिक्षा जाता अस्येति शिक्षित: वर्म्मसन्नाहं धरतीति वर्म्मधारी सन्नाह धारक: एतादृश: सुशिक्षित: कवचधारी चाश्वोऽश्वधारशिक्षायां स्थित स्वच्छन्दो निरोधेन स्वेच्छागमननिषेधेन मोक्षं प्राप्नोति निर्भयं स्थानं प्राप्नोति शत्रुभिर्हन्तुं न शक्यते हे साधो पूर्वाणि पूर्वप्रमितानि वर्षाणि यावत् अप्रमत्त: सन् चर साधुमार्गे विहर तस्मात् अप्रमत्तविहारान्मुनि: क्षिप्रं मोक्षं उपैति ८ अत्र कुलपुत्रशिक्षिताऽश्वद्वयोदाहरणं एकेन राज्ञा द्वयो: कुल पुत्रयो: शिक्षणार्थं अश्वौ दत्तौ एकेन कुलपुत्रेण प्रथमोधावन वल्गादि कला शिक्षितो द्वितीयस्तु द्वितीयकुलपुत्रेण न शिक्षित: संग्रामावसरे प्रथमोऽश्वो अथ क्व: पोतइव संग्रामसागरमवगाह्य पारं गत: सुखी बभूव द्वितीयस्तु संग्राममध्ये एव मृत: अत्रायमुपनयो यथासावश्व: कुलपुत्रेण शिक्षित: तथा धर्मार्थंपि स्वातं त्वाविहरतो गुरुशिक्षित: शिवमाप्नोति स पुव्वमेवं न लभेज्ज पच्छा एसोवमा सासयवाइयाणं विसीयई सिढिले आउयंमि कालेवणीए सरीरस्स भेए ९ य: पुरुष: पूर्वं एव अप्रमत्तत्वं न लभेत स पुरुष: पश्चादपि एवंमिव अप्रमत्तत्वं न लभेत एषा शाश्वतवादिनं निरुपक्रमायुषां उपमा

सूत्र

आय मलावधंसी ॥७॥ छंदं निरोहेण उवेइ मोक्खं आसेजहा सिक्खियवम्म धारी। पुव्वाइं वासाइं चरेप्पमत्तो

भाषा

आपणो छन्दो रुंधें आपणी चतुराइ कांइ न करे जे वीतरागे कह्यो छे तिम गुरुनी आज्ञा लोपन करे तो मोक्ष जाय अश्वो यथा शिक्षित: वाणधारो जिम घोड़ा शिक्षित भलो पाखर पेहेरावी छे असवार नाम न केड़े चाले तो वैरी जीती आवे तिम साधु पणो इच्छा रुंधतो मोक्ष जाय पूर्वाणि वर्षाणि चरेत् अप्रमत्त: साधू पूर्वबर्ष लगी अप्रमत्त थको विचरे तस्मात् साधु: शीघ्रं उपैति मोक्षं एहवी करणी करे तो साधू उतावलो मोक्ष जाय ८ स पूर्वमेव

युक्तिः यादृशो जीवः पूर्वं स्यात्तादृशः पश्चादपि स्यात् इति शाश्वतवादिनो वदन्तीत्यर्थः आयुषि शिथिले जाते सति शरीरस्य भेदेकाले उपनीते सति मरणेनिकटे समागते सति विखीदति विषिन्नो भवति अतः कारणात् पूर्वमपि पश्चादपि च न प्रमादं ८ खिप्पं न सक्केइ विवेगमेउं तम्हा समुट्ठाय पहाय कामे समिच्च लोगं समया महेसी अप्पाणरक्खी चरमप्पमत्तो १० हे भव्य क्षिप्रं शीघ्रं विवेकं द्रव्यभावेन सङ्ग त्यागरूपं एतुं प्राप्तुं भवान् न शक्नोति न समर्थो भवति तस्मात् आत्मरक्षी सन् अप्रमत्तश्च सन् त्वं विचर किं कृत्वा समुत्थाय सम्यक् उद्यमं विधाय पुनः किं कृत्वा कामान् इन्द्रियविषयान्

सूत्र

तम्हा मुणिखिप्प मुवेइ मोक्खं ॥८॥ स पुव्वमेवं नलहेज्जपच्छा एसोवमा सासयवा इयाणं । विसीयई सिढिले आउ यंमि कालोवणीए सरीरस्स भेए ।९। खिप्पं नसक्केइ विवेगमेउं तम्हा समुट्ठाय पहाय कामे । समेच्च लोगं समया

भाषा

न भेलत् पश्चादपि करिष्यामि कोइ जीव इम जाणे हवणा खाउं पीउं पछे मरणकाले धर्मकरी स पछे कोण जाणें मनना परिणाम किस्या एहोये ते भणी पेहे लांज धर्म करीइ एषा उपमा शाश्वतवादीनां निरूप क्रमायुषां पछे धर्मकरीश्च उपमा शाश्वतवादी आउषाना भणीने सोभे बीजाने न शोभे विषादं गच्छति शिथिले आयुर्बले सिथलीभूते पहिला धर्म कीधुं नहीं पछे आऊखूं पूर्ण थये जीव घणुं विषवाद पामे दुखी थाय कालोपनीते शरीर भेदे सति मरण आव्या थका झूरे मे धर्म न कीधो हवे माहरी सोगत थासे ९ प्राणी प्रायेण शीघ्रं विवेकमाप्तुं न शक्नोति प्राणी मरणसमे उतावलो त्याग रूप विवेक पाली सके नहीं तस्मात् समुत्थाय त्यक्त्वा कामान् तिणे कारणे कामभोग छांडीने धर्मने विषे उद्यम करी ज्ञात्वा लोक समतया महर्षिः लोकमुखरूप देखीने समता रसे करी झीलतो थको विचरे आत्मारक्षकः चरेत् अप्रमत्तः सन् साधु केहवा छे आत्मानो रक्षक छे अप्रमादी थको

प्रकर्षेण ज्ञात्वा इति प्रहाय त्यक्त्वा पुनः किं कृत्वा लोकं प्राणि समूहं समया प्रत्युमित्रोपरिसाम्यभावेन समित्य सम्यग् ज्ञात्वा १० अत्र ब्राह्मणीकथा एको ब्राह्मणः परदेशे गत्वा सर्वशास्त्रपारगो भूत्वा स्वदेशे समायातः तस्य प्रकामपाण्डित्यं दृष्ट्वा एकेन ब्राह्मणेन कन्या दत्ता तेन परिणीता सच लोके भृशं दक्षिणां लभते धनवान् जातः तस्या भार्यायास्तेन बहूनि आभरणानि दत्तानि सापि तानि स्वाङ्गे परिहितान्येव रचति नचांगात्कदाचिदप्युत्तारयति तेनैकदा तस्याः कथितं एष चुल्लश्वशुरोस्ति नित्यमाभरणपरिधानमयुक्तं कदाचिद्यत्र चौराः समायान्ति तदा तवाङ्गकदर्थना भवति सा प्राह यदा चौराः समायास्यन्ति तदा त्वरितमङ्गादाभरणान्यहमुत्तारयिष्यामि अन्यदा तस्या गृहे एव चौराः समायाताः सा तदानीं निबडमङ्गलग्नान्याभरणानि स्वांगादुत्तारयितमसमर्थाः तथैव स्थिता तस्यास्ताभरणाः पाणाद्यवयवांश्छित्वा तैर्गृहीताः साच महतीं कदर्थनां प्राप्ता मृता एवमन्येपि प्राक्तनकर्मविपाक कालेन विवेकमेतुं शक्नोति समिच्च लोगं समयामहेसी अप्पाण रक्खी चरमप्पमत्तो अत्र प्रमाद परिहारा परिहारयो र्वणिग्महिलाद्वयो रुदाहरणं एका वणिग्महिला प्रोषित पतिका निजवपुः शुश्रूषा परागृहव्यापारेषु प्रमत्ता दासादीनां यथार्हं भोजनाद्यपि अददाना तैर्मुक्ता ततो गृहागतेन भर्त्ता स्वगृहे भृत्य विभवहानिं दृष्ट्वा सास्तो निष्कासिता ततो वणिजा बहुद्रव्येण अन्या परिणीता सा च न स्वदेहशुश्रूषां करोति यथार्हं भृत्यान् भोजयन्ती कार्येषु नियुञ्जयन्ती च भर्त्रा गृहस्वामिनी ज्ञाता इहैव जन्मनि प्रथम स्त्रीवत्प्रमादादोषान् प्राप्नोति अप्रमादात् द्वितीय स्त्रीवद्गुणान वाप्नो

सूत्र — महेसी अप्पाण रक्खी चरप्पमत्तो ॥१०॥ मुहुं२ मोह गुणो जयं तं अणेगरूवा समणं चरं तं फासा फुसंति असमं

भाषा — विचरे जीव रक्षा करतु १० मुहुर्मुहु वारंवारं शब्दादीन् जयंतः साधु केहवा छे वारं२ मोहनी जीते छे संयममार्गे गच्छन्तु अनेकरूपस्पर्शा स्पृशन्ति अस मञ्जसं अनुकूलं प्रतिकूलं यथा स्यात्तथा नाना प्रकारे साधुने विचरतांने स्पर्शा अनुकूलं यथास्यात् नानाप्रकारना स्पर्श आवीसाधुने फरसे छे भूंडा भला

तीत्युपनयः १० सुहुं सुहुं मोहगुणे जयन्तं अणेगरूवा समणंचरन्तं फासा फुसन्ती असमञ्जसञ्च न तेसु भिक्खू मणसापओसे ११ स्पर्शाः स्पृश्यन्ते इन्द्रियै रिति स्पर्शाः शब्दादयो विषयाः श्रमणं साधुं असमञ्जसं प्रतिकूलं यथास्यात्तथा स्पृशन्ति साधुं प्रति दुःखदा भवन्ति कौदृशाः स्पर्शाः अनेक रूपाः त्रयो विंशति विधाः साधुं किं कुर्वन्तं मुहुर्मुहु र्वारं २ मोहस्य गुणान् जयन्तं शब्दादि विषयान् जयन्तं भिक्षुस्तेषु प्रतिलोमेषु अनुलोमेषु वान प्रादु र्भूतेषु प्रद्वेषं न कुर्वीत न च हर्षितोपि भवेत् इत्यर्थः ११ मन्दाय फासा बहुलो हणिज्जा तहप्पगारेसु मणं न कुज्जा रक्खेज्ज कोहं विणइज्ज माणं मायं न सेवेज्ज पहिज्ज लोहं १२ च पुनःसाधुस्तथा प्रकारेषु विषयेषु मनो न कुर्या तथाप्रकारेषु इति कौदृशेषु स्पर्शाः कौदृशाः सन्ति तानाह स्पर्शाः मन्दावर्त्तन्ते मन्द यन्ति विवेकिनं इति मन्दाः पुनः कौदृशाः स्पर्शाः बहुलोभनीयाबहुलोभयन्ति लोभ मुत्पादयन्तीति बहुलोभनीयाः पुनः साधुः क्रोधं रक्षेत् पुनर्मानं

सूत्र

जसंचनतेसुभिक्खूमणसाप उस्से ॥११॥ मंदाय फासा बहुलो हणिज्जा तहप्पगारेसु मणं न कुज्जा । रक्खेज्ज कोहं

भाषा

नतेषु भिक्षुः मनसा प्रद्वेषं कुर्यात् ते स्पर्श उपरि साधू द्वेष न आणे ११ मन्दयन्ति विवेकिनमज्ञतां नयन्ती मन्दाः प्रचुरः लोभनाला स्त्रीना स्पर्शपुरुषने मन्दपणे मूढ़पणे घणु लोभावेछे तथा प्रकारेषु स्पर्शादिषु मनो न कुर्यात् तथाप्रकार साधूस्त्री तणाहाव भावस्पर्शनने विषे मन स्फेटयेत् क्रोधं विनिवार येत् मानं साधु क्रोध न करे मान फेड़े मायं न सेवयेत् लोभं स्फेटयेत् मायाने न सेवे लोभने टाले १२ ये संस्कृताः तुच्छतत्त्वज्ञाः बीदाथा: ते संस्कृत भाषाना बोलणहारतुच्छपरवादी वादना करणहार ते प्रेमद्वेषानुगताः परवसाः ते रागद्वेषने वसि पड्या परवस पड्या थका फरसे छे एते परवादिनो अन्यतोर्थिकाऽधर्म्माः तान् निन्दन् ए पर अन्यतीर्थीऽधर्मीने निन्दतो थको अभिलिखेत् ज्ञानादीन् गुणान् यावन्मृत्तिः समाप्तो ब्रवीमि साधु संयमनागुण बांछे संयमने विषे वर्त्ते जिहां लगे शरीरभेद न पामे तिहां लगेधर्मने विषे प्रवर्त्ते १३ इति चतुर्थं अध्ययनं असंस्कृतम् संपूर्णम् ॥ अथ अकाममरणं

विनयेत् गर्वस्फेटयेत् मायां न सेवेत लोभं प्रसह्यात् परित्यजेत् जेसङ्खया तुच्छ परप्पवाई तेपिज्ज दोसाणु गयापरज्झा एए अहम्मुत्ति दुगच्छमाणो कङ्खे गुणे जावसरीरभेउत्तिबेमि १२ ये परप्रवादिनः संस्कृताः तुच्छाः यदृच्छाभि धानतयानिः सारा: तेपिज्जदो साणु गया प्रेमद्वेषानुगताः रागद्वेषानुगताः सन्ति पुनस्तेपरज्झाः परवशाः रागद्वेषग्रस्ता: सन्ति एते अधर्महेतु त्वात् अधर्माः इति अमुना प्रकारेण जुगुप्सु मानः तत्परिचयंनिवारयन् निन्दायाः सर्वत्र निषेधात् न निन्दत् गुणान् ज्ञानादीन् कांक्षेत अभिलषेत् कथं यावत् शरीर भेदः शरीरस्य भेदः पतनं स्यादित्यर्थः इति प्रमादाप्रमादयो र्हेयो पादेय सूचकं असंस्कृत प्रथम पदोपलक्षितं असंस्कृताख्यं चतुर्थं मध्ययनं सम्पूर्णं ४ इति श्रीमदुत्तराध्ययन सूत्रार्थ दीपिकायां उपध्याय श्रीलक्ष्मी कीर्त्तिगणिशिष्य लक्ष्मीवल्लभ गणिविरचितायां चतुर्थाध्ययनस्यार्थः सम्पूर्णः ॥ ४ अथ पूर्वाध्ययने यावच्छरीर भेद इति ब्रूवतामरण कालेऽपि अप्रमादः कार्य इत्युक्तं सचमरण विभाग ज्ञानतः स्यात् अतो मरण भेदमाह इति चतुर्थ पञ्चमयोः सम्बन्धः असंखयंमि महोहंमि एगेतिन्ने दुरुत्तरं तत्थएगे महा पन्ने इमं पहमुदाहरे १ व्याख्या एके महापुरुषागीतमादयः घातिकर्म रहिताः अर्णवात् संसार समुद्रात्तीर्णाः पारं प्राप्ताः कीदृशात् अर्णवात् महौघात्

सूत्र

विणएज्जमाणं मायं नसेवेज्जपहेज्जलोहं ।१२॥ जेसंखया तुच्छपरप्पवादुतेपेज्ज दोसाणुगया परज्झा एए अह म्मोत्ति दुगंछमाणोकंखेगुणेजावसरीरभे उत्तिबेमि ।१३॥ असंखयज्झयणं समत्तं । असंखंमि महोहंमि एगेतिन्ने दुरुत्तरे

भाषा

अध्ययनं प्रारभ्यते ४ अर्णवे महौ घेसंसारसमुद्रे महा जेहनो प्रवाह छे एहवो संसारसमुद्र बीहां मणी छे एकः कश्चित् दुरुत्तरं विषमस्थानं तीर्ण एक

महान् श्रीघोषस्य समहीधरस्तस्मात् अत्र प्राकृतत्वा द्विभक्ति व्यत्ययः हे जंबू तत्र देवमनुष्य सभायां एकस्मिन् काले अत्र भरतक्षेत्रे एकस्य तीर्थं करस्य विद्यमानत्वात् एकोमहावीरः इमं प्रश्नं प्रष्टव्यार्थं रूपं प्रश्नयोग्यं वाक्यं उदाजहे उदाहृतवान् कथं भूतः एकः महाप्राज्ञः महती केवलात्मिका प्रज्ञाप्रज्ञानिर्यस्य स महाप्रज्ञः १ सन्तिमेय दुवेठाणा अक्खा या मारणंतिया अकाम मरणञ्चेव स काम मरणन्तहा २ इमे प्रत्यक्षेद्वेस्थाने आख्याते जीवनि वासाश्रयी आख्याती पूर्वतीर्थ करैः कथितौ कौटग्रेद्वेस्थाने मारणान्तिके मरणमेव अन्तो मरणान्त स्तत्र भवं मारणान्तिकं तस्मिन् मरणावस्थायां जाते इत्यर्थः तेद्वे स्थाने एकं अकाम मरणञ्च पुन रन्यत् तथा सकाम मरणं अकाम मरणं बाल मरणं स काम मरणं पण्डित मरणञ्चेव शब्दोपादपूरणार्थौ मरणं सप्तदशधा आवीचीमरणं १ आवधिमरणं अन्तिम २ वलय ४ वशार्त्त ५ अन्तः शल्य ६ तद्भव ७ पण्डित ८ बाल ८ मिश्र १० छद्मस्थ११ केवली १२ विहायस१३ गृद्धपृष्ठ१४ भक्तपरिज्ञा१५ इङ्गिनी१६ पादपोपगमन १७ १ बालाणं अकामं तु मरणं तु असयंभवे पण्डियाणं सकामं तु उक्कोसेणं सयंभवे १२ बालानां मूर्खाणां अकामं अकामेन अनीप्सितत्वेन म्रियते अस्मिन् इति अकाम मरणं असकृत् वारं वारं भवेत तु पुनः पण्डिता सकामं सहकामे न ईप्सितेन म्रियतेऽस्मिन् इति सकामं मरणं यस्मिन् आगते सति असन्तस्य तया उत्सव भूतत्वेन सकामं इव सकामं

सूत्र

तत्थएगे महापन्ने इमंपण्ह मुदाहरे ॥१॥संतिमेय दुवेठाणा अक्खाया मारणंतिया अकाम मरणंचेव सकाम मरणं

भाषा

महापुरुषतीर्थंकर साधु ए संसारसमुद्रतथा दुस्तरः तत्र एको महाप्राज्ञः तिहां एक महाबुद्धिवन्तः इदं प्रश्नं उदाहरेत् कथितवान् एक साधु ए प्रश्न कहे तो इंतो १ सन्ति विद्यते मे मम हे स्थानके सन्ति छे माहरे दोयस्थानके आख्याताः मारणांतिकाः कह्या मरणने अवसरे एकं अकाममरणं निश्चये न एक स्थानके अकाममरण कह्युं द्वितीयं सकाम मरणं तथा बीजूं स्थानक सकाम मरणनो कह्युः २ बालानां मूर्खाणां विवेकरहिता नां अकामजे

ताहशं मरणं पण्डितानां उत्कृष्टं स कृत् एक वारं एव भवेत् उत्कर्षेण उपलक्षितं केवलि सम्बन्धि इत्यर्थः जघन्येन तु शैष चारित्र वतः सप्ताष्टवारान् भवेत् तत्थिमं पढ मठाणं महावीरेण देसियंकामगिद्धे जहा बालेभिसंकूराइकुव्वई ४ तत्रतयोरुभयोमरणयोर्मध्ये प्रथमं स्थानं महावीरेण अकामं मरणं देशितं कथितं तथा येन प्रकारेण कामगृद्धाः कामेषु इन्द्रियसुखेषु गृद्धाः कामगृद्धाः विषयिणो जीवाऽत एव बाला मूर्खा भृशं अत्यर्थं वारम्बारं अकाममरणं अति कुर्वते अशक्तौ अपि मनसा दुष्कर्माणि कृत्वा मुहुर्मुहु म्रियन्ते इत्यर्थः कीदृशा मूर्खाः क्रूराः ४ जेगिद्धे काम भोगेसु एगे कूडाय गच्छई न मेदिट्ठे परे लोए चक्खुदिट्ठा इमारई ५ कामभोगेषु यः एकः कश्चित् क्रूरकर्मा पुरुषः कूटाय नरकस्थानाय 'नरकस्थानं गच्छति नरकं व्रजति इत्यर्थः कूटं प्राणिनां पीडाकरं स्थानं द्वितीयास्थाने चतुर्थी प्राकृतत्वात् अथवाय एकः कश्चित् कामभोगेषु गृद्धः स कूटाय गच्छति मृषा भाषादिकूटं

सूत्र

तहा ॥२॥ बालाणं अकामंतु मरणं असइं भवे। पंडियाणं सकामंतु उक्कोसेणं सइं भवे ॥३॥ तत्थिमं पढमं ठाणं महावीरेण देसियं। काम गिद्धे जहा बालेभिसं कूराइं कुव्वई ॥४॥ जे गिद्धे काम भोगेसुएगे कूडाय गच्छई। नमे

भाषा

मूर्खज्ञानी पापना करणहार एहवो मनुष्यने अकाममरण होई असकृत् वारं२ भवेत् बालने अकाममरण बारंवार होई पण्डितानां सकामं तु पण्डितश्री माणसने सकाममरण होइ उत्कर्षेण केवलीनामेकवारं भवेत् पण्डितने सकाममरण एक जवार होइ३ तत्र अकाम सकाममर्णयोर्मध्ये प्रथमं अकामं स्थानं पहिलुं अकाम मरण स्थानक महावीरेण देशितं प्ररूपीतं श्रीमहावीर देवे कह्युं काम लोलुपः सन् यथामूर्खः कामभोगने विषे गृद्ध छतो थको बालमूर्ख भृशं अत्यर्थं क्रूराणि हिंसादीनि कर्माणि करोति अतिक्रूर हिंसादिक कर्म करे ४ जे आसक्ताः स्त्रीसम्भोगेषु विलेपनादिषु जे मनुष्य कांम

तस्मै प्रवर्त्तते तं प्रति कश्चिदुक्ति भोलं धर्मं कुरु तदा स वक्ति मया परलोको न दृष्टः इमाद्दयंरतिः कामभोग सुखं रतिः चक्षुर्दृष्टा प्रत्यक्षं दृश्यमाना वर्त्तते ५ हत्था गया इमे कामा कालिया जे अणागया को जाणइ परे लोए अत्थि वा नत्थि वा पुणो ६ इमे कामाः कामभोगाः हस्तागताः हस्ते आगताः हस्तागता स्वाधीना वर्त्तन्ते इत्यर्थः ये अनागताः आगामि जन्मनि भविष्यन्तीति आगामिनः कामभोग सुखास्ते कालिका कालेभवाः कालिकाः अनिश्चिताः को जानाति परलोकः परभवः अस्ति वा नास्ति वा इतिभावः ६ जणेण सद्धिं होक्खामि इइबाले पगब्भई कामभोगाणुराएणं केसं सम्पडिवज्जई ७ ततः स कामभोग रसगृद्धः पुमान् बालः इति प्रगल्भते इति धार्ष्ट्यं गृह्णाति इत्युक्ता धृष्टो भवति इतीति किं अहं जनेन सार्द्धं भवि

सूत्र

दिट्ठे परेलोए चक्खु दिट्ठा इमा रई ॥५॥ हत्था गया इमे कामा कालिया जे अणागया। को जाणइ परेलोए अत्थिवा नत्थिवा पुणो ॥६॥ जणेणसद्धिं होक्खामि इइ बाले पगब्भई। काम भोगाणु राएणं केसंसं पडिवज्जई ॥७॥

भाषा

भोगने विषे गृद्ध हुवा छे लपटाई रह्या छे एके मृषा भाषा गच्छन्ति ते एकांति कूडो बोले तथा क्रूरकर्म करे न मे दृष्टः परं लोकः परलोकमे दीठो नथी चक्षुर्दृष्टाइ मारतिः एकाम भोग ए स्त्रीनां सुख प्रत्यक्ष दीसे छे ५ हस्तागताः इमे कामाः एकाम भोगहस्त प्राप्त छे एकाम भोग इं भोग वुं एते कालिकाः शब्दाद्याः ये आगताः एकामभोग छोडीने धर्म करो जिम आगे सुख पामो कोण जाणे आगे कि स्युं छे आगे कुणे दीठुं छे को जानाति परलोकः कोण जाणे परलोक अस्ति वा नास्ति वा छे किंवा नही छे ६ लोकेन सार्द्धं भविष्यामि लंपट थको धेठाइ करे जिम एतला लोकनी गति हुस्ये तिम माहरी पणगति हुस्ये इति मूर्खः प्रगल्भ ते अवलंवत इम करी मूर्ख धीठाई करी अवलंवे छे काम भोगनुं रागे न काम भोगने रागे करी क्लेशं स

थामि अयं कामभोग सुख भोक्ताजनो यादृशो भविष्यति तेन सार्द्धं अहमपि भविष्यामि सबाल इति उक्ता कामभोगानुरागेण कामभोगस्नेहेन क्लेशं सम्प्रतिपद्यते क्लेशं इह परत्र च बाधात्मकं दुःखं भजते इत्यर्थः ७ तओसे दण्डसमारभईतसेसु थावरेसु अ अट्ठाए अणट्ठाए भूयगामं विहं सई ८ ततः कामभोगानुरागात् स धार्ष्ट्यवान् त्रसेषु च पुनः स्थावरेषु दण्डं समारभते मनोदण्ड वाक्काये: पीडां समारभते अर्थेन द्रव्योत्पादननिमित्तं अनर्थेन निःप्रयोजनेन वा भूतग्रामं भूतानां पृथिव्यप्ते जो वायु वनस्पत्येकेन्द्रियद्वीन्द्रिय त्रीन्द्रिय चतुरिन्द्रिय पञ्चेन्द्रियादि जीवानां वर्गं विशेषेणहिनस्ति अत्र अजपालकथा यथा एकः पशुपालो वटतलेऽजासु सुप्तासु तत्पत्राणि छिद्री कुर्व्वन् अश्वापहृतेन कुतश्चिद्रा यातेन कस्यचिद्राज्ञः पुत्रेण दृष्टो भणितश्च अरे अहं यस्य कथयामि तद्द्वीपित्वं पातयिष्यसि तेन प्रतिपन्नं राजपुत्रेण स स्वनगरेनीतः एकदाऽश्ववाहनिकार्थं गच्छतो राज्ञोऽग्रेऽपि राजपुत्र प्रेरितः सपातयामा स पश्चात्स राजपुत्रो राजाजातः पशुपालस्यैव सुवाच वरं वृणुतेनोक्तं यत्राहं वसामि तदेव ग्रामं देहि राजा तत्ग्रामस्य दत्तं तेन च तत्र घनास्तम्बवल्ला आरोपिता निष्पन्नेषु चतुस्त्रेषु गुडेन सार्द्धं लुब्ध खण्डानि खादन् गायति अहमट्टंपि सिखिज्जा सिक्खियं न निरत्थयं अहमट्टप्प साएण खज्जए गुलतुम्बयं १ तेन हि पशुपालेन वटपत्राणि अनर्थाय छिद्रितानि अग्नीणि पुनरर्थाय उत्पाटितानि उभयत्रापि प्राणिवधः कृत इति ८ हिंसे बाले मुसावाई माइल्ले पिसुणे सढे भुञ्जमाणे सुरंमंसं सेयं मेयं तिमन्नई ९ सबालः हिंस्रः हिंसनशीलो भवति पुनर्मृषावादी भवति

सूत्र

तओ से दंडं समारंभइ तसेसु थावरेसुय। अट्ठाएय अणट्ठाए भूय गामं विहिंसई ॥८॥ हिंसे बाले मुसावाई माइल्ले

भाषा

प्रति पद्यते क्लेश पण पड़वजे छे ७ ततः सदण्ड आरम्भ हिंसा समारम्भे ते इस्यो धीठ पणो आदरीने तिवार पछी ते मूरख त्रसेषु स्थावरेषु जीवेषु त्रस स्थावरजीवनो विणास करे धनादि कार्याय निरर्थक कार्यने अर्थे निरर्थक बध करे प्राणि वृंन्दं विहिंसेछ घणा जीवने विध्वंसे मारे ८

माइल्लः मायाकारकः कापट्यवान् पिशुनः परनिन्दकः पुनः शठो वेषाद्यन्यथा करणेन धूर्त्तः मूर्खो वा सुरामांसं च शुद्धानोऽपि मे मम एतत् श्रेयः कानि इति मन्यते अतएव शठ इत्यर्थः ९ कायसा वयसामत्ते वित्ते गिद्धे अइत्थिसु दुहओ मलं संचिणुई सिसुनागुव्वमट्टियं १० पुनः कीदृश सका येनमत्तः पुनःवचसामत्तः पुनःवित्ते द्रव्ये गृद्धः लोभी च पुनः स्त्रीषु गृद्धः कायेनमत्तः यतस्ततः प्रबुत्तिमान् बलवान् अहं रूपवान् अहं इति इति चिन्तयन् वचसा आत्मगुणान् कथयन् सुस्वरोहं इति वा चिन्तयन् उपलक्षणात् मनसा मदाध्मातो धारणादि शक्तिमान् अहं इति चिन्तयन् सदुहओत्ति द्वेधा द्वाभ्यां रागद्वेषाभ्यां मलं संचिनुते मलसञ्चयं कुरुते कः कां इव शिशुनागः अलसो द्वीन्द्रिय जीवविशेषः भूनागः यथा मृत्तिकां संचुनुते स च स्निग्धतनु तया बहिः प्रदेशे शरीरे रेणुभि रवगुण्ठ्यते अन्तश्च मृत्तिकां एव अश्नाति ततश्च मृत्तिकातो बहिर्निसरत सूर्यकिरणैः शुष्यन् क्लिश्यति विनश्यति विनश्य च मृत्तिकाया एव वृद्धिं कुरुते तथा सोपिमलं कर्ममलं वर्द्धयति कर्मणा एव उत्पद्यन्ते पुनः कर्ममल वृद्धिं करोतीत्यर्थ १० तओपुट्ठो आयङ्केण गिलाणो परितप्पई पभीओ परलोगस्स कम्माणुप्पेहि अप्पणो ११ ततोऽष्टकर्ममल सञ्चयादनन्तरं आतङ्केन रोगेन स्पृष्टः सन् ग्लानः ग्लानिं प्राप्तः परितप्यते परिखिद्यते परलोकात् प्रभीतः कथभूतः सः आत्मनः कर्मानुप्रेक्षी यदा रोगादिग्रस्तो भवति तदा स्वयं जानाति मम कर्मणां विपाकोजातः मया पुरायानि अशुभानि कर्माणि कृतानि तस्मादहं परलोकेपि दुःखी भविष्यामि इति स्वकृतकर्मापेक्षी स्वकृतकर्म विचारक

सूत्र पिसुणे सढे । भुंज माणे सुरं मंसं सेय मेयंति मन्नई ॥९॥ कायसा वयसा मत्ते वित्ते गिद्धे इत्थिसु । दुहओ मलं

भाषा हिंसन् मूर्खः मृषावादी हिंसा करे वाल मृषावाद बोले माइल्लत्ति मायायुक्तः परदोष भाषको मायाइ करी सहित चाड़ी खावे निन्दा करे भुंजानः सन् मद्यमांसं मद्यमांस खातो थको श्रेय प्रशस्य इति मन्यते श्रेय रुडो करी माने ९ कायेन वचसा मदवान् कायाइ करी वचने करीमत्त मातो द्रव्ये

इत्यर्थः ११ सुयामे नरएठाणा असीलाणञ्च जागई बालाणं कूरकम्माणं पगाढा जत्थवेयणा १२ मेमया नरके स्थानानि श्रुतानि यागतिर्नरकादि

संचिणइ सिसुनागोव्व मट्टियं ॥१०॥ तओ पुट्ठो आयंकेणं गिलाणो परितप्पई पभीओ पर लोयस्स कम्माणु प्पेहि अप्पणो ॥११॥ सुयामे नरए ठाणा असीलाणंच जा गई। बालाणं कूर कम्माणं पगाढा जत्थ वेयणा ॥१२॥ तत्थो ववाइयं ठाणं जहामे तमणुस्सुयं। अहाकम्मेहिं गच्छंतो सो पच्छा परितप्पई ॥१३॥ जहा सागडिउजाणं संमं हिच्चा

भाषा

वारं पुनरित्यर्थः तत् मित्रबान्धव धनौ घसञ्चयादि मार्गविषयेत् तस्मात् समयमात्रमपि माप्रमादीः ३० नहुजिणे अज्जदिस्सई बहुमए दिस्सइ मग्ग देसिए सम्यदृने याउ एपहे समयं० ३१ पुनरपि गौतमादीन् दृढीकरोति श्रीमहावीरः हे गौतम सम्प्रति इदानीं मयि विद्यमाने प्रत्यक्ष प्रमाणेन गृह्यमाणे सति नैयायिके मुक्तिरूपे पथिमार्गविषये माप्रमादः भवान् कुर्यात् यद्यपि तवेदानीं केवलज्ञानं नास्ति तथापि अहं विद्यमानोस्मि इति सांप्रतं संज्ञया भावेन प्रमादस्त्याज्यः अन्ये तु महिरहेपि एतादृशा भाविनो भव्यजना भविष्यन्ति ये इति विचिन्त्य इत्यनुमान प्रमाणं विधाय नैयायिके मार्गे साधुधर्मे मयि च स्थिरा भविष्यन्ति तत् किं अनुमानं कृत्वा अप्रमादिनः स्थिराश्च भविष्यन्ति तदाहमार्ग इव मुक्ति नगरं प्रतिपन्था इव देशितः कथितो मार्गदेसितः अयञ्जीव दयाधर्मो मुक्तिमार्गइव कथितो दृश्यते अथ इदानीं जिनो न दृश्यते कथम्भूतोयं मार्गदेशितः बहुमतः बहुभिर्बहूनां वामतो बहुमतः अथवा बहवोमाताः न यायस्मिन् स बहुमतः नै गमसंग्रह व्यवहार ऋजु सूत्रशब्द समभिरूढ़ एवम्भूतादि सप्त नया त्मकः ज्ञानदर्शन चारित्राणि मोक्षमार्गः अपरमतेहि एकान्त वादित्वं तस्मादयं जैन मतस्तु बहुमतः एवम्बिधोयं मुक्तिमार्गः अतीन्द्रियार्थ दर्शितं जिनं केवलिनं विना तस्मात् अस्य बहुमतस्य मुक्तिमार्गस्य एवं भव्याः ज्ञास्यन्ति चेदयं मुक्तिमार्गोस्तिजिनो नास्ति तदा अस्य मार्गस्य कश्चि दुक्तापि आसीत् न च स कश्चित् वक्ताऽपि सामान्यः किन्तु अस्य धर्मस्योपदेष्टा कश्चिदासो जिन एव भवितु मर्हति इति महिरहेऽपि अप्रमादिनो भविष्यन्ति मयि सम्प्रति केवलिनि सति अस्मिन् नैयायिके पथि सर्वथा प्रमादस्त्याज्य एवेति भावः निश्चितः आयो मुक्तिलक्षणो लाभो यस्मिन् सनै यायिको ज्ञानदर्शनचारित्र रूप रत्नत्रयात्मक इत्यर्थः अथ पुनरपि अस्या गाथा याअयमर्थोप्यस्ति हे गौतम अद्य इदानीं भवान् जिनः केवली न दृश्यते दृश्यते इति क्रिया बलात् भवान् इति पदं अनुक्त मपि गृह्यते परं बहुभिर्मतोमान्यो ज्ञातो वा बहुमतः अर्थात् प्रसिद्धः मार्गइव जिनश्च भवन

मार्गो देशितो मया तवोपदिष्टः स मार्गस्त्वया विलोक्यते एव तस्मात् सम्प्रति इदानीं मयि जिने सति नैयायिके मार्गे मदुक्ते मार्गे समयमात्रमपि माप्रमादीः मयि विद्यमाने सति मयि विषये मोहात् भवान् जिनो न वर्त्तसे पश्चात्त्वं जिनो भावी तस्मादिदानीं मद्वचने प्रामाण्यं विधेयं इत्यर्थः३१ अवसोहिय कण्टयापहं उत्तिण्णोसि पहं महालयं गच्छसि मग्गं विसोहियं सम० ३१ हे गौतम त्वं महालयं पन्थां न मुत्तीर्णोसि प्राप्तोसि महान् सम्यक् ज्ञान दर्शनचारित्र लक्षणः आलयः आश्रयो यस्मिन् स महालयस्तं महालयं एतादृशं पन्थानं राजमार्गं प्राप्तोसि किं कृत्वा कण्टकपथं अव शोध्य कण्टकानां बोद्ध चरकसंन्यादीनां पन्थाः कण्टकपथः आकारः प्राकृतिकः अथवा कण्डैः कुतीर्थिकैः आकीर्णो व्याप्तः कुत्सितः पन्थाः कण्टकापथस्तं परिहृत्य सम्यक् मुक्तिमार्गं राजमार्गमिव प्राप्तोसि हे गौतम यदि विशेषेण शोधिते निरवद्ये मार्गे गच्छसि तदा समयं अपि प्रमादं

सूत्र

मणदिग्घद्धमग्गदेसिए । संपट्ठेनेयाउएपहे समयंगोयममापमायए ॥३१॥ अवसोहिय कंटयापहंउत्तिण्णोसिपहं महालयं गच्छसि मग्गंविसोहिया समयंगोयममापमायए ।३२। अवले जहभारवाहए मामग्गेविसमेव गाहिया । पच्छापच्छाणु

भाषा

मार्गदेशक: घणा मत मुक्तिमार्गना देषाडणहारदीसेछे सम्प्रति मोक्षमार्गे पथि साम्प्रतहवणा मोक्षमार्गने विषे प्रमाद मत करे समयमपि हे गौतम मा प्रमादीः ३१ अवशोध्यपरिहृत्य कण्टकानां द्रव्यतस्थूलकण्टकादीनां भावतः चरकादि कंटानो मार्गलांध्यो छे चरकादीपाषंडी तेहने पणी मार्गलांध्यो छे उत्तीर्णोसि पथं महान्तं लांध्यो छे मोटा मार्ग गच्छसि मार्गे त्वं विशोध्य भली परे मार्ग सोभीने तुं जाइसी मुक्तने विषे ते कारणे करीने समयमपि हे गौतम मा प्रमादी ३२ अवलो यथा भारवाहकः निबल जिम भारवाहक मार्गविषम अवगाह्य प्रविश्य त्यक्त अङ्गीकृत भारः माथे भार लीधो छे विषम

त्वं मा कुर्याः ३२ अवले जह भारवाहए मामगे विसमे वगाहिया पच्छा पच्छाणुतावए समयं० ३३ हे गौतम यथा कश्चित् भारवाहको विषमं मार्गं अवगाह्य विषमे मार्गे स्खलितः स्यात् स च भारवाहकः पश्चात् गृहमागतः पश्चादनुतप्यते पश्चात्तापपीडितः स्यात् कोर्थः यथाकश्चिद्भारवाहकः सिरसि कतिचिद्दिनानि यावत् विषमे मार्गे स्खलितः भारमुद्वहति तदनन्तरं कुत्रचित्पाषाणादि सङ्कुले मार्गे भारेणाक्रान्तोहं मिति ज्ञात्वा तं भारमुत्सृजति सच भारवाहकः पश्चाद् गृहमागतः सन् निर्द्धनत्वेन पश्चादनुतप्यते पश्चात्तापपीडितः स्यात् तथा त्वमपि विषमं मार्गं तारुण्यादि वयोविशेषं महाव्रतभार मुद्वाह्य समे मार्गे यौवनोत्तारे कुत्रचित्परीषहादिना स्खलन् महाव्रतभारं त्यजन् अवलो भवन् पश्चादंत्ये वयसि आगतः संयमधनरहितो भूत्वा मा पश्चात्तापपीडितो भूयाः इति विचिन्त्य समयमात्रमपि मा प्रमादीः ३३ तिण्णोसि अण्णवंमहं किं पुणचिट्ठसि तीरमागओ अभि तुरपारं गमित्तए सम० ३४ हे गौतम त्वं अर्णवं भवसमुद्रं तीर्ण एव असि उल्लङ्घित प्रायोसि किं पुनस्तीरं आगतः सन् तिष्ठसि औदासीन्यं भजसि हे गौतम भवार्णवस्य पारगन्तुं अभित्वरस्व पारगमने उत्तालो भव इत्यर्थः तीर

सूत्र

तावए समयंगोयममापमायए ॥३३॥ तिण्णोसि अण्णवंमहंकिंपुण चिट्ठसितीरमागओ । अभितुरपारंगमित्तए समयं

भाषा

भार सर्व लांध्यो छे चोरकाले पाषंडी तेहनो यौवनमार्ग लांघ्यो छे दोहिलो पश्चात् पश्चात्तापं कृतस्या पछे ते भारवाहक मारग लांघ्या पछी पछतावे हाटनो मार्ग लांघ्यो छे चर थोडो सोमार्ग आदे रह्या छे तिवारे भारनाखीदीद्र हे गौतम मार्ग लांघीने थोडामांहीं भारनाख्यो समयमपि हे गौतममा प्रमादी ३२ तीर्णोसि भवसागरं महांतं हे गौतम संसारसमुद्रतर्यो छे किं पुनस्तिष्ठसितीरमागतः हे गौतम काठे आवीवैठा काइं छे अभि सम्मुखमुक्तिं गंतुत्वरा शीघ्र भव पारं अर्थान्मुक्तिपदगन्तु हे गौतम तुं शीघ्र मुक्तिं जाइ समयमपि हे गौतम मा प्रमादी ३४ क्षपकश्रेणि मुत्सृता आरुह्य क्षपकश्रेणि

मत्र मुक्तिपदमुच्यते तस्मात्समयमात्रमपि मा प्रमादीः ३४ अकले वरसेणिमुस्सिया सिद्धिं गोयमलोयं गच्छसि खेमंच सिवं अणुत्तरं समयं० ३५ हे गौतम त्वं सिद्धिं सिद्धि नाम कं लोकं स्थानं गमिष्यसि प्राप्स्यसि किं कृत्वा अकलेवरश्रेणिं उत्सृज्य न विद्यते कलेवरं शरीरं येषां ते अकलेवराः सिद्धा तेषां श्रेणिः उत्तरोत्तरप्रशस्तमनः परिणति पद्धतिः क्षपकश्रेणि स्तां अकलेवर श्रेणिं उत्सृज्य उत्तरोत्तरसंयमस्थानप्राप्त्या ऊर्ध्वतां द्रवक्कृत्वा कथंभूतं सिद्धिं लोकं क्षेमं परचक्राद्युपद्रवरहितं पुनः कीदृशं शिवं सकलदुरितोपशमं पुनः कीदृशं अनुत्तरं सर्वोत्कृष्टं३५ बुद्धे परिनिव्वुडेचरे गामगए नगरेवसंजए संतिमग्गंचबूहए समयं० ३६ हे गौतम परिनिर्वृतः शांतरससहितः सन् चरसंयमं सेवस्व कीदृशः ग्रामे गतो ग्रामगतः च पुनर्नगरे गतः च शब्दात् वने वा स्थितः पुनः कीदृशः संयत् सम्यक् यत्नं कुर्वाणः पुनः कीदृशः बुद्धो ज्ञाततत्त्वः च पुनः हे गौतम शांतिमार्गं त्वं बृंहये भव्यजनानां उपदेशद्वारेण

सूत्र

गोयममापमायए ॥३४॥ अकलेवर सेणिमुस्सिया सिद्धिं गोयमलोयं गच्छसि । खेमंचसिवंअणुत्तरं समयं गोयममापमा यए ॥३५॥ बुद्धेपरिनिव्वुडे चरेगामगएनगरेव संजए । संतिमग्गंचबूहए समयंगोयममापमायए ।३६। बुद्धस्सनिसम्म

भाषा

नेविषे चढीने पछे मुक्तिजाइ सिद्धिं हे गौतम लोकं गच्छसि हे गौतम सिद्धिलोकने विषे जाईसि परचक्रादि रहितं शिवं सर्वोत्तमं मुक्तिः कीसो छे खेम कल्याणनो करणहार छे शिव उपद्रव रहितछे सर्वोत्कृष्टछे समयमपि गौतम मा प्रमादी३५ ज्ञाततत्वपरीनीर्वृतकषायः संयमचरेत् तत्त्व जाणे छे कषाय आपणे वश्यो कीधा छे इम विचरजे मुक्तिमार्ग बृंहिं नयेत् संयतः गाम नगरने विषे शीतल हुओ थको विचरे मुक्तिं मार्गच बृंहिं नयेत् उपशम मार्गव धारे उपसम मार्ग बृंहि करे समयमपि हे गौतम मा प्रमादी ३६ वीरस्य श्रुत्वा भाषितं बुद्धतीर्थंकर तेहनो वचनसांभली सुष्ठु कथितं तीर्थंकर भलो कह्यो

बुद्धिं प्रापये अत्र कार्यं समयमात्रमपि मा प्रमादो २६ बुद्धस्य निशम्य भाषितं सुकथितमर्थपदोपशोभितं रागं द्वेषं च छित्वा सिद्धिं गए गोयमुत्ति बेमि ३७ गौतमः सिद्धिं मुक्तिस्थानं प्राप्तः किं कृत्वा बुद्धस्य श्रीमहावीर देवस्य सुष्ठुसो भनं भाषितं सुभाषितं सम्यक उपदेशं निशम्य श्रोत्रद्वारेण हृदय धार्यं च पुनः रागं द्वेषं च छित्वा कोटशं सुभाषितं सुकथितं सुतरां अतिशयेन शोभनप्रकारेण उपमायोगेन कथितं वाक्यप्रबन्धेन रचितमित्यर्थः सुधर्मा स्वामी जंबूस्वामिनः पुर आह यथा श्रीमहावीरदेवेन गौतमादि शिष्याग्रे कथितं तथाहं तवाग्रे ब्रवीमीत्यर्थः ३७ इति द्रुमपत्राख्यं अध्ययनं दशमं सम्पूर्णम् ॥१०॥ इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायां उपाध्याय श्रीलक्ष्मीकीर्त्तिगणिशिष्यलक्ष्मीवल्लभगणिविरचितायां दशमाध्ययनस्यार्थः सम्पूर्णः १० अथ दशमेऽध्ययने प्रमादपरिहारार्थं उपदेशो दत्तः सच विवेकिनः एव स्यात् विवेकी च बहुश्रुतो भवेत् अतः एकादशं अध्ययनं बहुश्रुताख्यं बहुश्रुतवर्णन

सूत्र

भासियं सुकहियमट्ठपउवसोहियं । रागं दोसंचछिंदियासिद्धिंगइं गएगोयमत्तिबेमि ॥३७॥ दुमपत्तज्झयणंसम्मत्तं ॥१०॥

संजोगाविप्पमुक्कस्स अणगारस्सभिक्खुणो । आयारंपाउकरिस्सामि आणुपुव्विंसुणेहमे ।१। जेयाविहोइ निव्विज्जेथड्डे

भाषा

अर्थपदै रुपशोभितं अर्थ अने पद तेणे करी शोभित छे रागं द्वेषंच छित्वात् रागद्वेष छेदीने सिद्धं गते गतः गौतमः इति समाप्तौ ब्रवीमीः गौतमप्रतिं प्रुहता ३७ इति श्रीद्रुमपत्रकाध्ययनं संपूर्णम् ॥१०॥ संजोग रहितस्य बाह्य संजोग घर धन माल बेटा बेटी प्रमुख अन्तरङ्ग संयोग च्यार कषायसंजोगबाह्य अन्तरसंयोग सर्व छांडा छे अनगारस्य भिक्षोः घररहित भिक्षसंयतीने आचारं प्रकटी करिष्यामि ते साधुनो आचार प्रगट करीसुं अनुक्रमेण शृणुत मे मन कथयतः अनुक्रमे सुभने कहतां सांभलो१ यद्यापि भवन्ति निर्विद्याः विद्या रहितः जे साधु विद्याइ करी हीन हुवे

मुच्यते सूत्रं संजोगाविप्पमुक्कस्स अणगारस्स भिक्खुणो आयारं पाउकरिस्सामि आणुपुव्विं सुणेहमे १ हेजंबू संयोगात् विप्रमुक्तस्य अनगारस्य भिक्षोः आचारं साधुयोग्यक्रियां बहुश्रुतपूजा रूपं बहुश्रुतस्वरूपज्ञानं आनुपूर्व्या अनुक्रमेण प्रादुःकरिष्यामि प्रकटी करिष्यामि मे मम कथयिष्यतः त्वं शृण १ अथवा साधो आचारं आकारं बहुश्रुतस्य आकारं बहुश्रुतः कीदृग् स्यात् तत् प्रकटी करिष्यामि १ प्रथमं तत् परिज्ञानार्थं अबहुश्रुतस्य लक्षणमाह ॥ जेया विहोइ निव्विज्जे थद्धे लुद्धे अणिग्गहे अभिक्खणं उल्लवई अविणीए अबहुस्सुए २ यश्च यो मनुष्यो निर्विद्यो भवति अपिशब्दात् सविद्यो वा भवति स चेत् स्तब्धो अहङ्कारी भवति पुनर्लुब्धो भवति रसादिषु लोलुपो भवति पुनर्यो अनिग्रह इन्द्रिय दमरहितो भवति पुनर्यः अभीक्ष्णं वारंवार उल्लपति उत्प्राबल्येन यथा तथा अविचारितं लपति वाचालो भवति स पुरुष अविनीतो विनयधर्मरहितोऽबहुश्रुत उच्यते सविद्योपि अबहुश्रुतः स्यात् चेत्सविद्यत्वस्य फलं न प्राप्नुयात् तद्विपरीतो बहुश्रुतः स्यात् अबहुश्रुतस्य कारणमाह २ अह पंचहिं ठाणेहिं जेहिं सिक्खा न लब्भई थंभाकोहापमाएणं रोगेणालस्सएणं ३ अथ श्रोतुः पुरुषस्य उत्कर्णता करणैः यैः पञ्चभिः स्थानैः पञ्चभिः प्रकारैः शिक्षाग्रहणा आसेवना रूपान लभ्यते न प्राप्यते तानि पञ्चस्थानानि शृणु इत्यध्याहारः स्तम्भः क्रोधः प्रमादः रोगः आलस्यंच स्तम्भात् अहङ्कारात् शिक्षायोग्यो न भवति तथा क्रोधात् अपिशिक्षायोग्यो न भवति तथा पुनः प्रमादेन मद्यविषयकषायनिद्राविकथा रूपेण उपदेशयोग्यो न स्यात् तथा रोगेण वातपित्तश्लेष्मकुष्ठशूलादिव्याधिना शिक्षाग्रहणार्हो न भवति तथा

सूत्र

लुद्धेअणिग्गहे । अभिक्खणं उल्लवई अविणीएअबहुस्सुए ॥२॥ अहपंचहिंठाणेहिं जेहिंसिक्खानलब्भई थंभाकोहापमा

भाषा

स्तब्धः लुब्धः रसादिगृद्धः स्तब्धरहे लोभ करे इन्द्रीआपणा वश न करे अहङ्कार करे अभिक्षणं पुनःपुनः वारं वारं उल्लपीति वार वारवोले लबाडी करे स अविनीतः अबहुश्रुतः उच्यते ते साधु अविनीत अबहुश्रुत कहो जे २ अथ पञ्चभिः स्थानैः हवे पांचे थानके करी यैः शिक्षाग्रहणं न लभ्यते सूत्र अर्थने

आलस्येन अनुद्यमेन च शब्देन एतैः सर्वैः प्रकारैः अथवा एतेषां स्थानानां मध्ये एकैकेनापि स्थानेन शिक्षा न प्राप्यते गुरूपदिष्टाशास्त्रार्थाभ्या सङ्कर्त्तुं न शक्नोति शिक्षा लाभस्याभावात् अबहुश्रुतत्वं स्यात् ३ अथायेतन गाथायां बहुश्रुतत्वेहेतूमाह अह अट्ठहिं ठाणेहिं सिक्खासीलेत्ति वुच्चई अहस्सिरेसयादंते नयमम्ममुदाहरे ४ अथानन्तरं एतैरष्टभिः स्थानैः अष्टभिः प्रकारैः शिक्षासील इत्युच्यते शिक्षा ग्रहणासेवना रूपशास्त्रे शीलते धारयतीति शिक्षां शीलः तानि अष्टप्रकाराणीमानि अहस्सिरे अहसनशीलः पुनः सदा दांतः जितेन्द्रियः पुनर्यो मर्म्म न उदाहरेत् य एताद्दशो भवति स गुरूणां शिक्षायोग्यो भव

एणं रोगेणालस्सएणय ।३। अहअट्ठहिंठाणेहिं सिक्खासीलेत्तिवुच्चई । अहस्सिरेसयादंते नयमम्ममुदाहरे ।४। नासीले णसिया अइलोलुए । अक्कोहणेसच्चरए सिक्खासीलेत्ति वुच्चई ।५॥ अहचउदसहिंठाणेहिं वट्टमाणेउसंजए। अविणीए

लहे ते पांच स्थानक कहे गर्वात् क्रोधात् प्रमादात् गर्वे करी क्रोधे करी२ प्रमादेकरि ३निन्दा करीने रोगेणालस्येन च रोगे करीने४ आलसे करीने ५ए पांच बोले करी अर्थ सूत्र न पामे ३ अथ अष्टभिः स्थानैः हवेए आठे स्थानके करीने शिक्षा शीलः इति उच्यते शिक्षाने योग्य हुवे यती अहसनशीलः सदा दांतेः इन्द्रियमदते सहे नहीं सदा आपणीइ इंद्रीयदमे न च मर्म उदाहरेत् कोइ नो मर्म बोले नही ४ न शीलेन नव विध शील सातिसारा अशील नहुवे सदा शील आचार सहीत हुवे अतीचार न होइ न स्यात् अति लोलुपः अति लोलपी न हुवे आक्रोधस्य तत्परतः क्रोध न करे सत्य बोले ए आठे बोले करी शिक्षा शील कहीये सिक्षा सीलः इति उच्यते ५ अथ चतुर्दशस्थानकैः हवे चउद स्थानकने विषे वर्त्तमान असाधु असंयती कहीइं अविनीतः इति उच्यते ते साधु अविनीत कहीइं निर्व्वाणं मोक्षं न याति निर्व्वाणं कहीइं मोक्ष तीहां पणि नजाइं ६ पुनः पुनः क्रोधी भवति बारं

तीत्यर्थः गुणिनो ग्रहणात् गुणानां ग्रहणं कर्त्तव्यं नासीले न विसीले न सिया अइलोलुए अकोहणे सच्चरई सिक्खा सीलेत्ति वुच्चई ५ पुनरेतादृशः भिक्षा शील उच्यते एतादृशः यः सर्वथा अशीलो न स्यात् न विद्यते शीलं यस्य स अशीलः शीलरहित इत्यर्थः पुनर्यो विशीलो न स्यात् विरुद्धशीलो विशीलः अतीचारैः कलुषितव्रतो न स्यात् यः पुनरति लोलुपः अति रसास्वाद लम्पटो न स्यात् अथवा अतिलोभ सहितो न स्यात् पुनर्योऽक्रोधनः क्रोधेन रहितः स्यात् पुनर्यः सत्यरतिः स्यात् स भिक्षाशीलः स्यात् इत्यर्थ हास्य वर्जनं १ दांतत्वं २ पर मर्मानुद्घाटनं ३ अशील वर्जनं४ विशीलवर्जनं ५ अति लोलुपत्व निषेधनं ६ क्रोधस्य अकरणं ७ सत्यभाषणं ८ एतैरष्टभिः प्रकारैर्बहुश्रुतत्वं स्यादिति भावः ५ अथ अबहुश्रुतत्व बहुश्रुतत्व हेतोरविनीत विनीतयोः स्वरूपमाह अह चउदसहिं ठाणेहिं वट्टमाणे उसंजए अविणीए वुच्चईसोऽनिव्वाणंच न गच्छई ६ अथ चतुर्दशसु स्थानेषु वर्त्तमानः संयतोऽविनीत उच्यते स चाविनीतो निर्वाणं मोक्षञ्च नगच्छति न प्राप्नोति अथवा निर्वाणं निर्वाणकारणं ज्ञानदर्शन चारित्रलक्षणं रत्नत्रयं सुखकारणं न प्राप्नोति अत्र चतुर्दशसु स्थानेषु इति सप्तम्यर्थे प्राकृतत्वात् तृतीया बहुवचनं ६ अथ तानि चतुर्दशस्थानानि तिसृभिर्गाथाभिराह अभिक्खणं कोही हवइ पबन्धञ्चपकुव्वई मित्तिज्ज माणो वमई सुयं लद्धूणमज्जई ७ अवियाव परिक्खेवी अविमित्तेसु कुप्पई सुप्पियस्साविमित्तस्स रहे भासइ पावगं ८ पइण्णवाई दुहिले थद्धे लुद्धे अणिग्गहे असम्विभागी अचियत्ते अविणी इत्ति वुच्चई ९ अथतानि चतुर्दशस्थानानि विभजति य ईदृशो भवति स च पुमान् अविनीत इत्युच्यते ईदृशः कीदृशः

सूत्र

वुच्चई सोऽनिव्वाणंचनगच्छई ॥६॥ अभिक्खणंकोही हवइपबंधंचपकुव्वई । मित्तिज्जमाणोवमई सुयंलद्धूणमज्जई ।७।

भाषा

वार क्रोध करे प्रबन्धं पुनः कुरुते दीर्घ क्रोधी स्यात् ते घणो काल क्रोध राखे मित्रीयमाणोपि वमति त्यजति मीचाइ कीजे ते मित्राईने माने नहीं श्रुतलब्धा अहङ्कारं करोति शास्त्र भणीने अहङ्कार करे ७ अपि सम्भावने पाप परिक्षेपी पाप समतिने विषे न पलाइ सूधी पाले नहीं मित्रेषु कुप्यति

अभीक्ष्णं वारं २ क्रोधी भवति क्रोधं करोति च पुनः प्रबन्धं क्रोधस्य दृढिं कुपितोपि कोमलवचनै रपि क्रोधस्य अत्यजनं क्रोधस्य स्थिरीभावं प्रकुरुते मिलीयमाणोपि मित्रं ममास्तु अयं इति विचिन्त्यमानोपि पश्चादमति त्यजति कोर्थः पूर्वं हि मित्रभावं कृत्वा पश्चात् त्वरितं मित्रत्वं त्रोटयति ननु सा धवोहि कुत्रापि मित्रत्वं स्नेहभावं केनापि सह न कर्तुः संयोगादिप्र मुक्ता भवेयु स्तर्हि कथं मित्तिज्जमाणो वमई इत्युक्तं अत्रहि षट् जीवनिकायेषु व्रत ग्रहणसमये मैत्रीं विधाय शिथिला चारित्रेन तां मैत्रीं त्यजेयु रित्यर्थः अथवा केनापि धर्मशिक्षा शास्त्रार्थ दानादिना उपकारः कृतः स च हित कारकत्वात् मित्र प्रायस्तत्र उपकार लोपत्वेन कृतघ्नत्वेन मित्रत्वं वमति अविणीतस्यै तल्लक्षणं इत्यर्थः पुनर्यः श्रुतं लब्ध्वामादयति ज्ञानाभ्यासादहङ्कारं करोति विद्या मदोन्मत्त इत्यर्थः ७ अपि शब्द सं भावनायां यः पाप परिक्षेपी अपि सम्भाव्यते पापैः समिति गुप्ति स्खलनैः परिक्षि पति तिरस्करोती त्येवं शीलः पाप परिक्षेपी स मिति गुप्ति विराधकं प्रति तिरस्करोति कोर्थः कदाचित् कश्चित् स मिति गुप्तिषु अज्ञानि तया स्खलति तदा तं प्रति धिक्करोति छिद्रं दृष्ट्वान्यं निन्दतीत्यर्थः तथा मित्रेष् अपि कुप्यति मित्रेभ्योपि शिक्षादात्तसंघेभ्यः क्रुध्यति स्वयं क्रोधं करोति तान् वा क्रोधयति पुनः सुतरां अतिशयेन प्रियस्य मित्रस्य हितवांछकस्य गुर्वादेरपि रहसि एकान्ते पापकं पापं एवपापकं अवर्णवादं भाषते कोर्थः अग्रतः प्रियं वक्ति पृष्ठतः दोषं वक्ति इत्यर्थः ८ पुनः प्रकीर्णवादी प्रकीर्णं असंबद्धं वदतीति प्रकीर्णवादी अथवा प्रतिज्ञया च इदं इत्थं एव इत्यादि निश्चयभाषणशीलः पुनः

अविणावपरिक्खेवी अविभित्तेसु कुप्पई सुप्पियस्साविमित्तस्स रहेभासइ पावगं ।८। पइण्णवादीदुहिले थद्धलुद्धे अणिग्गहे

सूत्र

भाषा

मित्र उपरि कोपे रीस करे सुप्रियस्यापि मित्रस्य अत्र अने बली जे अपणो गाढो मीत्र छे वाली एकांत भाषते अशुभं हितनुं पण एकांते भूंडू बोले निन्दा करे ८ प्रतिज्ञावादी निश्चय भाषानो बोलणहार मित्रादिकसुं द्रोहकारो स्तब्धः १ लुब्धः११ रसगृद्धः १२ संविभाग रहितः संविभाग न करे

द्रुहिलो द्रोग्धा द्रोहकरणशील इत्यर्थः पुनस्तब्धो अहङ्कारी अहं तपस्वी इत्यादि जल्पकः पुनर्लुब्धो रसयुक्ता हारादौ लोभी पुनरनिग्रहः अवशी कृतेन्द्रियः पुनः असंविभागी सम्बिभजति आनीताहारं अन्येभ्यः साधुभ्यः प्रार्थयतोऽपीवं शीलं सम्बिभागी नसम्बिभागी असंविभागी आहारेण स्वयमेव उदरं बिभर्त्तीत्यर्थः अन्यञ्च न ददाति अविनीत इति अप्रीतिकरः दर्शनेन वचनेन अप्रीतिं उत्पादयति एतैर्लक्षणैः अविनीत उच्यते अथ चतुर्दशस्थानानां नामान्याह क्रोधः १ क्रोध स्थिरीकरणं २ मित्रत्वस्य वमनं त्यजनं ३ विद्यामदः ४ परच्छिद्रान्वेषणं ५ मित्राय क्रोधस्योत्पादनं ६ प्रियमित्रस्यैकान्ते दुष्टभाषणं सुखे मिष्टभाषणं ७ अविचार्यभाषणं ८ द्रोहकारित्वं ९ अहङ्कारित्वं १० लोभित्वं ११ अजितेन्द्रियत्वं १२ असम्बिभागित्वं १३ अप्रीतिकरत्वं १४ चतुर्दशस्थानानि चतुर्दशहेतूनि कारणानि अविनीतत्वोत्पादकानि ज्ञेयानि ९ अह पनरसहिं ठाणेहिं सुविणीए त्ति वुच्चइ नीयावत्ती अचवले अमाई अकूहले १० अथ पञ्चदशभिः स्थानैः सुविनीत इत्युच्यते तानि पञ्चदशस्थानानि इमानि यः एतैः पञ्चदशभिर्लक्षणैर्युक्तो भवति सविनीत इत्यर्थः प्रथमं यः नीचावर्त्ती नीचं अनुद्धतं गुरोः शिष्या शनात् अनुच्चं तत्ववर्तितुं स्थातुं वा शीलं यस्य स नीचावर्त्ती गुरोः शिष्यातः गुरो राशनात् वा नीचे शय्यासने शेते तिष्ठति वा इत्यर्थः १ पुनर्योऽचपलः न चपलः अचपलः अचपलत्वं चतुर्धा भवति गत्या अचपलः १ स्थित्या अचपलः २ भाषा अचपल ३ भावे अचपलः ४ गत्या अचपलः शीघ्रचारी न भवति १ स्थित्या अचपल स्तिष्ठन् अपि शरीरहस्तपादादिकं अचालयन् स्थिर स्तिष्ठति २ भाषया अचपलः

सूत्र

असंविभागी अवियत्ते अविणीएत्ति वुच्चइ ।९। अहपन्नरसहिंठाणेहिं सुविणीएत्ति वुच्चइ । नीयावित्तीअचवले अमाई

भाषा

अप्रीतकरः सघलाइने अप्रीतनो करणहार एवम्बिधो अविनीतः कथ्यते एहवो साधु अविनीत कहीइ ९ अथ पञ्चदशस्थानके ए पनरहस्थानके साधु सुविनीत इति कथ्यते सुविनीत कहीजे नीचवृत्तिः १ नमनशीलः गुरुने नमे चपलपणे नहीं माया रहित ३ अकूतुहलः कतूहले करी रहित ४ १०

असत्यादिभाषो न स्यात् ३ भावेन अचपलः सूत्रे अर्थं अनागते असमाप्ते सत्येव अर्थे तनं गृह्णाति ४ अचपलस्यार्थः २ पुनर्यः अमायी मायास्यास्तीति मायी शुभ मिष्टान्नाहारादौ आचार्यादीनां अवञ्चकः ३ पुनर्यः अकुतूहलः न विद्यते कुतूहलं यस्य स अकुतूहलः कुहक इन्द्रजाल भगल विद्या नाटकादीनां न निलोकक इत्यर्थः ४ ।१० अप्पंचाहिक्खिवई पबंधंच न कुव्वई मित्तिज्जमाणो भयई सुयं लद्धुं नमज्जई ११ पुनर्योऽल्पं अधिक्षिपति अल्प शब्दोऽत्र भावार्थः कं अपि न अधिक्षिपति किमपि कठिनैर्वचनै र्न निर्भर्त्सयति इत्यर्थः ५ च पुनः प्रबन्धं न करोति प्रचुरकालं क्रोधं न रक्षति दीर्घ रोषी नस्यादित्यर्थः ६ मित्रीयमाणं भजते मित्रत्व कर्त्तारं सेवते कोर्थः यः कश्चित् स्वस्मै विद्यादानाद्युपकारं कुर्यात् तस्मै स्वयमपि प्रत्युपकारं करोति कृतघ्नो न स्यात् इत्यर्थः ७ पुनः श्रुतं लब्ध्वा न माद्यति मदं न करोति ८ अष्टमं स्थानं ११ नय पाव परिक्खेवी नयमित्तेसु कुप्पई अप्पियस्सावि मित्तस्स

सूत्र

अकुतूहले ॥१०॥ अप्पंचाहिक्खिवती पबंधंचपकुव्वती। मित्तिज्जमाणोभयती सुयंलद्धुंनमज्जती ॥११॥ नयपावपरिक्खे वी नयमित्तेसुकुप्पती अप्पियस्साविमित्तस्स रहेकल्लाणभासई ॥१२॥ कलहडमरवज्जए बुद्धे अभिजाइगोहिरिमंपडि

भाषा

स्वल्पमपि नाधिक्षपति कठोरवचन न बोले कदेही ५ क्रोधवर्द्धनञ्च न कुरुते क्रोध वधारे नहीं ६ मित्रेयतामपि भज्यते ७ सर्वभूत जीवादिकसुं मीत्राइपणो राखे सदाइ श्रुतं लब्ध्वा न माद्यति ८ शास्त्रभणीने मदन करे सर्वथा ११ नच पाप परीक्षेपी आचार्यादिकनी निन्दा न करे नच मित्रेभ्यः कुप्यति मित्र उपरे कोपे नहीं १० अप्रियस्यापि मित्रस्य अमित्रस्य उमीत्राइ करे ११ एकान्ते रम्यं भाषते एकान्ते भली भली वात करे १२ कलहडमर वर्जितः कलह करी वर्जीतः वचनकलह न करे बुद्धिवान् संयमभारवाहकः ज्ञात तत्वनो जाणसुविनीतः ह्रीमान् लज्जावंत १४ प्रति संलीन प्रतिसं

रहे कल्लाण भासई १२ च पुनः पापपरिक्षेपी न भवति पापेन परिक्षिपति तिरस्करोतीत्येवं शीलः पापपरीक्षेपी समिति गुप्त्यादिषु स्वयं स्खलनं कृत्वा आचार्यादिभिः शिक्ष्यमाणः सन् आचार्यादीनां एव मर्मोद्घाटको न भवति ९ न च मित्रेभ्यः कुप्यति अपराधे सत्यपि मित्रोपरि क्रोधं न करोति १० पुनर्योमित्रस्य मम मित्रत्वाङ्गीकृतस्य अप्रियस्य च अपराधे सत्यपि पूर्वकृतं सुकृतमनुस्मरन् रहसि अपि कल्याणं एव भव्यं एव भाषते न च तस्य दूषणं वदतीत्यर्थः ११ कलह डमरवज्जे इ बुद्धे य अभिजाइ गीहिरिमं पडिसंलीणे सुविणी इत्ति वुच्चई १२ पुनर्यः कलह डमरं वर्जयति तत्र कलहं वाक्य युद्धं त्यजति डमरं चपेटा मुष्टिलत्ताादिभिर्युद्धं तयोरुभयो वर्जको यो भवति १२ पुनर्बुद्धिमान् बुद्धोऽवसरज्ञो भवति पुनर्योऽभिजातिगो भवति अभिजातिं कुलीनतां गच्छति प्राप्नोतीति अभिजातिगः गुरुकुलवास सेवक इत्यर्थः १३ पुनर्यो ह्रीमान् ह्री विद्यते यस्य स ह्रीमान् कलुषाध्यवसाये अकार्यकरणे लपायुक्त इत्यर्थः १४ प्रति संलीनः गुरु सकाशेऽन्यत्रवाइत स्ततो न चेष्टते चेष्टां न करोति स प्रतिसंलीन उच्यते य एतादृशो भवति स विनीत उच्यते अथ पूर्वोक्त पञ्चदशस्थानानां सुविनीतत्वकारणानां नामान्याह गुरो रासनात् द्रव्यभावतो नीचासनोपवेसनं १ अचपलत्वं २ अमायित्वं ३ अकुतूहलत्व ४ कस्यापि अनिर्भत्सनं ५ अदीर्घरोषत्वं ६ मित्रस्य उपकारकरणं ७ विद्या मदस्य अकरणं ८ आचार्यादीनां मर्मस्याऽनुद्घाटनं ९

सूत्र

संलीणे सुविणीएत्ति वुच्चई ॥१३॥ वसेगुरुकुलेनिच्चंजोगवं उवहाणवं। पियंकरेपियंवाई ससिक्खंलद्धुमरहई ॥१४॥

भाषा

वान् आपणो इन्द्री दमे सुविनीत इति उच्यते ते शिष्य सुविनीत आज्ञाकारी कहीये १३ वसेत् गुरु कुलपासे नित्यं निरन्तरं तिष्ठन्ति सुविनीत शिष्य सदाइ गुरुपासे वसे योगवान् उपधानवान् योगवान् धर्मव्यापारविधिकर्त्ता तपो विशेषसूत्रपठनादी जिम उपधान प्रीयंकरः प्रियवादी प्रेम करे प्रेम बोले सशिक्षां लब्धुं अर्हती ते शिष्य शिक्षाने योग्य होवे १४ यथा शङ्खशङ्के पयो दुग्धं क्षिप्तं जिम संख दूधे भर्यो हाथ्यां विराजते दोइ प्रकारे बाहिरि

मित्राय क्रोधस्य अनुत्पादनं १० अपराधे सत्यपि मित्रस्य अमित्रस्य वा परोक्षे दूषणस्य अभाषणं ११ कलह डमरवर्जनं १२ गुरुकुलवास सेवनं १३ लज्जावत्वं १४ प्रतिसंलीनत्वं एतानि पञ्चदशस्थानानि सुविनीतस्य ज्ञेयानि १३ अथ सुविनीतः कीदृक् स्यादित्याह वसे गुरुकुलेनिच्चं जोगवं उवहाणवं पियं वाई से सिक्खं लद्धुं मरहई १३ स मुनिः शिक्षां लब्धुं अर्हति शिक्षायै योग्यो भवति स इतिकः यो गुरुकुले नित्यं वसेत् गुरोः पूज्यस्य विद्यादोचादायकस्य वा कुले गच्छे संघाटके यावज्जीवं तिष्ठेत् पुनर्यो मुनिः योगवान् योगो धर्मव्यापारः सविद्यते यस्य स संयोगवान् अथवा योगोऽष्टाङ्गलक्षणस्तद्वानित्यर्थः पुनर्यः साधुः उपधानवान् उपधानं अंगोपांगादीनां सिद्धांतानां पठनाराधनार्थं आचाम्लोपवास निर्विकृत्यादि लक्षणं तपो विशेषः सविद्यते यस्य स उपधानवान् सिद्धांताराधन तपोयुक्त इत्यर्थः पुनर्यः साधुः प्रियङ्करः आचार्यादीनां हितकारकः पुनर्यः प्रियवादी प्रियो वादोऽस्यास्तीति प्रियवादी प्रियभाषी एतैर्लक्षणैर्युक्तो मुनिः शिक्षां प्राप्तुं योग्यो भवति १४ अथ बहुश्रुत प्रतिपत्तिरूपं आचारं स्तवद्वारेणाह जहाओ संखं मिपयं निहितं दुहओ विरायई एवं बहुस्सुए भिक्खू धम्मो कित्तीतहा सुयं १५ यथा संखे निहितं पयो दुग्धं द्विधापि विराजते उभय प्रकारेण शोभते पयो धवलं अथच पुनः शंखेपि धवले अत्यन्त धवलत्वेन वर्णो विराजते एवं अमुना प्रकारेण शंखमध्यदुग्ध दृष्टांतेन बहुश्रुते भिक्षौ धर्मो

सूत्र

जहासंखंमिपयं निहितं दुहओविविरायई एवं बहुस्सुए भिक्खूधम्मो कित्तीतहा सुयं ॥१५॥ जहासे कंबोयाणं आइन्ने

भाषा

भीतरी उज्वल थको सोभे एवं अमुना प्रकारेण बहुश्रुतो भिक्षुः इम बहुश्रुत साधु धर्मकीर्ति तथा श्रुतं तिम साधु धर्म अने कीर्त्ति करीने सोभे १५ यथा अश्वः कम्बोज देशजातीना जिम कम्बोजदेसना उपना अश्वः अश्वानां मध्ये आकीर्णः कथकः स्यात् गुणैः प्रासकथक प्रधान सुजात घोडा माहि

यतिधर्मस्तथाकीर्त्तिः श्रुतं च एतत्पदार्थत्रयं स्वतएव भासते बहु प्रचुरं श्रुतं श्रुतज्ञानं यस्य स बहुश्रुतः तथा एवं गुरुकुलवासिनि साधौ बहुश्रुते आश्रयविशेषात् अत्यन्तं शोभते बहुश्रुते स्थितो धर्मः कीर्त्तिर्यशश्च मालिन्यं न प्राप्नोति अत्र कीर्त्तिगुणश्लाघा यशः सर्वत्र प्रसिद्धत्वं इति अनयोः कीर्त्ति यशसोर्लक्षणं ज्ञेयं १५ जहासे कंबोयाणं आसवो कंथएसिया आसेजवेण पवरे एवं हवइ बहुस्सुए १६ बहुश्रुतः साधुः एवं भवति एतादृशो भवति एवं विराजते एवमिति कथं यथा कंबोजानां कांबोजदेशोद्भवानां अश्वानां मध्ये यः आकीर्णः शीलादिगुणैर्व्याप्तो विशुद्धमाता पितृयोनिजत्वेन सम्यग् आचा रस्वामिभक्त्यादिप्रशस्तिहेतवश्चाश्वोक्ता गुणयुक्तः कोटश्यः आकीर्णः कन्थकः लघुपाषाणभूत कुतप निपतन संजातशब्दात् नत्रस्यति अथवा शस्त्रादीनां प्रहा रात् निर्भीकः कंथकः उच्यते पुनः कोटश्यः सः जवेनवेगेन सम्यक्गत्या प्रवरः प्रकर्षेण वरः श्रेष्ठः यथाहि सर्वेषु कांबोजदेशोद्भवेषु अश्वेषु आकीर्णः कंथ को अश्वो गमनेन अत्यन्तं प्रधानो भवेत् राजादीनां वल्लभो भवेत् तथा बहुश्रुतोपि सर्वेषां ज्ञानक्रियावतां मुनीनां मध्ये परवादिनां वादत्रस्तः सम्यक् आचारविहारेण विराजमानः स्यात् सर्वेषां वल्लभो भवेदित्यर्थः जहादृढ समारूढे सूरेदृढपरक्कमे उभओ नंदिघोसेणं एवंह० १७ पुनर्यथा सूरः आदृढ समारूढः आकीर्णो जाति विशुद्धघोटक स्तत्रसमारूढः आकीर्ण समारूढो दृढ़पराक्रमः स्थिरपराक्रमो बलं यस्य सः स्थिरपराक्रमः स्थिरोत्साहः केनापि अन्यसुभटेन न अभिभूयते इति अध्याहरः नच तं प्रत्याश्रितोपि भृत्यादिवर्गः केनापि अभिभूयते कथंभूतः ससूरः उभयतो वामदक्षिणतः अथवा पृष्ठतः

सूत्र

कंथएसिया आसेजवेणपवरे एवं हवइ बहुस्सुए ।१६। जहादृढ समारूढे सूरेदृढपरक्कमे उभओ नंदिघोसेणं एवंहव

भाषा

आकीर्णसुविनीत प्रधान घोडो होवे अश्ववेगेन प्रवरः अश्व घोड़ो वेगे करी प्रधान एवं भवति बहुश्रुत शोभे १६ यथा आकीर्णः जात्यतुरङ्गभाषितं जिम असवार आकीर्ण सुविनीत घोडे चढ्यो जिम शूरो दृढ़पराक्रमवान् सुभटं शूरः पराक्रमी सत्ववन्त उभ यतः वामदक्षिणपार्श्वे द्वादशतूर्यनादेन सहितः

अग्रतो वा नांदीघोषेण उपलक्षितः नांदी द्वादशतूर्याणि तेषां द्वादशतूर्याणां घोषो नान्दीघोषस्तेनोपलक्षितः अथवा त्वं चिरं जीवा इत्यादि बन्दिजनोच्चारिताशीर्वचनं तस्य घोष शब्द स्तेनोपलक्षितः यथैतादृशः शूरः सर्वत्र विजयी स्यात् एवं बहुश्रुतोपि साधुर्जिनप्रवचनाश्रारूढः दृढपराक्रमः दृश्यत्वरवादि दर्शनात् अत्रस्तः परवादि जये समर्थः उभयतो दिनरजन्यो स्वाध्यायरूपेण नांदीघोषेणोपलक्षितः अथवा उभयतः पार्श्वद्वयोः ग्रिथाध्ययनरूपेण नांदी घोषेण उपलक्षितः अथवा प्रवचनोद्दीपकत्वेन स्वतीर्थ्यै चिरंजीवत्वसौ इत्याद्याशीर्वचनरूपेण नांदीघोषेणोपलक्षितः परतीर्थ्यैः पराभवितुं अशक्यो भवेत् तदाश्रितोपि सङ्घः केनापि पराभवितुं न शक्यते १७ जहा करेणु परिकिन्ने कुंजरे सट्ठिहायणे बलवंते अप्पडिहए एवं० १८ यथा षष्टि हायने षाष्टिवार्षिकः कुञ्जरो बलवान् अप्रतिहतः स्यात् प्रतिहंद्वि गजैः प्रतिहन्तुंशक्यो न स्यात् तथा बहु श्रुतोपि षष्टिवर्षाणि यावत् गजो वर्द्धमान बलः स्यात् कथम्भूतो गजः करेणुभिर्हस्तिनीभिः परिकीर्णः परिवृतः षष्टिहायन तया कुञ्जरः स्थिरमतिश्च स्यात् एवं बहुश्रुतोपि उत्पातिक्यादि च तसृभिर्बुद्धि भिर्विद्याभिर्वासहितः वर्द्धमानशास्त्रार्थ बलः केनापि प्रतिवादिना जेतुं न शक्यते १८ जहासे तिक्खसिंगे जायखन्धे विरायई वसे हे जूहाहिवई एवं० १९ यथा स इति वक्ष्यमाणो वृषभः यूथस्य गोवर्गस्य अधिपो विराजते एवं बहुश्रुतोपि विशेषेण राजते कथम्भूतो वृषभः तीक्ष्णशृङ्गः पुनः कथं भूतः जातस्कन्धः उत्पन्न धूर्वहणभागः एतादृशो बली वर्दइव बहुश्रुतोपि शोभते कथम्भूतो बहुश्रुतः परपक्षभेदकत्वेन तीक्ष्णे स्वमत परमत ज्ञानरूपे

सूत्र

बहुस्सुए ॥१७॥ जहा करेणु परिकिण्णे कुंजरे सट्ठि हायणे । बलवंते अप्पडिहए एवं हवइ बहुस्सुए ॥१८॥ जहा से

भाषा

बिडं पासे द्वादसतूर्यनादे करी सोभे एवं भवति बहुश्रुतः इम बहु श्रुतसोभे १७ यथा हस्ती हस्तनीभिः परिवृतः जिम हथणीने परिवारे परिवर्यो थको कुञ्जरः हस्ती षष्टि हायनः षष्टि वर्षायुः जिम हाथी साठिवर्षनो बलवान् अप्रतिहतो भवति अनेरा वैरी हाथी पराभवी सके नहीं एवं भवति बहु

शास्त्रे एव शृङ्गे यस्य स तीक्ष्णशृङ्गः पुनः कथम्भूतो बहुश्रुतः जातः उत्पन्नो गणस्य कार्यरूपधुरं प्रतिधौरेयिकत्वेन पुष्टः स्कन्धो यस्य सजातस्कन्धः पुनः कौट्टगो बहुश्रुतो यूथाधिपतिः यूथस्य चतुर्विध सङ्घस्य अधिपति र्यूथापतिः एवं बहुश्रुतो यूथाधिप ऋषभवत् आचार्यादिपदवीं प्राप्तः सन् विराजते १८ जहासे तिक्खदाढे उद्दग्गे दुप्पहंसए सीहे मियाणपवरे एवं० २० यथासिंहो मृगाणां अरण्यजीवानां मध्ये प्रवरः प्रधानः स्यात् एवं बहुश्रुतोपि सिंह इव अन्यतीर्थाय मृगाणां मध्ये प्रकर्षेण श्रेष्टः स्यात् कथंभूतः सिंहः तीक्ष्णदंष्ट्रः पुनः कौट्टगः सिंहः उद्दग्गः उत्कटः पुनः कथम्भूतः दुप्रहंस्यकः दुरभिभवः अन्यै र्जीवैर्दुर्धृष्यः दुःसह इत्यर्थः बहुश्रुतोपि सिंहइव कथम्भूतो बहुश्रुतः तीक्ष्णाः सप्तनयविद्या रूपा दंष्ट्रा यस्य स तीक्ष्णदंष्ट्रः अतएव उत्कटः दुर्जयः

तिक्ख सिंगे जायखंधे विरायई । वसहे जूहाहिवई एवं हवइ बहुस्सुए ॥१९॥ जहासे तिक्ख दाढे उद्दग्गे दुप्पहंसए सीहे मियाण पवरे एवं हवई बहुस्सुए ॥२०॥ जहा से वासुदेवे संख चक्क गयाधरे । अप्पडिहय बले जोहे एवं हवइ

सूत्र

भाषा

श्रुतः इम ए हाथीने दृष्टान्ते करी अन्यदर्शनीये अजय हुवे बहुश्रुतसाधु १८ यथा सः तीक्ष्णः शृङ्गः जिमतीथासी गडानो धणी जातोपचितभूतः स्कन्धोऽ स्येति वृषभः उपचितस्थूल स्कंधे करी विराजोत छे वृषभः यूथाधिपतिः जिम वृषभ गायनायुथ मांहि सोभे एवं भवन्ति बहुश्रुतः इमबहुश्रुत हुवे १९ यथा तीक्ष्ण दंष्ट्रः जिम तीक्ष्णदाढ़सहितः उद्दग्रः उत्कटो अतएव दुःप्रधर्षको अन्यै दुरभिभवनीयः अनेरे जीवें पराभवीसके नहीं यथासिंहो मृगाणां प्रवरः जिम सीह मृगमाहि प्रधान एव भवति बहुश्रुतः २० यथा सवासुदेव जिमते वासुदेव संख१ चक्र २ गदाधरः संखचक्रगदाप्रमुख ए धारे अप्रतिहतबलयोद्धः किणही जीत्यु न जाइं इस्यु महासुभट हुवे एवंविधः बहुश्रुतो भवन्ति २१ यथा स चतुरन्तः जिम चक्रवर्त्ति चतुरङ्गिणी सेनानो नायक

पुनः कथम्भूतो बहुश्रुतः दुःप्रहंस्यकः अन्य तीर्थैर्दुर्धृष्यः कलितु मशक्य इत्यर्थः २० जहासे वासुदेवे संखचक्क गयाधरे अप्पडिहय बले जोहे एवं० २१ यथा स प्रसिद्धो वासुदेवः अप्रतिहतबलः स्यात् अप्रतिहतं केनापि अनिवारितं बलं यस्य स अप्रतिहतबलः एवं बहुश्रुतोपि केनापि परमतिना अनिवारितबलः स्यात् कीदृशो वासुदेवः शंखचक्र गदाधरः वासुदेवस्य हि रत्नसप्तकं स्यात् चक्रं धणुहं खग्गो मणी गया होइतहयवणमाला संखो सत्तइमाइं रयणाइं वासुदेवस्स १ अत्र त्रयाणां एव ग्रहणं बहुश्रुतेन सामर्थ्यात् सप्तानां मध्ये त्रयाणां एव प्राधान्य मस्ति पुनः कीदृशो वासुदेवः योधः युध्यति शत्रून् प्रतिसंहरतीति योधः यदुक्तं युद्धे सूरा वासुदेवा: खमासूरा: अरिहन्ता: तपसूरा अणगारा: भोगसूरा चक्रवट्टी वासुदेवोहि स्वशरीरेण युद्धं कृत्वा शत्रून् जयतीत्यर्थः एवं बहुश्रुतोपि वासुदेव वत् कीदृशो बहुश्रुतः संखचक्र गदातुल्यानि रत्नत्रयाणि ज्ञानदर्शनचारित्ररूपाणि धरतीति शंखचक्रगदाधरः पुनः कीदृशो बहुश्रुतो योधः अन्तरङ्ग शत्रुघातकः अत्र बहुश्रुतस्य वासुदेवोपमानं २१ जहासे चाउरन्ते चक्कवट्टी महड्ढिया च उद सरयणाहिवई एवं० २२ यथा स इति प्रसिद्ध चक्रवर्त्ती विराजते इत्यधाहारस्तथा बहुश्रुतोपि विराजते कीदृशश्चक्रवर्त्ती चातुरन्तः चतुर्भि हय गज रथपदातिभिः सेनांगैः अन्तोऽरीणां विनाशयस्य सचाउरंतः चतुरंत एव चातुरंतः आसमुद्रं आहिमाचलं विविधविद्याधर कृन्द गीत कीर्त्ति तया एक च्छत्रं षट् खण्डराज्यपालकः चातुरन्तः पुनः कीदृशश्चक्रवर्त्ती महर्द्धिकः महती ऋद्धिर्यस्य स महर्द्धिकः चतुःषष्टि सहस्रान्तः पुरनारीणां शय्यासु वैक्रिय

बहुस्सुए ॥२१॥ जहासे चाउरंते चक्कवट्टी महिड्ढिए। चउद्दस रयणाहिवई एवं हवइ बहुस्सुए ॥२२॥ जहा से स

चक्रवर्त्ति महाऋद्धिनो धणी चक्रवर्त्तिने मोटी ऋद्धि हुवे चतुर्दशरत्नाधिपतिः स्यात् चजदे रत्नवनिधाननो अधिपति होइ सुख भोगवे एवं भवती बहुश्रुत २२ यथा सहस्राक्षः जिमते इंद्र सहस्राक्षः हजारनेचनो धणी वज्रहस्त दैत्यपुरंदमनः वज्रहाथने विषे रहे दैत्यने विणसाडे शक्रदेवाधिपतीः

शक्तिं विधाय रममाणः वैक्रियादि ऋद्धि सहितः इत्यर्थः दिव्यानुकारि लक्ष्मीयुक्तो वा पुनः कौटश्य चक्रवर्त्ती चतुर्दशरत्नाधिपतिः चतुर्दशरत्नानि अमूनि सेनापति १ गृहपति २ पुरोहित ३ गज ४ हय ५ सूत्रधार ६ स्त्री ७ चक्र ८ छत्र ९ चर्म १० मणि ११ काकिनी १२ खड्ग १३ दण्ड १४ एतेषां रत्नानां स्वामी एवं बहुश्रुतोपि कौटश्यो बहुश्रुतः चतुर्भिः दानशील तपो भावलक्षणैर्धर्मैरन्तश्चतसृणां गतीनां यस्य स चतुरन्त श्चतुरन्त एव चातुरन्तः चतुर्दशरत्नाधिपतिः चतुर्दशपूर्वरूपाणि रत्नानि तेषामधिप इत्यर्थः पुनः कौटश्यो बहुश्रुतः महर्द्धिकः महत्यः ऋद्धयः आमर्षौषधिव प्रौषधिखेलौषधा दयो यस्य समहर्द्धिक लब्धि ऋद्धिसहित इत्यर्थः अथवा महती ऋद्धिज्ञानसम्पत्तिर्यस्य स महर्द्धिकः २२ जहासे सहस्सक्खे वज्जपाणी पुरन्दरे सक्के देवा हिवई एवं० २३ यथा स इति प्रसिद्ध, शक्र इन्द्रो विराजते तथा बहुश्रुतोपि विराजते कौटश्यः शक्रः सहस्राक्षः सहस्रं अक्षीणि यस्य स सहस्राक्षः सहस्रनेत्रः कौटश्यः वज्रपाणिः वज्रयस्य हस्तः पुनः कौटश्यः पुरन्दरः पुराणि दैत्यनगराणि दारयति विध्वंसयतीति पुरन्दरः दैत्यनगर विध्वंसकः पुनः कौटश्यः देवाधिपतिर्देवेषु अधिपति देवाधिपतिः देवेषु अधिक कान्तिधारी अथ कौटश्यो बहुश्रुत शक्रः सहस्रं अक्षीणिश्रुतज्ञानानि यस्य स सहस्राक्षः सहस्रसंख्यै रक्षिभिर्नेत्रैरिव श्रुतज्ञानभेदैः पश्यतीत्यर्थः पुनः कौटश्यो बहुश्रुत शक्रः वज्रपाणिः वज्रं वज्राकारं पाणौ यस्य स वज्रपाणिः विद्यावतः पूज्यस्य हस्तमध्ये वज्रलक्षणस्य सम्भवात् पुनः कथंभूतो बहुश्रुतः शक्रः पुरन्दरः पुरं स्वतनुं दारयति तपसा दुर्बलीकरोतीति पुरन्दरः तपस्वी इत्यर्थः

सूत्र

हसक्खे वज्जपाणी पुरंदरे। सक्के देवा हिवई एवं हवइ बहुस्सुए ॥२३॥ जहा से तिमिरविद्धंसे उत्तिट्ठंते दिवायरे।

भाषा

शक्र इंद्र देवता मांहि अधिपति हुवे एवं भवति बहुश्रुत २३ यथा सः तिमिरान्धकारविध्वंसकः जिम दिवाकरः सूर्य अन्धकार फेड़े, तिम उर्द्धं गच्छन् दिनकरः सूर्यः ऊचो चढ़तो सूर्य तिम तेजसा जलतैव ज्वालामुत्पन्नः इम बहुश्रुतः अज्ञानरूप अन्धकार टाले तपतेजे करी दीपे बहुश्रुत २४ यथा स

पुनः कथंभूतो बहुश्रुत शक्रदेवताधिपतिः देवेषु सर्वसाधुषु अधिपति अधिकः सर्वसाधून् अधिकं यथा स्यात्तथापाति रक्षतीति देवाधिपतिः रिसीहि देवाय समं विवित्ता इत्युक्ते देवाः अधिकं पांतिरक्षन्ति सेवां कुर्वन्ति उपद्रवेभ्यो रक्षन्ति हरिके शबल साधुवत् वैयाकृत्यं कुर्वन्तीति देवाधिपतिः देवैरपि पूज्यते इत्यर्थः २३ जहासे तिमिरविद्धंसे उत्तिट्ठन्ते दिवायरे जलन्ते इवते एणं एवं० २४ यथा स इति प्रसिद्ध उत्तिष्ठन् उद्गच्छन् दिवाकरः सूर्य स्तेजसा ज्वलन् ज्वालाभि सत्पर्यन् इव विराजते तथा बहुश्रुतोपि राजते कथंभूतः सूर्यः तिमिरं अन्धकारं विध्वंसते इत्येवंशील स्तिमिर विध्वंसी अथवा तिमिरस्य विध्वंसो यस्मात् स तिमिरविध्वंसः अथ बहुश्रुत एव दिवाकरः कीदृक् स्यात् कथंभूतो बहुश्रुत सूर्य स्तिमिरं मिथ्यात्वान्धकारं विध्वंसयतीति तिमिरविध्वंसः किं कुर्वन् उत्तिष्ठन् क्रियानुष्ठानादौ अप्रमादी भवन् पुनः कीदृशो बहुश्रुत दिवाकरः किं कुर्वन् इव तेजसा द्वादशविध तप स्तेजसा माहात्म्येनवा ज्वलन् देदीप्यमानः परिवादिभिर्द्रष्टुं अपि अशक्य इत्यर्थः २४ जहासे उडुवइचन्दे नक्खत्त परिवारिए पडिपुन्ने पुन्नमासीए एवं ह० २५ यथा पूर्णमास्यां राकायां उडुपतिः चन्द्रोभवति जनाह्लादको भवति चन्दति आह्लादयतीति चन्द्रः अन्वर्थनामा भवति तथा बहुश्रुतोपि पूर्णिमास्यां सम्यक्त्वप्राप्तौ प्रतिपूर्णः उडुपतिरिव चन्द्रो भवति भव्यजनाह्लादको भवति कीदृश उडुपतिः नक्षत्रैर्ग्रह तारकादिभिः परिवृतः परिवारोजातोऽस्येति परिवारितः इति वा पुनः कीदृशः उडुपतिः प्रतिपूर्णः षोड़शकलाभिर्युक्तः पूर्णोमासः संसारो यस्यां पूर्णमासी सम्यक्त्व लब्धिरूपायां पूर्ण

सूत्र

जलंते इव तेएणं एवं हवइ बहुस्सुए ।२४। जहासे उडुवई चंदे नक्खत्ते परिवारिए । पडिपुन्ने पुन्नमासीए एवं हवइ

भाषा

नक्षत्रपतिः चन्द्र जिमते उडुपति ग्रह नक्षत्रनो स्वामी चन्द्रमा नक्षत्र परिवारपरिवृतः नक्षत्रनो परिवार तिणे करी परवर्यो थको प्रतिपूर्ण पूर्णमासि पूर्ण पूनिमने दीने शोभे एवं भवति बहुश्रुत २५ यथा सामानिकानां लोकसमूहानां जिम लोकना घरमांहि कोष्टागारेषु धान्याश्रयः सुष्ठु,दक्षु मूषकादिभ्यः

मास्यां बहुश्रुतरूप उडुपतिर्भव्य जनाह्लादको भवतीतिभावः पुनः कोष्ठगो बहुश्रुतोडुपतिः साधुभिर्नक्षत्रैरिव परिवृतः सहितः पुनः कोष्ठगो बहुश्रुतोडुपतिः प्रतिपूर्णः सर्वधर्म कलाभिः संपूर्णः इत्यर्थः २५ जहासि सामाइयाणं कुट्ठागारेसुरक्खिए नाणाधन्न पडिपुन्ने एवं० २६ यथा स इति प्रसिद्धः सामाजकानां महाष्टहस्त्यानां कोष्टागारो विराजते तथा बहुश्रुतोपि विराजते समायोजन समूहस्तंऽर्हतीति सामाजिका कौटम्बिकानां कथम्भूतः कोष्टागारः सुरक्षितः सुतरां अतिशयेन चौर मूषकादिभ्य उपद्रवेभ्यो रक्षितः सुरक्षितः पुनः कोष्ठगकोष्टागारः नानाधान्य प्रतिपूर्णः चतुर्विंशतिधान्यैः प्रतिपूर्णो भृतः अथ बहुश्रुतः कोष्ठगः सुरक्षितः सुतरां अतिशयेन गच्छ संघाटस्थ मुनिभिर्यत्नेन रक्षितः पुनर्नानाप्रकारै रङ्गो पाङ्गादिरूपैर्धान्यैः प्रतिपूर्ण इत्यर्थः२६ जहासे दुमाणपवरा जम्बूनाम सुदंसणा अणाढियस्स देवस्स एवं० २७ यथा द्रुमाणां मध्ये जम्बूनामा सुदर्शना इत्यपरनामा द्रुमोत्तमः प्रवरः

सूत्र

बहुस्सुए ।२५। जहासे सामाइयाणं कोट्ठागारेसु रक्खिए । नाणाधन्न पडिपुन्ने एवं हवइ बहुस्सुए ।२६। जहासे दुमाण पवरा जंबूनाम सुदंसणा । अणाढियस्स देवस्स एवं हवइ बहुस्सुए ।२७॥ जहा सा नईण पवरा सलिला सागरं

भाषा

सकलथाद्रक्षित: कोठारमांहि भलो परिचोरादिक उंदरादिक थकी वस्तु जले करी राखे नानाधान्य प्रतिपूर्ण: नानाप्रकारना धान्यतेणे करी भर्या थका सोभे एवं भवति बहुश्रुतसाधु२६ यथा स द्रुमाणां मध्ये प्रवरा जिम सघला वृक्षमांहि प्रवर प्रधान सोभे जंबू नाम्नाभिधानेन सुदर्शन नामाभिधान: जंबूद्वीपनामे बीजो नाम सुदर्शन अनाढतस्य अनाढीयादेवे नामे देवता तेहनुं थानक एवं भवति बहुश्रुत साधु २७ यथा शीता नदीनां मध्ये प्रवरा: जिम सीता नदी सर्व नदीमांहि मुख्य सलिला समुद्रगामिनी भवति सलिला कही पछे नदीसागर समुद्रमाहे जाइ सीता पूर्ववाहिनी सीतोदा पश्चिमवा

प्रधानः शोभते तथा बहुश्रुतो सर्वमुनिनां मध्ये प्रधानो विराजते स च जम्बू सुदर्शना नामा वृक्षः अनार्द्धिकस्य जम्बूद्वीपाधिष्ठाट देवस्य वर्त्तते तस्य हि जम्बूद्वीपाश्रितत्वेन सर्ववृक्षेभ्यः प्रधानत्वं ज्ञेय मित्यर्थः बहुश्रुतोपि मिष्टफल सदृश सिद्धान्तार्थ फलदः देवादिभिरभिगम्यः २७ ज हासा नईणपवरा सलिला सागरङ्गमा सीया नीलवन्तप्पवहा एवं० १८ यथा सा इति प्रसिद्धा नदीनां मध्ये सीता नाम्नी नदी प्रवरा प्रधाना शोभते तथा बहुश्रुतोपि शोभते कथम्भूता सीतानदी सलिला सलिलं पानीयं अस्याः अस्तीति सलिलानित्यनीरा पुनः कथम्भूता सीता सागरङ्गमा सागरं गच्छतीति सागरंगमा पुनः कीदृग्या सीता सीलवन्त प्पवहा नीलवतः पर्वतात् प्रवाहो यस्याः सा नीलवत् प्रवाहा नील पर्वतादुत्तीर्णा इत्यर्थः बहुश्रुतोपि साधूनां मध्ये प्रधानः निर्मलजलतुल्य सिद्धान्त सहितः पुनः सागरमिव मुक्तिस्थानं गामी पुनर्बहुश्रुतो नीलवत् पर्वतसदृशोन्नतकुलात् प्रसूतः उत्तम कुलप्रसूतो हि सद्विद्या विनयौदार्यगांभीर्यादिगुणयुक् स्यात् २८ जहासेन गाणपवरे सुमहं मंदरे गिरी नाणे सहि पज्जलिए एवं हवइ० २९ यथा स इति प्रसिद्धो नगानां पर्वतानां मध्ये सुतरां अतिशयेन महान् उच्चैस्तरो मन्दरो मेरु गिरि मेरु पर्वतः शोभते तथा बहुश्रुतोपि शोभते कथंभूतो मेरुः नानौषधी प्रज्वलितः नानाप्रकाराभि रौषधीभिः शल्य विशल्या सञ्जीवनी संरोहिणी चित्रावल्ली विषापहारिणी शस्त्र निवारिणी भूत नाग दमन्यादिभि र्मूलौभिः प्रज्वलितो जाज्वल्यमानः एवं बहुश्रुतः सर्व साधूनां प्रवरो गुणै

सूत्र — गमा। सीयानीलवंत पवहा एवं हवइ बहुस्सुए २८ जहासे नगाण पवरे सुमहं मंदरो गिरी नाणो सहि पज्जलिए

भाषा — हिनो सीता सोतोदा नीलवंतोद्भवासीता नदी नीलवंत पर्वत हुती उपनी जीम सर्व नदी माहि तुंगमे तिम बहुश्रुत गच्छमांहे सोभे सुसाधु २८ यथा सदृति प्रसिद्धो नगानां पर्वतानां मध्ये सुतरां अतिशयेये महात् उच्चैस्त रोमंदरोमेरु गिरिमेरुपर्वतः शोभते नानौषधिभि

प्रवरो गुणैरुत्तैस्तरः श्रुतस्य माहात्म्येन अत्यन्तं स्थिरः परवादिवादवात्या अचलः अनेकलब्ध्यतिशयसिद्धि रूपाभि रौषधीभि र्मिथ्यात्वोपकारेपि वध्यखामि मानतुंग कुमुदचन्द्रादिवत् जैनशासन प्रभावनारूप प्रकाशकारकः २८ जहासे सयंभुरमणे उदही अक्ख ओदए नाणारयण पडिपुन्ने एवं०३० यथा स इति प्रसिद्धः स्वयंभूरमण नामा चरमोदधि र्विराजते तथा बहुश्रुतोपि विराजते कथंभूतः स्वयंभूरमणोदधिः अक्षयं शाश्वतं अविनाशि उदकं जलं यस्य स अक्षयोदकः पुनः कथंभूतः स्वयंभूरमण समुद्रः नानारत्नप्रतिपूर्णः बहुप्रकारैः असंख्यै र्माणिक्यैर्भृतः तथा बहुश्रुतोपि स्वयंभूरमणइव कथं भूतः बहुश्रुतः अक्षयज्ञानोदकः अक्षयज्ञान जलः पुनर्बहुश्रुतः स्वयंभूरमण समुद्रवत् नानाप्रकारातिशयरूपरत्नैः संपूर्णः ३० समुद्दगंभीरसमादुरासया

सूत्र

एवं हवइ बहुस्सुए २९ जहासे सयंभु रमणे उदही अक्खओदए नाणा रयण पडिपुन्ने एवं हवइ बहुस्सुए ३० समुद्द गंभीरसमा दुरासया अचक्किया केणइ दुप्पहंसया सुयस्स पुन्ना विउलस्स ताइणो खवित्तु कम्मं गइमुत्तमंगया ३१

भाषा

प्रज्वलितः नानाप्रकारनी औषधो अने रत्न तिणे तेजवंत थको जाजुल्यमान दीपतो शोभे एवं भवति बहुश्रुत २९ यथा स स्वयंभु रमण समुद्र जीमते स्वयंभु रमण समुद्र जलक्षयरहितः अखूटपांणी छे जे समुद्रने विषे नानारत्नैः मरकतादिभिः प्रतिपूर्णः स्यात् नानाप्रकारना रत्न तिणे करी भर्यो छे एवं भवति बहुश्रुतः ३० समुद्रगांभीर्यसमाः सदृशाः अनाकलनीयाः समुद्रनी परि गम्भीर छे अनाकलनीय कोइकलो सके नहीं परिषहादिनाकेनापि पराभवं कर्तुं न समर्थाः किणे परिसहे पराभव करी सकोइ नहीं परिसह कोइ जेहने जीती सके नहीं श्रुतेन पूर्णा विस्तरेण त्रायणो रक्षकाः सिद्धान्ते करीने पूर्णभर्या पूर्वज्ञोवना रक्षक चपयित्वा कर्म सर्वकर्म खपावीने उत्तमां गतिं गताः उत्तमगतिने विषे गया ३१ तस्मात् श्रुतं पठनीयं तिणे कारणे

[अचकिया केणइ दुप्पहंसया सुयस्स पुण्णा विउलस्स ताइणो खवित्तु कम्मं गइमुत्तमंगया] ३१ एतादृशाः श्रुतस्य पूर्णाः बहुश्रुताः उत्तमां गतिं गताः प्रधानं स्थानं मुक्तिं प्राप्ताः किं कृत्वा कर्माणि क्षिपयित्वा श्रुतस्य पूर्णाः इत्यत्र तृतीयास्थाने षष्ठी श्रुतेन श्रुतज्ञाने पूर्णाः कौटश्यस्य श्रुतस्य विपुलस्य विस्तीर्णस्य अनेकहेतुयुक्तिदृष्टांत उत्सर्गवादनयाद्यनेक रहस्यार्थयुक्तस्य कौटश्याः बहुश्रुताः समुद्रगम्भीरसमाः समुद्रस्य गाम्भीर्येण तुल्याः समुद्रगम्भीरसमाः पुनः कौटश्याः दुराश्रयाः केनापि परवादिना कपटं कृत्वा न आश्रयणीया केनापि ठगितुं अशक्याः इत्यर्थः पुनः कथंभूताः अचकिताः अत्रासिताः परीषहैस्त्रासं अप्रापिताः पुनः कौटश्याः दुःप्रहंस्याः परिवादिभिः पराभवितुमशक्याः एतादृश श्रुतज्ञानधराः मोक्षं गताः गच्छन्ति गमिष्यन्ति ३१ [तम्हासु असद्दिट्ठिज्जा उत्तमट्ठगवेसए जेणप्पाणं परं चेव सिद्धिं संपाउणिज्जा सेत्तिबेमि] ३२ उत्तमार्थं गवेषको मोक्षार्थी पुमान् तस्मात् बहुश्रुतस्य मोक्षप्राप्तियोग्यत्वात् श्रुतं सिद्धान्तं अधितिष्ठेत् उत्तमश्चासौ अर्थश्च उत्तमार्थो मोक्षार्थस्तं गवेषते इति उत्तमार्थगवेषकः येन श्रुतेन आत्मानञ्च पुनः परमपि सिद्धिं प्रापयेत् मोक्षं गमयेत् कोर्थः बहुश्रुतः स्वयमपि मोक्षं प्राप्नोति अन्यं अपि स्वसेवकं मोक्षं प्रापयतीत्यर्थः इत्यहं ब्रवीमि इति सुधर्मास्वामी जंबू स्वामिनं प्रत्याह ३२ इति बहुश्रुतपूजाख्यं एकादशं अध्ययनं संपूर्णं ॥११॥ इति श्रीमदुत्तराध्ययनसूत्रार्थदीपिकायां उपाध्याय श्रीलक्ष्मीकीर्त्तिगणिशिष्य लक्ष्मीवल्लभगणि विरचितायां बहुश्रुतपूजाध्ययनस्यार्थः संपूर्णः ॥११॥ अथ द्वादशं प्रारभ्यते एकादशे बहुश्रुतपूजा प्रोक्ता ॥ अथ द्वादशे बहुश्रुतेनापि तपो विधेयः इति एकादशद्वाद

सूत्र

तम्हासुय मद्दिट्ठिज्जा उत्तमट्ठ गवेसए जेणप्पाणं परंचेव सिद्धिं संपाउणेज्जासेत्तिबेमि३२ बहुस्सुयज्झयणंसम्मत्तं ॥११॥

भाषा

सिद्धान्त भणवुं उत्तमार्थी मोक्षः तस्य गवेषकः उत्तम अर्थ मोक्षतेहना गवेषक जीवे छे येन कृत्वा आत्मानं परञ्च जिणे सिद्धान्ते करी आपणा आत्माने अने परशिष्यादीकने सिद्धिं प्रापयति निस्तारयति इत्यर्थः मुक्तिः सम्प्राप्तः इति समाप्तौ ब्रवीमि ३२ इति श्री बहुश्रुताख्यमध्ययनं संपूर्णम् ॥११॥

योः सम्बन्धः अतोऽध्ययने तपो माहात्म्यमाह । हरिकेशबलसाधु स्वपत्नी बभूव तत्सम्बन्धो यथा मथुरानगर्यां शङ्खोनाम राजा विषयसुख विरक्तः स्थविराणामन्तिके निष्क्रान्तः कालक्रमेण गीतार्थो जातः पृथ्वीमण्डले परिभ्रमन् हस्तिनागपुरे प्राप्तः तत्र भिक्षानिमित्तं प्रविष्टः तत्रैको मार्गो अतीवो ष्णोस्ति उष्णकाले केनापि गन्तुं न शक्यते उन्मार्गस्थ हुतवह इति नाम सञ्जातं तेन मुनिना सत्रगवाक्षस्थितः सोमदेवाभिधानः पुरोहितः पृष्टः किमेतेन मार्गेण व्रजामीति पुरोहितेन चिन्तितं यद्यसौ हुतवहमार्गे गच्छति तदा दह्यमानमसुं पश्यतो मम कौतुकमनोरथः पूर्णो भवतीति अतस्तेन स एव मार्गो निर्दिष्टः ईर्यापयुक्तो मुनिस्तेनैव मार्गेण गन्तुं प्रवृत्तः लब्धिपात्रस्य पादप्रभावतस्ताद्दग्योपि मार्गे शान्तो बभूव तस्मिन् मार्गे शनैः शनैश्चलन्तं मुनिं वीक्ष्य स पुरोहितः स्वावास गवाक्षादुत्तीर्य स्वपदाभ्यां तं मार्गं स्पृष्टवान् हिमवच्छीतलो मार्गस्तेन ज्ञातं मुनिपादमाहात्म्यं एवञ्च चिन्तितं हा मया पापकर्मणा पुण्यात्मनोऽस्यकीदृग्यो मार्गः प्रकाशितः परमस्य पादस्पर्शादेव मार्गतापोयशांति जाता ततो यद्यहमस्य विद्वेषोऽभूवं तदामामे तत्प्रायश्चित्तं भवतीति चिंतयित्वा तस्यमुनेः पुरः स्वपापं प्रकाशितं पादौ च प्रणतो मुनिनापि तस्य सम्यग्धर्मः प्रकाशितः जातं संवेगेन तेन सोमदेवेन तस्य निरंति केदीक्षा गृहीता चारित्रं विशेषात्पालयति परमहं ब्राह्मणत्वादुत्तमजातिरितिमदकुरुते परंनैवं भावयतिगुणे रुत्तमद्वायांतिननुजाति प्रभावतः क्षीरोदधि समुत्पन्नः कालकूटः किमुत्तमः १ किंच कोशेयं कृमिजं सुवर्णं मुपलाद्दूर्वापि गोरोमतः पंकात्तामरसं शशांकमुदधे रिंदीवरं गोमयात् काष्टादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना जाता लोकमहार्घता निजगुणैः प्राप्तास्व किं जन्मना २ एवं परमार्थमभावयन् सजातिमदस्तब्धः सोमदेवः कियत्कालं संयममाराध्य कालक्रमेण मृतो देवो जात स्तत्र चिरकालवाञ्छितसुखानि भुक्तवान् ततश्च्युतो गङ्गातीरे हरिकेशाधिपस्य बलकोष्टाभिधानस्य चण्डालस्य भार्यायाः गौर्याः कुक्षौ समुत्पन्नः साच स्वप्ने फलितं आम्रवृक्षं ददर्श स्वप्नपाठकानांच कथितवती तैरुक्तं तव प्रधानपुत्रो भविष्यतीति कालमासे दारको

जातः जातिमदकरणेनास्य चण्डालकुलोत्पत्तिर्जाता स बालः सौभाग्यरूपरहितो बान्धवानामपि हसनीयः तस्य बल इति नाम प्रतिष्ठितं सच वर्द्धमानः प्रकामं क्लेशकारित्वेन सर्व्वेषामुद्वेगकारी जातः अन्यदा वसन्तोत्सवे प्राप्ते चाण्डालकुटम्बानि विविधखाद्यपानकरणाय पुराद्बहिर्मिलितानि सन्ति स बल नामा बालकः परबालैस्समं क्लेशं कुर्व्वन् ज्ञातिद्वेषैर्निर्यूढः दूरस्थः स विलासक्रीडापराणि परबालानि पश्यति परं मध्ये समायातुं न शक्नोति तस्मिन्नव सरे तत्र सर्पो निर्गतः सविष इति ज्ञात्वा चाण्डालै र्मारितः पुनस्तत्र प्रलम्बमलम्बिकं निर्गतं निर्विषमिति ज्ञात्वा तैर्नविनाशितं तादृग्र मरणं दृष्ट्वा तेन बलबालेनचिन्तितं निजेनैवदोषेणप्राणिनः पराभवं सर्वत्रप्राप्नुवन्ति यद्यहं सर्प सदृशः सविषस्तदा पराभवपदं प्राप्तः यद्यलसिकश्चिरपराधो भविष्यंस्तदा न मे कश्चित्पराभवो भविष्यदिति सम्यग्भावयंस्तस्य जातिस्मरणमुत्पन्नं विमान वाससुखस्मृतिर्मार्गमा गतं जातिमदविपाकोऽपि ज्ञातः सम्वेगमागतेन दीक्षा गृहीता स हरिकेशीबलः शुद्धक्रियां पालयन् षष्ठाष्टमदशमद्वादशमासादित पस्तपन् क्रमेण विहारं कुर्वन् वाराणसीं नगरीं प्राप्तः तत्र तिन्दुकवने मण्डिकयक्षप्रासादे स्थितो मासक्षपणादितपः करोति तद्गुणावर्जितस्य यक्षस्तं महर्षिं निरन्तरं सेवते अन्यदा तत्र वने एको परो यक्षः प्राघूर्णकः समागतः तेन मण्डकयक्षस्य पृष्टं कथं त्वं भद्रने साम्प्रतं नायासि तेनोक्तं अहमिह स्थितमिमं मुनिं सेवे एतद्गुणावर्जितश्चान्यत्र गन्तुं नोत्सहे सोप्यागन्तुको यक्षस्तद्गुणावर्जितो बभूव आगन्तुकयक्षेण मण्डिकयक्षस्योक्तं एतादृग्ा मुनयो भद्रनेपि सन्ति तत्र गत्वा अद्य तान् सेवामहे इत्युक्त्वा द्वावपि तौ तत्र गतौ विकथादि प्रमादपरास्ते तत्र ताभ्यां दृष्टाः तेभ्यो विरक्तौ तौ यक्षौ पश्चात्तत्रा गत्य हरिकेशीबलं महामुनिं प्रणमतः प्रत्यहं सेवतेस्म अन्यदा तत्र यक्षायतने वाराणसीपति कौशलिकराजपुत्री भद्रा नाम्नी नानाविध परजनानुगता पूजासामग्रीं गृहीत्वा समायाता यक्ष प्रतिमां पूजयित्वा प्रदक्षिणं कुर्व्वन्ती मलक्लिन्न वस्त्रगात्रं दुस्सहतपःकरणकृशं कुरूपं तं महामुनिं दृष्ट्वा थूत्कृतं

निससर्ज यक्षेण चिन्तितं इयं महामुनिं तिरस्करुते अतो मया शिक्षणीयेति अधिष्ठिता तेन यक्षेण असमञ्जसं प्रलपन्ती दासीभिरुत्थाप्य राजगृहं नीता राज्ञा मन्त्रिका वैद्याश्च आकारिताः तैश्चिकित्सायां कृतायामपि न तस्याः कश्चिद्विशेष जातः अथ तस्या मुखे संक्रान्तो यक्षः सृष्टमेवमाह अनया मदायतनस्थितो महानुभावः संयमीनिन्दितः यदीयं तस्य संयमिनः पाणिग्रहणं करुते तदा मयास्या वपुर्मुच्यते नान्यथेति चिन्तितं राज्ञा ऋषिपत्नी भूत्वा अपीयं जीवत्विति विसृज्य यक्षवचनं राज्ञा प्रतिपन्नं सा स्वस्थशरीरा जाता सर्वालङ्कारभूषिता गृहीतविवाहोपकरणा महाविभूत्या यक्षायतने गता तस्य महर्षेः पादौ प्रणम्य एवं विज्ञप्तिं चकार हे महर्षे त्वं मत्करंकरेण गृहाण मुनिना भणितं भद्रे बुधजननिन्दतया अनया सङ्गत्यालं अपिच ये साधव एकस्यां वसतौ स्त्रीभिः समं वासमपि नेच्छन्ति तेन साम्प्रतं करङ्करेण कथं गृह्णन्तिसिद्धिवधू बद्धरागाः साधवः कथं अशुचिपूर्णासु युवतीसु रज्यन्ति अथतेन यक्षेण तस्यमहर्षेः शरीरं प्रच्छाद्य तत्सदृशं भिन्नरूपं विकुर्व्य करंकरेण जगृहे एकरात्रिं यावद्वसिता प्रभाते यक्षोदूरीभूतः स्वाभाविकरूपो योते स्मामाह भद्रे अहं संयमीनैव स्त्रीसङ्गं त्रिधाशुध्या करोमि न मया त्वत्करः करेण गृहीतः किन्तु मद्भक्तेन यक्षेणैव त्वं विडम्बिता स च साम्प्रतं दूरे गतः मत्तस्त्वं दूरे भव महर्षिणेत्युक्ता सा प्रभावे सर्वमिव मन्यमाना भयं विक्षिप्ता राज्ञोगृहे गता सर्वं तत् स्वरूपं राज्ञोग्रे आचख्यौ तदानीं राज्ञः पुर उपविष्टेन रुद्रदेव पुरोहितेनोक्तं राजन्नियं ऋषिपत्नी तेन मुक्ता ब्राह्मणाय दीयते ततो राज्ञा सा तस्यैव दत्ता पुरोहितोपि तयासह विषयसुखमनुभवन् कियन्तं कालं निनाय अन्यदा तस्या यज्ञपत्नीत्वकरणार्थं यज्ञस्तेन कर्तुमारब्धः तत्र यज्ञमण्डपे देशान्तरेभ्यो अनेकभट्टाः सवट्टाः समायाताः तदर्थं भोजनसामग्री तत्र प्रगुणीकृता अस्मिन्नवसरे तत्र महर्षि र्मासोपवासपारणके गोचर्यां भ्रमन् यज्ञमण्डपे समायातः इत्यादिकथानकं हरिकेशीबलस्योक्तं शेषकथानकं सूत्रादेवावसेयं सूत्रं [सोवागकुलसंभूओ गुणुत्तरधरो मुणी हरिए सबलो नाम आसी भिक्खू जिइंदिओ] १ स हरिकेशबलो नाम प्रसिद्धो भिक्षुरासीत्

कौटश्यः सः साधुः जितेन्द्रियः पुनः कौटश्यः श्वपाक कुलसम्भूतः श्वपाकश्चाण्डाल स्तस्य कुले सम्भूतः पुनः कौटश्यः मुनिः मन्यते जिनाज्ञां इति मुनिः जिनाज्ञापालकः इत्यर्थः जितानि इन्द्रियाणि येन स जितेंद्रियो विषय जेता पुनः कौटशो गुणत्रयधरः गुणत्रयं ज्ञानदर्शन चारित्राख्यं धरतीति गुणत्रय धर)१ [इरिए सणभासाए उच्चार समिईसुय जओ आयाण निक्खेवे संजओ सुसमाहिओ] २ पुनः कथंभूतो हरिकेशबली मुनिः ईर्यैषणा भाषोच्चार स मितिषु जओ इति यतो यत्नवान् ईर्या च एषणा च भाषा च उच्चारश्च ईर्यैषणा भाषोच्चारास्तेषां समितयः सम्यग् व्यवहारा ईर्यैषणा भाषोच्चार समितय स्तासु ईरणं ईर्या गमनागमनं तस्य समितौ गमनागमन व्यवहारे यत्नवान् एषणं एषणा आहारग्रहणं तत्र समितिरेषणा समितिस्तत्र यत्नवान् एवं

सूत्र

सोवागकुलसंभूओ गुणुत्तरधरो मुणी। हरिएसबलो नाम आसी भिक्खू जिइंदिओ ॥१॥ इरिएसणभासाए उच्चारे समिईसुय। जओ आयाण निक्खेवे संजुओ सुसमाहिओ ॥२॥ मणगुत्तो वयगुत्तो कायगुत्तो जिइंदिओ। भिक्ख

भाषा

चण्डालकुलो भवः सोपाककहीइ चण्डाल तेहने कुले उपनो सर्वोत्तम जे गुण तेहनो धरणहार छे साधु हरिके शबलोनाम हरिकेशी चण्डालनी जाति छे बलीस्यो नाम छे आसीत् अभूत् भिक्षुः जितेन्द्रियः आसीत् हुओ साधु जितेन्द्रियः आपणा इंद्रि जित्या छे १ इर्यैषणा भाषायां इर्या समति एषणा समति भाषा समति पुरीष समितिषु च उच्चारपा सवण समितिनें विषे यत्न वान् ग्रहणे मोचने च भांडा प्रमुख मूकेतो पूंजीनें मूकेले तो पूंजीने लिइं संयमान्वित सुसमाधित सतरह विधि संयम पाले समाधि वंतछे समाधि मांहि वर्त्तेछे २ मनो गुप्तवान् मन जेहने गुप्त ठामिछे वचन् गुप्तवान् वचन जेहने गुप्तछे काय गुप्तवान् जितेंद्रियः काया जेहनीं गुप्तछे

भाषा समितौ भाषा व्यवहारे यत्नवान् भासाए इत्यत्र एकारः आर्षत्वात् तिष्ठति उच्चार समिति मूत्रपुरीषादि परिष्टापन विधौ यत्नवान् पुनः कौदृशो हरिकेशबलः साधुः आदान निक्षेपे वस्त्रपात्रादयुप करण ग्रहण मोचने संसम्यक् प्रकारेण यतः संयतः संयमी पुनः कीदृशः सुतरां अतिशयेन समाधितः समाधिसहितः चित्तस्थैर्य सहित इत्यर्थः पञ्चसमिति युक्तः सुसाधुरस्तीत्यर्थः २ [मणगुत्तो वयगुत्तो कायगुत्तो जिइन्दिओ भिक्खट्ठावंभइज्जंमि जन्नवाड मुवट्ठिओ] ३ पुनः कीदृशो मनो गुप्तागुप्तः पुनर्वचन गुप्तागुप्तः पुनः काय गुप्तागुप्तः पुनः जितेन्द्रियः एतादृशो हरिकेशबलः साधुभिक्षार्थं ब्राह्मणानां इज्या ब्राह्मणे ज्यातस्यां ब्राह्मणेज्यायां ब्राह्मण यज्ञपाटके उपस्थितः तत्र ब्राह्मणा यज्ञं कुर्वन्ति तत्र यज्ञपाटके: प्राप्तः मनो गुप्तागुप्तो मनोगुप्तः वचो गुप्तागुप्तो वचोगुप्तः काय गुप्तागुप्तः कायगुप्तः इत्यत्र सर्वत्र मध्यपदलोपी समासः ३ [तंपासि जणमेज्जन्तं तवेण परिसोसियं पन्तोवहि उवगरणं उवहसन्ति अणारिया] ४ तं हरिकेशबलं साधुं एज्जन्तं आयातं पासि जण दृष्ट्वा अनार्याः दुष्टाः ब्राह्मणा उपहसन्ति उपहासं कुर्वन्ति कीदृशं तं तपसा परिशोषितं तपसा दुर्बलीकृतं पुनः कीदृशं तं प्रान्तोपध्युपकरणं जीर्ण वस्त्रोपधिधारकं प्राप्तं जीर्ण मलिनत्वादिना असारं जघधिर्वर्षा कल्पादिः सएव उपकरणं धर्मोपष्टंभ हेतुरस्येति प्रान्तोपध्युपकरणस्तं प्रान्तोपध्युपकरणं ४ जाईमय पडिबद्धा हिंसगा अजि इंदिया अबंभचारिणो बाला इमं वयण

सूत्र

ट्ठावंभइज्जंमि जन्नवाड मुवट्ठिओ ॥३॥ तं पासिऊणमेज्जंतं तवेण परिसोसियं । पंतोवहि उवगरणं उवहसंति

भाषा

पांचे द्रीजीत्यां छे भिक्षार्थं ब्राह्मणानां भिक्षाने अर्थे ब्राह्मणनेघरे यज्ञपाठके उपस्थित. प्राप्तः यज्ञवाडाने विषे आव्यो ३ तं हरिकेशं आगच्छन्तं दृष्ट्वा तेह रिकेशी साधुने आवतो देखी ते साधु कीस्या छे तपसा षष्ठादिना परिशोषितं छट्ठ अट्ठममासखमण आदेदेईने तपे करीने आपणे देही सुखाईछे प्रान्तो पध्यपकरणं जीर्णोपध्युपकरणं प्रांत फाटा तूटावस्त्र पहस्या छे हास्यं कुर्वन्ति अनार्या ब्राह्मणाः एहवायतीने हसवालागावाह्मण अनार्य४ जातिमद

मव्ववी ५ ते ब्राह्मणाः विवेकविकलाः इदं वचनं अब्रुवन् कौट्टगास्ते जातिमद प्रतिस्तब्धा जातिमदेन ब्राह्मण ब्राह्मण्यत्वेन यो मदोऽहङ्कारस्तेन प्रतिस्तब्धा अनम्राः जाति मद प्रतिस्तब्धा पुनः कौट्टगाः हिंस्रकाः जीवहिंसाकरणशीलाः पुनः कौट्टगाअजितेंद्रियाः विषया सक्ताः पुनः कौट्टगाः अब्रह्मचारिणो मैथुनाभिलाषिणः अब्रह्मणि कामविनायां चरन्ति रमन्ते इति अब्रह्मचारिणः कुशीलाः इत्यर्थः ते ब्राह्मणाः किं अब्रुवन् इत्याह [कयरे आगच्छइदित्त रूवे काले विकराले पोक्कनासे ओमचेलए पंसु पिसायभूए संकरदूसं परिहरियकण्ठे] ६ कतरः कोयं आगच्छति अतिशयेन इति कतरः एकारः प्राकृतत्वात् परमयं कौट्टगः दीप्तरूपो बीभत्सरूपः दीप्तवचनं बीभत्सार्थं वाचकं पुनः कौट्टगः कालः कालवर्णः पुनः कौट्टग् विकरालो विकृतांगोपां

सूत्र

अणारिया ॥४॥ जाइमय पडिवद्धाहिंसगा अजिइंदिया । अबंभचारिणो बालाइमं वयणमब्ववी ॥५॥ कयरे आगच्छइ दित्तरूवे काले विगराले पोक्कनासे । उमचेलए पंसु पिसायभुए संकरदूसं परिहरिय कंठे ॥६॥ कयरे तुमं इय अदं

भाषा

प्रतिबद्धाः ते ब्राह्मणकिस्या छे जातिनो मदतिणे करी लुब्धप्राणघातकः अजितेन्द्रियवली ब्राह्मण केहवाछे हींसाजीव बध करे छे इन्द्री जेणे जीत्या नथी अब्रह्मचारीणो मूर्खाः वली ब्राह्मण किस्या छे अब्रह्मचारी कुशीलिया छे बाला मूर्ख इदं वचनं अब्रवीत् हवे ते ब्राह्मण यतीने एहवांवचन कहे छे ५ कतरः त्वं आगच्छति हे वीभत्सरूपः कतरकोणरे तूं आवे छे कुत्सित दैत्यरूप वर्णेन कालः दन्तुदिना विकरालः हे फोक्कनासः तुं कालो छे मोटा दांत छे तेह भणी वीकराल छे मोटी थूलनाशिकाछे हे उच्छिष्टवस्त्रधारक पीसाचभूत मैला वस्त्र छे घणी धूलशरीरेलागी छे तेह भणी पणी पिशाचदीसे छे उत्करटिका वस्त्रनिच्छिन्न कण्ठः जकरडानां पद्यां वस्त्र लेइ ते गले पहस्या छे जीणे जतीये ६ कतर इत्येवं दुष्ट अदर्शी ब्राह्मण बोल्या कोण

गधरः लम्बोष्ठ दन्तुरत्वादि विकारयुक्तः पुनः कौटग्यः पोक्कनाग्रः पोक्का अग्रेस्थलोन्नता मध्ये निम्ना चिप्पटा नाशायस्य सपोक्कनाग्रः पुनः कौटग् अवम चेलः अवमानि असाराणि चेलानि वस्त्राणि यस्य स अवमचेलः मला विलत्वेन जीर्णत्वेन त्याज्यप्राय वस्त्रधारीत्यर्थः पुनः कौटग्यः पांशु पिशाच भूतः धुल्यावगुण्ठित शरीरत्वेन मलिनवस्त्रत्वेन भूततुल्य इत्यर्थः एतादृग्यः कोयं शङ्करदूष्यं कण्ठे परिधृत्य अत्रा गच्छति समीपे आगतं दृष्ट्वा एवं ऊचुरि त्यर्थः शङ्कर उत्करटक रोडीकावस्त्र जकरडी विशेष स्तत्रस्थं दूष्यं वस्त्रं शङ्करदूष्यं यद्यपितस्यसाधोर्वस्त्रं उत्करटकनास्ति तथापितेषां अत्यन्त घृणोत्पादक त्वेनतैरुक्तं कोयं उत्करटक वस्त्रं कण्ठे परिधृत्य पिशाच सदृशो भ्रमन्नत्रा गच्छति सहि हरिकेशी साधुः कुत्रापि आत्मीयं उपरणं न मुञ्चति सर्वं वस्त्रोपधि उपकरणादिकं गृहीत्वैव भिक्षार्थं भ्रमतीतिभावः ६ [कयरेतुमं इय अदंसणिज्जे काएव आसाइहमागओसि ओम चेलगा पंसु पिसाय भूया गच्छ खलाहि किमिहं ठिओसि] ७ पुनस्ते किमूचुरित्याहरे इति नीचामन्त्रणे अवमचेलकः सटित पटित वस्त्रधारी धूलीधूसर भूत कल्पस्त्वं कोसिकया आशया इह यज्ञपाटके आगतोसि काएव आशा इति प्राकृतत्वात् भकारोपि लाक्षणिकः कौटग्यस्त्वं इय अदंसणिज्जे अनेन मलिनवस्त्रादिधारणेन अदर्शनीय इति अदर्शनीयः द्रष्टुं अयोग्यः त्वद्दर्शना देवास्माकं धर्मो विलीयते अत्र गाथायां उमचेलगा पंसु पिशाय भूया इति पुनरुक्तिः अत्यन्त निर्भत्सनार्थारेभूतप्राय गच्छ इतो यज्ञस्थानाद्व्रज खलाहित्ति देशीय भाषया अपसर दूरं दृष्टिमार्गात् किमिहस्थितोसि त्वया सर्वथाच

सूत्र — सणिज्जे । काएव आसाएइह मागओसि । उमचेलगा पंसुपिसायभूया गच्छ खलाहि किमिहंठिओसि ।७। जक्खो

भाषा — रे तूं आवे छे इहां अदर्शोक देखवा अयोग्य कया वांछया इह यज्ञपाटके आगतोसि अरे पिशाच ए यज्ञ वाडे किसी इच्छाइ आव्यो छे हे उमचेलकरज सा पिशाचवत् जातः मेलावस्त्रछे धुलिलागी छे शरीरे तिणे करीने पिशाचभूतछे अतोयज्ञपाटकात् व्रजस्व अपसर किंस्थितोसि हे खल हे दुर्ज्जनजापर

न स्यात्य मित्यर्थः तैर्वाच्यो रित्युक्ते सति स साधुषु किमपि न अवादीत् तदा तद्भक्तस्य यक्षस्य कृत्यमाह ७ [जक्खो तहिंतिंदुय रुक्खवासी अणुकम्पओ तस्स महामुणिस्स पच्छायइत्तानियगं सरीरं इमाइं वयणाइ मुदा हरित्था] ८ तस्मिन्काले तिन्दुकवृक्षवासी यक्ष इमानि वक्ष्यमाणानि वचनानि उदाहा र्षीत् अवोचदित्यर्थः किं कृत्वा निजकं शरीरं प्रच्छाद्य स्व शरीरं प्रच्छन्नं विधाय साधुशरीरे प्रवेशं कृत्वा कथंभूतः स यक्षः तस्य मुनेः अनुकम्पकः अनु रूपं कम्पते चेष्टते इत्यनुकम्पकः आधीः सेवक इत्यर्थः तिन्दुकवनमध्ये एको महान् तिन्दुकवृक्षोस्ति तस्य वृक्षस्याधस्तस्य चैत्यमस्ति तत्र साधुः कायोत्स र्गेण तिष्ठति तस्य साधोर्धर्मानुष्ठानं दृष्ट्वा गुणरागी सेवकः संजातोस्ति इतिभावः स यक्ष इत्यवादीत्८ [समणो अहं सञ्जओ बंभयारी विरओधण पयण

सूत्र

तहिं तिंदुयरुक्खवासी अणुकंपओ तस्स महामुणिस्स पच्छायइत्ता नियगं सरीरं इमाइं वयणाइं उदाहरित्था ।८।
समणो अहं संजओबंभयारी विरओ धणपयण परिग्गहाओ। परप्पवित्तस्सओ भिक्खकाले अन्नस्स अट्ठा इहमाग

भाषा

ही मत उभो रहे कोम उभो छे ७ तत्र यज्ञपाटके यक्षः तिंदुकवृक्षवासी तेह यज्ञवाडाने विषे एक तिंदुकनामे वृक्ष छे ते वृक्षमांहि एक यक्ष रहे छे अनुकम्पया भक्त्या महामुनेः हवे ते जक्ष ते साधुनी भक्तिने वास्ते प्रच्छाद्य स्वं तनुं अदृश्यं कृत्वा आत्माङ्ग शरीरं आपणु शरीर आच्छाद्य ढांकीने यतीना शरीरमे संक्रामीने इमानि वचनानि उदाहृतवान् इस्या वचन बोलवा लागो यतीना शरीरमाहिं पेसिने यक्ष ८ अहं श्रमणः अहं संयतः अहं ब्रह्मचारी अहो ब्राह्मणो हुं साधु छु संयती कुं ब्रह्मचारी कुं निवृतः धनस्वजन परिग्रहात् विरमो छांड्यो धन आपणो परिवार सर्व परिग्रहपणि छांड्यो परार्थ निष्पन्नस्य भिक्षाकाले पराइ अर्थे नीपना छे आहार पांणी भिक्षानि काले भिक्षावेलाइ अन्नस्यार्थेह यज्ञपाटके आगतोस्मि ए यज्ञपाडाने विषे अन्नने अर्थे

परिग्गहाओ परप्पवित्तस्सउभिक्खकाले अन्नस्स अट्ठाइह मागओसि] ८ स यत्त: किम वोचत् तदाह भो ब्राह्मण भवद्भिरुक्तं कोसिरेत्वं तस्योत्तरं अहं श्रमणोस्मि श्राम्यति तपसि श्रमं करोतीति श्रमणस्तपस्वी पुनरहं संयत: सावद्य व्यापारेभ्यो निवर्त्तित: पुनरहं ब्रह्मचारी ब्रह्मणि भोगत्यागे चरति रमते इत्येवं शीलो ब्रह्मचारी पुनरहं धनपचन परिग्रहात् विरत: तत्र धनं गो महिष्यश्वादि चतु:पदरूपं पचनं आहारादिपाक: परिग्रहो गणिमधरि मेय्य परिच्छेद्यादि द्रव्यरूप: कया आशया इहा गतोसि अस्योत्तरं भो ब्राह्मण भिक्षाकाले भिक्षावसरे अन्नस्य अर्थाय अत्रागतोस्मि कीदृशस्य अन्नस्य परप्रदत्तस्य परस्मै परार्थं प्रदत्तं पक्वं परप्रदत्तं गृहस्थेन आत्मार्थं राद्धं ८ [वियरिज्जइ खज्जइ भुज्जई य अन्नं पभूयं भवयाणमेवं जाणाहि मेज्जा यण जीविणुत्ति सेसावसेसंलहओ तवस्सी १० अत्र भवयाणं इति भवतां एतत्समीपत रवर्त्ति अन्नं प्रभूतं अद्यते इति अन्नं भक्ष्यं प्रभूतं प्रचुरं विद्यते तदेव प्रचुरत्वं दर्श्यते वियरिज्ज इति वितीर्यते दीनहीना नाथेभ्य: सर्वेभ्यो वितीर्यते विशेषेण दीयते पुन: खाद्यते खण्डक घृतपूरादिकं स शब्दं भक्ष्यते पुनर्भुज्यते तण्डुल मुद्गदाल्यादि स घृतं आकण्ठं अभ्यवहार्यते इत्यनेन अत्रकाचित् कस्यापि भक्ष्यवस्तुनोन्युनतानदृश्यते यूयं मे इति मां याचन जीविनं जानीत याचनेन भिक्षया जीविनं जीवितव्यं अस्येति याचन जीवीतं इति अस्मात् कारणात् तपस्वी मत्तक्षणो मुनिरपि अत्र शेषावशेषं शेषात् अपि

सूत्र ओसि ॥९॥ वियरिज्जइखज्जइ भुंज्जईय अन्नंपभूयं भवयाणमेयं । जाणाहिमेजायण जिविणोत्ति सेसावसेसं लहओ

भाषा आव्यो छुं ८ दीयते खाद्यानि खाद्यते भक्तरूपादि यत्र कहे छे अहो ब्राह्मणो तुम्हो अत्र जिमो छो चोखा दालि रोटी प्रमुख धान्यं प्रचुरं भवतां एतत् तुम्हारा यज्ञ वाडा मांहो ए धानघणा दीसे छे जानीतया च नजीवो इति अहो ब्राह्मणो मुझने तुम्हो याचना जीवी जाणो छुं भिक्षा मांगीने आजीवीका करु छुं शेषावशेष उबरित अन्तप्रान्तलभेत तपस्वी अहो ब्राह्मणो अम्हसरिखो जगत्मो सांभरुं तादुं तपस्वीने यो १० संस्कृतं उत्पादितं भोजनं ब्राह्म

शेषं शेषावशेषं उद्धरितं प्रान्तप्रायमाहारं लभतां प्राप्नोतु इत्यपि यूयं जानीतकोर्थः स मुनिरवादीत् अत्र अन्नं यत्र तत्र परिष्ठाप्यते भवद्भिरेतादृशी बुद्धिः करणीया अयं क्षपको आहारार्थं आगतोस्ति अयमपि शेषावशेषं आहारं प्राप्नोतु इति विचार्य मह्यं शुद्धमाहारं दीयतामिति यच्चेणोक्ते सति ते ब्राह्मणाः किं प्राहुरित्याह १० [उवक्खडं भोयणमाहणाणं अत्तट्ठियं सिद्धमिहेगपक्खं न उव्वयं एरिसमन्नपाणं दाहामुतुभं किमहं ठिओसि] ११ रे भिक्षो इह अस्मिन् यज्ञपाटके भोजनं यत् उपस्कृतं घृतहिंग्वाद्यान्यक मिरच लवण जीरकादिभिः घृतोपस्कारं शाकादिकं पुनरिहसिद्धं चतुर्विधाहारं राद्धं वर्त्तते तद् रे भिक्षो आहारं एकपक्षं वर्त्तते एकः पक्षो ब्राह्मणो यस्य तत् एकपक्षं एतदाहारं शूद्रेभ्यो नदेयमस्ति ब्राह्मणानां वर्त्तते पुनरिदं आहारं

सूत्र

तवस्सी ॥१०॥ उवक्खडं भोयण माहणाणं अत्तट्ठियं सिद्धमिहेगपक्खं । ण उव्वयं एरिसमन्नयाणं दाहामुतुभं किमिहं ठि ओसि ११ थलेसुबीयाइं ववंति कासगा तहेवणिन्नेसुय आससाए एयाए सद्धाए दलाहि मज्झं आराहए पुण्ण मिणं खु खेत्तं ।१२।

भाषा

णानां ब्राह्मण कहे छे ए आहार पांणी ब्राह्मणाने काजे नीपनो छे आत्मार्थं निष्पन्नं इह एक एक ब्राह्मणेभ्य एव देयं अने वली आत्माने अर्थे नीपनो एक पक्ष छूट ब्राह्मण वीजा को इने देवो नहीं नच वयं ईदृशं अन्न पानं अम्हे इस्यो अन्न तुभने तुभ्यं न दास्यामः किं इहस्थितोऽसि नहिं आंइहां कांइ उभो छे ११ यच्चो वाच उच्च भूभागेषु वीजानि वपंति कौटम्बिकाः कलंवी उंचा थलने विषे वीजवावे तथा निम्नेषु नीच भूमिषु वपंति धान्याशयः तिम वली नीची भूमिकाने विषे वावेधाननीची भूमिकाने विषे वावे धाननी आस्था करे एतदुपमयाश्रद्धयाददध्वं मह्यं एखे तनीउपमाकरीनेसुभने पणिधो आराधयेत् पुण्यं इदं निश्चितक्षेत्रं अहो ब्राह्मणो ए क्षेत्र पवित्र छे भलो छे तुम्हो आराधो १२ ब्राह्मणा जचुः क्षेत्राणि अस्माकं ज्ञातानि लोके अम्हे साधु

आत्मार्थिकं आत्मार्थेभवं आत्मार्थिकं ब्राह्मणैरपि आत्मनैवभोज्यं नत्वन्यस्मैचित् देयमित्यर्थः तु इति तेन हेतुनावयं एतादृशं ब्राह्मणभोज्यं अन्न पानं तुभ्यं न दास्यामः इह त्वं किं स्थितोसि अस्माकं धर्मशास्त्रे उक्तमस्ति न शूद्राय मतिं दद्यात् नोच्छिष्टं न हविः कृतं नचास्योपदिशेद्धर्मं नचास्य व्रतमादिशेत् १।११ तदा यत्तः पुनरवादीत् [थलेसुबीयाइं ववंति कासयातहेव निन्नेसुय आससाए एयाइ सद्धाएदलाहिमज्झं आराहिए पुन्नमिणं खुखेत्तं] १२ एतया अनया उपमया श्रद्धया भाववनया मह्यं ददध्वंखु इति निश्चयेन इदं मल्लक्षणं पुण्यं शुभं चेत्रं आराधयत एतया इति कया उपमया तां उपमां आह कर्षकाः क्षेत्रीकारकाः नराः आयंसया विचारणया काले वर्षाकाले स्थलेषु उच्चप्रदेशेषु तथैव निम्नेषु निम्नभूमिप्रदेशेषु बीजानि वपन्ति कोर्थः वर्षा काले क्षेत्रीकारका बीजं वपन्त एवं चिन्तयति यदि प्रचुरा वर्षा भविष्यन्ति तदा स्थलेषु फलावाप्तिर्भविष्यति यदि च अल्पाः वर्षा भविष्यन्ति तदा निम्न प्रदेशेषु फलावाप्तिर्भविष्यति उभयत्र उच्च नीचप्रदेशेषु बीजं वपन्ति न पुनरेकत्रैव बीजं वपन्ति यदि यूयं ब्राह्मणा निम्नभूमिसदृशा स्तदा अहं स्थलभूमिसदृशो गण्यः मह्यमपि दातव्यं न केवलं यूयमेव क्षेत्रप्रायाः किन्तु अहमपि पुण्यक्षेत्रमस्मीति भावः १२ इति श्रुत्वा ते ब्राह्मणा स्तं प्रत्यूचुस्तदाह [खित्ताणि अम्हं विइयाणि लोए जहिं पकिन्ना विरुहंति पुन्ना जेमाहणा जाइ विज्जोववेया ताइं तुखित्ताइं सुपेसलाइं] १३ अरे पाषण्डपाश्च तानि क्षेत्राणि अस्माभिर्विदितानि वर्त्तन्ते इति अध्याहारः जहिं इति यत्र क्षेत्रेषु प्रकीर्णानि उप्तानि बीजानि प्रदत्तानि

सूत्र

खेत्ताणिअम्हंविदियाणिलोए जहिंपकिन्नाविरुहंतिपुन्ना। जेमाहणाजाइ विज्जोववेयाताइंतुखेत्ताइं सुपेसलाइं।१३

भाषा

ब्राह्मण कहे छे जेदाननां क्षेत्र छे ते अमे जाणु छुं यत्र क्षेत्रेषु वपानि सति प्रादुर्भवन्ति पूर्णानि जे क्षेत्रने विषे व्योवो थकां उगे पुण्य ये ब्राह्मणाः जाति विद्योपपेताः जे ब्राह्मण योग करी विद्या करी सहित छे उत्तम जाति छे घणी विद्या जाणेछे तानि क्षेत्राणि सुपेशलानि मनोज्ञानि इस्या ब्राह्मण अम्हारे

दानानि पूर्णानि विरुहंति विशेषेण उद्गच्छन्ति फलदानि भवन्ति विभक्तिलिङ्गव्यत्ययस्तु प्राकृतत्वात् ये ब्राह्मणा जातिविद्योपपेताः स्तेतु ब्राह्मणाः सुतरां अतिशयेन पेशलानि मनोहराणि क्षेत्राणि क्षेयानि तत्र जातिब्राह्मणत्वं विद्यावेदाध्ययनं जातिश्च विद्याच जातिविद्ये ताभ्यां उपपेताः सहिताः जाति विद्योपपेताः उप अप इताः इत्यत्र शकंध्वादिषु पररूपमित्यनेन उपशब्दस्य अकारलोप पश्चादादगुणेन सिद्धिः यदुक्तं समश्रोत्रिये दानं द्विगुणं ब्राह्मण ब्रूवे सहस्रगुणमाचार्य अनन्तं वेदपारगे २ इत्युक्तत्वात् वेदपाठगाः ब्राह्मणाः पुण्य क्षेत्राणि १३ अथ यच्च आह [कोहोय माणोयवहोयजेसिं मोसं अदत्तं च परिग्गहं च तेमाहणाजाइ विज्जा विहीणा ताइं तु खित्ताइं सुपावयाइं] १४ भो ब्राह्मणाः येषां भवतां मध्ये क्रोधो वर्त्तते च पुनर्मानमाया लोभाश्च वर्त्तन्ते चकारात् मानादीनां ग्रहणं च पुनर्बधो जीवहिंसा वर्त्तते अदत्तं अदत्तादान मस्ति च शब्दात् मैथुनं कामा शक्तिरस्ति च पुनः परिग्रहो वर्त्तते ते यूयंकेब्राह्मणाः जाति विद्याविहीना क्रिया कर्म्मविशेषेण चातुर्वर्ण्ये व्यवस्थितं इति वचनात् ब्राह्मणत्व जातिमान् ब्राह्मणः ब्राह्मण ब्राह्मणीभ्यां उत्पन्नो यते किं तु ब्राह्मणत्वेन ब्राह्मणक्रिया निष्ठत्वेन ब्राह्मणस्थितेन जातिधर्मेण विशिष्टो ब्राह्मण उच्यते तस्मात् युष्मासु ब्रह्मक्रियानिष्टत्व ब्राह्मत्वस्य अभावात् न जातिरस्ति ब्राह्मणाः ब्रह्मचर्येण इति लक्षणोक्तित्वात् न पुनर्यूयं विद्या युक्ताः विद्यायास्तु विरति रूपफलभावात् विद्यावान् अपि यावत् विरतिमान् सन् आश्रवात् सम्वरद्वारेण न रुणद्धि तावत् स विद्यावान् न उच्यते विद्या अपि परमार्थत स्त्राएव उच्यते यासुपश्चा श्रव परिहार उक्तः तस्मान्न भवन्तो विद्या

सूत्र

कोहोयमाणोयवहोयजेसिं मोसं अदत्तंचपरिग्गहंच । तेमाहणाजाइ विज्जाविहूणा ताइं तुखेत्ताइं सुपावयाइं ॥१४॥

भाषा

पुण्यनां क्षेत्र मनोहर कह्या १३ अथ यद्योवाच क्रोधश्च मानश्च बधश्च येषां क्रोधमान छे जे मांहिवली वध करे छे जीवमारे छे मृषावादश्च अदत्तश्च परि ग्रहश्च मृषावाद बोले अदत्तादानलिइ परिग्रह राखे ये ब्राह्मणाः जातविद्या विहिनाः तेब्राह्मण जाति विद्याइ करीने हीन तानि क्षेत्राणि सुपापकान्येव

वन्तः भवत्सु भवदुक्तं एव जाति विद्योप पेतत्वं ब्राह्मण लक्षणं सर्वथा नास्त्येव तस्मात् तानि सु पापकानि एव खेत्राणि भवन्तः न पुण्यचेत्राणि युयं१७ अथ कदाचित्ते एवं वदेयुः वयं वेदविदो वर्त्तामहे इत्याह [तुम्भेत्थ भोभारगिराणं अट्ठं नयाणाह अहिज्जवेए उच्चावयाइं मुणिणो चरन्ति ताइंतु खित्ता इंसुपेसलाई] १५ भो इत्या मन्त्रणे भो ब्राह्मणा यूयंगिरां वेदवाणीनां भारहराः भारोद्वाहकाः यतो यूयं वेदान् अधीत्य वेदानां अर्थं न जानीथ तथाहि आत्मा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः पुनरयं समो मशके नागे च न हिंस्यात् सर्वभूतानीत्यादि वेदवाक्यानि अधीतानि अथ पुनर्भवद्भि जीव हिंसासेव प्रवर्त्यते तस्मादत्र यागः पृथक् उच्यते यत्र च आत्मनां अग्नीदाहः सचात्र वेदे यागश्च न स्यात् यदि च सएव आत्माएव भवद्भिर्नज्ञातः तदा

सूत्र

तुम्भेत्थभोभारहरागिराणं अट्ठंनजाणाह अहिज्जवेए। उच्चावयाइं मुणिणोचरंति ताइं तुखेत्ताइं सुपेसलाइं।१५
अज्झावयाणं पडिकूलभासीपभाससे किंतुसगासिअम्हं। अविएयंविणस्सओ अन्नपाणं णायणं दाहामुतुमंणियंठा।१६।

भाषा

ते ब्राह्मणरूपक्षेत्र अत्यन्त पापी कह्या १४ यूयं अत्र लोके विप्राभारधरा गिराणां सन्ति तुम्हे भो ब्राह्मणो निःकेवल शास्त्रना भार अने ब्राह्मणना नामनो भार वहो छो जे अम्हे ब्राह्मण वाणीति तुम्हे वेदनो अर्थनेति ज्ञात्वा अने वली तुम्हे वेदना भणो छो उच्चनीच स्थानानि मुनि यत्चरन्ति धनवन्तने घरे अने निर्धनने घरे भिक्षाने अर्थे यतो जाइ नान्येव मुनिलक्षणानि चैवाणि शोभनानि तेजसाधु रूप जे क्षेत्रछे ते भला पुण्य हेतु छे पुण्यक्षेत्र छे१५ अथ विप्राः आहुः अध्यापकानां पाठकानां विपरीत भाषो ब्राह्मण बोल्या अहोसाधु उपाध्यायनुं भुंडोबोलोछो प्रकर्षेण ब्रूषे कस्मात् समीपे अस्माकं अम्हारे पासे उभो थको अम्हने शु कहे छे अविसभावने एतत् दृश्यमानं अन्नपानं क्वथितादिभावं प्राप्नोतु अन्नपांणी विणसी जाइ छे कोही जाइ छे तो पिणि न किञ्चिदा

किमर्थं यागं कुर्वोध्वं प्रथमं यागोपि भवद्भिर्नज्ञायते कानि तर्हि क्षेत्राणीत्याह हे ब्राह्मणा मुनीन् सुपेशलानि अत्यन्तं सुन्दराणि क्षेत्राणि जानीथ ये मुनयः उच्चावचानि गृहाणि उत्तमाधमानि कुलानि भिक्षार्थं चरन्ति अथवा उच्चावयाद् उच्चानि महान्ति व्रतानि उच्चव्रतानि येषां तानि उच्चव्रतानि अकारप्राकृतत्वात् महाव्रतधरणितानि क्षेत्राणिभव्यानिज्ञेयानि इत्यर्थः १५ तदा छात्राः किं प्राहुः [अज्झावयाणं पडिकूलभासी पभाससे किंतुसगासि अम्हं अविएयं विणस्सउ अन्नपाणं नयणं दहासुतुमंनियंठा] १६ किन्तु इति शब्दो निन्दाक्रोधवाचकौ अरे नियंठा अरे दरिद्रि त्वं उपाध्यायानां प्रतिकूलभाषी सन् अस्मत्पाठकानां सम्मुखवादी सन् अस्माकं सकाशे अस्माकं प्रत्यक्षं प्रभाषसे प्रकर्षेण यथा तथा भाषसे असंबद्धं वचनं ब्रूषे तस्मादरे एतत् अन्नपानं विनश्यतु एतदाहारं सटतु पततु अपि परमेतदाहारं तुभ्यं उपाध्याय प्रतिकूलवादिनेदृशः १६ तदायज्ञ आह [समिईहिं मज्झं सुसमाहियस्स गुत्तीहिं गुत्तस्स जिइंदियस्स जइमेनदाहित्थइहेसणिज्जं किमज्ज जन्नाणलभि त्थलाभं] १७ यदि मे मम इह अस्मिन् यज्ञपाटके एषणीयं शुद्धं आहारं अद्य अवसरे न दास्यथ तदा यज्ञानां लाभं पुण्यप्राप्ति रूपं फलं किं लप्स्यथ अपि तु न किमपीत्यर्थः यावदानं विना किमपि न फलं इत्यर्थः कथंभूतस्य मम तिसृभिःगुप्तिभिर्गुप्तस्य पुनः कीदृशस्य पञ्चभिः समितिभिः सु अत्यन्तं समाहितस्य युक्त

सूत्र

समिईहिंमज्झं सुसमाहियस्स गुत्तीहिंगुत्तस्सजिइंदियस्स । जइमेणदाहित्थ इहेसणिज्जं किमज्ज जन्नाणलभेत्थ

भाषा

स्यामः तव अन्नपान हे निग्रन्थ तुझने ए अन्नपाणी कांइ नहीं दां तुपरहोजा १६ साधुरुवाच सुसमितिभिः सुसमाधितस्य यज्ञ कहे छे पांचे समते करी समाधिमतो छो गुप्तिभिः गुप्तस्यजितेन्द्रियाय अने इं त्रिइं गुप्ति करी गुप्त छुं पांचे इंद्री मे आपणा जीत्या छे यदि मे मम यूयं न दास्यथ एषणीयं वस्तु जो तुम्हे सूझतो आहार एषणीय सूझते नही दो तदा किमत्र यज्ञानां लाभं लप्सिथः तो ते आज एह यज्ञनुं फल शुं पामस्यो १७ विप्राः प्राहुः

स्य पुनः कोट्टपस्य मम जितेन्द्रियस्य जितानि इन्द्रियाणि येन स जितेन्द्रियस्तस्य अत्र चतुर्थी स्थाने षष्ठी एतादृशाय पात्राय मह्यं चेत् यूयं प्रासुकमाहारं न दास्यथ तदा भवतां सर्वमपि वृथा फलस्य अभावात् १७ अथोपाध्याय आह [के इत्थ खत्ता उवजोइया वा अज्झावया वा सह खंडिएहिं एयंखुदंडेण फलेण हंता कंठंमि घित्तूणखलिज्जतोणं] १८ केचित् अत्र अस्मिन् यज्ञपाटके क्षत्राः क्षत्रियाः उपज्योतिषः अग्नेः उपसमीपे अग्निसमीपवर्त्तिनः पाक स्थानस्थाः वा अथवा अध्यापकाः वेदपाठकाः संदृति अध्याहारः कथंभूताः पाठकाः खंडिकैः क्षात्रैः सहिताः ये एनं मुंडं दंडेन वंशयष्ट्या फलेन बिल्वादिना हत्वा कंठं गृहीत्वा गलहस्तं दत्वा स्खलयेयुः इतो यज्ञस्थानान्निःकासयेयुः जोइत्यत्रयः इत्युक्तं तत् प्राकृतत्वात् ये इति वक्तव्यं प्राकृतत्वाद्वचन व्यत्ययः १८ [अज्झावयाणं वयणं सुणित्ता उद्धाइया तत्थ बहू कुमाराः दण्डेहिं वित्तेहिं कसेहिं चेवं समागया तं इसिताडयन्ति] १९ तत्र तस्मिन् यज्ञ

सूत्र

लाभं ॥१७॥ केएत्थखत्ताउवजोइयावा अज्झावयावासहखंडिएहिं। एयंतुदंडेणफलेणहंता कंठंमिघित्तूण खलेज्ज जोणं ॥१८॥ अज्झावयाणं वयणं सुणित्ता उद्धाइयातत्थबहूकुमारा। दंडेहिंवेत्तेहिंकसेहिंचेव समागयातंइसिताल

भाषा

क्षत्रिय अन्य क्षत्रियाः वाथवा उव जोई या अग्निरक्षकाः ब्राह्मण बोल्या कोई छे रे अत्र क्षत्रिय अथवा अग्निरक्षकः अध्यापकाः सह क्षात्रैः उपाध्याय इहां केइ छे क्षात्र सहित यः एनं निर्ग्रंथं दण्डे न फलेन हत्वा जे एह जतीने दण्डे करी फल बीजोरा प्रमुखे करी हणीकण्ठं गृहीत्वानिःक्षासयेत् गले झालिने एहने काढी परी १८ अध्यापकानां वचनं श्रुत्वा उपाध्यायनां वचनसांभलीने उद्धापिताः तत्र बहवः कुमाराः मारवा भणी ब्राह्मणना छोकरा घणा दोडया दण्डैः वेत्रैः कसैश्च तर्जनकैश्चैव निश्चयेन दण्डे करीने ताजणे करीने चाबुके करीने समागताः सन्तः तं मुनिं ताडयन्ति आव्या थका ते

पाटके बहवः कुमाराः तरुणाः च्छात्राः दण्डैर्वंश यष्टिभिर्वेत्रैर्जलवंशैः कशैश्चर्म दवरकैस्तं ऋषिं ताडयन्ति कौटशास्ते कुमाराः समागताः संमील्यैकतो भूय आगताः अहो क्रीड़नकं समागतं इति रभसतः संभूय यष्ट्यादि सर्वं गृहीत्वा समागताः इत्यर्थः तं मुनिं ताडयन्ति किं कृत्वा उपाध्यायानां वचनं श्रुत्वा १६ [रन्नो तहिंकोसलि अस्स धूया भद्दत्तिनामेण अणिन्दियं गीतंपा सिया सञ्जय हम्ममाणं कुद्धे कुमारे परिनिव्ववेइ] २० तत्र कौशलिकस्य राज्ञः धूश्रा इति सुता भद्रावर्त्तते सा भद्रातंसा धुन्ते ब्राम्हण कुमारैर्हन्यमानं दृष्ट्वा क्रुद्धान् मारणोद्यतान् कुमारान् ब्राम्हणछात्रान् परिनिर्वापयति वचनैरुपशमयति इत्यर्थः कौटशं तं साधुं संयतं संयमावस्थायां स्थितं कौटशी सा भद्रा अनिन्दिताङ्गी अनिन्दितं अङ्गं यस्याः सा अनिन्दिताङ्गी शोभन

सूत्र

यंति ।१६। रन्नोतहिंकोसलियस्सधूया भद्दत्ति नामेणअणिंदियंगी । तंपासियासंजय हम्ममाणं कुद्धेकुमारेपरिनिव्व वेइ २० देवाभिओगेणणिओइएणंदिन्नामुरन्नामणसाणझाया । नरिंददेविंदभिवंदिएणंजेणामिवंताइसिणामएसो २१

भाषा

ब्राम्हण यतीने मारे छे १६ तव यज्ञे कोशलिक राज्ञः पुत्री ते यज्ञ वाडाने विषे कौ सलिक राजानी बेटी महिलमांहे बैठीछे भद्रा इति नाम्ना अनिन्दि ताङ्गी निर्दोष शरीरा भद्रा एहवे नामे निर्दोष शरीर छे जेहनुं तं ऋषिं दृष्ट्वा दण्डादैः हन्यमानं तेणीइ भद्राइं यती मार तुं दीठो क्रुद्धान् कुमारान् विनिवारयति देखीने क्रोधसहित जे कुमार तेहने वारे छे २० भो कुमाराः देवाभिः योगेण देववशेन प्रेरितेन अहो कुमारी देवताने वसि करी प्रेखो थको मम दाता राज्ञा मनस्यापि न ध्यातोराजाइ एह यतीने मुने दीधो पणि मने करी पणी मुझने इणे साधुइ नवांछी नरेन्द्रदेवेन्द्राभिः वन्दितेन ए यतो किस्या छे राजवीए देवता इन्द्रे वांद्या छे येन ऋषिणा अहं वांता त्यक्तास्मि स एष मुनिः जिणे ऋषि मुझने छांडी ते ए ऋषीश्वर छे २१ एषः

शरीरा२० [देवाभि ओगेण निओइएणं दित्ता सुरत्ता मणसा न झाया नरिन्द देविन्दभि वंदिएणं जेणामिवन्ताइसिणा सएसो] २१ सा भद्रा किमवा दोत् तदाह भो ब्राह्मणाः एषः सं ऋषिर्वर्त्तते येन ऋषिणा अहल्यांता अहल्यत्ता कथभूतेन ऋषिणा नरेन्द्र देवेन्द्रादिभिः वन्दितेन कौटग्या अहं राज्ञा दत्ता अस्मै अर्पिता अनेन ऋषिणा अहं राज्ञादीयमानास्मि तदा मनसा पिन ध्याता न अभिलषिता कौटग्येन राज्ञा देवाभिओगेन नियोजितेन देवस्य यक्षस्य अभियोगो बलात्कारो देवाभियोगस्तेन यद्य देवहठेन नियोजितेन प्रेरितेन इत्यर्थः एतादृग्यो यन्त्यागो मुनि रस्ति तस्मात् भवद्भिर्न कदर्थः इति भद्रा राजकन्या ब्राह्मणान् अवादीत् २१ पुनः सा किमाह [एसो हुसो उग्गतवो महप्पाजिइन्दिओ सच्चय बंभयारी जोमेतयाणेच्छइ दिज्जमाणिं पिउणासयं कोसलिएण रन्ना] २२ इइति निश्चयेन उपलक्षितो मया एषः उग्रतपा महात्मा वर्त्तते उग्रंतपो यस्य स उग्रतपा महान् प्रशस्य आत्मायस्य स महात्मापुरुषः स इतिकः यस्तपस्वी कौशलिकेन पित्रा मम जनकेन राज्ञा स्वयं आत्मना तदादीयमानां मां न ऐच्छेत् न वाञ्छतिस्म कौटग्य एष जितेन्द्रियः पुनः कौटग्यः संयतः सप्तदशविध संयमधारी पुनः कौटग्यो ब्रह्मचारी ब्रह्मचर्यवान् २२ [महायसो एस महाणुभागो घोरव्वओ घोर परक्कमोय माएयंइच्छीलइ अहीलणिज्जं मासव्वेते एणभेणिइहिज्जा] २३ पुनः एषः साधुर्महायशा वर्त्तते पुनर्महानुभागः अचिन्त्यातिशयः पुनरेष

सूत्र

एसोहुसोउग्गतवो महप्पाजिइंदिओ संजओबंभयारी। जोमेतयाणेच्छइ दिज्जमाणिंपिउणा सयंकोसलिएणरन्ना २२॥

भाषा

निश्च येन स साधुः उग्रतपाः महर्षिः ते एजसाधू छे उग्रतपस्वी महात्मा जितेन्द्रियः संजतः ब्रह्मचारी किसो छे साधु इन्द्री जीणे जीत्या छे संजम पाले छे ब्रह्मचारी छेयः मांपिता दीयमानां न इच्छन्ति जिको यती मुझने देता थका ने पिता स्वयं आत्मना कौशलिकेन राजाम्हारो पिता कौशलिक राजा आपरतो मुझने देता हता परं इणे यतीइ मुझने वांछो नहीं अङ्गिकार कीधो नहीं २२ महायशा एष मुनिर्महानुभावः ए जती महायशनो

घोरव्रतो दुर्धर महाव्रतधारी पुनर्घोर पराक्रमो रौद्र मनोबल: क्रोधादि चतु:कषायाणां जये रौद्र सामर्थ्य स्वस्मात् एनं तपस्विनं माहीलयथ कथम्भूतं एनं अहीलनीयं अवगणनाय अयोग्यं स्तवनार्ह मित्यर्थ: एष: मे इति भवतो युष्मान् सर्वान् मानिर्द्दाच्चीत् मा भस्मसात् कार्षीत् इति यदा नृपपुत्रा उक्तं तदा यक्षः किं अकार्षीदित्याह २३ [एयाइं तीसे वयणाइं सोच्चा पत्तीए भद्दाए. सुभासियाइं इसिस्सवेया वडि यट्ठयाए जक्खा कुमारे विणिवार यन्ति] २४ यक्षाः परिवारसहिताः ऋषे वैया हृत्यर्थं कुमारान् ब्राह्मणबालकान् विशेषेण निवारयन्ति किं कृत्वा तस्या सोमदेवस्य यज्ञाधिपस्य पुरो हितस्य पत्न्याः भद्रायाः वचनानि श्रुत्वा कौटस्थानि वचनानि सुभाषितानि सुष्टुभाषितानि ब्राह्मणेभ्यः मिथ्यारूपेण प्रकाशितानि २४ [ते घोररूवा ठिइ अन्त लिक्खे असुरा तहिन्तं जणता यन्ति ते भिन्नदेहे रुधिरं वमन्ते पासित्तु भद्दाइप माइसुज्जो] २५ ते यक्षास्तदा तस्मिन्काले तान् जनान्

सूत्र

महाजसो एसमहाणुभागो घोरव्वओ घोरपरक्कमोय। माएयंहीलह अहीलणिज्जं मासव्वेतेएण भेणिहहेज्जा ॥२३॥
एयाइंतीसे वयणाइं सोच्चापत्तीएभद्दाए सुभासियाइं। इसिस्सवेयावडियट्ठयाए जक्खा कुमारेविणिवारयंति ।२४॥

भाषा

धणी महानुभाव छे घोरव्रती घोर पराक्रमस वीजानीवती धस्या नजाइ एहवा व्रतनो पालणहारछे घणा जे बलवंत छे मा एनं हीलय अहीलनीयं अव ज्ञातुमशक्यं रेवा भणी एहनीं हीलना मत करो ए साधु अनिन्दनीक छे मा सर्वानपि युष्मान् तेजसा निर्दहेत् रखे तुम्हने सघला एने तपने तेजे करी भस्म करे २३ एतानि तस्याः वचनानि श्रुत्वा एहवा वचनसांभलीने सोमदेव पुरोधसः पत्नी सुभद्रायाः सुभाषितानि सोमदेवपुरोहित तेहनी स्त्री भद्रा तेहना भलावचन ऋषे वैयावृत्य निमित्ता यज्ञपतीना वेया वज्ञनिमित्त सावधान हुआ वेयावच्चकरवा लागी यक्षाः कुमारान् विनिवारयंती यक्ष देवता

ब्राह्मणान् ताड़यन्ति चपेटादिभिर्घ्नन्ति कौट्यास्ते यक्षाः घोररूपाः पुनः कौट्यास्ते अन्तरिक्षे आकाशेस्थिताः पुनः कौट्यास्ते आसुराः असुरपरिणाम युक्ताः उक्तं च ते असुराइव इत्यर्थः तेहि यस्मिन् यज्ञपाटकेते इतितान् भग्नदेहान् दृष्ट्वा भद्राभूयः पुनरपि इदं वचनं आहुरिति आह ब्रूते प्राकृतत्वाद्वचन व्यत्ययः तान् किं कुर्वन्तो रुधिरं वमन्तः २५ [गिरिं नहेहिंखणह अयं दन्तेहिं खायह जायवेयं पाएहिं हणह जे भिक्खं अवमन्नह] २६ अरे वराका इति अध्याहारः यूयं नखैः करजैर्गिरिं पर्वतं खनथइव इह शब्दस्य ग्रहणं सर्वत्र कर्त्तव्यं पुनर्दन्तै रयो लोहं खादयभक्षयथइव पुनर्जातवेदसं अग्निं पादै र्हनथइव अग्निं चरणैः स्पर्शयथइव येयूयं भिक्षुं साधुं अवमन्यथ अस्य भिक्षो रपमानं कुरुथ गिरिलोहाग्नीनां उपमानं अनर्थ फलहेतुत्वात् उक्तं २६

सूत्र

तेघो रूववाठियअंतलिक्खे असुरातहिं तंजणतालयंति। ते भिन्नदेहे रुधिरं वमंते पासित्तु भद्दाइणमाहुभुज्जो ।२५॥
गिरिंणहेहिंखणह अयं दंतेहिंखायह। जायवेयं पाएहिंहणह जे भिक्खूं अवमन्नह ॥२६॥ आसीविसोउग्गतवोमहेसी

भाषा

ब्राह्मणना कुमरने निवारे छे २४ ते घोर रौद्रा वारणधारिणः स्थिताः आकाशे ते यक्ष घोररूद्र करीने आकाशने विषे ऊभा छे यक्षः तत्र यज्ञपाटके तत् छात्र लोकां घ्नन्ति यक्ष देवता ते यज्ञ ठामे छात्रने मारे ताड़े छे तान् बालकान् भिन्नदेहात् ते बालक धरतीइं पड्या छे रुधिर वमता मोढा थकी लोहीनाखे छे दृष्ट्वा भद्रा इदं आहुः पुनः इस्यु स्वरूप ब्राह्मण नूं देखी भद्रा बोली २५ पर्वतनखैः खनथ अहो ब्राह्मणो तुम्हे नखे करी पर्वतखणो छो लोहं दन्तैः खादयथ लोह दांते करीने तुम्हे खाओ छो अग्निं पादैः हणथ अग्निपगे करीने मर्दवावांछो छो ये भिक्षुं यूयं अवमन्यतः जे तुम्हे साधुने अवगणो छो होलो छो २६ आशीविषलब्धिवन्तः उग्रतपा महर्षिः भद्रा कहे छे एयतो आशीविष लब्धिनो धणी छे उग्रतपकरे छे मोटो ऋषीश्वर छे

[आसी विसो उग्गतवो महेसी घोरव्वओ घोर परक्कमोय अगणिंव पक्खं दपयंगसेणा जे भिक्खुयं भत्तकाले वहेइ] २७ पुनर्भद्रा आह भो मूर्खा इत्यध्याहारः एषः तपस्वी आशीविषः शापदाने समर्थः आशीविषः सर्प उच्यते यथा सर्पः पादादिना अवमन्यमानो मारणायस्यात् तथा अयमपि शापविषेण मारयति पुनरयं उग्रतपाः महर्षिः पुनरसौ घोरव्रतः पुनर्घोर पराक्रमः ये पुनर्यूयं भक्तकाले भोजनकाले भिक्षुकं पूर्वोक्तलक्षणं मुनिं बध्यथ यष्ट्यादिभि स्ताडयथ ते यूयं पतङ्गसेनाः शलभसमूहाः अग्निं प्र-क्रन्दथ इव आक्रमथ इवकोर्थः यथा पतङ्गसेनाः अग्निं बधाय प्रविश्यमाना म्रियन्ते तथा यूयं मरिष्यथ इत्यर्थः २७ [सीसेण एयं सरणं उवेह समागया सव्वजणेण तुम्हे जइ इच्छह जीवियंवा धणं वा लोगं पिएसो कुविओड हेज्जा] २८ भो ब्राह्मणाः तुभ्भे इति यूयं सर्वजनेन सर्वकुटम्बेन समागताः सम्मिलिताः सन्तः एनं तपस्विनं शीर्षेण मस्तकेन शरणं उपेतशिरः प्रणामपूर्वं सर्वेप्यागत्य

सूत्र

घोरव्वओ घोरपरक्कमोय । अगणिंव पक्खंदपयंगसेणा जे भिक्खूयंभत्तकाले वहेइ ॥२७॥ सीसेणएयंसरणं उवेह समागयासव्वजणेणतुम्भे । जइ इच्छहजीवियंवाधणंवा लोगंपि एसोकुविओडहेज्जा ॥२८॥ अवहेडियपट्ठि स उत्तमंगे

भाषा

घोरव्रतः घोरपराक्रमः घोरव्रत पाले छे घोर पराक्रम छे अग्निमध्ये प्रक्षेपः शलभानां सेनाइव अग्निमांहि पडी जिम पतङ्गी आनी सेनावली भस्म हुवे तिम तुमने वालो भस्म करो छे यूयं भिक्षुं भोजनकाले हनथा तुम्हे भोजननी वेलाइ ऋषीश्वरनी पीडा करो छो २७ सीर्षेण एनं मुनिं शरणं प्रपद्यथः मस्तक नमावीने पगे पडो एहनो सरण करो समागताः सर्वजनेन यूयं सघला लोक एकठा होईने तुम्हे यदि वांछत यूयं जीवितं धनं तुम्हे जो वांछो जीवितव्य अने धनतो तुमे सरण लो मुनिनो लोकमपि एष साधुः कुपितः सन् भस्मसात् करोति ए साधु कोप्यो थको सघला लोकने भस्मकरेछे

अयं एवास्माकं शरणं इत्युक्त्वा अभ्युपागच्छत यदि यूयं जीवितं वा अथ वाधनं इह इच्छथ यतः एषः साधुः तपस्वी कुपितः सन् लोकं समस्तं नगरादिकं दहेत् २८ [अवहेडिय पिट्ठि स उत्तमंगे पसारिया बाहु अकम्मचिट्ठे निज्जे रियत्थे रुहिरं वमन्ते उड्ढं मुहे निग्गय जीहनित्ते] २९ [ते पासिया खण्डिय कट्ठभूए विमणो विसिन्नो अहमाहणोसो इसिम्यसाए इस भारियाओ हीलत्थ निन्दत्थ खमाहभन्ते] ३० युग्मं अथानन्तरं स ब्राह्मणः ऋषिं प्रसादयति कौटज्ञः स ब्राह्मणः स भार्यः पत्नीसहितः सह भार्यया भद्रया सहवर्त्तते इति स भार्यः कथं कथं प्रसादयति तदाह हे भदन्ते हे पूज्यहीलां अस्मत्कृतं अपमानञ्च पुनर्निन्दां हास्माभिः भवतां निन्दाकृता तां निन्दां यूयं क्षमध्वं कौटज्ञो ब्राह्मणो विमनाः विदूनमनाः पुनः कौटज्ञो विषिन्नः विशे

सूत्र

पसारियाबाहु अकम्मचिट्ठे । निब्भरियक्खेरुहिरं वमंते उड्ढं मुहेणिग्गयजीहणेत्ते ॥२९॥ तेपासिया खंडियकट्ठभूए
विमणोविसन्नो अहमाहणोसो । इसिंपसाएइ सभारियाओ हीलंच णिंदंच खमाहभंते ॥३०॥ बालेहिं मूढेहिं अया

भाषा

२८ अवहेडिताः अधोनामितः पृष्ठावधिः मस्तकान् माथा पूठादि साफेरा छे मोहडा पुठाने कीधा छे प्रसारितबाहून् अकर्मचेष्टान् व्यापाररहितान् बाहपसारी छे चेष्टा काइं नथी करता हाथ पगहलावता चलावता नथी प्रसारित नेत्रान् रुधिरं वमन्तः आंखि पसारि छे मुख थकी लोहीनाखे छे उर्द्धमुखान् निर्गतजिह्वा नेत्रान् मुख उंचा कीधा छे जीभ बाहिर काढी छे नेत्र फाटा छे २९ तान् दृष्ट्वा छात्रान् काष्ठभूतान् ते छात्रने एहवे हवाले पड्या देखीने मनोरहितः विषादप्राप्तः सन् स ब्राह्मणः ते यज्ञनो करावणहारपुरोहित विषाद पाम्यो मन मूंडो होइ गयो हवे शु थाशे ऋषिं प्रसन्नं करोति सभार्या भार्या सहितः हवे ते ब्राह्मण भार्यासहित ऋषिने प्रसन्न करे छे अवज्ञां निन्दा क्षमस्व हे भदंत तुम्हारी हीला कीधी छे निन्दा कीधी

षेण दीनः किं कृत्वा तान् खण्डिकान् क्षात्रान् काष्टभूतान् काष्ठसदृशान् निषेष्टितान् दृष्ट्वा पुनः कौट्टयान् तान् अवहेठित दृष्टि स उत्तमांगान् अवेहि ठितानि पृष्ठं यावत् नामितानि पृष्टे गत्वा लग्नानि सन्ति शोभनानि उत्तमांगानि मस्तकानि येषान्ते अवहेठित पृष्ठ स उत्तमांगा स्तान् पश्चाद्भग्न पृष्ठ देश संलग्नमस्तकान् पुनः कौट्टयान् प्रसारितबाहू कर्मचेष्टान् प्रसारिताः प्रलम्बीकृता बाहवो यैस्ते प्रसारितबाहवः न विद्यते कर्मणि अग्नि विषये इन्धन घृतादिनिक्षेपणे चेष्टा सामर्थ्यं येषान्ते अकर्मचेष्टाः प्रसारित बाहवश्चते अकर्म चेष्टाश्च प्रसारितः बाहुकर्म चेष्टा स्तान् बाहुप्रसारणत्वेन दूरे पतितें धनदर्वीकान् इत्यर्थः पुनः कौट्टयान् निर्भेरिताक्षान् निर्भेरितानि प्रसारितानि अक्षीणि यैस्तेनिर्भेरिताक्षास्तान् तरलितनेत्रान् पुनस्तान् किं कुर्वतः रुधिरं वमंतः मुखात् रक्तं श्रवंतः पुनः कौट्टयान् अर्द्धमुखान् अर्द्धवदनान् पुनः कौट्टयान् निर्गतजिह्वा नेत्रान् जिह्वा च नेत्रं च जिह्वा नेत्रे निर्गते जिह्वा नेत्रे येषान्ते निर्गत जिह्वा नेत्रास्तान् ३० अथ स ब्राह्मणो हरिकेश ऋषिं कौट्टयैर्वचनैः प्रसादयतितानिवचनान्याह [बालेहिं मूढेहिं अयाणएहिं जंहीलियातस्सखमाहभंते महप्पसाया इसिणोहवंति नहुमुणीकोवपराहवंति] ३१ भो पूज्याः भो भदंताः एभिर्बालैः अियुभिर्मूढैः कषायमोहनीयवशगैर्मूर्खैर्हिताहित विवेकविकलैर्जं इति यस्मात् कारणात् यूयं अवहीलिताअवगणिताः तस्स इति तस्य अवहीलनस्याप राधंचमध्वं ऋषयोमहाप्रसादाः भवंति अतीव निर्मलचेतसो भवन्ति न पुनर्मुनयः कोपपरायणाः भवन्ति मुनयः क्षमा वन्तो भवन्ति ३१ तदामुनिः

सूत्र

बालेहिं मूढेहिं अयाणएहिं जंहीलियातस्स खमाहभंते। महप्पसाया इसिणोहवंति नहुमुणी कोहपराभवंति ॥३१॥ पुव्विंच इण्हिंच

भाषा

हे हे पूज्य हे भगवंत तुं खमि ३० अियुभिः मूढैरज्ञानैः बालके मूढ़ अज्ञानीये यत् यूयं हीलिताः पीडिताः तस्य क्षमस्व तुम्हने हीला पीडा ते खमो हे भदंत महा प्रसन्नचित्ताः ऋषयो भवन्ति प्रसन्नचित्त महाप्रसाद वन्तश्री ऋषीश्वर हुवे हु निश्चितं मुनयः कोपपरानहवन्तीर्थः मुनीश्वर कोपने वशि न

किं अवादीदित्याह [पुव्विंच इन्हिंच अणागयंच मणप्पओ सो नमे अत्थिकोइ जक्खाइवेयावडियं करेन्ति तम्हाइ एएनि इया कुमारा] ३२ भो ब्राह्मणामेममपूर्वं अतीतकाले च पुनरिन्हिं इदनीं वर्त्तमानकाले च पुन अनागते आगामिनिकालेमनः प्रद्वेषो ना ममनास्ति अतीते काले नासीत् इदानीं प्रद्वेषोनास्ति अग्रेपि न भविष्यतीत्यर्थः कोपि अल्पोपिनास्तिइपुनरर्थं येनयक्षाः वैयावृत्यं साधु तर्जकनिवारणां साधुभक्तिं कुर्वन्ति तस्मात् इदंति निश्चयेन एते कुमाराः यक्षैर्निहताः ३२ अथसर्वे उपाध्यायादयस्तद्वचो श्रुत्वाचित्ताएवमाहुः [अत्थंच धम्मंच वियाणमाणा तुब्भे नविकुप्पह भूइपन्ना तुब्भंतु पाए सरणं उवेमो समागया सव्वजणेण अम्हे ३३ हे स्वामिनः यूयं अपि निश्चयेन कुप्यत कोपं न कुरुत कथंभूता यूयं अर्थं सर्वशास्त्राणां तत्वं

सूत्र

अणागयंच मणप्पओसोणमे अत्थिकोइ। जक्खाइवेयावडियं करेंतितम्हाइ एए णिहया कुमारा।३२। अत्थंच धम्मंच वियाणमाणा तुब्भेणविकुप्पहभूइपन्ना। तुब्भंतुपाएसरणं उवेमो समागया सव्वजणेण अम्हे ॥३३। अच्चेमुतेमहा

भाषा

होइ क्रोध न करे ३१ मुनिरुवाच पुरा पूर्वं इदानींच अनागत काले यती कहेछे पेहेलां हवणां अने आगे पीण मनः प्रद्वेषो मम नास्ति कोपि माहरा मनमांहि द्वेष कोइ नथी देवविशेषाइ निश्चयेन वै या वृत्तिं कुर्वन्ति ब्राह्मण कहे सामी ए कुमरकिणे पक्षाद्या यती कहेछे मान भावी यक्ष देवविशेष तिनुं वीनय वेया वच्चकीधुं तस्मात् इ निश्चयेन ए ते घातिताः कुमाराः तिणे कारणे ए तुम्हाराकुमर देवताइं हण्या माया काष्ठभूत कीधा छे ३२ अथं पुनः धर्मं विजानतः अहो ऋषीश्वर तुम्हे अर्थ धर्मनी गति जाणो छो यूयं नैव कुप्यतः प्राणरक्षण बुद्धियुक्ता तुम्हे कोपमकरो जीवरक्षा करो ए जीव उपरि कृपा करो युष्माकं चरणौ शरणं कुर्मः वयं तुम्हारा पगनो शरण करुंकुं समागताः सर्वजीवने वयं आदने सर्वपरीवार साथे अम्हे ३३ पूजयामो

च पुनः धर्मं वस्तूनां स्वभावं अथवा धर्मं दशविधं साध्वाचारं विजानानाः अर्थधर्मज्ञाः इत्यर्थः पुनः कथंभूताः यूयं भूतिः सर्वजीवरक्षाः तत्र प्रज्ञा येषां ते भूतिप्रज्ञाः तस्मात् वयं तुभ्यं इति युष्माकं शरणं उपेमः उपागताः स्मः प्राप्ताः स्मः अस्मे शब्देन वयमिति ज्ञेयं कौटुम्बा यूयं सर्वजनेन समागताः सर्व कुटम्बपरिवारेण समागताः मिलिताः ३३ [अच्चेमुते महाभागा नतेकिंचिन अच्चिमो भुंजाहि सालिमं कूरं नाणावंजण संजुयं] ३४ हे महाभाग ते तव सर्वं अपि अर्चयामः ते तव सर्वमपि श्लाघयामः ते तव वयं किमपि चरणधूलिं अपि न अर्चयामः के वयं ये त्वां अर्चयामः त्वं तु देवानां पूजार्हः वयं तव कां पूजां कुर्मः एतादृशी का पूजास्ति या तव योग्या परन्तु वयं दासभावं कुर्म इत्यर्थः सालिमं इति शालिमयं सम्यग् जातिशुद्धं शालिनिष्पन्नं कूरं तं दुर्लभोज्यं भुंजाहि भुंक्ष्व कथंभूतं कूरं नानाव्यञ्जनसंयुतं बहुविधैर्व्यञ्जनैर्दध्यादिभिः सहितं ३४ [इमं च मे अत्थिपभूयमन्नं तं भुंजसु अम्ह अणुग्गहट्ठा

सूत्र

भागा णतेकिंचिणअच्चिमो। भुंजाहिसालिमंकूरं णाणावंजण संजुयं ॥३४॥ इमंचमे अत्थिपभूयमन्नं तंभुंजसु अम्ह अणुग्गहट्ठा। बाढंति पडिच्छइभत्तपाणं मासस्सऊपारणए महप्पा ॥३५॥ तहियं गंधोदय पुप्फवासं दिव्वातहिं वसु

भाषा

वयं तव हे महानुभागा पूजां कां तुम्हने नः किं पी अर्चते भूंख्य गटहाण शालिनिष्पन्नं कूरं खामी जीएचीखानीपना छे सालनो नीपनो छे ए कूर नाना विध विंजनसंयुक्तं विधि विधिनां सालणा सहित एचावल जिमो ३४ इदं च मम प्रभूतं प्रचूरं खंड खाद्यं ए अम्हारे अत्र पकवान घणो इछे तदगटहाण अस्माकं प्रसाद करणाय ए आहार तुम्हे जीमो अम्ह ऊपरि कृपा करीने ततो मुनिः बाढं एवमस्तु इत्युक्त्वा गटह्णाति भक्तपान तिवारे यती घणो आग्रह देखीने भातपाणी लिइ विहरे मासोपवासस्य पारणे महात्मा मुनिः मास खमणने पारणे माहात्मा ३५ तदा दानावसरे गन्धोदकं पुष्पाव हृष्टि जाता

हट्ठा वाढंति पडिच्छइ भत्तपाणं मासक्खमणपारणए महप्पा] ३५ हे स्वामिन् मे मम इदं प्रत्यक्षं खंडमंडकादिकं अन्नं प्रभूतं वर्त्तते प्रचुरं वर्त्तते पूर्वमपि शालमयं क्रूरं गृहीतं अत्र च पुनरत्रग्रहणं तत्सर्वान्न प्राधान्य ख्यापनार्थं तद्गृह्यं भुंक्ष्व इति ब्राह्मणैः प्रोक्ते सति मुनिः प्राहः बाढं इत्युक्त्वा तथास्तु वाढ शब्दोंगीकारे एवं एव करोमि गृहीष्यामीत्युक्त्वा साधुर्मासक्षमणपारणके भक्तपानं आहारपानीयं प्रतीच्छति अङ्गीकरोति कथम्भूतः स मुनिर्भवति महात्मा महान् निर्मलो निःकषाय आत्मायस्य स महात्मा महापुरुषः ३५ [तहियं गन्धोदय पुप्फवासं दिव्वा तहिं वसुहारायवुट्ठा पहयाओ दुंदुहिओसु रेहिं आगासे अहोदाणं चघुट्ठं] ३६ तहिं तस्मिन् यत्रपाटकेमुनिना आहारे गृहीते सति गन्धोदक पुष्पवर्षमभूदिति शेषः सुगन्धपानीय कुसुमवर्षा आसन् इत्यर्थः च पुनस्तस्मिन् स्थाने दिव्या प्रधानादेवैः कृतावसुधारा वृष्टा स्वर्णदीनाराणां वृष्टिरभूत् वसु द्रव्यं तस्य धारा सतत पातजनिता वसुधारा सा वृष्टा देवैः पातिता इत्यर्थः तु पुनः आकाशे सुरैः दुन्दुभयः प्रहता देवैः आकाशे वादित्राणि वादितानि च पुनः आकाशे अहोदानं २ इति घुष्टं देवैः शब्दितं ३६ तदा च द्विजा विस्मिताः किमाहुः तत् आह [सक्खं खुदी स इतवो विसेसो नदी सई जाइ विसेस कोइ सो वागपुत्तं हरिएससाहुं जस्से रिसा इड्ढि महाणुभागा] ३७ खुइति निश्चयेन तपोविशेषः साक्षात् दृश्यते जातिविशेषः कोपि न दृश्यते तपो माहात्म्यं दृश्यते जातिमाहात्म्यं किमपि न दृश्यते श्वपाकपुत्रं चांण्डालपुत्रं तं हरिकेश साधुं पश्यत इति शेषः तं इति किं यस्य हरिकेशस्य साधोः एतादृशी सर्वजनप्रसिद्धा ऋद्धिर्वर्त्तते देव

सूत्र

हाराय वुट्ठा । पहयाओ दुंदुहीओ सुरेहिं आगासे अहो दाणंचघुट्ठं ।३६। सक्खं खुदीसइ तवोविसेसो नदीसईजाइ

भाषा

यतीने आहार लेतां थकां सुरभी पांणी फूलनी वृष्टिहुई तस्मिन् समये द्रव्य वृष्टिः कृता देवैः तेह समे देवताइं द्रव्यनी वर्षा कीधी वादिता वाजिंत्र विशेषाः देवैः देवता ए देव दुंदुभी वजाडी आकाशे अहो दानमपि घोषितं आकाशने विषे अहो दानमहो दानं इसी घोषणा कीधी ३६ साक्षात्

साहाय्य रूपा संपत्वर्त्तते कीदृशी ऋद्धिर्महानुभागा महान् अनुभागो अतिशयो यस्याः सा महानुभागाः महा माहात्म्यसहिता इत्यर्थः ३७ अथ मुनिस्तान् ब्राह्मणान् उपशान्तिमित्यात्वान् दृष्ट्वा धर्मोपदेशमाह [किं माहणा जोइसमारभंता उदएणसोहिं बहियाविमग्गह जंमग्गहा बाहिरियं विसोहिं नतं सुदिट्ठं कुसलावयंति] ३८ किमिति शब्दोऽधिक्षेपे भो ब्राह्मणाः यूयं शृणुत ज्योतिः अग्निं समारभन्तः अग्नीनां समारम्भं कुर्वन्तः किं ब्राह्मणा भवन्ति अपितु न भवन्ति भो ब्राह्मणाः उदकेन शौचिं कुर्वतो बाह्यं शुद्धिं विमार्गयथ जानीथ यागं कुर्वन्तः स्नानं कुर्वन्तश्च ब्राह्मणा न भवन्तीत्यर्थः यां यागं स्नानादिकां बाह्यां विशुद्धिं विमार्गयथ विचारयथ तां बाह्यां विशुद्धिं कुशला ज्ञाततत्त्वा सुदृष्टं सम्यग् दृष्टं न वदन्ति यत् यज्ञादौ अग्नीनां तेज

विसेस कोदू । सोवागपुत्ते हरिएस साहुं जस्सेरिसा इड्ढिमहाणुभागा ॥३७॥ किं माहणा जोदू समारभंता उदएण सोहिं बहियावि मग्गहा । जं मग्गहा बाहिरियं विसोहिं णातं सुदिट्ठं कुसला वयंति ॥३८॥ कुसंचजूवं तणकट्ठमग्गिं

प्रत्यक्षं दृश्यते तपो विशेषः साक्षात् प्रत्यक्ष ए तपनी महीमा दीसे छे न दृश्यते जाति विशेषः कोपी जातिनोविशेषतो कोइ दीसतोनथी चण्डालपुत्रः हरिकेशी साधुः चण्डालनो बेटो हरिकेशी साधु यस्य साधोरीदृशी देवसान्निध्य सम्यत्सातिशयमहाप्रभावाः जे हरी एहवी ऋद्धि महाप्रभावकः ३७ ब्राह्मणा योतिरग्निस्तं समारभमाना जागं कुर्वतः ब्राह्मण अग्निपूजे याग करे सात पीढी इक वीस पीढी ताइं अग्निराखे जलेन शुद्धिं निर्मलतां बाह्यां विमार्गयन् गवेषयन् यथा जले करीने बाहिरली शुद्धि वांछो छो यन्मार्गयथा बाह्य विशुद्धिं तुम्हे ब्राह्मणो बाहिरली शुद्धि वांछो छो न तत् रम्यं तत्त्वज्ञाः कुशलाः वयंति ते स्नान पाणीनी शुद्धितत्त्वना जाण भलीन कहे ३८ दर्भं पुनः यज्ञस्तम्भं तृणंकाष्ठं अग्निकरी छो सन्ध्यायां प्रभाते उदकं स्पृशतां सन्ध्या

स्नायस्थजीवानां विराधना अथ च स्नानादौ अप्कायस्य जीवानां विराधनाविशुद्ध्यर्थं विधीयते तत् तत्त्वज्ञैर्न सम्यक् दृष्टं सम्यग् न कथितमित्यर्थः यदुक्तं स्नानं मनोमलत्यागो यागश्चेन्द्रियरोधनं अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः इति ३८ [कुसंच जूवंतणकट्ठमग्गिं सायंच पायं उदयं फुसंता पाणाइं भूयाइं विहेडयंता भुज्जो विमंदापकरेह पावं] ३९ भो ब्राह्मणाः मन्दा यूयं भूयोपि पुनरपि शुद्धिकरणप्रस्तावेपि पापं प्रकुरुथ पूर्वमपि संसारकार्यकरण प्रस्तावे आरंभं कृत्वा प्राणान् भूतानि विनाश्य पातकमुपार्जितं पुनर्धर्म करणप्रस्तावे तदेव क्रियते इत्यर्थः किं कुर्वन्तः कुशं दर्भं यूपं यज्ञस्तंभं तृणं वीरणादिनडादिकं काष्ठं समीधश्चस्येन्धनं अग्निं च एतत्सर्वं प्रतिगृह्णतः एतत्सायं सन्ध्याकाले च पुनः प्रातः प्रभाते उदकं पानीयं स्पृशन्तः आचमनं कुर्वन्तः अतएव प्राणान् द्वीन्द्रियचतुरिन्द्रियान् भूतान् तरून् पृथिव्यादीन् अपि तदाधारभूतान् विहेटयंतः विशेषेण हिंसन्त इत्यर्थः एतेषां एव प्राणभूतसत्त्वानां विराधनेन हिंसा भवति पुनरेतेषामेव शुद्धिकरणकालेऽपि विराधना विधीयते कुतोऽस्माकं शुद्धिर्भवित्री इति न जानन्ति अतएव मन्दा मूर्खाः यत उक्तं दृष्टिपूतं चरेन्मार्गं वस्त्रपूतं पिबेज्जलं ज्ञानपूतं सृजेद्धर्मं सत्यपूतं वदेद्वचः३९ अथ प्रत्युत्पन्नग्रहास्ते ब्राह्मणाधर्मं पप्रच्छुः [कहं चरे भिक्खु वयं जयामोपावाइं कम्माइं पणुल्लयामो अक्खाहिणो संजयजक्खपूइया कहं सुजुट्ठं कुसलावयंति] ४० हे भिक्षो वयं कथं चरेमहि कस्यां क्रियायां प्रवर्त्तेमहि हे भिक्षो पुनर्वयं कथं यजामो यागं कुर्मः पुनर्वयं पापानि पापहेतूनि कर्माणि पणुल्लयामः प्रणुदामः प्रकर्षेण स्फेटयामः हे यज्ञ पूजित हे संयतेन्द्रिय कुशलाः धर्म

सायंच पायं उदयं फुसंता । पाणाइं भूयाइं विहेडयंता भुज्जोवि मंदा पकरेह पावं ॥३९॥ कहंचरे भिक्खु वयं

समय प्रभात समय पाणीने फरसो छो प्राणान् द्वीन्द्रियादीन् भूतान् पृथ्व्यादीन् विहेडयतः बेंद्रियादिक जीव पृथ्व्यादिक एकेन्द्रि जीवते धर्म्म बुद्धे करी तुम्हे मारो छो पुनरपि पापसञ्चयं कुरुथ मूर्खाः आगे पाप करीने मूर्ख आत्माने घणे मेलो करो छो ३९ अथ विप्राः प्राहुः हे भिक्षुः वयं कथं चरामो

मर्मज्ञा विद्वांसः कथं केन प्रकारेण सुजुष्टं इति सुष्टु शोभनं इष्टं स्विष्टं शोभनयजनं वदन्ति तत् शोभनयज्ञं नोऽस्मान् आख्याहि कथयेत्यर्थः ४० अथ मुनिराह [कुज्जीवकाए असमारभंता मोसं अदत्तं च असेवमाणा परिग्गहं इत्थिओ माणमायं एयं परिन्नाय चरंति दंता] ४१ पूर्वं ब्राह्मणैरयं प्रश्नो विहितः कथं वयं प्रवर्त्तेमहि तस्योत्तरं भो ब्राह्मणाः दान्ताः जितेन्द्रियाः एतत् पूर्वोक्तं पापहेतुकं परिज्ञाय चरन्ति प्रवर्त्तन्ते साधवो ज्ञ परिज्ञया ज्ञात्वा प्रत्याख्यान परिज्ञया आरंभाविवर्त्तन्ते इति भावः दान्ताः किं कुर्वाणाः षट्जीवकायान् असमारभमाणाः अनुपमर्दयन्तः पुनर्मृषावादं च पुनरदत्तं असेवमानाः पुनः परिग्रहं उपकरणमूर्च्छां सचित्ता चित्तद्रव्य ग्रहणरक्षणात्मकं पुनस्त्रीतुपुनर्मानं अभिमानं पुनर्मायं परवञ्चनात्मिकां असेवमानाः मान

सूत्र

जयामो पावाइं कम्माइं पुणोल्लयामो । अक्खाहिणोसंजयजक्खपूइयाकहं सुजट्ठं कुसला वयंति ॥४०॥ कुज्जीवकाए असमारभंता मोसं अदत्तं च असेवमाणा । परिग्गहं इत्थिउ माणमायं एयं परिन्नाय चरेज्जदंता ॥४१॥ सुसंवडा

भाषा

हिवे ब्राह्मण कहे छे हे भिक्षु अम्हे किमचालुं केहवी करणी करुं पाप कर्माणि प्रेरयामः जिणी क्रियाइं करीने पाप कर्म दूर करे अख्यापयकथयनो अस्माकं भो संयत यज्ञ पूजीत अम्हने कहो अहो साधु यज्ञ पूजित कथं सुष्टु यज्ञ तत्त्वज्ञा वदन्ति भलो यज्ञ पण्डित किस्यो कहे छे ४० षट्जीवनिकायान् अविनासयन्ति छ जीवनिकायनी रक्षा करे जीव मारे नही मृषावादं अदत्तञ्च असेवमानाः मृषावादबोले नहीं अदत्ता दान साधु लीये नहीं परिग्रहं स्त्रियः मानञ्च मायाञ्च परिग्रहस्त्री मान माया रहित एतानि त्यक्त्वा चरन्ति दंताः दमनेन्द्रियाः क्रोधः मानः मायाः लोभ छांडीने विचरे दान इन्द्रिय जिणे दम्या छे आपणां ४१ सुसंवृताः पञ्चभिः सम्वरैः प्राणवधविरमणादिभिः पांचें आश्रव जिणे रुंध्या छे इह संसारे जीवितमपि अनभिः शपंतः

मायया: सहकारित्वेन क्रोधलोभयोरपि त्यागो श्रेय: एतान् सर्वान् पापहेतून् ज्ञात्वा पुनस्त्यक्ता साधवो यतनया चरन्ति अतो भवद्भिरपि एवं चरितव्य मित्यर्थ: ४१ अथ द्वितीयप्रश्नस्य कथं यजाम इत्यस्य उत्तरमाह [सुसंवुडा पंचहिसंवरेहिं इह जीवियं अणवकंखमाणा: वोसट्ठकायासुइचत्तदेहा महा जयं जयई जन्न सिट्ठं] ४२ भो ब्राह्मणा: पञ्चभि: सम्वरै: हिंसा मृषाअदत्त मैथुनपरिग्रह विरमणै: सुसम्वृता: सुतरां अतिशयेन संवृता आच्छादिता श्रव: निरुद्ध पापागमनद्वारा: सुसंवृता: संयमिन: जन्नसिट्ठं यज्ञश्रेष्ठं जयन्ति कुर्वन्तीत्यर्थ: यज्ञेषु श्रेष्ठो यज्ञश्रेष्ठस्तं अथवा श्रेष्ठो यज्ञ: श्रेष्ठयज्ञस्तं प्राकृतत्वात् यज्ञश्रेष्ठं इतिप्रेयं कौदृशं श्रेष्ठयज्ञं महाजयं महान् जय: कर्मारीणां विनाशो यस्मिन् स महाजयस्तं कौदृशा: सुसंवृता: इहास्मिन् मनुष्य जन्मनि जीवितं प्रस्तावादसंयमजीवितव्य अनवकांक्षमाणा: असंयमं अनीप्सन्त इत्यर्थ: पुन: कीदृशा: सुसंवृता: व्युत्सृष्टदेहा: विशेषेणपरीषहोपसर्गसहने उत्सृष्ट: कल्पित: कायो यैस्ते व्युत्सृष्टदेहा: पुन: कीदृशा: शुचयो निर्मलव्रता: पुन: कीदृशा: त्यक्तदेहा: त्यक्तो निर्ममत्वेन परिचर्याभावेन अवगणितो देहो यैस्ते त्यक्तदेहा: एतादृशा: साधवस्विष्टं यज्ञं कुर्वन्ति एष एव कर्मप्रस्फेटनोपाय इत्युक्तं ततो भवद्भिरप्येवं यजतामिति भाव: यजमानस्य कान्युपकारणानि इति पुनर्ब्राह्मणा: पृच्छन्तिस्म ४२ [केतेजोई केवतेजोइठाणं कातेसुया किंवतै कारिसंगं पहायते कयरासंति भिक्खू कयरेण होमेण हुणासि

सूत्र

पंचहिं संवरेहिं इह जीवियं अणवकंखमाणा। वोसट्ठकायासुइचत्त देहा महाजयं जयइ जन्नसिट्ठं ।४२। केतेजोई

भाषा

अवाञ्छतः इह संसार मांहि जीवितव्यनोवांछा पणिनकरे जे इं घणा दिन जीवु इम न वांछि व्युत्सृष्टकाया निरतिचारदेहो त्यक्तदेहाः शुश्रूषा भावात् देही आपणो जेणे वोसिरावो छे अतीचारकोइ नलगाड़े इष्टयं सुनयो महायज्ञं कर्मजयरूपं यज्ञं यजति कुर्वति यज्ञं श्रेष्ठं साधुं भगवंत श्रेष्ठ उत्तम इसो यज्ञ करे ४२ कः तवाग्निः किं तव ज्योतिः स्थानं कुंडंब्राह्मण कहे छे अहो साधु तुम्हारे अग्नि केहवो छे अने

जोइ] ४३ हे मुने ते तव किं ज्योतिः कोऽग्निः किं पुनस्ते तवज्योतिः स्थानं अग्निस्थानं अग्नि कुंडं किमस्ति ते तव कापुनः घृतोष्टतादिप्रक्षेप कादर्व्यः च पुन स्ते तव करोषाङ्गमग्न्युद्दीपनकारणं किमस्ति विध्याप्यमानोग्निर्येन उद्दीप्यते सन्धुक्ष्यते तत्करीषां गन्तव किं विद्यते च पुनः एधाः कतराः काः समिधः याभिरग्निः प्रज्वा ल्यते ताः काः सन्ति च पुनः शान्तिर्दुरितोपशमहेतु रध्ययनपद्धति स्तवकतराकास्ति हे भिक्षोत्वं कतरेण इति केन होमेन हवन विधिज्योति रग्निं जुहोषिअग्निं प्रीणयसि षट्जीवनिकायविराधनाविनाहि यज्ञो न स्यात् हेभिक्षोभवता षट् जीवनिकायविराधनानुपूर्वं निषिद्धा अतो मुनिसे ब्राह्मणा यज्ञं यज्ञोपकरणसामग्रीं च पप्रच्छुः ४३ अथ मुनिर्मुनिर्योग्यं यज्ञमाह [तवोजोई जीवोजोइ ठाणं जोगासु या सरीरं कारिसङ्गं

सूत्र

केवते जोइठाणा कासेसुया किंचते कारिसंगं । पहायते कयरासंति भिक्खू कयरेण होमेण हुणासि जोइं ।४३।
तवो जोई जीवो जोइ ठाणं जोगोसूया सरीरं कारिसंगं । कम्मं पहासंजमजोग संती होमं हुणामीइसिणं पसत्थं ।४४

भाषा

तुम्हारे अग्निनुं स्थानक केहवुं छे का तव चटुकादर्वीकिं घृतादिप्रेषणपात्रं अग्निदीपनकारणं काष्ठं किंस्यो तुम्हारे अग्निमांहि घृतघालवानो चाटुओ छे भिक्षो तवइं धनानि कानि सन्ति अहो साधु तुम्हारे इंधणकेहवा छे केन होमेन हवनं करोषि किसे होमे करीनेंइ अग्निने होमो छो ४३ साधोवाच तपो ज्योतिः जीवो ज्योति स्थानं कुण्डं तपो ज्योति कहो जीव ज्योति नुं स्थानक कह्यो मनोयोगादयः सुधा घृतप्रेषणपात्राणि शरीरं तपो दीपकत्वात् करीषं मनोयोगवचन योग सूर्यं कहता घीघालणरापात्र शरीरइंतो तप कीजे ते करीषं कह्यो जे कर्म्माणि इंधनरूपाणि संयमयोगरूपा सान्तिः आठकर्म रूपइं धण संजमरूपयोग शान्ति ईष्टयं होमं करोमि ऋषीणां प्रशस्तं ऋषि कहे छे एहवो होमइं करू छुं ए रिषीश्वरने प्रशस्त कह्यो छे ४४ कः तव

कम्मं पहा संयम जोगसन्ती होमं हुणामि इसिणं पसत्थं]४४ भो ब्राह्मणाः अस्माकं तपोज्योतिः तपः अग्निरस्ति कर्मेन्धनदाहकत्वात् द्वादशविधं हि तपः सकल कर्मकाष्टानि प्रज्वालयति जीवोज्योतिः स्थानं जीवोऽग्निकुण्डं तपसः आधारत्वात् मनोवाक्काय योगास्ते शुचोदर्व्वीया: मनोवाक्काय योगैः शुभ व्यापाराः घृतस्थानीया स्तपोग्नि प्रज्वलन हेतवो वर्त्तन्ते शरीरं करीषांगं तेनैव शरीरेण ततोग्निर्ईप्यते शरीरसाहाय्येन तपः स्यादित्यर्थः शरीरमाद्यं खलु धर्मसाधन मित्युक्तेः कर्माणि एधाइन्धनानि कर्मेन्धनानि तपोग्निः प्रज्वालयन्ति महा दुष्टकर्मकारिणोपि तपसा निर्मलाः संजाताः संयमजोगः शान्तिः संयमस्य सप्तदशविधस्य योगः सम्बन्धः स शान्तिः सर्वजीवानां उपद्रव निवारकत्वात् अनेन होमेन अहं तपोग्निं जुहोमि कथम्भूतेन होमेन ऋषीणां प्रशस्तेन मुनीमां योग्येन साधवोहि एतादृशं यज्ञं कुर्वन्ति न अपरे एतादृशं कर्तुं समर्था भवन्ति ४४ यज्ञस्वरूपं तु साधुनोक्तं अथ ब्राह्मणाः स्नानस्वरूपं पृच्छन्ति [केते हरए केयते सन्तितित्थे कहिंसिण्हाओ वरयं जहासि आयक्खणे सञ्जय जक्ख पूइया इच्छामुनाउं भवओ सगासे] ४५ हे ऋषे यत्तपूजितत्वं नः अस्मान् आचक्ष्वब्रूहि वयं भवतः सकाशात् ज्ञातुं इच्छामः हे मुने ते तवको ह्रदः कः स्नानकरणयोग्य जलाधारः किं पुनः तव शान्ति तीर्थं शान्त्थे पापशान्ति निमित्तं तीर्थं शान्तिं तीर्थं पुण्यक्षेत्रं यस्मिन् तीर्थे दानादि बीजगम्यं पातकशमनं पुण्योपार्जकञ्च स्यात् कुरुक्षेत्रादिसदृशं

केतेहरए केयतेसंतितित्थे कहिंसिणहाओ वरयंजहासि। आइक्खणे संजयजक्खपूइयाइच्छामुणाउं भवओ

ह्रदः कः तव पापोपशमनाय तीर्थं कोण तुम्हारे द्रह: कवण तुम्हारि पाप दूरकरवानुं तीर्थकवण तुम्हारे कुत्र स्नानः त्वं रजः कर्ममलं जहासि किहां स्नान कीधां कर्मरूपमेलटले कथयनो अस्माकं भो संयत यत्तपूजित कहे अम्हने साधु यत्ते पूजित वाञ्छामि तव समीपे ज्ञातुं वांछ कुं ताहरे पासे जाणवाने ४५ धर्मरूपो द्रह: ब्रह्मरूपं शान्ति तीर्थं धर्मरूपद्रह ब्रह्मज्ञान शांति तीर्थ निर्मलमलरहितं आत्मा जीव भली लेश्या तेहने विषे यत्र स्नातः

किं तीर्थं वर्त्तते पुनर्हेमुने त्वंकस्मिन् स्थाने स्नातः सन् रजः कर्ममलं जहासित्यजसि त्वं निर्मलो भवसि एतत् सर्वेषां प्रश्नानां उत्तरम्वद इत्यर्थः ४५ इति पृष्टे मुनिराह [धम्मे हरएबम्भे सन्ति तित्थे अणाविले अत्तपसन्नलेसे जहिंसिन्हाओ विमलो विसुद्धो सुसीय भूओपजहामिदोसं] ४६ भो ब्राह्मणाः धर्मोहिंसा विरमणोदया विषयमूलो ह्रदो वर्त्तते कर्ममलापहारकत्वात् ब्रह्मचर्यं मैथुनत्यागः शान्तितीर्थं तस्य तीर्थस्य सेवनात् सर्वपाप मूलं राग द्वेषौ निवारितौ एव यदुक्तं ब्रह्मचर्येण सत्येन तपसा संयमेन च मातङ्गर्षिर्गतः शुद्धिं न शुद्धि स्तीर्थयात्रया १ कीदृशे ब्रह्मचर्यतीर्थे अनाविले निर्मले पुनः कीदृशे ब्रह्मचर्य तीर्थे आत्मप्रशस्तलेश्ये आत्मनः प्रसन्ना निर्मलत्व कारणं लेश्या यस्मिन् स आत्मप्रसन्न लेश्य स्तस्मिन् आत्मनिर्मलत्वकारणं तेज पद्म शुक्लादि लेश्यात्रयान्वित सहिते इत्यर्थः यत्र यस्मिन् ब्रह्मचर्य तीर्थे स्नातः अहं विमलोभाव मलरहितो विशुद्धोगत कलङ्कः सुशीतीभूतः रागद्वेषादि रहितः सन् दोषं कर्मज्ञानावरणीयादिकं अष्टप्रकारकं प्रकर्षेणजहामित्यजामि४६ [एयंसिणाणं कुसलेहिं दिट्ठं महासिणाणं इसिणं पसत्थं जहिंसिण्हाया विमला विसुद्धा महारिसी उत्तमठाणं पत्तित्तिबेमि] ४७ पूर्वं उक्तं कर्मरजो विनाशकं स्नानं तस्योत्तरमाह भो ब्राह्मणाः कुशलैस्तत्त्वज्ञैः केवलिभिः एतत्

सूत्र

सगासे ॥४५॥ धम्मे हरए बंभे संति तित्थे अणाविले अत्तपसन्नलेसे। जहिंसिण्हाओ विमलो विसुद्धो सुसीइ भूओपजहामिदोसं ॥४६॥ एयं सिणाणं कुसलेहिं दिट्ठं महासिणाणं इसिणं पसत्थं। जहिं सिन्हाया विमला

भाषा

विमलोनिर्मलो विशेषेण शुद्धः स्नान कीधूं थकोनिर्मल हुइ विशेषे करीशुद्ध हुइ अतिशयेन शीतीभूतो दोषं त्यजामी अतिसीतलहुओयकीसर्वदोष छांडा त्यजा ४६ एतत् स्नानं कुशलैः कथितं ए स्नानं कुशले पण्डिते कह्युं उत्तमस्नानं ऋषीणां प्रशस्त उत्तम स्नान,ए ऋषिने भलो कह्यो यत्र स्नाता विमला

स्नातं दृष्टं परेभ्यश्च प्रोक्तं कथञ्चित् एतत् स्नानं महास्नानं सर्वेषु स्नानेषु उत्तमं पुनः कीदृशं तत् स्नानं ऋषीणां प्रशस्तं मुनीनां योग्यं येन स्नानेन स्नाताः कृतयोगा विमलाः कर्ममलरहिताः अतएव विशुद्धाः निःकलङ्का महर्षयो मुनीश्वराः उत्तमं प्रधानं स्थानं अर्थात् मोक्षस्थानं प्राप्ताः इति अहं ब्रवीमि जम्बूस्वामिनं प्रति श्री सुधर्मास्वामी प्राह इति हरिकेशीयं अध्ययनं द्वादशं सम्पूर्णं १२ इति श्रीमदुत्तराध्ययन सूत्रार्थ दीपीकायां उपाध्याय श्रीलक्ष्मी कीर्त्तिगणिशिष्य लक्ष्मीवल्लभगणिविरचितायां हरिकेशीयाध्ययन स्यार्थः सम्पूर्णं १२ अथ त्रयोदशमम्भा रभ्यते तपः कुर्वता पुरुषेण निदानं न कार्यं इत्याह । इति द्वादश त्रयोदशयोः सम्बन्धः चित्रसम्भूत साध्वोः सम्बन्धमाह साकेतनगरे चन्द्रावतंसकस्य राज्ञः पुत्रो मुनिचन्द्रनामा बभूव स च निहत्त काम भोग तृष्णः सागरचन्द्रस्य मुनेः समीपे प्रव्रजितः गुरुभिः समं विहरन्नन्यदा एकस्मिन् ग्रामे प्रविष्टः सार्थेन सह सर्वेपि साधवस्खलिताः सार्थ भ्रष्टोसावटव्यां पतितः तत्र चत्वारो गोपाल दारकास्तं क्षुत्तृषाक्रान्तं पश्यन्ति शुद्धै रशनादिभिः प्रतिजाग्रति यतिना तेषां पुरोदेशनाकृताः ते गोपाल दारकाः प्रतिबुद्धास्तदन्तिके प्रव्रज्यां गृहीतवन्तः तैः सर्वैः शुद्धादीक्षा पालिता ताभ्यां तु दीक्षापालितैव परं मलक्लिन्नवस्त्रादि जुगुप्सा कृता ते चत्वारोपि देवलोकं गताः तत्र जुगुप्साकारको द्वौदेवलोकच्युतौ दशपुरे नगरे सांडिल्य ब्राह्मणस्य यज्ञोमत्या दास्याः पुत्रत्वेनोत्पन्नौ युग्मजातौ बभूवतुः अतिक्रान्त बालभावौ तौ यौवनं प्राप्तौ अन्यदा क्षेत्ररक्षणार्थं तौ अटव्यां गतौ रात्रौ वटपादपाधः सुप्तौ तत्रैको दारको वटकोटराविर्गतेन सर्पेण दृष्टः द्वितीयः

सूत्र

विमुद्धा महारिसी उत्तमठाणं पत्तेत्तिबेमि ।४७। इति हरिएसज्झयणं समत्तं ॥१२॥

भाषा

निर्मला जेहने विषे स्नान कीधा थकी निर्मल हुआ शुद्ध हुया थका महामुनि यः उत्तमं स्थानं प्राप्त इति ब्रवीमि मोटो साधु उत्तम स्थानकने विषे प्राप्त हुया मुक्ति गया एहवुं कहे सुधर्मा स्वामी ४७ इति हरिकेशी अध्ययन संपूर्णम् द्वादशमध्ययनप्ररूपीतः सम्पूर्णम् ॥१२॥ त्रयोदशम अध्ययन प्राह १

सर्पोपलभ्यनिमित्तं भ्रमन् तेनैव सर्पेण दष्टस्तौ द्वावपि मृतौ कालिंजरपर्वते मृगी कुक्षौ समुत्पन्नौ युग्मजातौ मृगौ जातौ कालक्रमेण तौ द्वौ मात्रा समं भ्रमन्तौ एकेन व्याधेन एकशरेणैव हतौ मृतौ ततौ द्वावपि मृतौ गङ्गातीरे एकस्या राजहंस्याः कुक्षौ समुत्पन्नौ जातौ क्रमेण हंसौ मात्रा समं भ्रमन्तौ एकेन मत्स्यबन्धकेन गृहीतौ मारितौ च ततौ वाराणस्यां नगर्यां महर्द्धिकस्य भूतदिन्नाभिधस्य चाण्डालस्य पुत्रत्वेन समुत्पन्नौ क्रमेण जातयोस्तयोः चित्र सम्भूतनामकृतं तौ चित्रसम्भूतौ मिथः प्रीतिपरौ जातौ इतश्च तस्मिन्नवसरे वाराणस्यां नगर्यां शङ्खनामा राजा तस्य नमुचिनामा मन्त्री अन्यदा तस्य किञ्चित् चूर्णं जातं कुपितेन राज्ञा सबधार्थं भूतदिन्न चण्डालस्य दत्तः भूतदिन्नचण्डालेन तस्यैवमुक्तं भो मन्त्रिन् त्वामहं रक्षामि यदि मदृगृहान्तर्भूमिगृहस्थितो मत्पुत्रौ पाठयसि जीवितार्थिना तेन तत् प्रतिपन्नं भूमिगृहस्थः सचित्र सम्भूतौ पाठयति चित्रसम्भूतमाता तु मन्त्रिपरिचर्यां कुरुते मन्त्री तु तस्यामेव व्यासक्तो भूत् निजपत्नी व्यभिचारि चरितं चाण्डालेन ज्ञातं नमुचिमारणोपायस्तेन चिन्तितं पितुरध्यवसाय स्वाभ्यां ज्ञातः उपकार प्रीतिरताभ्यां स नमुचि र्नोत्रितः ततो नष्टः स क्रमेण हस्तिनागपुरे सनत्कुमारचक्रिणो मन्त्री जातः इतश्च ताभ्यां मातङ्गदारकाभ्यां चित्र सम्भूताभ्यां रूपयौवनलावण्य नृत्यगीतकलाभि र्वाणारसी नगरी जनः प्रकामं चमत्कारं प्रापितः अन्यदा तत्र मदनमहोत्सवोजातः सर्वेषु लोकेषु गीतनृत्यवादित्रादिविनोदप्रवृत्तेषु सत्सु तौ मातंगदारकौ वाराणसीनगर्यां ततः समागत्य सर्वाः स्वकलाः दर्शयितुं प्रवृत्तौ तयो र्विशेषकलाचमत्कृता लोकास्तरुणीप्रमुखाः समीपे गताः एकाकारो जातः अस्पृश्य त्वादिकं न जानन्ति सर्वेपि लोकास्तन्मयतां गताः ततश्चतुर्वेदविद्विर्ब्राह्मणै र्नगर स्वामिन एवं विज्ञप्तं राजन्नेताभ्यां चित्रसम्भूताभ्यां चण्डालाभ्यां सर्वोपि नगरीलोक एकाकारं प्रापितः राज्ञा तयोर्नगरी प्रवेशो वारितः कियत्कालानन्तरं पुनस्तत्र कौमुदी महोत्सवो जात स्तदानीं कियत्कालौ तौ राजप्रासनं विस्मार्य नगरीमध्ये प्रविष्टौ तत्र स्वच्छवस्त्रेण मुखमाच्छाद्य प्रेक्षणानि प्रेक्षमाणयो स्तयोरसप्रकर्षोद्भवेन मुखान्नीतं निर्गतं सर्वं

लोका वदन्ति केन किं मरानुकारेणेदं कर्णसुखमुत्पादितमिति वस्त्रं पराकृत्य लोकै र्तयो मुखमोचितं उपलक्षितौ तौ मागङ्गदारकौ राज्ञानुशासनभङ्गक त्वेन जनैर्यष्टि मुष्ट्यादिभिर्हन्यमानौ तौ नगर्याः बहिर्निष्कासितौ प्राप्तौ बहिरुद्याने भृशं खिन्नौ एवं चिन्तयतः धिगस्तु अस्माकं रूपयौवनसौभाग्य लावण्य सर्वकलाकौशल्यादिगुणकलापस्य यतोऽस्माकं मातङ्गजाभ्यां सर्वं दूषितं लोकपराभवस्थानं वयं प्राप्ताः एवं गुरुवैराग्यमागतौ स्वबान्धवादीनामना पृच्छ्यैव दक्षिणदिगभिमुखौ चलितौ दूरं गताभ्यां ताभ्यां एको गिरवरो दृष्टः तत्र भृगुपातकरणार्थमधिरूढौ तौ शिलातलोपविष्टं तपः शोषिताङ्गं शुभ ध्यानोपगतं आतपना यङ्कन्तमेकं श्रमणं ददृशतुः हर्षितौ तौ तत्समीपे जग्मतुः भक्तिमानपूर्वं ताभ्यां स वन्दितः साधुना धर्मलाभकथनपूर्वकं तयोः स्वागतं पृष्टं ताभ्यां पूर्ववृत्तान्तकथनपूर्वकं स्वाभिप्रायः साधोः कथितः साधुना कथितं न युक्तमनेक शास्त्रावदातबुद्धीनां भवादृशानां गिरिपतनमरणं सर्व दुःखक्षयकारणं श्रीवीतरागधर्मं गृह्णन्तिति पञ्च महाव्रतरूपः श्रीवीतरागधर्मस्तयोः कथितः ततस्ताभ्यां तस्य मुनेः समीपे दीक्षा गृहीता कालक्रमेण तौ गीतार्थौ जातौ ततः स्वगुर्वाज्ञया षष्ठाष्टमदशमद्वादशार्द्धमासमासक्षपणादि तपोभि रात्मानं भावयन्तौ आज्ञानुग्रामं विहरन्तौ कालांतरेण हस्तिनाग पुरं प्राप्तौ बहिरुद्याने स्थितौ अन्यदा मासक्षपणपारणकें सम्भूतसाधुर्नगरमध्ये भिक्षार्थं प्रविष्टः गृहानुग्रहं भ्रमन् राजमार्गानुगतो गवाक्षस्थेन नमुचि मन्त्रिणा दृष्टः प्रत्यभिज्ञातः चिन्तितंच स एष मातंगदारको मद्ध्यापतो मच्चरित्रमशेष मजानन्नस्ति कदाचिच्च लोकाग्रे वक्ष्यते तदा मन्महत्त्वभंशी भवि ष्यतीति मत्वा दूतैः स मुनि यष्टिमुष्ट्यादिभि र्मारयित्वा नमुचिना नगराद्बहिर्निष्काशयतु मारब्धः निरपराधस्य हन्यमानस्य तस्य कोपकरालितस्य मुखा न्निर्गतः प्रथमं धूमस्तोमः तेन सर्वमपिनगरमन्धकारितं। भयकौतूहलाक्रान्तानागरास्तत्रायाताः क्रोधाध्मातन्तंमुनिं दृष्ट्वा सर्वेपि प्रसादयितुं प्रवृत्ताः स नत् कुमारचक्रवर्त्यपि तत्रायातः तं प्रसादयितुं प्रवृत्त एवं बभाण भगवन् यदस्माद्दैरज्ञानैरपराद्धं तद्भवद्भिः क्षमणीयं संहरन्तुतपस्तेजः प्रसादं

कुर्वन्तु ममोपरिप्रसादं सर्वनागरिकजीवित प्रदानेन पुनरेवम्विधमपराधञ्चकरिष्याम इत्यादि चक्रिणाप्युक्तौसौयावच्च प्रशाम्यति तावदुद्यानस्थचित्र साधुर्जनापवादात्तं कुपितं ज्ञात्वा तस्य समीपमागत एवं उवाच भो संभूतसाधो उपशामयकोपानलं उपशम प्रधानाः श्रमणा भवन्ति अप राधेपि न कोपस्यावकाशं ददति क्रोधः सर्वधर्मानुष्ठान निष्फलीकारकोस्ति यतउक्तं मासुववासुकरइचित्तवणवासुनिसेवइ पढइनाणसुज्झाणनिच्च अप्पाणं भावई धारइदुद्धरबंभचेरमिक्खासणभुञ्जइ जासुरोसतसुसयलु धम्मनिप्फलु सम्यज्जइ इत्यादिकैश्चित्रसाधूपदेशैः संभूतस्य उपशान्तः क्रोधः तेजोलेश्या संहृता ततस्तौद्वावपितत्प्रदेशाद्विनिष्क्रान्तौ तदुद्यानं चिन्तितं चैताभ्यां आवाभ्यां संलेखनाकृता साम्प्रतमावयोयुक्त मनशनं कर्तुं । इति विचार्यैताभ्यां मनशनं विहितं सनत्कुमार चक्रिणा न मुचि मन्त्रिणो वृत्तान्तो ज्ञातः दुतैः सह रज्जुबद्धः कृतः प्रापितश्च तदुद्याने तयोः समीपे ताभ्यां समोचितः सनत्कुमारोपि तयोर्वन्दनार्थं सान्तः पुर परीवार स्तत्रायातः सर्वलोकसहितश्चक्री तयोः पादयुग्मे प्रणतः चक्रिणः स्त्रीरत्नं सुनन्दापि श्रीत् सुक्यात्तयोः पादे प्रणता तस्याश्च कस्पर्शानुभवेन सम्भूतयतिना निदानं कर्तुमारब्धः तदानीं चित्रमुनिना एवं चिन्तितं अहो दुर्जयत्वं मोहस्य अहो दुर्दान्तता इन्द्रियाणां येन समाचरित विकृष्ट तपस्करोपि विदित जिन वचनोप्ययं युवती बालाग्र सर्पणेत्थं अधवस्यति ततः प्रतिबोधितु कामेन चित्र मुनिना तस्य सम्भूत मुने रेवं भणितं भ्रातरे तदध्यवसायाद्विनिवृत्तिं कुरु एतेहि भोगाः असाराः परिणाम दारुणाः संसार परिभ्रमण हेतव स्सन्ति एतेषु मानिदानं कुरुनिदानात्तव घोरानुष्ठानं नैवताट्कं फलदं भविष्यति एवं चित्र मुनिना प्रतिबोधितोपि सम्भूतो न निदानं तत्याजयद्यस्य तपसः फलं अस्ति तदाहं भवान्तरे चक्रवर्त्ती भूया समिति निकाचितं निदानं ततो मृत्वासौधर्मे देवलोके द्वावपि देवौ जातौ ततश्चुतश्चित्र जीवः पुरमताल नगरे इभ्यपुत्रोजातः सम्भूत जीवस्ततश्चुतः कांपिल्यपुरे ब्रह्मनाम राजा तस्य चुलनी नाम्नी भार्यास्तस्याः कुक्षौ चतुर्दश स्वप्न सूचितः उत्पन्नः क्रमेण जातस्य

तस्य ब्रह्मदत्त इति नामकृतं देहोपचयेन कला कलापेन च वृद्धिङ्गतः तस्य ब्रह्मराज्ञ उत्तमवंशसम्भूतास्चत्वारः सुहृदस्सन्ति तद्यथा काशी विषयाधिपः कटकः गजपुराधिपः कणेरदत्तः कोशल देशाधिपति दीर्घः चम्पाधिपतिः पुष्पचूल इति तेऽत्यन्त स्नेहेन परस्पर विरहमनिच्छन्तः समुदितास्सैवं एकं २ वर्षं परिपाल्या विविध क्रीडाविलासै रेकस्मिन् राज्ये तिष्ठन्ति अन्यदातेचत्वारोपि समुदितास्सैव ब्रह्मराज्ये स्थिताः सन्ति तस्मिन्नवसरे ब्रह्मराज्ञो मस्त तस्य औषधाद्य साध्यः शिरोरोगः उत्पन्न स्ततस्तेन कटकादि चतुर्णां मित्राणा मुत्सङ्गे ब्रह्मदत्तो मुक्तः उक्तश्च यथैषमद्राज्यं सुखेन पालयति तथा युष्माभिः कर्त्तव्यमिति राज्यचिन्तां कारयित्वा ब्रह्मराजा कालङ्गतः मित्रै स्तस्य प्रेत्य कर्मकृतं मित्यर्थैवं भणितं एष कुमारो यावद्राज्य धुरार्हो भवति तावदस्माभि रेतद्राज्यं रक्षणीयमिति विचार्य सर्व्वसम्मतं दीर्घराजानं तत्र स्थापयित्वा कटक करेण दत्त पुष्पचूलाः स्वस्वराज्ये जग्मुः स दीर्घ राजा सकलसामयीकं राज्यं पालयति भण्डागारं विलोकयति प्रविशत्यन्तः पुरं चुलिन्यासमं मन्वयति तत इन्द्रियाणां दुर्निवारत्वेन ब्रह्मराज्ञ मैत्री मव गणय्य वचनीयतां अवमन्य चुलिन्या समं सम्य लग्न एवं प्रवर्द्धमान विषयसुख रसयो स्तयोर्गच्छन्ति दिनाः ततो ब्रह्मराज मन्त्रिणा धनुर्नाम्ना तयो स्तत्स्वरूपं ज्ञातं चिन्तितं च यएवं विधमकार्यं माचरति स किं कुमार ब्रह्मदत्तस्य हिताय भविष्यति एवं चिन्तयित्वा तेन धनुर्नाम्ना मन्त्रिणा स्व पुत्रस्य वरधनुनाम्नः कुमारस्य एवं भणितं यथा पुत्र यथा ब्रह्मदत्तस्य माता व्यभिचारिणी जातास्ति दीर्घ राज्ञा भुज्यमानास्ति अयं समाचार एकान्ते त्वया ब्रह्मदत्त कुमारस्य निवेदनीयः तेन च तथा कृतं ब्रह्मदत्त कुमारोपि मातुर्दुश्चरितम सहमान स्सखी ज्ञापनार्थं काक कोकिला मिथुनं गृहाग्रोतं कृत्वा चुलनी माह दीर्घ नृपयोर्दर्शितं एवं प्रोक्तं ये ईदृशमनाचारं करिष्यति तस्याहं निग्रहं करिष्यामीत्युक्त्वा कुमारो बहिर्गतः एवं द्वित्रिभिर्दृष्टान्तै दिन स्वयं यावदेवञ्चकार उवाच ततो दीर्घ नृपेण शङ्कितेन चुलिन्याएवमुक्तं कुमारेणावयोः स्वरूपं ज्ञातं अहङ्काकस्त्वं कोकिलेति दृष्टान्तः कुमारेण ज्ञापितः

तयोक्तं बालोयं यत्त दुलपतिनात्रार्थे काचिच्छङ्का कार्या ततो दीर्घपृष्ठेनोक्तं त्वं पुत्र वात्सल्येन किमपि स्वहितं वेत्सि अयमवश्य मावयो रति विघ्नकर स्तदवश्यमयं मारणीयः मयि स्वाधीने तवान्ये पुत्रा बहवो भविष्यन्ति एतादृशं दीर्घ नृपवचस्तयाङ्गी कृतं यतः उक्तं महिला आस कुलहरं महिला लोयंमिटुचरियखित्तं महिला दुग्गइदारं महिला जोणी अणत्थाणं १ मारइपिय भत्तारं हणइ सुअत्तहपणासए अत्थं नियगेहिंपिपीलावइणारी रागा उरापावा २ चुलिन्या भणितं कथमेष मारणीयः कथञ्च लोकापवादो न भवति दीर्घनृपेणोक्तं साम्प्रतमस्य विवाह क्रियते यस्याञ्चर्व्वभावयोः चिन्तितं भविष्यति ताभ्यां ब्रह्मदत्तस्य कस्यचिद्राज्ञः कन्या पाणिग्रहणं कारितं तयोः शयनार्थं अनेकस्तम्भ मत सन्निविष्टं गूढ निर्गमद्वारं जतुगृहं कारितं इतश्च धनु मन्त्रिणा दीर्घ नृपाय एवं विज्ञप्तं एष मम पुत्रोवर धनुरे तद्राज्य कार्यकरण समर्थो वर्त्तते अहं पुनः परलोक हितङ्करोमि दीर्घ नृपेणोक्तं इह स्थित एवत्वं दानादि धर्म कुरुतस्वै तद्वचः प्रतिपद्य धनुमन्त्रिणा गङ्गातीरे महती प्रपाकारिता तत्र पथिक परिव्राजकादीनां यथेष्टदानं दातुं प्रवृत्तः दानोपचारा वर्जितैः परिव्राजकादिभिर्द्विगव्यूत प्रमाणा सुरङ्गा जतुगृहं यावत्खानिताः जतुगृहान्तः सुरङ्गा द्वारि शिलादत्ता इतश्च चुलिन्या महताडम्बरेण वधूसहितः कुमारस्तत्र प्रवेशितः ततः समग्रः परिवारो विसर्जितः वरधनुः कुमारपार्श्वेस्थितः एवं स्वपित्रागदित वृत्तान्तानुसारेण सावधानो जाग्रन्नेव सुप्तः ब्रह्मदत्त कुमारस्तु एक शय्यायां तया वध्वासह सुप्तः गतं रात्रि प्रहरयुग्मं तदा तत्रचुलिन्या स्वहस्तेन अग्निकन्दुकोन्यस्तः तेन तद्गृहं सर्वं तात्दह्यमानं दृष्ट्वा विनिद्रो ब्रह्मदत्तः स्वमित्रं वरधनुं पप्रच्छ किमेतदिति वरधनुना सर्वं चुलिनी स्वरूपं कथितं पुनः कथितं श्वश्वा कन्या राजपुत्री न किन्तु काप्यन्या तस्मादस्यां मोहोमना गपिन कार्यः त्वमस्यां शिलायां पादप्रहारं कुरु येनावां निर्गच्छावः वरधनूक्तं सर्व्वं ब्रह्मद त्तेन कृतं ततो द्वावपि निर्गत्य सुरङ्गाद्वहिर्देशे समायातौ तत्र च धनुमन्त्रिणा पूर्वमेवद्वौ तुरङ्गमौ पुरुषौ च मुक्तौस्तः ताभ्यां तयोः सङ्केतः कथितः तुर

ङ्गारूढौ तावपि कुमारौ ततश्चलितौ एकेन दिवसे न पञ्चाशद्योजन मात्रं भूभागङ्गतौ दीर्घ मार्ग खेदेन तुरङ्गमौ व्यापन्नौ ततः पादचारेण गच्छन्तौ तौ कौट्टाभिधान ग्राममङ्गतौ कुमारेण वरधनुर्भणितः मां क्षुधा बाधते वरधनुः कुमारं बहिरेवोपवेश्य स्वयं ग्राममध्ये प्रविष्टः नापितं गृहीत्वा तत्रायातः कुमारस्य मस्तकं मुण्डापितं परिधापितानि कषाय वस्त्राणि चतुरङ्गुल प्रमाण पट्टबन्धः कुमारस्य स्त्री वस्त्रालङ्कृते कृदिवद्धः वरधनुनापि वेषपरावर्त्तनः कृतः तादृश वेषधरौ द्वावपि ग्राममध्ये प्रविष्टौ तावता एको द्विजः स्व मन्दिरान्निर्गत्य अभिमुख मागत्य तौ कुमारौ प्रत्येवमाह आगच्छता मद्गृहे भुञ्जतां वेनेत्युक्ते तौ द्वावपि तद् गृहे गतौ ब्राह्मणेन राजरूप प्रतिपत्ति पूर्वकं भोजितौ भोजनान्ते च एकाग्रवर महिला बन्धुमतीं नाम्नीं कन्यां उद्दिश्य वृहद्दत्त कुमार मस्तकेऽक्षान् प्रक्षिपति भणति च एषोऽस्याः कन्याया वरोस्विति वरधनुना भणितं किमेतस्य मूर्खस्य बटुकस्य कृते एतावानायासः क्रियते यतो गृहस्वामिना भणितं श्रूयतामस्मदाया स वृत्तान्तः पूर्वं सुव्रत नैमित्ति केनाख्यातं यथाऽस्याः बालिकायाः पट्टाक्षादित वक्षःस्थलः समित्रो भवद्गृहे भोजनकारी वरो भविष्यति सोयमस्या योग्योवर इति तस्मिन्नेव दिने तस्याः कन्यायाः कुमारेण पाणि ग्रहणं कारितं मुदितो गृहस्वामी कुमारस्तु एकरात्रौ तत्रस्थितः द्वितीयदिने वरधनुना कुमारस्योक्तं आवाभ्यां दूरे गन्तव्यं दीर्घराजा सन्नत्वेनात्र स्थातुमावयोरयुक्त मिति तौ द्वावपि बन्धुमत्याः स्वरूपं कथयित्वा निर्गतौ गच्छन्तावेकदा कस्मिंश्चिद्दूर ग्रामे गतौ क्षुधा क्रान्तं कुमारं बहिरुपवेश्य वरधनुः सलिलमानेतुं ग्राममध्ये प्रविष्टः त्वरितमेव पश्चादागत्य एवं कुमारस्योक्तवान् अत्र दुष्टश्रो जनापवादो मया श्रुतः यद्दीर्घ नृपेण ब्रह्मदत्तमार्गः सर्व्वत्र सैन्यैर्वेष्टितोस्ति ततः कुमारं आवामितो नश्यावः नष्टौ ततो द्वावपि उन्मार्गेण व्रजन्तौ महाटवीं प्राप्तौ तत्र कुमारं वटाध उपवेश्य वरधनुर्जलमानेतुं मितस्ततो बभ्राम दिनावसाने वरधनु दीर्घ पृष्ट नृप भटैर्दृष्टः प्रकामं यष्टि मुष्ट्यादिभिर्हन्यमानः कुमारं दर्शयेति प्रोच्य

मानस्य कुमारासन्न प्रदेशे प्रापितः तावता वरधनुना कुमारस्य केनाप्य लक्षिता संज्ञा कृता भट्टैरदृष्ट एव ब्रह्मदत्तो नष्टः पतितश्च दुर्गमे कान्तारे क्षुधा तृषाश्रमार्त्तः कुमारस्तृतीये दिने तामटवी मतिक्रान्त स्तापसमेकं ददर्श दृष्टे च तस्मिन् कुमारस्य जीविता सा जाता कुमारेण तापसः पृष्टः भगवन् क्व भवदाश्रमः तेन आसन्न एवास्मदाश्रम इत्युक्ता कुलपतिसमीपं नीतः कुमारेण प्रणतः कुलपतिः कुलपतिना भणितं वत्स कुत इह भवदागमनं कुमारेण सकलोपि स्वहत्तान्तः कथितः कुलपतिना उक्तं अहं भवज्जनकस्य क्षुल्लभ्राता ततस्त्वं निजं चैवावासं प्राप्तोसि सुखेनाच तिष्ठ इत्यभिप्रायं तापसस्य ज्ञात्वा कुमारस्तत्रैव सुखं तिष्ठत्यस्ति अन्यदा तत्र वर्षाकालः समायातः तदानीं निश्चिन्तेन कुमारेण तत्र तापसान्तिके सकला धनुर्वेदादिकः कला अभ्यस्ताः अन्यदा ग्रीष्मकाले फलमूलकन्दनिमित्तं तापसेषु गच्छत्सु ब्रह्मदत्तकुमारोपि तैः समं वने गतः वनश्रियं पश्यता तेन एको महाहस्ति दृष्टः कुमारस्तदभिमुखं चलितः कुमारं दृष्ट्वा हस्तिना गजगर्जारवः कृतः कुमारेण तस्य पुरो निजमुत्तरीयं वस्त्रं निक्षिप्तं करिणापि तत्क्षणात् शुण्डादण्डेन गृहीतं क्षिप्तं च गगनतले यावत् क्रोधान्धो जातः तावत् कुमारेण छलं ज्ञात्वा तद्वस्त्रं स्वकराभ्यां गृहीतं ततस्तेन नानाविध क्रीडया परिश्रमंनीत्वाकरीमुक्तः स पश्चाद् गन्तुं प्रवृत्तः तत् पृष्ठौ कुमारोपि चलितः इतश्च अग्रे गच्छन् कुमारः पूर्वापर दिग्विभागे परिभ्रमन् गिरिनदीतटसन्निविष्टं जीर्णभवनभित्तिमात्रोप लक्षितं जीर्णं नगरमेकं ददर्श तन्मध्ये प्रविष्टश्चतुर्दिक्षु दृष्टिं क्षिपन् पार्श्वपरिभुक्तखेटखड्गविकटवंशकुडंगं ददर्श कुमारेण तत् खड्ग तथैव कौतुकाद्गृहितं एकप्रहारेण निपतितं वंशकुडगं वंशान्तरालस्थितं च निपतितं रुण्डमेकं स्फुरदोष्ठं मनोहराकारं शिरः कमलं दृष्ट्वा संभ्रान्तेन कुमारेण एवं चिन्तितं श्वा धिगस्तु व्यवसितस्य धिक्मे बाहुबलस्येति कुमारः स्वं निनिन्द पश्चात्तापाक्रान्तेन तेन कुमारेण दृष्टं धूमपानलालसं कबन्धं समधिकमधृति स्तस्य पुनर्जाता इतस्ततः पश्यता कुमारेण पुनः प्रवरमुद्यानं दृष्टं तत्र भ्रमन् अशोकतरुपरिक्षिप्तमेकं सप्तभूमिकं आवासं कुमारो दृष्टवान् तन्मध्ये प्रविष्टः

कुमारः क्रमेण सप्तभूमिकामारूढः तत्र विकसितकमलदलाक्षीं प्रवरां महिलां पश्यतिस्म कुमारेण सा पृष्टा कासि त्वमिति ततः सा स्वसद्भावं कथयितुं प्रवृत्ता महाभाग मम व्यतिकरो महान् वर्त्तते ततस्त्वमेव प्रथमं स्ववृत्तान्तं वद कस्त्वं कुतः समायातः एवं तया पृष्टे कुमार आख्यत् अहं पञ्चालाधिपति ब्रह्मराजपुत्रो ब्रह्मदत्तोस्मीति कुमारोक्तिश्रवणानन्तरं हर्षोत्फुल्लनयना सा अभ्युत्थिता तस्येव चरणौ निपत्य रोदितुं प्रवृत्ता ततः कारुण्यहृदयेन कुमारेण सा पुनरेवं भणितामुखमुन्नतं कुरु मारुदेत्याश्वासिता सा कुमारेण त्वं स्ववृत्तान्तं वदेत्युक्ता साचख्यौ कुमार अहं तव मातुलस्य पुष्पचूलस्य राज्ञः पुत्री तवैव पित्रा दत्ता विवाहदिवसं प्रतीक्ष्यमाणा निजगृहोद्यान दीर्घिकापुलिने क्रीडन्ती दुष्टविद्याधरेणात्रानीता यावदहं स्वजनविरहाग्निसंतप्ता इह तिष्ठामि तावत् त्वं अतर्कितदृष्टिसमोऽत्रायातः अथ मम जीविताशा सञ्जाता यत् त्वं मयादृष्टः कुमारेणोक्तं स मम शत्रुः क्वास्ति येन तद्बलं पश्यामि तया भणितं स्वामिन् ममानेन शङ्करी नाम्नी विद्यादत्ता कथितं च इयं विद्या पठितमात्रा तव दासदासी सखी परिवारा भूत्वा आदेशं करिष्यति तवान्तिकमागतं प्रत्यनीकं निवारयिष्यति दूरस्थस्यापि मम चेष्टितं दृष्ट्वा सती इयं तव कथयिष्यति साद्य मया प्राप्ता स्मृता सती मम तच्चेष्टितं प्राह यथा स उन्मत्तनामा विद्याधरः पूर्णपुण्याया स्तव बलात् स्वर्गतेजश्च सोढ्मशक्तस्त्वामत्र मुक्त्वा निजभगिनीं ज्ञापनाय ज्ञापिकीं विद्यां प्रेषयित्वा च स्वयं विद्यां साधयितुं वंशकुडङ्गे गतोस्ति ततो निर्गतमात्रस्त्वां परिणेष्यतीति ममाद्य तथा विद्यया कथितं एतत्तस्याः वचः श्रुत्वा ब्रह्मदत्तेनोक्तं वंशकुडंगस्थस्य तस्य विद्याधरस्य मया साम्प्रतमेव शिरश्छेद्यं तयोक्तं आर्यपुत्र शोभनं कृतं यत्त दुरात्मा निहतः ततः सा कुमारेण गन्धर्वविवाहेन परिणीता तया समं विलसन् कुमारः कियत्कालं तत्र स्थितः अन्यदा कुमारेण तत्र दिव्यवलयानां शब्दः श्रुतः कुमारेणोक्तं कोयं शब्दः श्रूयते तयोक्तं कुमार एषा तव वैरिभगिनी खण्डश्रीखा नाम्नी विद्याधर कुमार परिणता स्वभ्रातृनिमित्तविवाहोपकरणानि गृहीत्वा समायाता त्वमितस्त्वरितमपक्रम यावदेता सा मद्दमभिप्रायं

वेद्मि यद्येतासां तवोपरि रागो भविष्यति तदाहं प्रासादोपरिस्थितां रक्तां पताकां चालयिष्यामि अन्या तु खेतामिति कुमारस्तद्दृष्टाद्वहिर्गत्वा दूरे स्थित ऊर्द्धविलोकते तावच्चालितां धवलपताकां दृष्ट्वा शनैःर स्तत्प्रदेशादपक्रान्तः प्राप्तो गिरिनिकुञ्जमध्ये तत्र भ्रमता कुमारेण एकं सरोवरं दृष्टं तत्र स्नानं कृत्वा सरः पश्चिमतीरे उत्तीर्णेन कुमारेण दृष्टा एका वरकन्या चिन्तितं च अहो मे पुण्यपरिणतिः येनैषा कन्या मे दृगोचरसमागता तयाप्यसौ कुमारः स्नेह निर्भरं विलोकितः कुमारं विलोकयन्ती साग्रे प्रस्थिता स्तोकया वेलया तया कन्यया एका दासी प्रेषिता तया कुमाराय वस्त्रयुगलं पुष्पतांबूलादिकं दत्तं उक्तं च या युष्माभिः सरस्तीरे कन्या दृष्टा तया सर्वमिदं प्रेषितं लावण्यलतिका नाम्नी अहं तस्या दासी अस्मि तयाच ममेदमादिष्टं एनं महानुभावं कुमारं मम तात महामन्त्रिणो शरीरस्थितिं कारय ततस्तत्र कुमार यूयमागच्छत ततः कुमारस्तया सह तदैवामात्यमन्दिरे गतः तत्र दास्या मन्त्रिणएवमुक्तं मन्त्रिन् त्वत्स्वामि पुत्रायं प्रेषितोस्ति प्रकामं अस्यादरः कर्त्तव्यः मन्त्रिणा तथैव कृतं द्वितीयदिने कुमारो मन्त्रिणा राज्ञ सभायां नीतः अभ्युत्थितेन राज्ञा कुमारस्य धुरि आसनं दत्तं पृष्टश्च वृत्तान्तः कुमारेण सर्वोपि कथितः अथ विविधभक्त्या भोजितस्य कुमारस्य एवमुक्तं राज्ञा कुमार तव भक्तिरस्माद्दृशैः कापि कर्त्तुं न पार्यते परमियमेवास्माकं भक्तिर्यदियं कन्या तव प्राभृतीकृता सुमुहूर्त्ते तयोर्विवाहो जातः कुमारस्तया समं विलासन् सुखेन तत्र तिष्ठति अन्यदा कुमारेण तस्याः प्रियायाः पृष्टं किमर्थमेकाकिने मह्यंवं नृपेण दत्ता सा उवाच आर्यपुत्र एष मदीयः पिता बलवत्तरवैरिसन्तापित इमां विषमपल्लिं समाश्रितः अत्र तातपक्षा श्रीमत्यात्रयतुर्णां पुत्राणामुपरि अहं पुत्री जाता अहमतीव पितुर्वल्लभा यौवनस्था अन्यदा पित्रा उक्ता पुत्रि मम सर्वेपि राजानो विरुद्धाः सन्ति तेन त्वं इह स्थितैव योग्यं वरं गवेषय ततोहं ग्रामाद्वहिस्तस्य सरस्तीरे समायातान् पथिकान् विलोकयन्ती स्थिता तदानीं त्वं तत्रायातो मया भाग्यात् प्राप्तश्चेति परमार्थः ततः श्रीकान्तया समं विषयसुखमनुभवतस्तस्य सुखेन वासरायान्ति अन्यदा स पल्ली

पतिः कुमारेण समं निजसैन्यवेष्टितः स्वविरोधि नृप देशभङ्गाय चलितः मार्गे गच्छतस्तस्य क्वचित्सरखीरे वरधनुर्मिलितः कुमारेणोपलक्षितः कुमारं दृष्ट्वा स रोदितुं प्रवृत्तः कुमारेण बहुप्रकारं वारितः स्थितः कुमारेण पृष्टं मन्त्री दूरीभूतेन त्वया किमनुभूतं वरधनुः प्राह कुमारतदानीं त्वां वटाध उपवेश्य अहं जलार्थं गतः सर एकं दृष्टवान् ततो जलं गृहीत्वा तवान्तिके यावदहमागतुं प्रवृत्तः तावत्तत्रत्यवङ्गकवचैर्दीर्घनृपभटैः सहसाश्लिष्टैरहमुपलक्षितस्ताडितश्च उक्तं चक्रवर्मदत्तइति मयोक्तं अहं न जानामि ततो दृढतरं ताडितो अहमवदं ब्रह्ममन्त्री व्याघ्रेण भक्षितः तैरुक्तं तं देशं दर्शय तैर्मार्यमाणोहं तवान्तिकदेशमागत्य तदानीं त्वां संग्रामकार्षं त्वयि ततो नष्टे अहं पुनस्तैर्भृशं ताड्यमानं स्वमुखेपरिव्राजकदत्तां गुटिकां क्षिप्तवान् तत्प्रभावदहं निश्चेष्टो जातः ततस्ते मृतोयमिति ज्ञात्वा सर्वेपि भटागताः तेषां गमनानन्तरं चिरकालेन मया गुटिकामुखान्निष्कासिता ततः सचेतनोहं त्वां गवेषयितुं प्रवृत्तः न मया दृष्टस्त्वं ततोहमेकं यामं गतः तत्र दृष्ट एकः परिव्राजकः तेनोक्तं अहं तव तातस्य मित्रं सुभगनामा तव पिता धनुर्नष्टः मातापि दीर्घेण गृहीता मातङ्गपाटे क्षिप्तास्तीति श्रुत्वाहमतीव दुःखितः काम्पिल्यपुरे गतः कापालिकवेषं कृत्वा मातङ्गवृत्तं वर्णयित्वा मातङ्गपाटकान्मातरं निष्कासितवान् एकस्मिन् ग्रामे पितृमित्रस्य देवशर्म ब्राह्मणस्य गृहे मातरं मुक्त्वा त्वामन्वेषयन्नहमिहायातः इत्थं यावत्तौ वरधनु ब्रह्मदत्तौ वार्त्तां कुरुतः तावदेकः पुरुषस्तत्रागत्य एवमुवाच यथा महाभाग भवता क्वचिदितस्ततो न पर्यटितव्यं त्वद्गवेषणार्थं दीर्घनियुक्ता नृपा इहागताः सन्तीति श्रुत्वा तौ द्वावपि ततो वनान्नष्टौ भ्रमन्तौ कौशांब्यां गतौ तत्र बहिरुद्याने द्वयो श्रेष्ठिसुतयोः सागरदत्तबुद्धिलनाम्नोः कुर्कुटयुगलं लक्षपणकरणपूर्वकं योद्धुं प्रवृत्तं द्रष्टुं कौतुकेन तौ तत्रैव स्थितौ बुद्धिलकुर्कुटेन सागरदत्तकुर्कुटः प्रहारेण जर्जरीकृतो भग्नः सागरदत्तेन प्रेर्यमाणोपि स्वकुर्कुटो बुद्धिलकुर्कुटेन समं पुनर्योद्धुं नाभिलषति हारितं लक्षं सागरदत्तेन अत्रान्तरे वरधनुना उक्तं भो सागरदत्त एषसुजातिरपि कुर्कुटः कथं भग्नः ममाग्रार्थे विग्रयोस्ति यदि

कोपि कोपं न करोति तदा बुद्धिलकर्कटमहं पश्यामि सागरदत्तो भणति भो महाराज विलोकयनास्यत्र मम कोपि द्रव्यलोभः किं त्वभिमानसिद्धिमात्र प्रयोजनमस्तीति ततोवरधनुनाविलोकित स कुर्कुटः तच्चरण निबद्धः सूचीकलापोदृष्टः बुद्धिलोपिवरधनं प्रति शनैरेव माह यदित्वं सूचीकलापं न बध्नसि तदाहन्म वलाच्चार्द्ध दास्यामि ततो वरधनुनाउक्तं विलोकितोयत् कुर्कुटोनाच किञ्चिद् दृश्यते एव मुक्तापि यथा बुद्धिलोनजानाति तथा सूचीकलाप मया कृत्व सागरदत्तस्य तदृश्यति करः कथितः सागरदत्तेन पुनः स्व कुर्कुटः प्रेरितोबुद्धिल कर्कुटेन समं युद्धं प्रवृत्तेसागरगत्त कुर्कुटेन जितो बुद्धिल कुर्कुट हारितं बुद्धिलेन लक्षं तुष्टः सागरदत्तः एवमाह आर्यपुत्र गृहेगम्यते इत्युक्ता द्वावपि कुमारीरथे निवेश्य सागरदत्तः स्वगृहेगतः सागरदत्तस्तौ परमप्रीत्या पश्यति सागर दत्तस्नेह नियन्त्रितौ तौ अतो वा ग्रहात् तद्गृह एव तस्थतुः कियद्दिनानन्तरं एकोदा स स्नात्वा यातस्तेन एकान्ते वरधनु राकारितः उक्तं वरधनुकुमारायत्तव तदानीं सूचि व्यतिकर द्रव्यं स्वमुखोक्तं बुद्धिलेन तद् द्रव्यार्पणाय अयं हारः प्रेषितोस्ति इत्युक्ता हारकरण्डिकातेन वरधनवे दत्ता दासः स्वगृहेगतः वरधनुरपिहार करण्डिकां गृहीत्वा ब्रह्मदत्तान्तिके गतः स्वरूपं कथयित्वाहारकरण्डिकातेन वरधनवे दत्ता स्वरूपं कथयित्वाहारकरण्डिकातोहारं निष्कास्यदर्शितवान् हारं पश्यतां ब्रह्मदत्तेनहारैकदेशस्थो ब्रह्मदत्त नामाङ्कितो लेखो दृष्टः दृष्ट्वच मित्तकस्यैषः लेखः वरधनुर्भणति को जानाति ब्रह्मदत्तनामकाः पुरुषाबहवस्सन्ति ततोदूरे गत्वा वरधनुना उत्कीर्णो लेखः तन्मध्ये इयङ्गाथा दृष्टा पत्थिज्जइजइ विजए जणेण सद्धोय जणिय जत्तेणं तहवित्त मच्चिह धणिअं रयणवई मुणइ माउं सूत्रबुद्ध्याध्यायता वरधनुनाऽस्या गाथाया अर्थोऽवगतः द्वितीयदिने एका परिव्राजिका तत्रायाता सा कुमारसिरसि कृसुमाक्षतानि प्रक्षिप्य कुमारत्वं शतसहस्रायुर्भवेदित्या शिषं ददौ वरधनुमेकां तेन तेन समं किञ्चिन्मन्त्रयित्वा सा प्रतिगता कुमारेण वरधनुर्जल्पितः अनया किमुक्तं वरधनुर्भणति अनया एवमुक्तं यत्तव

बुद्धिलेन करण्डेहारः प्रेषितोस्ति तेन समं योलेखः समागतोस्ति तत् प्रतिलेखं समर्प्पय मया उक्तं एष लेखो ब्रह्मदत्त राजा नामाङ्कितो वर्त्तते ततस्त्वमेव वदको सो ब्रह्मदत्तः तया उक्तं श्रूयतां परङ्कस्यापि त्वया न वक्तव्यं इह नगर्यां श्रेष्टि पुत्री रत्नवतीनाम्नी कन्यकास्ति सा बालभावादारभ्य अतीव ममज्ञे दानुरक्तायौवनमनु प्राप्ता अन्यदिनेसा किञ्चित्ध्यायन्ती मयादृष्टा च पुत्रि त्वं किं ध्यायसीति साकिमपिनैवबभाणपरिजनेनोक्तं इयं बहून् प्रहरान् यावत् ईदृश्येव किञ्चिदार्त्त ध्यान् कुर्वन्ती दृश्यते परमस्याहार्द्दन ज्ञायते ततः पुनरपि तस्याः पृष्टं सा किञ्चिद्रोवाच तत्सख्याप्रियं गुप्ता उक्तं हे भगवति तव पुरुषलज्जया किञ्चिदक्तुं शक्नोति अहं तावत्कथयामि इयं गत दिने क्रीड़ार्थं मुद्यानेगता तत्रानया स्वभ्रातुर्बुद्धिलश्रेष्टिनः कुर्कुटयुद्धं कारयतः समीपेएकोवर कुमारोदृष्टः तं दृष्ट्वैषा एतादृग्जाता कुमारीसख्याः प्रियंगुलतिकाया एतद्वचः श्रुत्वा मया उक्तं पुत्रि कथयसद्भावं पुनः पुनरेवं मयोक्ता सा कथमपि सद्भावं उक्ता प्राह भगवति तं मम जननीनास्ति किञ्चित्तत्त्ववाकथनीयं अनया प्रियंगुलतिकया कथितो यो ब्रह्मदत्त कुमारः स मे पतिर्भविष्यति तदावरं अन्यथाहं मरिष्यामि सामया भणिता वत्से धीराभव अहं तथा करिष्ये यथा तव समीहितं भविष्यति ततः सा किञ्चित् स्वस्था कल्यदिने पुनरेवं मया तस्या विशेषाश्वासना करणार्थं कल्पितमेवोक्तं वत्से स ब्रह्मदत्त कुमारो मया दृष्टः तयापि समुच्छ्वसित रोम कूपया भणितं भगवति तव प्रसादेन सर्वं भव्यं भविष्यति किन्तु तस्य विश्वास निमित्तं बुद्धि लब्धपदेशेन इमं हार रत्नकरण्डके प्रक्षिप्य ब्रह्मदत्तराज नामाङ्कित लेख सहितं कृत्वा कस्यचिद्धस्ते प्रेषय ततो मया कल्पे तथा विहितं एषले खव्यतिकरः सर्वोपि मया तव कथितः साम्प्रतं प्रतिलेखं देहि ततो मयापितस्याः प्रतिलेखोदत्तः तस्मध्ये चेट्टगी गाथा लिखितास्ति गुरुगुण वरधणुकलिओ तमाणिओ सुणइवंभदत्तो विरयणवई रयणमई चन्दोविय चन्दमाजोगो १ इदं वरधनूक्तमाकर्ण्य अदृष्टाया मपि रत्नवत्यां परमप्रेमवान् कुमारो जातः तद्दर्शन सङ्गमोपाय मन्वेषमाणस्य कुमारस्य गतानि कतिचिद्दिनानि अन्यदिने

समागतो नगरबाह्याद्वरधनुः एवञ्च कुप्रवृत्तः यथा एतन्नगर स्वामिनो दीर्घनृपेण स्व किङ्करा आवां गवेषणाय प्रेषिता सन्ति नगरस्वामिना च आवां ग्रहणोपायः कारितोस्ति एतादृशी लोकवार्त्ताबहिः श्रुता सागरदत्तेन एतद्वार्तिकरं श्रुत्वा द्वावपि भूमिगृहे गोपितौ रात्रिः पतिता कुमारेण सागर दत्तस्य भणितं तथा कुरु यथा पक्रमामः एतदाकर्ण्य सागरदत्तोद्वाभ्यां सह नगराद्बहिर्निर्गतः स्तोकां भूमिंगत्वा नेच्छन्तमपि सागरदत्तं बलान्निवर्त्य कुमार वरधनूद्वावपि गन्तुं प्रवृत्तौ पथि गच्छद्भ्यां ताभ्यां यक्षायतनोद्यान पादपान्तरालस्थिता प्रहरण समन्वित रथवर समीपस्था एका प्रवरमहिला दृष्टा ततस्तया समुत्थाय सादरं भणितौ किमियत्यां वेलायां भवन्तौ समायातौ इति तस्याः वचः श्रुत्वा कुमारः प्राह भद्रे कौ आवां तयोक्तं त्वं स्वामी ब्रह्मदत्तोऽयञ्च वरधनुः कुमार इतिश्रुत्वा कुमार उवाच कथमे तद्वगतं त्वया सा उवाच श्रूयतां इहैव नगर्यां धनप्रवरोनाम श्रेष्ठीवर्त्तते तस्य धनसञ्चया भार्या वर्त्तते तया अष्टपुत्राणा मुपरि एका पुत्री प्रसूता सचाहमेव मम च कोपि पुरुषो नरोचति ततो मातुरनुज्ञयाहं यक्षमाराधितुं प्रवृत्ता तुष्टेन यक्षेण मयोक्तं वत्से तव भर्त्ता भविष्यच्चक्रवर्त्ती ब्रह्मदत्तो भविष्यति मया भणितं समया कथं ज्ञातव्यः तेनोक्तं बुद्धिल सागरदत्तयोः कुक्कुटयुद्धमध्ये यो दृष्टस्तवानन्दं जनयिष्यति स वरधनुमित्र सहितो ब्रह्मदत्तकुमार उपलक्ष्यः ततः परं मयाहार लेख प्रेषणादिकं यत्कृतं तत्सर्वं तव सुप्रीतमेवास्तीति कुमरी वाक्यमाकर्ण्य सानुरागः कुमारस्तया सहरथ मारूढः सा कुमारेण पृष्ठा इतः क्व गन्तव्यं रत्नवत्या भणितं अस्तिमगधपुरे मम पितुः कनिष्ठ भ्राता धनसार्थवाह नामा श्रेष्ठी सज्ञातव्यतिकरो युवां मम चसमागमनं सुन्दरं ज्ञास्यति ततस्तत्र गमनं क्रियते पश्चाद्यथा युवामिच्छा तथा कार्यमिति रत्नवतो वचसा कुमारो मगधापुराभिमुखः प्रवृत्तः वरधनुस्तदा सारथिर्बभूव ग्रामानुग्रामं गच्छन्तौ तौ कौशांबी देशान्निर्गतौ अन्यदा गतौ गिरिगुहा टव्यां तत्र कण्ठकसुकण्ठकाभिधानौ द्वौ चौर सेनापती तं प्रवरं रथं विभूषितं स्त्रीरत्नं च प्रेक्ष्य तद्रक्षकं च कुमारद्वयमेव प्रेक्ष्यसन्नद्धौ सपरिवारौ प्रहन्तु

मायतौ अत्रावसरे कुमारेण तथा प्रहरणशक्तिर्दर्शिता यथा सर्वेपि चौरसुभटाः कुमारप्रहाराजर्जराः सर्वासु दिक्षु गताः कुमारस्ततो रथारूढो चलितः वरधनुना उक्तः कुमार यूयं दृढश्रान्ता स्ततो मुहुर्त्तमात्रमत्रैव रथे निद्रासुखमनुभवत ततो रत्नवत्या सह कुमारः प्रस्थः गिरिनदी एकामार्गे समायाता तावत्तुरङ्गमाः श्रमखिन्नानाग्रे चलन्ति ततः कथञ्चित् प्रतिबुद्धः कुमारः श्रमखिन्नान् तुरंगमान् पश्यन् रथाग्रे च वरधनुमपश्यन् जलनिमित्तं वरधनुर्गतो भविष्यतीति चिन्तितवान् इतस्ततः पश्यन् कुमारः रथाग्रभागरुधिरावलिप्तं ददर्श ततो व्यापादितो वरधनुरिति ज्ञात्वा हा हा हतो मे सुहृत् इति शोकार्त्तः कुमारो रथोत्तङ्गात्पपात मूर्च्छांच प्राप्तवान् पुनरपि लब्धचैतन्य एवं विललाप हा भ्रातः हा वरधनु मित्र त्वं क्वगतोसीति विलपन् कुमारः कथमपि रत्नवत्या रक्षितः कुमारः रत्नवत्यै प्रत्येवमाह सुन्दरि न ज्ञायते वरधनु मृतो जीवन्नास्तीति ततोहं तदन्वेषणार्थं पश्याद्रजामि तया भणितं आर्यपुत्र अवसरो नास्ति पश्चाद्गमनस्य येनाहमेकाकिनी चौरश्वापदादिभीमं चारण्यमिदं अत्र च निकटवर्त्ती सीमावकाशोस्ति येन परिम्लाना कुशकङ्कटकाः पश्यन्ति एतद्रत्नवतीवचः प्रतिपद्य रत्नवत्या सहकुमारः पथि गन्तुं प्रवृत्तः मगधदेशसंस्थितमेकं ग्रामं प्राप्तः तत्र प्रविशन् कुमारः सभामध्यस्थितेन ग्रामाधिपतिना दृष्टः दर्शनानन्तरमेव एष न सामान्यः पुरुष इति ज्ञात्वा सोपचारः प्रतिपत्त्या पूजितो नीतश्च स्वगृहं दत्तस्तत्र सुखावासः तत्र सुखं तिष्ठन् एकग्रामाधिपतिना भणितः कुमारत्वं विखिन्न इव लक्ष्यसि कुमारेणोक्तं मम भ्राता चौरेण सह भण्डनं कुर्वन् न जाने कामप्यवस्थां प्राप्तः ततो मया तदन्वेषणार्थं तत्र गन्तव्यं ग्रामाधिपेनोक्तं अलं खेदेन यद्यस्या भटव्यां सभविष्यति तदाऽवश्यमिह प्राप्स्यामः इति भणित्वा प्रेषितानिज पुरुषा अटव्यां गत्वा समायाताः कथयन्ति अस्माभिः सर्वत्र स पुरुषो गवेषितः परं क्वचिन्न दृष्टः किन्तु प्रहारपतितो बाण एवैष दृष्टः ततः कुमारो वरधनुर्मृत इति चिरकालं शोकं चकार एकदा रात्रौ तस्मिन् ग्रामे चौरधाटिः पतिता सा च बाणैः कुमारेण जर्जरीकृता नष्टा अथ हर्षितो ग्रामाधिपतिर्ग्रामश्च

अथ ग्रामाधिपतिमापृच्छ्य ततश्चलितः कुमारः क्रमेण राजगृहं प्राप्तः तत्र नगराद्बहिः परिव्राजकाश्रमे रत्नवतीमुक्त्वा स्वयं नगराभ्यन्तरे गतः तत्रैकस्मिन् प्रदेशे धवलगृहं दृष्टं तदन्तःप्रविष्टेन कुमारेण द्वे कन्ये दृष्टे ताभ्यां कुमारं दृष्ट्वा प्रकटितानुरागाभ्यां भणितं कुमारयुष्माद्दशामपि पुरुषाणां रक्तजनमुत्सृज्य भ्रमितुं किं युक्तं कुमारेणोक्तं सजनः कः येनैवं यूयं भणथ ताभ्यामुक्तं प्रसादं कृत्वा आसनेनिवेशं तु भवन्तः ततः उपविष्ट आसने कुमारः ताभ्यां कुमारस्य मज्जनस्नानाद्युपचारं कृत्वा उक्तं कुमार शृणुतमत्सवृत्तान्तः इहैव भरतक्षेत्रे वैताढ्य गिरिदक्षिणश्रेण्यलंकारभूते शिवमन्दिरे नगरे ज्वलनशिखो राजा तस्य विद्युच्छिखा नाम्नी देवी तस्या आवां द्वे पुत्र्यौ अस्मद्भ्राता उन्मत्तो नाम वर्त्तते अन्यदा अस्मत्पिताग्निशिखाभिधानेन मित्रेण समं यावद्गोष्ठ्यां प्रविष्टस्तिष्ठति तस्मिन्नवसरेऽष्टापदपर्वताभिमुखं व्रजन्तं सुरासुरसमूहं पश्यति राजापि पुत्रीसहितस्तत्र गन्तुं प्रवृत्तः अष्टापदे प्राप्तोजिनप्रतिमाश्च वन्दिता कर्पूरागरुधूपाद्युपचारो महान् कृतः प्रदक्षिणात्रयं कृत्वा निर्गच्छता राज्ञाऽशोक पादपस्याध उपविष्टं चारणमुनियुगलं दृष्टं प्रणतश्च तत्रोपविष्टस्य राज्ञः पुरस्ताद्गुरुणा एवं धर्मदेशना कर्तुमारब्धा असारः संसारः शरीरं भंगुरं शरदभ्रोपमं जीवितं तडिल्लसितानुकारि यौवनं किंपाकफलोपमा भोगाः सन्ध्याराग समं विषयसुखं कुशाग्रजलबिन्दुचञ्चला लक्ष्मीः सुलभं दुःखं दुर्लभं सुखं अनिवारितप्रसरो मृत्युः तस्मादेवं स्थिते सति भो भव्याः मोह प्रसरं छिन्दन्तु जिनेन्द्रधर्मे मनो नयन्तु एवं चारणश्रमणदेवानां श्रुत्वा सुरादयो यथा गतं प्रतिगताः तदालब्धावसरेणाग्निशिखिना भणितं यथा एतासां बालिकानां को भर्त्ता भविष्यति चारणश्रमणाभ्यामुक्तं एते द्वे कन्ये भ्रातृवधकारिणी नार्यौ भविष्यतः तयो रेतद्वचः श्रुत्वा राजा श्याममुखो जातः अस्मिन्नवसरे आवाभ्यामुक्तं तात साम्प्रतमेव साधुभ्यामुक्तं संसारस्वरूपं तत आवयो रलं एवं विधावसानेन विषयसुखेन आवयोरेतद्वचस्तातेन प्रतिपन्नं आवाभ्यांच भ्रातृस्नेहेन स्वदेहसुखकारणानि त्यक्तानि भ्रातुरेव स्नानभोजनादिचिन्ता कुर्वन्त्यौ आवां तिष्ठाव अन्यदाऽस्मद्भ्राता पृथिवी भ्रमता दृष्टा

कुमारभवन्मातुलपुत्रीपुष्पवती कन्यका तद्रूपा चित्रचित्तस्तां हृत्वा आगताः परं तत् दृष्टिं सोढुमक्षमो विद्यां साधेतुं गतः अतःपरं वृत्तान्तो युष्माकं ज्ञानगोचरोऽस्ति तस्मिन् काले भवदन्तिकादागत्य पुष्पवत्या आवयोर्भ्रातृवधवृत्तान्तः कथितः ततः शोकभरेण आवां रोदितुं प्रवृत्ते मधुरवचनैः पुष्पवत्या रक्षिते तदा आवां शङ्करोविद्या एवं वक्तुं प्रवृत्ता असौ भ्रातृवधकारी ब्रह्मदत्तचक्रवर्त्ती भविष्यति युवां मुनिवचनं किं न स्मरथ एतद्वचनमाकर्ण्य आवाभ्यां जातानुरागाभ्यां मानितं परं पुष्पवत्या वालिकया स्नेहरससंभ्रान्तया रक्तपताकां विहाय श्वेतपताका चालिता तदर्शनानन्तरं त्वमन्यत्र कुचापि गतः नानाविधग्रामाकर नगरादिषु भ्रमन्तीभ्यां आवाभ्यां त्वां न क्वचिद्दृष्टः ततो विखिन्ने आवां इहागते साम्प्रतमत्रातर्कितहिरण्यसमं तव दर्शनं जातं ततो महाभाग पुष्पवती व्यतिकरं स्मृत्वा कुरु अस्मत् समीहितं एवं श्रुत्वा कुमारेण सहर्षं मानितं गन्धर्वविवाहेन तयोः पाणिग्रहणं कृतं एक रात्रौ ताभ्यां समं उषित्वा प्रभाते कुमारस्तयोरेवमुवाच युवां पुष्पवत्या समं गच्छतं तया समं तावत् स्थातव्यं यावन्मम राज्यलाभो भवति एवं श्रुत्वा ते गते तावत् कुमारो न तल्लग्नहं न तं परिजनं पश्यति चिन्तितवांश्च एषा विद्याधरी मायेति चिन्तयन् रत्नवती गवेषणा निमित्तं तापसाश्रमाभिमुखं गतः न च तत्र रत्नवती दृष्टा न चान्यः कोपि पुरुषो दृष्टः ततः कं पृच्छामीति विचार्य इतस्ततः पश्यति तावदेको भद्राकृतिः पुरुषस्तत्रायातः कुमारेण स दृष्टः भो महाभाग एवंविध रूपनेपथ्या एका स्त्री मयात्र मुक्ता कल्येऽद्य वा त्वया दृष्टा तेन भणितं पुत्र त्वं किं तस्या रत्नवत्या भर्त्ता कुमारो भणति एवं तेन भणितं कल्ये सा मया रुदतीं दृष्टा अपराह्णकाले तस्याः समीपे गतः पृष्टा च सा मया पुत्रिका कासि त्वं कुतः समागताः किंतेशोककारणं कथा त्वया गन्तव्यं तया किञ्चित्कथिते सामया प्रत्यभिज्ञाता मम त्वं दौहित्री भवसीति उदित्वा मया तस्य लघुपितुः समीपे गत्वा शिष्टा तेनाप्युपलक्ष्य सा विशेषादरेण स्वमन्दिरे प्रवेशिता सर्वत्र त्वं गवेषितः परं न क्वचिद्दृष्टः साम्प्रतं सुन्दरं जातं यत् त्वं लब्धः एवमुक्त्वानीतः कुमारस्तद्दृष्ट्वा उपचारः कृतः तत्र महो

त्सवेन रत्नवती पाणिग्रहणं कुमारः कृतवान् तया सह विषयसुख मनुभवन् कियत्कालं तस्थौ अन्यदा वरधनुवर्ष दिवसोऽद्येति उक्ता तद्गृहे कुमारेण ब्राह्मणादयो भोजिताः अन्नावसरे वरधनुः कृतब्राह्मणवेषो भोजन निमित्त मागतः एवं भणितुं प्रवृत्तः भो ज्ञापयन्तु तस्य भोज्यकारिणः यथा यदि मम भोज्यं प्रयच्छतः तदा तस्य परलोकवर्त्तिन उदरे भोज्यं संक्रमति गृहपुरुषै स्तद्वचः कुमारायगिष्टः कुमारोपि गृहाद्बहिर्निर्गतः दृष्टो वरधनुः प्रत्यभिज्ञातस्य गाढं कुमारेण लिङ्गितः गृहमध्ये प्रवेशितः स्नानमज्जन भोजनादिभिः सत्कृतश्च अनन्तरं कुमारेण पृष्टो वरधनुः स्ववृत्तान्तं जगौ यथा तस्यां रात्रौ निद्रावश मुपागतेषु युष्मासु सत्सुप्तेषु धाविला चौरेण एकेन कुडङ्गान्तरितेन मम पादे बाणप्रहारः कृतः तद्वेदना परवशोहं निपतितो मही तले परं अपाय भीरुत्वेन मया युष्माकं न निवेदितं स्वयं अग्रे चलितः अहन्तु शनैः पतित वृक्षान्तराले चलन् महता कष्टेन तस्मिन् ग्रामे प्राप्तः यच यूयं स्थिताः तेन ग्रामाधिपतिना सत्कृतः युष्माकं प्रवृत्तिं श्रुत्वाऽहमद्य प्रगुणीभूतो भोजन प्रस्तावे समागतः यूय मद्यमद्याप्यास्मिलिताः अथ तयो स्तत्राऽवियुक्तयोः सहर्षं दिवसायान्ति अन्यदा ताभ्यां परस्परमेवं विचारितं यथा आवाभ्यां कियत्कालं मुक्तपुरुषा कराभ्यां स्थातव्यं एवं च चिन्तयतो स्तयोर्गतः कियान्कालः अन्यदा तत्र समायातो मधुमासः मदनमहोत्सवे जायमाने सर्वलोको नगराद्बहिः क्रीडितु मायातः वरधनु कुमारावपि कौतुकेन नगराद्बहिर्गतौ निर्भर क्रीडारस निमग्ने लोकेऽतर्कितएव पतित मिठोनिरंकुशोराजः हस्ती तत्रायातः समुच्छलित कोलाहलो भग्नः क्रीडा रसो नष्टः समन्तात्रारी निकरः एका च बालिका समुन्नत पयोधरा नश्यन्ती तस्य हस्तिनो दृष्टी पतिता सा शरणं मार्गयन्ती ईतस्ततः पश्यति तस्याः परिजनाः पूत् कुर्वन्ति भयभ्रांतायास्याः पुरोभूत्वा कुमारेण स करीहक्कितः एषा मोचिता सोपिकरीतां मुक्ता रोषवश विस्तारित लोचनः प्रसारित शुण्डादण्डः शीघ्रं कुमाराभिमुखं धावितः कुमारेणापि उत्तरीय वस्त्रं गजाभिमुखं प्रक्षिप्तं गजेन तद्वस्त्रं शुण्डया गृहीत्वा गगने प्रक्षिप्तं गग

नाच पुनर्भूमौ निपतितो तद्ग्रहणाय यावत्करौ पुनर्भूम्यभिमुखं परिणमतितावदुन्मुत्य कुमारस्तत्स्कन्धमारूढः स्व करतलाभ्यां तत् कुम्भस्थल मास्फालितवान् मधुरवचनैश्च सन्तोषितः सन् करी स्व वर्गंनीतः समुच्छलितः साधुकारः जयति कुमार इति पतितं बन्दिजनैः कुमारेण स करी आसान स्वश्च समीपं नीतो बद्धश्च नरपति स्तमनन्य सदृशं दृष्ट्वा परमं विस्मयं प्राप्तः स्वमन्त्रिणं पप्रच्छैकएषः ततः कुमार स्वरूपाभिज्ञेन मन्त्रिणा उक्तं एषः ब्रह्मराज्ञः पुत्रो ब्रह्मदत्तकुमार इति ततस्तुष्टेन राज्ञानीतः कुमारः स्व भुवनं सत्कृतः स्नानमज्जन भोजनादिभिः ततः कुमारस्याष्टौ स्व पुत्र्यो दत्ताः महोत्सवपूर्वं तासां पाणिग्रहणं कुमारेण कृतं तत्र कियद्दिनानि वरधनुकुमारो सुखेन स्थितो अन्यदा एका स्त्री कुमारसमीपमागत्य भणितुं प्रवृत्ता यथा कुमारोस्ति किंचिदकृत्यं कुमारेणोक्तं वद सा उवाच अस्यामेव नगर्य्यां वै श्रमणो नाम सार्थवाहस्तस्य पुत्री श्रीमती अस्ति सा मया बालभावा दारभ्य पालिता या त्वया तदानीं हस्तिसंभ्रमाद्रक्षिता तया हस्तिसंभ्रमोद्धरितया तदानीं जीवितदायकं त्वां सा स्नेहेन विलोकितवती सान्यतं त्वदेक चित्ता तद्रूपलावण्यकलाकौशलमोहिता त्वामेव स्मरन्ती परिजनेन कथमपि स्वमन्दिरं नीता तत्रापि न मज्जन भोजनादिदेहस्थितिं करोति तदानीं मया तस्या उक्तं कथं त्वमकांण्डे ईदृशी जाता यावन्नमापि प्रतिवचनं न ददासि हसित्वा सा एवमुवाच हे अम्ब भवत्याः किमकथनीयं परं लज्जया किं चिदक्तुं न शक्नोमि पुनर्मया साग्रहं पृष्टा सा उवाच येनाहं हस्तिसंभ्रमाद्रक्षिता तेन समं यदि मम पाणिग्रहणं न स्यात् ततो मेवश्यं मरणं एवमुक्ता तया अहं तव समीपे प्रेषिता अङ्गी कुरुतां बालिकां कुमारेण तद्वचोङ्गीकृतं प्रशस्तदिवसेस तस्याः पाणिग्रहणं कुमारेण कृतं वरधनुना तु सुबुद्धिनामात्य पुत्रानन्दननाम्नाः पाणिग्रहणं कृतं एवं च द्वयोरपि विषयसुखमनुभवतो स्तयोर्गता कियन्तो वासराः तयोः सर्वत्र प्रसिद्धिर्जाता तौ अन्यदा गतौ वाराणस्यां ब्रह्मदत्तं बहिः स्थापयित्वा वरधनुर्नगरस्यामि कटकसमीपं गतः एष हर्षितः सबलवाहनः संमुखो निर्गतः कुमारं हस्तिस्कन्धे समारोप्य

नगरी प्रवेशोत्सवो महान् कृतः स्व भवने नीतस्य कुमारस्य स्नानमज्जनभोजनादि सामग्रीं कृत्वा प्रकामं सत्कारं कृत्वा च स्वपुत्री कनकवती अनेकहय रथद्रव्यकोशसहितादत्ता प्रशस्तविवाहो जातः तया समं विषयसुखमनुभवतस्तस्य सुखेन कालो याति ततो दूतो संप्रेषणेनाकारिताः सबलवाहनाः पुष्पचूलराजधनुमन्त्रिकणेरदत्त भवदत्तादयोऽनेके राजमन्त्रिणः समायाताः तैः सर्वैः कुमारो राज्येऽभिषिक्तः तदा ब्रह्मदत्त आयुधस्थाने चक्ररत्नमुत्पन्नम् वरधनुस्तु सेनापतिः कृतः ब्रह्मदत्तः सर्वसैन्यसहितो दीर्घनृपोपरिचलितः अनवच्छिन्न प्रयाणैः काम्पिल्यपुरे प्राप्तः दीर्घनृपेणापि कटकादीनां स्वकीय करणार्थं दूतः प्रेषितः तैस्तुनिर्भर्त्सितो दूतः स्वस्वामिसमीपे गतः ब्रह्मदत्तसैन्येन काम्पिल्यपुरं समन्ताद्वेष्टितं ततो दीर्घनृपेण एवं चिन्तितं कियत्काल मस्माभिर्बिलप्रविष्टैः स्थेयं साहसमवलम्ब्य नगरात् स्वसैन्य परिवृतो दीर्घ नृपोनिर्गत्य संमुखमायातः ब्रह्मदत्त दीर्घनृपसैन्ययोर्घोरः संग्रामः प्रवृत्तः क्रमा द्ब्रह्मदत्तसैन्येन दीर्घनृपसैन्यं भग्नं अथ दीर्घ नृपः स्वयमुत्थितः ब्रह्मदत्तोपि तमायातं वीक्ष्य प्रदीप्तकोपानलस्तदभिमुखं चलितः तयो र्द्वयो र्युद्धं लग्नं अनेकैरायुधैर्निचितैर्न तयोः संग्रामरसः संपूर्णो बभूव ब्रह्मदत्तेन ततश्चक्रं मुक्तं चक्रेण दीर्घनृपमस्तकं च्छिन्नं ततो जयत्येष चक्रवर्त्ती इत्युच्छलितः कल कलः सिद्धगन्धर्वैर्देवैर्मुक्ता पुष्पवृष्टिः उल्लब्ध उत्पन्नोयं द्वादशचक्री ततो जनपदलोकैः स्तूयमानो नारीवृन्दकृतमङ्गलः कुमारः स्वमन्दिरे प्रविष्टः पुनस्साधि तानि षट् खण्डानि कृतश्च सकलसामन्तै र्ब्रह्मदत्तस्य चक्रवर्त्त्यभिषेकः चक्रवर्त्ति त्वं पालयन् ब्रह्मदत्तः सुखेन कालं निर्गमयति अन्यदा चक्रवर्त्तिनः पुरो नटेन नाट्यं कर्त्तुमारब्धं स्वदासो अपूर्वं कुसुमदामगण्डं हस्ते ढौकितं तच्च प्रेक्षतो गीतविनोदं शृण्वत् चक्रवर्त्तिनः एवं विमर्शो जातः एवंविधो नाट्य विधिर्मया क्वचित् दृष्टः क्वचिच्चेदृगं पुष्पदामगण्डमपि घ्रातएवं चिन्तयत स्तस्य जातिस्मरणमुत्पन्नं दृष्टाः पूर्वभवास्तत्र सौधर्मे पद्मगुल्मविमानेऽनुभूतं नाट्य दर्शन दिव्य पुष्पाघ्राणादिकं स्मृतिपथं ययौ देवसुखस्मरणेन मूर्च्छां गतः पतितो भूमौ चक्री पार्श्ववर्त्तिभिर्वातोत्क्षेपादिना स्वस्थीकृतः ततश्चक्रवर्त्तिना

पूर्वं भवभ्रात्रा शुद्धार्थं श्लोकार्द्धं मिदं रचितं यथा अश्वदासौ मृगौ हंसौ मातङ्गावमरौ तथा इदं श्लोकार्द्धं श्रुत्वा चक्रिणा वरधनु सेनापते रुक्तं इदं श्लोकार्द्धं सर्वत्र निर्घोषय एतत्पश्चिमार्द्धं यः पूरयति तस्य राजा राज्यर्द्धं ददाति इदं श्लोकार्द्धं सर्वैर्लोकैः श्रुतं ते यत्र तत्र निर्घोषयन्ति अन्यावसरे स पूर्वं भवसम्बन्धीभ्राता चित्रजीवः पुरिमताल नगरे इभ्य पुत्रो भूत्वा सञ्जात जातिस्मरणो गृहीतव्रत स्तत्र नगरे मनोरमा विधाने आरामे समवसृतः तत्र प्रासुके भूभागे पात्रोपकरणानि निक्षिप्य धर्मध्यानोपगतः कायोत्सर्गेण स्थितः अत्रान्तरे आरघट्टिकेन पठ्यमानं तत् श्लोकार्द्धं मुनिनाश्रुतं ज्ञानोप योगेन स्व भ्रातृस्वरूपं सर्वमवगम्य मुनिना उत्तरचरणद्वयंपूरितं एषा नौषष्टिकाजाति अन्योन्याभ्यां वियुक्तयोः ततोऽसावारघट्टिकस्तत् श्लोकार्द्धं लिखित्वा प्रफुल्लास्य पङ्कजो गतो राजकुलं पठितश्चक्रिणः पुरः संपूर्णः श्लोकः ततः पूर्वं भव भ्रातृस्नेहातिरेकेण चक्री मूर्च्छां गतः क्षुभिता सभा रोषवशं गतेन सेव कवर्गेण आरघट्टिकश्चपेटाभि र्हन्तुमारब्धः हन्यमानेन तेन ऊचे इदं पद्वयं मया न पूरितं किन्तु वनस्थितेन मुनिनेति विलपन्नसौ मोचितो गतमूर्च्छेण चक्रिणा पूर्वभवभ्रातृमुनि समागतं श्रुत्वा तद्भक्तिस्नेहाकृष्ट चित्तो ब्रह्मदत्त चक्री सपरिकरो निर्ययौ उद्याने तं मुनिं ददर्श वंदित्वाग्रे उपविष्टः मुनिना प्रारब्धा धर्मदेशना दर्शिता भवनिर्गुणता वर्णिताः कर्मबन्धहेतवः श्रावितो मोक्षमार्गः ख्यापितः शिवसौख्यातिशयः इमां देशनां श्रुत्वा पर्षत्सञ्जिग्ना जाता ब्रह्मदत्तस्तु अभावित एवमाह भगवन् यथा स्वसङ्गसुखेन वयमाह्लादिता स्तथा राजस्त्रीकारेण साम्प्रतंमम्मनाह्लादयन्तु पश्चादावां तपः समेव करिष्यावः एतदेव वा तपसः फलं मुनिराह युक्तमेवेदं वचो भवता मुपकारीद्यतानां परं इयं मानुष्यतां दुर्लभा सततं पतनशीलमायुः श्रीश्चञ्चला अन वस्थिता धर्मबुद्धिः विषयाः विपाक कटवः विषयासक्तानां च ध्रुवो नरकपातः दुर्लभं पुनर्मोक्षबीजं विरतिरत्नं तत्त्यागान्नरकपातहेतुःकतिपयदिनभावि राज्यात्ययणं न विदुषां चित्तमाह्लादयति ततः परित्यज्य कदाग्रयं प्राग्भवानुभूतः दुःखानिस्मरपिजिनवचनामृतरसं सञ्चरतदुक्तमार्गेण सफलीकुरु

मनुष्यजन्मेति स प्राह भगवन्नुपनतयाचिनाहृष्टसुखवाञ्छाज्ञानतालक्षणं तन्मैवमादिश कुरु मत्प्रमीहितं मुनिराह संसारसुखं भुक्तं परभवे महते दुःखाय भावीतितत् त्यागः कार्यते एवं मुनिना वारं वारमुक्तोपि यदा चक्रवर्त्ती नप्रतिबुध्यते तदा मुनिना चिन्तितं आः ज्ञानं पूर्वभवे सनत्कुमार चक्रिस्त्रीरत्नकेश संस्पर्शेनजाताभिलाषातिरेकेण संभूतभवेयुक्तामया निवार्यमाणेपि चक्र वर्त्तिपदवी प्राप्तिनिदानं कृतं तस्येदृग्फलं अतः कारणादसौ दुष्टाध्यवसायी जिनवचनानामसाध्यः इत्यवेक्षितं मुनिस्ततो विजहार क्रमेण मोक्षं गतः चक्रिणोपि प्रकामसुखमनुभवतः कियान् कालो नीतः अन्यदा एकेन पूर्वपरिचितेन द्विजातिनोक्तोसौ भो राजाधिराज ममेदृशो वांछा समुत्पन्नास्तियच्चक्रि भोजनं भुंक्ते चक्रिणोक्तं भो द्विजमामकं भोजनं भोक्तुं त्वमक्षमः यतो मां विहाय मद्भोजनं अन्यस्य न परिणमतितदोवाह्मणेनोक्तं धिगस्तु ते राज्य लक्ष्मीमाहात्म्यं यदन्नमात्रदानेप्यालोचयसि ततश्चक्रिणा तस्य भोजनमङ्गीकृतं स्वगृहे निमंत्र्य स्वभोजन दानेन भोजितश्चासौ भार्या पुत्रान् भ्रातृन्दुहित्र पौत्रादि कुटम्बान्वितः भोजनं कृत्वा स स्वगृहे गतः रात्रावत्यन्तजातोन्माद प्रसरोसौ अन पेक्षित मातृस्वसृभगिनीव्यतिकरो महावेदना नष्टचित्तः प्रवृत्तोऽकार्य माचरितुं द्विजः द्वितीये दिने मदनोन्मादो पशान्तो परिजनस्य निजमास्यं दर्शितु मपारयन्निर्गतो नगरात्स द्विजः एवं चिन्तयामास अनिमित्तवैरिणाचक्रिणाहं विडम्बितः अमर्षवहता तेन द्विजेन वने भ्रमता एकोऽजपालकोदृष्टः स कर्करकाभिरस्य पत्राणिकाणो कुर्वन् लक्ष्यवेधोवर्त्तते द्विजे न चिन्तितं महिवचित कार्यकरोयमिति कृत्वोपचरितस्तेनदान सन्मानादिभिः कथितः तेन स्वाभिप्रायोस्य रहसितेनापि प्रतिपन्नः अन्यदा गृहान्निर्गच्छतो ब्रह्मदत्तस्य कुड्यान्तरित तनुनाऽनेन अमोघ वेधिनानिक्षिप्तगोलि कया समकालं उत्पाटिते लोचने राज्ञातद्वृत्तान्तं अवगम्य उत्पन्नकोपेन असौ स पुत्रबान्धवो घातितः चक्रिणाऽन्ये द्विजा घातिताः अशान्त कोपेन च चक्रिणा मंत्रिण एवं मुक्तं यथा ब्राह्मणा नां अक्षीणि कर्षयित्वास्थालेनिक्षिप्य स्थालं मम पुरोनिधेहि यतोहन्तानि स्वहस्तेन मर्दयित्वावैरवालनसुखमनुभवामि मन्त्रि

णातस्य चक्रिणः क्लिष्टकर्मोदयवसतां अवगम्यशाखोट तरुफलानिस्थालेनिक्षिप्य अर्पितानि सोपि रौद्राध्यवसायस्तानि फलानि अत्ति बुद्ध्यामर्दयित्वा सुख मनु भवति एवं प्रत्यहं करोति ततः सप्तशतानि षोडशोत्तराणि वर्षाणि आयुरनुपाल्य प्रवर्द्धमान रौद्राध्यवसायः सप्तमनरक पृथिव्यां त्रयस्त्रिं शत्सागरोपमायुर्नारको बभूव सांप्रतं सूत्र मनुष्टीयते जाईपराजिओ खलुकासिनियाणन्तु हत्थिण पुरंमि चुलइबं भदत्तो उप्पन्नोप उमगुम्माओ १ खलु इति निश्चये अलङ्कारे वा जात्या चाण्डालाख्यया पराजितः पराभूतः सर्वतो निर्द्धारितो गृहीतदिक्षः संभूतचित्रस्य लघुभ्राता हस्तिनागपुरे चक्रवर्त्ति स्त्रीरत्न वन्दनात् केशपाश संस्पर्शात् चक्रवर्त्तिपद प्रार्थनारूपं निदानं अकार्षीत् ततः स संभूत साधुः पद्मगुल्म विमाने नलिन गुल्म विमाने उत्पन्नः ततश्च नलिन गुल्म विमानात् सम्भूत जीवो ब्रह्मराज्ञो भार्या चुलणीतयोः पुत्रत्वेन ब्रह्मदत्त इति नाम्ना उत्पन्नः इति गाथार्थः १ कम्पिल्ले सम्भूओ चित्तो

सूत्र

जाईपराजिओखलुकासिनियाणंतु हत्थिणपुरम्मि। चुलणीए बंभत्तो उववन्नो पउमगुम्माओ ॥१॥ कंपिल्ले संभूओ चित्तोपुणजाओपुरिमतालंमि। सेट्ठिकुलंमि विसालेधम्मं सोऊणपव्वइओ ॥२॥ कंपिल्लंमिनयरेसमागया दोविचित्त

भाषा

जाति चण्डालः निश्चयेन पराजितः जातिचण्डालनो तिणे जीत्यो थको आकर्षीत् निदानं हस्तिनागपुरे नियाणुं कीधुं हथिणा पूरनगरने विषे संभूति नामे साधुइं चुलग्या उदरे ब्रह्मदत्तं चक्रवर्त्तिचुलणीनी कूखिमाहिब्रह्मदत्तचक्री उत्पन्नः नलिनीं गुल्मविमानात् नलिनीं गुल्मविमानथी चवीनेऊपनो१ काम्पिल्यपुरे नगरे संभूतिः उत्पन्नः संभूति कांपिल्यपुरे नगरे ऊपनो चित्रजीव पुनः पुरिमताले नगरे चित्रनो जीवपुरिमतालनगरने विषे श्रेष्ठिकुलेशवि साले उत्पन्नः विस्तीर्णसेठनो कुलतोहां ऊपनो भोगववा लागो तत्र धर्मश्रुत्वा प्रव्रजितः साधुने पासे धर्मसांभली संसार असारजाणी दिक्षा लीधी २

पुणजाओ पुरिमतालंमि सेट्ठिकुलंमि विसाले धम्मं सोऊण पव्वई ओ २ काम्पिल्ले नगरे ब्रह्मराजा तद्भार्या चुलणी पुत्रः सम्भूत जीवो ब्रह्मदत्तः सञ्जातः चितश्चित्रजीवः पुनः पुरिमतालनगरे विशाले विस्तीर्णे एकस्मिन् श्रेष्टिनः कुलेऽष्ठिपुत्रः सञ्जातः सच चित्र जीवस्तत्र श्रेष्टिपुत्रत्वेन समुत्पद्य अनुक्रमेण तारुण्ये धर्मं श्रुत्वा प्रव्रजितः प्रव्रज्यां अग्रहीत २ कम्पिल्लं मियनयरे समागयादो विचित्त सम्भूयासुह दुक्खफलविवागं कहन्तिते एक्कमेक्कस्स ३ अथ सचित्त जीवो गृहीतदिक्षः समुत्पन्न जाति स्मृत्यादिज्ञानो विहरन् कांपिल्ये नगरे समागतः तत्रैव कांपिल्ये नगरे ब्रह्मदत्तोपि लब्ध चक्रवर्त्तिपद स्ति ष्ठति एकदा देवोपनीत मन्दारकल्पवृक्ष पुष्पाणां माला सादृश्यं दृष्ट्वा समुत्पन्न जातिस्मृतिरभूत् तदा च ब्रह्मदत्तेन आस्वदासौ सृगौ हंसौ मातङ्गौ अमरौ तथा इति श्लोकार्द्ध स्वबन्धु सम्बन्ध गर्भितं कृत्वा नगरे उद्घोषणा कारिताय: कश्चिदग्रे तनं श्लोकार्द्धं पूरयति तस्मै वाञ्छितं ददामि राज्यार्द्धं ददामि अस्मिन्नेवावसरे भ्रातृबोधनार्थं समागतेन चित्रजीव साधुनाइ मानौ षष्टिका जातिरन्योन्याभ्यां वियुक्तयोरिति श्लोकोत्तरार्द्धं पूरितं तद्वनमध्ये अरघट्ट भ्रामकेण आरामिकेण साधुमुखेन श्रुत्वा राज्ञोग्रे उक्तं राजापि श्रुत्वा मूर्च्छां प्रापततो राज्ञा पृष्ठेन कुट्टितेन तेनोक्तं मया श्लोकार्द्धं पूरितं नास्ति किंतु आरामे कायोत्सर्गस्थितेन एकेन साधुना पूरितं ब्रह्मदत्त चक्रधरेण श्लोकपूरणात् ज्ञातोयं साधुर्ममभ्राता ततो राजा मुनिसमीपेगतोऽत एव सूचकारेणोक्तं कांपिल्ये नगरे द्वावपि चित्रसम्भूत जीवौ चक्रवर्त्ति मुनीश्वरौ समागतौ एकत्र मिलितौ तौच सुखदुःखफलविपाकं सुकृतं दुःकृतकर्मानुभावरूपं

सूत्र संभूया सुहदुक्ख फलविवागं कहें तिते । एक्क मेक्कस्स ॥ ३ ॥ चक्कवट्टी महिड्ढीओ बंभदत्तो महायसो भायरं बहुमा

भाषा कांपिल्ये नगरे कांपील्यनगरनेविषे समागतौ मिलितौ द्वावपिचित्रसंभूतौजीवौ एकठामिं मिल्या चित्रसंभूतिना जावे भाई एकठा हुआ सुखदुःख फलविपाकं सुखदुःखनांजेफलतेहनो विपाक भोगववोतीहौ एकैकस्य परस्परं कथयतः तेवे भाई मांहोमांहि सुखदुःखभोगव्यांतेहनी वात कहेछे ३

एकैकस्य परस्परं कथयतः स्म इति अध्याहार्यं ३ चक्रवट्टी महड्ढीओ बंभदत्तो महायसो भायरं बहुमाणेणं इमं वयणमब्बवी४ ब्रह्मदत्तश्चक्रवर्त्ति भ्रातरं बहुमानेन मनसारागेण इदं वचनं अब्रवोत् कथम्भूतः चक्रवर्त्तिमहर्द्धिकः सम्प्राप्त षट्खण्डराज्यः पुनःकथम्भूतो ब्रह्मदत्तः महायशाः महत्यशो यस्य स महायशाः भुवनत्रय प्रसिद्धः ४ आसिमोभायरादोवि अन्नमन्नवसाणुगा अन्नमन्नमणुरत्ता अन्नमन्नहिएसिणो ५ मोइति आवां द्वावपि भो भ्रातः भ्रातरौ आस्व पूर्वजन्मनि आवां उभौ भ्रातरौ अभूव इत्यर्थःकथम्भूतौ द्वौ अन्योन्यवशानुगौ अन्योन्यंपरस्परं वशं अनुगच्छतः इति अन्योन्यवशानुगौ अन्योन्यवशवर्त्तिनौ इत्यर्थः पुनः कथंभूतौ अन्योन्यं अनुरक्तौ परस्परं स्नेहवन्तौ पुनः कीदृशौ अन्योन्यं हितैषिणौ परस्परंहितवाञ्छकौ एतादृशौऽभव इत्यर्थःअत्र मुहुर्मुहुरन्यो न्याग्रहणं चित्ततुल्यता अत्यादरख्यापनार्थः५ दासा दसन्ने आसीमिया कालिञ्जरे नगे हंसामयंगतीराए चण्डाला कासिभूमिए६ क्वच अभूतां तत्स्थानमाह

सूत्र

णेणं। इमं वयण मब्बवी ॥ ४ ॥ आसिमो भायरादोवि अन्नमन्न वसाणुगा। अन्नमन्न मणुरत्ता अन्नमन्न हिए सिणो ॥ ५ ॥ दासा दसन्ने आसी मियाकालिंजरे नगे हंसा मयंगतीराए। सोवागा कासि भूमीए ॥ ६ ॥

भाषा

चक्रवर्त्तीमहर्द्धिकः चक्रवर्त्तिमोटी ऋद्धीनोधणी ब्रह्मदत्तनामामहायशाः ब्रह्मदत्तएहवेंनामे महायश भ्रातरंभवांतर सहोदरं बहुमानेन करीपक्किला भवना भाईने घणोमानदेइने इदं वचनं अब्रवोत् इस्युं बचनकहेछे ४ पूर्वभवेआवांजातौ भ्रातरौ द्वावपिपाछिलेभवे आपणबेभाई हुआ चांडालकुलनें विषे अन्योन्य वशिवर्तिनौ माहोमांहि परमस्नेहवंत अन्योन्यानुरक्तौमाहोमांहि अनुरक्तपरस्परं हितवांछकौमाहोमांहि हितवांछेछे५ दासौ दसार्णे देशेउत्पन्नौ दास हुआ दशार्ण देसनेविषे तथापि कालिंजरेनगे मृगोजातः कालिंजरपर्वतनें विषेमृगहुआ तथा मृतगंगानदीतीरेहंसाजातौमृतगंगानदीतीरे हंस

आवां दशार्णदेशेदासौ आस्व कालञ्जरे नाम्नि नगे पर्वते मृगौ आस्व पुनर्मृत गङ्गानदीतटे हंसौ आवां आस्व काशीभूम्यां वाराणस्यां चाण्डालौ अभूव ६ देवाय देवलोगंमि आसि अम्हे महड्ढिया इमाणी छट्ठिया जाई अन्नमन्नेण जाविणा ७ पुनस्तत्रचाण्डालजन्मतः परञ्चो भ्रातः अम्हे आवां देवलोके सौधर्म देवलोके महर्द्धिकौ देवौ अभूव हे भ्रातः णोइति आवयोः अनयोना जाविणा परस्परं साहित्य रहिता परस्पर वियोग सहिता षष्टिका जातिरियं प्रत्यक्षा जाताः ७ इति श्रुत्वा मुनिराह कम्माणि याणपगडा तुम्हे राय विचिन्तिया तेसिं फलविवागेण विप्पओग मुवागया ८ हे राजन् त्वया कर्माणि विचिन्तितानि आर्त्तध्यानरूपाणि ध्यानानि ध्यातानि आर्त्तध्यानहेतुभूतानि कर्माणि विचिन्तितानि इत्यर्थः निदानेनउपार्जितानि कीदृशानि कर्माणि निदानप्रकृतानि भोगप्रार्थनावशेन प्रकृतानि निदानानि प्रकृतानि प्रकर्षेणबद्धानि तेषांकर्मणां फलविपाकेन फलोदयेन आवां विप्रयोगंउपागतौ वियोगं प्राप्तौ८ अथ

सूत्र

देवाय देवलोगंमि आसि अम्हे महड्ढिया । इमाणी छट्ठिया जाई अन्नमन्नेण जाविणा ॥ ७ ॥ कम्माणियाण पगडा तुमे रायविचिंतया । तेसिं फल विवागेण विप्पओग मुवागया ॥ ८ ॥ सच्च सोयप्पगडा कम्मामए पुरा कडा ।

भाषा

हुआ चंडालोजातौकाशीभूम्यां वाणारस्यां चांडालहुआ वांणारसीनगरीइं ६ सौधर्मेदेवलोके देवौजातौ सौधर्मदेवलोकने विषे देवता हुआ उत्पन्नो आवां महर्द्धिकौआपणहुआ महर्द्धिकदेवता एषा आवयोः षष्टीजातिः षष्टीभवःएआपणीछट्ठीजाति छट्ठीभवके अनयोर्नानविना पृथक्त्वंभूयाद्इह भवने विषे आपण जूदी जातिलाधी जूदा हुआ ७ अथ मुनीरुवाचः कर्म्माणिनिदानवशेन प्रगडानि बद्धानिनियाणं करीने कर्मबांध्युं अहो राजन् त्वयाचिंतितानि कृतानि हेराजन् खोरत्न देखीनेतेभोग चींतव्यानीयाणोकीयो तेषां कर्म्मणां फलविपाकेन ते कर्मने उदये करीनेविप्रयुक्तप्रायौ पृथक्जातौ जूदाजूदाजपना

चक्रोप्रश्नं करोति सच्चसो अप्पगडा कम्मामए पुराकडाते अज्ज परिभुञ्जामो किंनुचित्ते विसेतहा ८ हे साधो हे भ्रातः मया पुरा पूर्वजन्मनि कर्माणि कृतानि कथम्भूतानि कर्माणि सत्यशौचप्रकटानि सत्यं मिथ्याराहित्यं शौचं आत्मशुद्धिकारकं धर्ममयं अनुष्ठानं सत्यञ्च शौचञ्च सत्य शौचेताभ्यां प्रकटानि प्रसिद्धानि एतादृशानि यानि मया सुकर्माणि कृतानि तानि शुभकर्माणि अद्य अस्मिन्जन्मनि परिसमन्तात् भुञ्जे क्षीरन्नभोगद्वारेण तेषां फलं विषय सुखानि अनुभवामि हे चित्र यथाहं राज्यसुखं भुञ्जे तथा किं चित्रोपि भवानपितु भुंक्ते नु इति वितर्के कोर्थः चक्रीवदति यथाहं इदानीं पूर्वोपार्जितानां सुकृतानां फलानि परिभुञ्जे तथा किं चित्रभवान् परिभुंक्ते अपितु भवान् न परिभुंक्ते एव भवतसु भिक्षुकत्वात् तानि सुकृतानि किं निःफलानि जातानि इति आशयः ८ अथ मुनिराह सच्चं सुचिण्णं सफलं नराणं कडाणकम्माण न मोक्ख अत्थि अत्थेहिं कामेहिं उत्तमेहिं आया ममं पुन्नफलोववेए१० हे राजन् नराणां सुचीर्णं सम्यक्प्रकारेण कृतं संयमतपः प्रमुखं सर्वं सफलं एववर्त्तते नराणां इत्युपलक्षणत्वात् सर्वेषामपि सफलं भवति यतः कृतेभ्यः कर्मभ्यो मोक्षोनास्ति जीवैः कृतानि कर्माणि अवश्यं भुंज्यते प्राक्तनत्वात्यञ्चमी स्थाने षष्ठी कृतानां कर्म्माणां मोक्षोनास्ति यदुक्तं कृतकर्मक्षयोनास्ति कल्प

सूत्र

ते अज्ज परिभुंजामो किं नु चित्ते विसे तहा ॥ ८ ॥ सच्चं सुचिन्नं सफलं नराणं कडाण कम्माण नमोक्ख अत्थि ।

भाषा

वियोगपाम्यो ८ अथ ब्रह्मदत्ताहसत्यंमृषात्यागशौचं निर्दंभतावृद्धदत्तकहेछे सत्यवोल्योकपटनकोधोइंद्रीदम्या शुभकर्म्माणियानिमयापूर्वभवेकृतानि पाकृलाभवनेविषेंजेमेंभलाकोधाहता ते अद्यइहभवे अहं परिभुंजामोवेदयामि। ते तपजपनाफलआजहुंभोगवूंकुं किमिति प्रश्नेभोचित्रभवानपि तथा न परिभुंक्ते किं कारणं। अहो चित्र ते शुभकर्ममाहरेउदय आव्यांहुंभोगवूंकुंताहराशुभकर्म्म एकींहांगयाएम्युंथयुं ८मुनिराह सर्वमपिपुण्यं सुचीर्णं सुष्ठुकृतनराणां सर्वजीवानां सफलं भवतियतोकहेंछे पुण्यकोधांसर्वजीवने उदयआवे निष्फलनजाइकदेही कृतेभ्यःकर्मेभ्योमुक्तिर्नास्ती कोधाजेकर्मते

कोटि शतैरपि अवश्य मे वभोक्तव्यं कृतं कर्म शुभाशुभं १ तस्मात् ममापि आत्मा अर्थैर्द्रव्यैः पुनः कामैर्विषय सुखैः पुण्यफलैरुपेतो वर्त्तते कीदृशैः अर्थैः कामैः उत्तमैर्मनोहरैः अथवा कीदृशैः कामै अर्थैः प्रार्थनीयै अर्थ्यन्ते प्रार्थ्यन्ते जनैरिति अर्थास्तैः अर्थैः इत्यनेन चित्रजीवेन साधुना उक्तं मयापि सर्वेन्द्रियाणां सुखानि द्रव्याणिच पुण्यफलानि प्राप्तानि इति त्वया न ज्ञातव्यं अनेन किमपि सुकृतफलं न लब्धमस्ति इतिभावः १० तदेव सूचकारो गाथया आह जाणाहि सम्भूय महाणुभागं महड्ढियं पुन्नफलोववेयं चित्तंपि जाणाहितहेवरायं इड्ढीजुई तस्स वियप्प भूया ११ पूर्वनाम्ना ऋषिर्वदति हे सम्भूत महाराज यथा त्वं आत्मानं महानुभागं तथा महर्द्धिकं तथा पुण्यफलोपपेतं जानासि तथा चित्रमपि मामपि तादृशं एव जानाहि महान् अनुभागो यस्य स महानुभागस्तं महानुभागं बहुमाहात्म्यं तथा महती ऋद्धिर्यस्य स महर्द्धिः महर्द्धिरेव महर्द्धिकस्तं महर्द्धिकं विशाल लक्ष्मीकं पुण्यफलेन उपपेत स्तं एतादृशं ऋद्धिर्द्धिपद चतुःपद धनधानादि सम्पत्तिः द्युतिर्दीप्तिस्तस्य चित्रस्यापि अर्थान्ममापि प्रचुरावर्त्तते इति जानीहि च शब्दोत्रयस्मादर्थे इह

सूत्र

अत्थेहिं कामेहि य उत्तमेहिं। आया मम पुण्णफली ववेए ॥ १० ॥ जाणाहि संभूय महाणुभागं। महड्ढियं पुन्न फलो ववेयं। चित्तंपि जाणाहि तहेव रायं। इड्ढीजुई तस्सवियप्पभूया ॥ ११ ॥ महत्थ रूवावयणप्पभूया गाहाणु

भाषा

हथीजोवकूटेनही अर्थैः द्रव्यैः कामैः शब्दाद्यैः युतः उत्तमैः द्रव्यैकरीकामभोगउत्तमप्रधानतिणेकरीनें आत्माममपुण्येनफलेनउपनोसहीतः आत्मापुण्य फलतिणेकरीनेंसहित १०हे संभुतयथात्वं आत्मानं जानासिकिदृशं महानुभागं तथा महर्द्धिकपुनःफलोपपेतं अहो संभूति तिजेतुं आपणा आत्मानें जाणेछे। पुण्यवंत ऋद्धिवंत महानुभावचित्रमपि तथैवजानीहि। भोराजन्अहोराजाचित्रनेंपणितुं इमजजोमनुष्यनाटोलानि ऋद्धिःद्युतिः चित्राख्यममपि

कक्केय बंभे यवेइया आवसहायरम्मा इमंगिहं चित्तधणप्पभूयं पसाहि पञ्चाल गुणोववेयं १३ अथ ब्रह्मदत्तः पुनः साधुं निमन्त्रयति पूर्वनाम्ना सम्बोधनं कृत्वा वदति हे चित्र त्वं इमं इदं प्रभूत गृहे प्रचुरधन सहितं गृहं प्रसाधि प्रतिपालय गृहेस्थित्वा सुखं भुंक्ष्वे इत्यर्थः अथवा चित्तधणप्पभूयं इति एकं एवपदं गृहविशेषणं चित्रं नानाप्रकारं प्रभूतं प्रचुरं धनं यस्मिन् तत् चित्रप्रभूत धनं एतादृशं मममन्दिरं गृहाणेत्यर्थः पुनः कीदृशं गृहं पञ्चालदेशानां गुणाः इन्द्रियविषयाः शब्दरूप रसगन्धस्पर्शाः तै रुपेतं पाञ्चालगुणोपपेतं च पुनः रम्याः रमणीयाः मम आवसथाः प्रासादाः प्रवेदिताः प्रकर्षेण वेदिताः प्रवेदिताः प्रकटाः सन्तितान् अपित्वं प्रसाधि इति शेषः ममवार्द्धिक रत्नपुरः सरैर्देवैरुपनीताः प्रासादास्तेके प्रासादाः उच्च १ उदय २ मधु ३ कर्क ४ ब्रह्म ५ एते पञ्चप्रासादाः यत्र चक्रिणो रोचन्ते तत्रैवस्थुर्वार्द्धिकरत्नेन चक्रिसूत्रधारेण विधीयन्ते इति ज्ञात्वा आहुः तस्मादत्र ईदं गृहमिति पृथक् उक्तमस्ति पाञ्चालानां गुणग्रहणंतु अत्युदीर्णत्वात् अन्यथा भरतक्षेत्रस्य सारंतद्गृहेस्थित्वैव १२ नट्टेहिंगीएहियवाइएहिं नारीजणाइं परिवारयन्तो भुंजाहि भोगाइ इमाइभिक्खू ममरोयई पव्वज्जाहु दुक्खं १४ भोचित्र हे भिक्षो हे साधो मम एतत् रोचते एतत् हृदये प्रतिभाति हुइति निश्चयेन प्रव्रज्या दुःखं

सूत्र

वसहायरम्मा । इमंगिहं चित्तधणप्पभूयं पसाहि पंचालगुणो ववेयं ॥१३॥ णट्टेहिंगीएहियवाइ एहिंणारीजणाइं

भाषा

शोलगुणसहित इह प्रवचननेयतं उद्यमं कुर्वंति इहप्रवचननेविषेयततेउद्यमकरेछे तांगाथांशुत्वा अहमपिश्रमणोजात १२ अथ चक्रीराह उच्चोदयः मधु कर्क ३बंभ ४ वृह्मा५ पांच आवासकहेछे प्रवेदिता कथोताः पंचआवासाः रम्या मनोज्ञाए पंचआवास मनोज्ञमनोहरकह्या इदं गृहं हे चित्रविचित्रधनैः पूर्णाएवरहेचित्र नानाप्रकारतुं धनतिणेकरीने भर्योपूर्ण परिपालय पंचालदेशगुणयुक्तं एधरतूंपालि अंगीकारकरिकेहवुंछे घरपंचालदेशनीजे लक्षोतिणेकरोनेभर्योछें १३ पुनः चक्रीआह । नाटैः वादित्रैश्चलोवत्रिसवधनाटकगीतवाजां नारीजनान् परिवारयन् । व्यापारयन् स्त्रीएगीतम्यां

वर्त्तते इति शेषः दीर्घायां सुखं किमपि नास्ति तस्मात् हे साधोत्वं इमा प्रत्यक्षं दृश्यमानान् भोगान् भुङ्क्ष कथम्भूतः सन् नाटकैर्वात्रिंशद्विधैः गीतैर्गा न्धर्वशास्त्रोक्तैर्वादित्रैर्भरतशास्त्रोक्तैः मृदङ्गादिभिस्तथा नारीजनैः परिवृतः सन् विषयसुखानि अनुभव अत्र नारीजनानामेव ग्रहणं कृतं अन्येषां गजाश्ववस्त्रासन द्रव्यादीनां ग्रहणं न कृतं तत्तु तस्य स्त्रीलोलुपत्वात् सर्वविषयेषु स्त्रीणामेव प्राधान्यात् १४ तं पुव्वनेहेणकयाणुरायं नराहिवं कामगुणे सुगिद्धं धम्मम्मि ओतस्सहियाणुपेही चित्तोइमं वयणमुदाहरित्था १५ यदा तु ब्रह्मदत्तेन सम्भूतजीवेन चित्रजीवं साधुं प्रतिउक्तं तदा चित्रजीवः साधु श्चित्रइदं वचनं तं ब्रह्मदत्त नराधिपं चक्रिणं प्रति उदाजहार अवादीत् कथम्भूतं तं ब्रह्मदत्तं पूर्वस्नेहेन कृतानुरागं पूर्वभवबान्धव प्रेम्णा विहित प्रीति भावं पुनः कथम्भूतं नराधिपं कामगुणेषु विषयसुखेसु गृद्धं लोलुपं कौटुम्बश्चित्त जीवसाधुः धर्माश्रितः धर्मं आश्रितः पुनः कौटुम्बश्चितः तस्य ब्रह्मदत्तस्य हितानुप्रेची हितवाञ्छकः हितं अनुप्रेचते इत्येवं शीलहितानुप्रेची १५ किं उदाजहारेत्याह सव्वं विलम्बियङ्गीयं सव्वं नट्टं विडम्बियं सव्वे आभ

सूत्र

परिवारयंतो। भुंजाहि भोगाइं इमाइं भिक्खू ममरोयई पव्वज्जाहु दुक्खं ॥ १४ ॥ तं पुव्वनेहेण कयाणुरागं णराहिवंकामगुणे सुगिद्धं। धम्मे स्मिओतस्सहिआणुपेही चित्तो इमं वयण मुदाहरित्था ॥१५॥ सव्वं विलंवियंगीयं

भाषा

ननाटकौघांछे भोभिक्षु इमान् भोगान् भुक्षु अहोसाधुतुएभोगभोगविममप्रवृज्यादुःखरूपारोचते मुझने दीक्षादुक्खरूप लागेछें १४ तं ब्रह्मदत्तं पूर्वस्नेहेन कृतानुरागं ब्रह्मदत्तपूर्वभव स्नेहेकरोनें रागधरोयतीजपरि नराधिपं चक्रवर्त्तीनं कांमगुणेषु गृद्धं नराधिपचक्रवर्त्तिप्रतिं केहवुछें राजाकामनेविषेगृद्धछ ओछे धर्माश्रितः तस्यराज्ञोहितचित्तकं चित्रसाधुधर्मने विषे आश्रयछे राजा जपरिहित चिंतवेछें चित्रःइदं वचन उदाहृतवान्। चित्रसाधूंस्यु वचन

रणाभारा सव्वेकामा दुहावहा १६ हे राजन् गीतं सर्वं विलंबितं विलापतुल्यं सर्वं नाट्यं नाटकं विडम्बितं भूतावेष्टित पीतमद्यादिजनांग विक्षेप तुल्यं सर्वाणि आभरणानि भारतुल्यानि सर्वे: कामाः दुःखावहा दुःखदायकाः गजपतङ्ग भृङ्ग मीन कुरङ्गादीनामिव बन्धन मरणादिकष्टदाः इत्यर्थः१६ बालाभिरामेसु दुहावहेसु नतंसुहं कामगुणेसु रायं विरत्तकामाणतवोहणाणं जं भिक्खुणं सीलगुणेरयाणं १७ हे राजन् विरक्तकामानां विरक्ताः कामेभ्य इति विरक्तकामास्तेषां निर्विषयिणां भिक्षुणां साधूनां यत्सुखं वर्त्तते तत्सुखं वत्ततगुणेषु शब्दादिषु इन्द्रियसुखेषु कामिनां पुरुषाणां नास्ति कीदृशेषु कामगुणेषु बालाभिरामेषु बालानां निर्विवेकाणां अभिरामाबालाभिरामास्तेषु मूर्खाहिविषयेषु रज्यन्ते पुनः कीदृशेषु कामगुणेषु दुःखावहेषु दुःखदायकेषु कीदृशानां भिक्षणां तपोधनानां तपएवधनं येषान्ते तपोधनास्तेषां पुनः कीदृशानां शीलगुणिरतानां शीलस्यगुणाः गुणकारिणी नव

सव्वं नट्टं विडंबीयं । सव्वे आभरणाभारा सव्वे कामा दुहावहा ॥१६॥ बालाभिरामेसु दुहावहेसु णतंसुहंकामगुणेसु रायं विरत्तकामाण तवोहणाणं । जंभिक्खुणं सील गुणे रयाणं ॥ १७ ॥ नरिंद जाई अहमाणराणंसोवागजाइ दुहओ

सूत्र

षाभा

बोल्यातेकहेके सर्वरुदित रूपं गीतः सर्वगीतविलापरूपके सर्वनाट्यं विडं वनप्रायं सर्वनाटक विडंवनाप्रायके सर्वे आभरणा भारभूताः सघलां आभ रणभारभूत: सर्वेकामाः दुक्खदायकाः सर्वकांम सुखदुक्खनादेणहारके मुनिराह १६ बालानां मूर्खाणांऽभिरामिष् हर्षोत्पादकेषु दुक्खकारणेष् एकांमजिके बालकामखेतेहने भलालागेहर्षऊपजे भो राजन् ईदृग्येषु कामगुणेषु ततसुखं नहि अहोराजा एहवाकांमगुणनेविषेते सुखनही विरक्ताकांमानां तपोध नानां कामभोगथो विरक्तहुआकेतपजेधनके यावत्सुखंभिक्षुणं शीलगुणेरतानांतत्सुखं अन्यजनास्ति जेसुखसाधुनेके सीलनेविषेसुखबीजेठामेनही १७

मुता कामगुणेपकामं पच्छा गमिस्सामोपहाण मग्गं ॥३१॥ भुत्तारसा भोइ जहाइणेवउं न जीवियट्ठा पहयामि भोए । लाभं अलाभंच सुहंच दुक्खं संचिक्खमाणो चरिस्सामि मोणं ॥३२॥ साहु तुमंसोयरियाण संभरे जुन्नोवहंसो

कामभोगान् प्रकामं सेवामहे तिणेकारणिंए कामभोग आपणभोगवीइ अतिसेवये पश्चात् गमिष्यामि आश्रयिष्यामः प्रधानमार्गं मुक्तिमार्गं पछे आपण आदरस्यां प्रधानमार्गं मुक्तिमार्गं मोक्षमार्गं ३१ रसाः विषयाः भुक्ताः हे भद्रं प्रियेनोऽस्मान्वयो यौवनं रूपं त्यजति हे ब्राह्मणी भोग भोगव्यां हतां यौवनवयजाइरहेनही मानजायछे अवस्था न जीवितार्थं त्यजामि भोगान् असंयमजीवितार्थं न पर भवभोगवांछाए कामभोग पेटभराने अर्थे इह लोकार्थे नही छोडता लाभं अलाभं पुनः सुखं दुक्खं लाभ अलाभ सुख दुख इत्थन् पश्यन् प्राणान् चरिष्यामी मुनिभावं भोगवतोथकोजीव परिव्या

कारेण इत्यपि हे स्वामिन् त्वं पुनः सौदर्याणां सहोदराणां भ्रातृणां स्वजन सम्बन्धिनां गृहे स्थितानां मास्मार्षीः कोर्थः त्वं मुनिर्भूत्वापश्चाद्दुःखितः सन् गृहस्थान् स्व बन्धून् स्मरिष्यसि तस्मात्मया सार्द्धं विषय सुखं भुञ्जानो गृहेतिष्ठ इत्यर्थः खुइति निश्चयेन भिक्षाचर्या विहारो दुःख दुखई तुरेवास्ति भिक्षाचरत्वं असहमानस्त्वं गृह वासं स्मरिष्यसि इति भावः त्वं क इव सोदरात् स्मरिष्यसि जीर्णोहंस इव हृदो हंसो यथा प्रति श्रोतोगामी सम्मुख जल प्रवाहन्तरन् तत्र तरणा सक्तः पश्चादनु श्रोतो जल तरणं स्मरसि मनसिखिन्नः सन् इति जानाति मया किमर्थं सम्मुख जल प्रवाहतरणमारब्धं जलवहन मार्गेण सह तरणमेव मम श्रेयः तथात्वमपिमा भूरित्यर्थः २३ अथ भृगु पुरोहित आह जहायभोईतणु अम्भु अङ्गोनिम्मोयणिं हि चपलाइ मुत्तो एमे एजाया पयहन्ति भोए तेहिं कहं नाणु गमिस्समिक्को २४ भोई इति हे भवति हे ब्राह्मणि भुजङ्गः सर्प स्तनुजां शरीरादुत्पन्नां निर्मोचनीं निर्मोकं कञ्चुकं हित्वा मुक्तः सन् प्रयाति एवं एतौ जातौ पुत्रौ भोगान् प्रजहीतः तौ भोगत्यागिनौ पुत्रौ प्रति अहं एकाकीसन् कथं न अनुगमिष्यामि पुत्राभ्यां विहीनस्य एकाकिनो मम कोटशो गृहवासः धन्यो यौ पुत्रौ तरुणावेवकञ्चुकं इव विषय सुखत्यक्त्वा भुजङ्गमवत् व्रजतः इत्यर्थः २४ किन्दित्तु

सूत्र

पडिसोत्तगामी भुंजाहि भोगाइं मए समाणं दुक्खंखु भिक्खायरिया विहारो ॥२३॥ जहायभोई तणुयं भुयंगो

भाषा

करतु साधूनो क्रियाकरोसि सहताकृता २२ अथ ब्राह्मणीआहः मा इति निषेधेत्वं सौदर्य्यान् स्वजनानि स्मरसि ब्राह्मणी कहेछे रखेतुं दिचालेइने स्वजनने समरेपछे पिकृतावेमेकांदिखालोधो यथा जीर्णोहंस विपरीत जलगामीजिमजीर्ण बूढो राजहंसउपराठे पांणीमाहिं पछोथको सोचेतिमतु सोचीं स भुंक्ष भोगान् मयासमं सुभ्रु संघातें भोगभोगवि दीचानीवातरहबाधे दुक्खरूपोनिश्चयेन भिक्षाचर्य्यया विहारए भिक्षाचर्यनुं वृतदोहिलछे पाछुं नहो जाइ २२ अथ ब्राह्मणआह यथा हे भद्र सरीरोत्पन्नां भुजंगसर्पः जिमसर्प आपणाशरीरथी जपनींभोइति आमंत्रणे नीर्मोचनीं

जालं अबलं बरोइया मच्छाजहा काम गुणेपहायधोरेयसीला त वसाउयाराधोराहुभिक्खायरियचरन्ति ३५ हे ब्राह्मणि धीराः धैर्यवन्तोजनाहु निश्चयेन भिक्षा चर्यां भिक्षा वृत्तिं साधुधर्मंचरन्ति कीदृशाः धीराः तपसा उदाराः अथ वा कीदृशीं भिक्षाचर्यां तपसा उदारान्तपसा उदारां तपसा प्रधानां प्राकृतत्वाद्विभक्ति लिङ्गव्यत्ययः पुनः कीदृशाधीराः धोरेयशीलाः धोरेयाणां धुरन्धराणां इव शीलं उद्दोढभारोद्वाहनसामर्थ्यं येषान्ते धोरेयशीलाः किं कृत्वा धीराभिक्षा चर्यांचरन्ति काम गुणान् प्रहाय प्रकर्षेण हित्वा के किं यथा यथा शब्द दृष्टार्थे के किं इव रोहिताः मत्स्याः रोहितजातीयामीनाः अबलं जीर्णं जालं इव यथा बालिष्टमत्स्याजीर्णं जालञ्छित्वानिर्भय स्थाने चरन्ति तथा धीराः कामगुणान् पास सदृशान् त्यक्त्वाभिक्षाचर्यां आद्रियन्ते अहं मपि इत्थं एव चरिष्यामि इति भावः ३५ इति भृगु वचनं श्रुत्वा ब्राह्मणी आह न हेव कुच्चासम इक्कमन्ता तयाणि जालानिदलित्तु हंसा पलन्ति

मूल

निम्मोयणिं हिच्चपलेइ मुत्ते। एमेव जाया पयहंतिभोएनोहं कहं नागु गमिस्समेक्को ॥३४॥ छंदित्तुजालं अबलं वरोहिया मच्छाजहा कामगुणेपहाय धोरेय सीलातवसा उदारा धीराहुभिक्खायरिअं चरंति ॥३५॥ नहेव कुंचा

भाषा

कंचुलिकां त्यक्त्वागच्छति निरपेक्षः सन् जीमकांचलीछांडीने सर्पनासे एतीएव जाती पुत्रौ भोगांस्त्यजत एताहरा पुत्रभोगछांडीने दिक्षालीइछे ततः अहं कथंनानुगमिष्यामो एको द्वितीयः तोइ वेटाने साथिं किमनजाउं पूठिरहीने एकलोस्युंकरुं ३४ जालं छित्वा अबलं दुर्बलं रोहितो मत्स्यः रोहितनामा मच्छपूछे करीजालछे दीनांखे जालकिस्याछे निवलछे यथा रोहितोमच्छः जालं छिनत्ति तथा कामगुणान् त्यक्त्वाजिम मच्छजाल छोडी नासेतिमपुत्र कामभोगछोडी नासेछे धृत्वाशीलान् आचारगुणान् तपसा उदारान् लेईने शीलनागुण तपनागुण अम्हे ईदृशाः धीराः जीवान्

पुत्ताय पईयमज्झं तेहिं कहिं नाणुगमिस्समेक्का २६ पुत्रौ द्वौ अपि पतिर्भृगुः पुरोहितः एते त्रयोपि मह्यं इति मान्दलयित्वामत्सम्बन्धि स्नेह जालं भोगाभिष्वङ्ग जालञ्छित्वापलन्ति परियान्ति परिसमन्तात् यान्ति संयमाध्वनि चरन्ति इत्यर्थः एतेक्रौञ्चा इव क्रौञ्चाः क्रौञ्च पक्षिणोहंसाः हंस पक्षिणो वाते इव यथा क्रौञ्चपक्षिणो हंस पक्षिणश्च ततानि विस्तीर्णानिजालानि दलयित्वाभित्वासमक्रामन्तः नाना प्रदेशात् उल्लङ्घयन्तो नभसि परियान्ति गगने परि यान्ति स्वेच्छयाविचरन्ति अत्र हि विषय सुखं जालोपमं निरुवलेपत्वात्साधुवर्त्मनभः कल्पं उत्तमजीवानां क्रौञ्च विहङ्गहं स विहङ्गमोपमानं यदा एते त्रयोपि मान्यत्वा व्रजन्ति तदा अहं एकाकिनीतान् कथं न अनु गमिष्यामि अपि तु अनु गमिष्याम्येव २६ पुरोहियं तं स सुयं सदारं सुचाभिनिक्खम्म पहायभोए कुटम्बसारं विउलुत्तमन्तं रायं अभिक्खं समुवायदेवी २६ अथ यदा च तूर्णीं प्रव्रज्यायां मनोभूत् तदा किं अभूत् इत्याह राजानं तं इषु कारिणं देवीकमला अभीक्ष्णं वारं २ समुवाच सम्यक् प्रकारेण गिरा पूर्वकमुवाच किं कृत्वा पुरोहितं भृगुं स सुतं पुत्र सहितं सदारं स पत्नीकं

सूत्र

समइक्कमंता तयाणि जालाणि दलित्तुहंसा । पलेंति पुत्ताय पईयमज्झं तेहिं कहंनाणु गमिस्समेक्को ॥२६॥ पुरोहि यंतं ससुयं सदारं सोच्चाभिनिक्खम्मपहायभोए कुडंबसारं विउलुत्तमंतंरायं अभिक्खं समुवायदेवी ॥३७॥ वंतासी

भाषा

भिक्षाचर्यां चरंतिइ स्या धीरपुरुष भिक्षाचर्योविचरे दीक्षालेई सुभतो आहारलोइ २५ अथ ब्राह्मणी प्रबुद्धा आहः यथा नभसि आकाशे क्रौंचपक्षिणः जिम आकाशनेविषें क्रौंचपंखी यथा तानि रचितानि जालानि दलित्वाहं सा गच्छन्ति क्रौंच पंखियानि हंसाने जालमाआछे ते जालतोडीने आकाश जडोजाइ तथा परियांति गच्छंति पुत्रौ पतिश्च ममतिमए माहराबे वेटाएभरतारभोग जालछोडीनेजाइछे तान् प्रति अहं एका कथंनानुगमि

भोगान् प्रहाय प्रकर्षेणत्यक्त्वा पुनर्विपुलं विस्तीर्णं उत्तमं तं कुटम्बसारं प्रहायत्यक्त्वा कुटम्ब स्वजन वर्ग सारं धनधान्यादिकं उभयमपित्यक्त्वा अभिनिः क्रम्य गृहाद्विर्गत्य प्रव्रजितं इति श्रुत्वा तस्य पुरोहितस्य धनादिकं गृह्णन्तं राजानं राज्ञी प्राह इत्यर्थः ३७ वन्तासी पुरिसोरायं नसोहोइपसंसिओ माहणेण परिच्चत्तं धणं आयाओमिच्छसि ३८ राज्ञी किं उवाचेत्याह हे राजन् योवान्ताशीसपुरुषः प्रशंसनीयो न भवेत् श्राघ्यो न भवेत् हे राजन् ब्राह्मणे न परित्यक्तं धनं त्वं आदातुं इच्छसि ब्राह्मणेन त्यक्तं धनं वान्ताहार सदृशं गृहीत्वा त्वं श्राघ्यो न भविष्यसीत्यर्थः वां तं वदनादुद्गतं आहारं अश्नातीत्येवंशीलोवान्ताशी वान्ताहारभोक्तादृत्यर्थ ३८ सव्वं जगज्जइ तुहं सव्वं वा विधणं भवे सव्वं पिते अपज्जत्तंनेवताणायतं तव ३९ हे राजन् यदि सर्वं जगत्समस्तोपि भूलोकस्तव भवेत् भवायत्तः स्यात् वाथ वा सर्वमपि धनं रजतसुवर्णरत्नादिकं अपि तद् भवेत् तत्सर्वं जगत् पुनः सर्वं अपि धनन्ते तव अपर्याप्तंभवेत् तव इच्छा पूरणाय असमर्थं स्यात् यत इच्छाया अनन्तत्वात् पुनस्तत्सर्वं जगत् तत्सर्वं धनं त्राणाय मरण भया द्रक्षणायन

सूत्र

पुरिसोरायं नसोहोइप संसिओ। माहणेण परिच्चत्तं धणं आयाओ मिच्छसि ।३८। सव्वंजगंजइतुहंसव्वंवाविधणं भवे। सव्वंपिते अपज्जत्तं नेवताणायतंतव ।।३९॥ मरिहिसिरायं जयातयावामणोरमे कामगुणे पहाय एक्कोहु धम्मो

भाषा

थामि तेसाथेइहं पणिजाईसिएकलीरहीनेस्युंकरुं ३६ तं पुरोहितं सुतकलत्रसहितं ते पुरोहितने बेटावायडिसाथे श्रुत्वा गृहात् निर्गत्यभोगांस्त्यक्त्वा सुणीनेदीख्यालिइछे भोगछांडीने धनधान्यादिगृह्णन्तं स्वीकुर्वतं धनधान्य अंगीकरताराजाने अभीक्ष्णं पुनः सम्यग् उच्यते कमलावती देवीहीवे राजाने वारंवार कमलावती देवी कहे ३७ भोराजन् वमनभोजी पुरुषः अहो राजा वम्यो आहारजे पुरुषकरे स न भवति प्रसंसनीयः ते पुरुष प्रशंस वा योग्य

धन भवेत् यदि जगत् धनस्य इच्छा पूरणाय अथ च मरणा दूरणाय असमर्थं तदा किं ब्राह्मण परित्यक्त धन ग्रहणेनेत्यर्थः ३९ मरिहिसिरायं जया तया वामणोरमे कामगुणेपहाय एक्को हु धम्मोनर देवताणं न विज्जई अन्नमिहे हकिञ्चि ४० हे राजन् यदा तदा यस्मिन् तस्मिन् काले मनोरमान् मनो हरान् कामगुणान् प्रहाय प्रकर्षेणत्यक्तामरिष्यसि प्रियमाणस्य पुरुषस्य च धनादि सार्थेनभवति हे नरदेवइ इति निश्चयेन एकोधर्म एवत्राणं शरणं विद्यते इह जगति इह मृत्यौ वा जीवस्य अन्यत् किंचित् त्राणं न विद्यते ४० नाहं रमे पक्खिणि पंजरे वासंताण छिन्ना चरिस्सामि मोणं अकिंचिणा उज्जुकडा निरामिसा परिग्गहारम्भनि अत्त दोसा ४१ अहं इहेति अध्याहारः हे राजन् अहं नरमे रतिं न प्राप्नोति वा शब्द इवार्थे पक्षिणी पंजरे इव यथा पक्षिणी पंजरेरतिं न प्राप्नोति अहं सन्तानच्छिन्नासती मौनं मुनीनां आचारं चरिष्यामि करिष्यामि छिन्नः सन्तानः स्नेह सन्ततिर्ययासाछिन्न सन्ताना पुनः कथं भूता सतो अहं अकिञ्चना स चित्ताचित्तविविध परिग्रहरहिता पुनरहं कथं भूतासती ऋजुमायारहितं कृतं तपो धर्मं ययासा ऋजु कृता पुनः कथं भूतासती निरामिषासती निःक्रान्ता आमिषात् विषयादिपदार्थात् इति

सूत्र

नरदेवताणं। नविज्जई अन्नमिहेह किंचि ॥४०॥ नाहं रमेपंक्खिणि पंजरेवा संताणछिन्ना चरिस्सामिमोणं। अकिं

भाषा

न हइ ब्राह्मणेन परीत्यक्तं ब्राह्मणेछोडीजइ धनं वित्तं ग्रहीतुं मिच्छसि जेधन तेहने लेवुं वांछेछे ३८ सर्व्वं जगत् यदितव सर्वजगत् तुझनेदीजे अथवा स्वर्णादिक सर्वताहरेहुवे सर्वमपि तव अपर्य्याप्तं असंपूर्णं सर्वते अपर्य्याप्ततोहितोने न स्यात् रक्षणाय तत्सर्वं तत्र धनंएधन तुझनेराखी सकेनहीं ताहरीतृष्णापूरी न होइ ३९ हे राजन् यदा तदा कालेषु मरिष्यसि हे राजन् यदा तदाकालितुं मरीश मनोरमान् कांमगुणान् त्यक्ता मनोहरए कांमभोग छोडीने हे नरदेव एकधर्म्मएव त्राणं शरणं हे राजा एकधर्म्मजीवनेराखणहारछें दुर्गते पडतानें न विद्यते अन्यत् इहलोके किंचित् बीजो वस्तु

निरामिषाविषयादयः पदार्था हि विषय जीवानां गृद्धिहेतुत्वादामिषोपमाएतस्मादहं निर्विषयासती पुनः कथं भूतासती अहं परिग्रहारम्भ निवृत्तदोषा परिग्रहश्च आरम्भश्च परिग्रहारम्भौ तौ निवृत्तौ दोषौ यस्याः सा परिग्रहारम्भ निवृत्तदोषा ४१ दवग्गिणा जहारन्ने डज्झमाणे सुजं तु सु अन्नेसत्तापमो यन्ति राग दोसवसङ्गया ४१ अपरं यथा अरण्ये जीवेषु दह्यमानेषु सत्सु अन्ये अदग्धाः सत्वाः प्रमोदं ते हर्षिताः भवन्ति मनसि एवं जानन्ति एतेज्वलन्ति तदाज्वलं तु वयं अदग्धास्तिष्ठामः कथं भूतास्ते रागद्वेषयोर्वशङ्गताः रागद्वेषग्रस्ताः ४१ एव मेव वयं मूढा काम भोगेसु मुच्छिया डज्झ माणं न बुज्झामोरागदोसग्गिणा जगं ४२ एवं अमुनैव दृष्टान्ते न वयं मूढाः अविवेकिनः कांम भोगेषु मूर्च्छिताः सन्तः रागद्वेषाग्निनाजगत् दह्यमाणं न बुध्यामहेनजानीमहे वयमिति बहुवचनात् बहवोऽन्या दृश्याजीवा इति ज्ञापनार्थं ४२ भोगे भुञ्जावमित्ताय लहु भूय विहारिणो आमोयमाणा

सूत्र

चणाउज्जु कडा निरामिसापरिग्गहारंभ नियत्तदोसा ।४१।। दवग्गिणा जहारन्ने डज्झमाणेसु जंतुसु । अन्नेसत्ताप मोयंति रागदोस वसंगया ॥४२। एवमेव वयंमूढा कामभोगेसु मुच्छिया डज्झमाणं नबुज्झामो । रागदोसग्गिणा

भाषा

धर्मवीना जीवने राखणहार सरणकोनथी ४० नाहंरमेपक्षिणीइव भवपंजरे जिम पक्षिपांजरा मांहिं संतोष न पामेतिमहुंए भवपांजरामांहिंरति नहीपामुकुं संतति च्छिन्ना स्नेहरहिता चरिष्यामि मौनंहुं स्नेहकरीरहित मौनव्रतआदरीदिक्षाग्रहस्तावास लेईसे द्रव्यतो हिरण्यादिरहिता: कषायादि रहीता: विषयादिमुक्ता: द्रव्यरहित कषायरहित विषयरहित परिग्रहारंभदोषरहिताः परिग्रह अने आरंभदोषतिणेकरीरहितछे ४१ दवाग्निना यथाऽरण्ये दावानल अग्नि अटवीने वीषेलागोथको दह्यमानेषु जंतुषु दाझताथका जीवनेदेखीने अन्ये प्राणिनः प्रमोदयंति तुष्यंति वीजाजीव अरण्य

गच्छन्ति दियाकामक्कमाइव ४४ धन्यास्तेजी वा इत्यध्याहारः जे जीवा भोगान् भुक्ता पुनरुत्तरकाले वां त्वात्यक्ता अर्धाराधवो भूत्वा आमोदमाना साध्याचरणीयानुष्टानेन सन्तुष्टाः सन्तोगच्छन्ति विचरन्ति वाञ्छितं स्थानं व्रजन्ति ते जीवाः के इव कामक्रमाइजो इवक्रामं स्वेच्छया क्रमो विचरणं येषां ते काम क्रमाः स्वेच्छाचारिणः अप्रति बद्धविहारत्वेन यत्र २ संयमनिर्वाहस्तत्र २ यान्तीत्याशयः पुन कथं भूतास्ते जीवाः लघु भूतविहारिणः लघ्वीवायुस्तद्भूतास्तदुपमाः सन्तोविहरन्तीत्येवं शेषा लघु भूतविहारिणः अथ वा लघुश्वासौ भूतश्च लघु भूतो वायुस्तद्वत् विहरन्तीत्येवं शेषा लघु भूत विहारिणः वायुरिवा प्रतिबद्ध विहारिणः ४४ इमे यबद्धा फन्दन्ति ममहत्यज्जमागया वयञ्च सत्ताकामेसु भविस्सामो जहाइमे ४५ हे आर्य इमे च प्रत्यक्षाः शब्द रूपरसगन्धस्पर्शादयः पदार्थाः बद्धाः नियन्त्रिताः सुदृढी कृताः ममहस्ते पुनस्त वहस्ते आगता अपि फन्दन्ति अस्थिति धर्म तया गच्छरा

सूत्र

जगं ॥४३॥ भोगेभोच्चावमित्ताय लहुभूय विहारिणो । अमोयमाणा गच्छंति दियाकम कमाइव ॥४४॥ इमेय बद्धा फंदंति ममहत्थज्जमागया वयंच सत्ताकामेसु भविस्सामो जहाइमे ॥४५॥ सामिसं कुललंदिस्स वज्झमाणं निरामिसं

भाषा

नातेहने देखोने खुसीथाइं रागद्वेषवशंगताः रागद्वेषनेवसि पद्यार्थका ४२ एवमेव वयं मूढाः इम अम्हे मूर्छ कामभोगेषु मूर्च्छिताः कामभोगने विषें मूर्च्छापाम्याछे दह्यमानं न बुद्धामोनवेद यामः दाझताथकानथीजाणतां रागद्वेषादिना जगदिग्वं रागद्वेषने वशिपद्यार्थका न जाना ४३ पूर्वं भोगान् भुक्ता तत वांत्वा पहलां भोग भोगवेपछे छांडीने अप्रतिबद्ध विहारिणोयतयः हलूयाछ आथकावायूनीपरिं अप्रतिवद्धथको विहारकरें आमोद माना: हर्षयुक्ताः गच्छंति हर्षसहितथकाजाइ द्विजाः पक्षिणः इव स्वेच्छाचारिणः जिमपंखी आपणींइच्छाइजडे ४४ इमे प्रत्यक्षाः शब्दादयः बद्धाः राग

दृश्यन्ते सुरक्षिता, अपियान्तीत्यर्थः एतादृशेषु गत्वरेषु कामेषु अज्ञानवयं गृद्धाः सञ्जातालिप्साः जाताः तस्मात् एतेषु गत्वरेषु कः स्नेहः हे स्वामिन् आवां यथा इमे पुरोहितादयः चत्वारोजातास्तथा भविष्यामः ४५ सामिसं कुललं दिस्स वज्झमाणं निरामिसं आमिसं सव्वमुज्झित्ताविहरामिनिरामिसा ४६ हे राजन् अहं सर्वं आमिषं अभिष्वङ्गहेतुं धन धान्यादिकं उज्झितात्यक्त्वा निरामिषात्यक्तसङ्गासती अप्रति बद्धविहार तथा विहरिष्यामि किं कृत्वा सामिषं आमिष सहितं कुललं गृद्धं अपरं पक्षिणं वा परैरिति अन्यैर्बध्यमानं पीड्यमानं दृष्ट्वा सामिषः पक्षी हि आमिषाहारिपक्षिभिः पीड्यते अथ वा सामिषं सस्पृहं भोजनाद्यर्थं लुब्धं कुललं पक्षिणं परैर्बध्यमानं पीड्यमानं दृष्ट्वा यतो हि पक्षिणो यदा गृह्यन्ते तदा तान् मध्यं दर्शयित्वापाशादिना बध्यन्ते आमिषाहारी शकुनिस्तु आमिषदर्शने नैव लोभयित्वामीनवत् बध्यते सह आमिषेण आमिषरसास्वादलोभेन वर्त्तते इति सामिषस्तं सामिषं ४६ गिद्धोवमे उनच्चाणं कामे संसारवड्ढणे उरगोसुवन्नपासेव्व सङ्कमाणो तणुं चरे ४७ हे राजन् त्वमपि विषयेभ्यः शङ्कमानः सन् तनुं स्वल्पं यतन याचरेः इति चरस्य विषयेभ्यो भीतिः पदे २ विधेया इत्यर्थः किं कृत्वा गृद्धोपमान् पूर्वोक्तसामिष कुललोपमान् विषय लोलुपान् जनान्

आमिसं सव्वमुज्झित्ता विहरिस्सामो निरामिसा ॥४६॥ गिद्धो वमेउ णच्चाणं कामे संसारवड्ढणे । उरगो सुवन्न पासेव्व

ईषरचिताः फंदंति थिरा न भवंतिएकामभोग भली परिं राख्याथका धीरनहोइ मम हस्ते समागताऽपि माह राहाथनेविषें आव्यायकाळे वयं पुनः कांमभोगेषु आसक्ताः अम्हे कांमभोगनेविषें आसक्तहुआकुं भविष्यामः ईहशाः यथा पुरोहितादयः जिमणपुरोहितादिकहवेछे तिमहोस्यां अम्हे पिण ४५ सामिषं मांसयुक्तं कुललं पक्षिणं दृष्ट्वा मांससहीत पंखीनेदेखीने पीड्यमानं निरामिषेण जे मांसरहित पंखीछे ते मांससहीत पंखीने पीडे मांसखोसीलीइ एवं आमिष धनधान्यादि सर्वत्यक्ता इम आमिषसरिखुं धनधान्य छोडीने विहरिष्यामि निरामिषाः विषयरहिताः निरामिषहुआ

ज्ञात्वातु पुनः कामान् संसारवर्द्धकान् ज्ञात्वा विषयलोलुपाः कामैः पीडिताः संसारे भ्रमन्तीति ज्ञात्वा त्वं कट्वयंकमानः सन् सुपर्णपार्श्वे गरुड समीपे उरगइव सर्पइव यथा गरुडपार्श्वे सर्पः शनैः २ शंकमानः सन् चरति यथा गरुडो न जानाति तथाऽविश्वासी सन् तनु यथा स्यात्तथा चलति तथा त्वमपि गरुडोपमानां विषयानां विश्वासं माकुर्याः अत्रहि विषयानां गुरुडोपमानं संयमरूप जीवितापहारकत्वात् नरस्यहि भोगलोलुपत्वात् उरगोपमानं यत उरगो भोगेव उच्यते विषयास्तु दृश्यमानास्सुन्दरा गरुडाकाराः भोगिनांहि विषयेभ्य एव मृत्युःस्यात् तस्माद्विषयेभ्यः शंकनीयमित्यर्थः४७ नागोव्व बंधणं छित्ता अप्पणोवसहिंवए एयं पत्थं महारायं उसुयारित्तिमेसुयं ४८ हे राजन् नागइव हस्तीव बन्धनं छित्वा आत्मनो वसतिं स्वकीय स्थानं विंध्याटवींयाति तथा त्वमपि बलवत्वात् नागो विषय शृङ्खलां छित्वा आत्मनः स्थानं मुक्तिं व्रजे धीरपुरुषाः गजतुल्याः विषयाः शृङ्खला तुल्याः मुक्तिविंध्याटवी इव आत्म गजस्य स्थानमुक्तं हे इषुकारि महाराज मया साधुमुखात् इति पथ्यं हितं श्रुतमस्तिनाहं स्वबुध्या ब्रवीमि इत्यर्थः ४० चइत्ताविउलं रज्जं कामभोगेयदुच्चए निव्विसयानिरामिसानिन्नेहानि परिग्गहा ४९ सम्मं धम्मं वियाणित्ता चिच्चाकामगुणेवरे तवं पगिज्झहक्खायं घोरं घोर

सूत्र संकमाणो तणुंचरे ॥४७॥ नागोव्व बंधणं छित्ता अप्पणो वसहिंवए । एयं पत्थं महारायं उसुयारेत्तिमेसुयं ।४८॥

भाषा थका विहरस्यां ४६ गरुडोपमान् ज्ञात्वा: गरुडपंखिया सरिखा पुरुषजाणीने कामान् संसारवर्द्धकान् एकामभोग संसार नावधारण शारछे उरगः सर्पः गरुड़पार्श्वेभयं चलः सन् सर्प गरुड़ने समीपे भयथको संकमांनः तनुर्भवति तथाचरे भो राजन् शंकमांन शरीर हुवे गुरुडथी विहतो चाले दुबलो ४७ यथा नागो हस्ती बंधनंच्छित्वा जिम हाथी बंधन तोडीने आत्मनावसतिं स्थानं गच्छति आपणे स्थानकिंजाइ एतत्पथ्यं भो महाराज अहो महाराज एपथ्यछे भोइषुकारमे,मयाइति श्रुतं भो इषुकार महाराजामे इमसांभल्यं ४८ इति श्रुत्वा राजा प्रतिबुद्धः राजा राणींइं राज्यछांडो तथा कामभोगान्

परक्कमा ५० एवंते कमसोबुद्धा सव्वेधम्म परायणा जम्ममच्चुभउविग्गा दुक्खस्संत गवेसिणो ५१ तिसृभिः कुलकं एव अमुना प्रकारेणते सर्वपि क्रमशोऽनु क्रमेण षडपि जीवा बुद्धाः प्रति बोधं प्राप्ताः किं कृत्वा विपुलं विस्तीर्णं राज्यं त्यक्त्वा च पुनर्दुस्त्यजान् कामभोगान् त्यक्त्वा कथं भूतास्ते सर्वे निर्विषया विषयाभिलाषरहिताः पुनः कथं भूताः निरामिषाः स्वजनादि सङ्गरहिताः पुनः कीदृशाः निपरिग्रहा बाह्याभ्यन्तर परिग्रहरहिताः ४९ पुनस्तेजीवाः किं कृत्वा प्रतिबोधं प्राप्ताः सम्यक् सम्यक् प्रकारेण धर्मं साधु धर्मं विज्ञाय पुनर्वरान् दुर्लभान् प्रधानान् कामगुणान् त्यक्त्वा कामस्य मदनस्य गुणकारित्वात् काम वृद्धिकरत्वात् गुणाः कामगुणास्तान् कामगुणान् अक् चन्दनवनितादीन् कामोद्दीपनौषधादीन् त्यक्त्वा अत्र पुनः कामगुण ग्रहणं तेषां अतिशयख्याप नार्थं पुनः किं कृत्वा घोरं अघोर पुरुषैर्दुरनुचरं यथा ख्यातं तीर्थ करोद्दिष्टंतपो द्वादशविधं प्रगृह्य भावतोङ्गीकृत्य पुनः कथं भूताः ते सर्वे घोर पराक्रमा घोरं पराक्रमं धर्मानुष्टान विधिर्येषां ते घोर पराक्रमाः पुनः कीदृशाः ते सर्वे धर्म परायणाः धर्मध्याने तत्पराः इत्यर्थः पुनः कीदृशास्ते जन्म मृत्यु भयो

सूत्र

चइत्ता विउलं रज्जं कामभोगेय दुच्चए। निव्विसया निरामिसा निन्नेहानिपरिग्गहा। ४९॥ सम्मं धम्मं विया णित्ता चिच्चाकामगुणे वरे तवंपगिज्झ हक्खायं घोरं घोर परक्कमा॥५०॥ एवंते कमसो बुद्धा सव्वेधम्म परायणा

भाषा

दुस्त्यजन् वलो छोडतां दोहिला इस्या कामभोग छोड्या निर्विषयाः निरामिषाविषयतृष्णारहित वीषयरहित हुवाः नीस्नेहानिः परिग्रहाः स्नेहरहीत परिग्रहेंरहित हुआ४९सम्यक् धर्मंजाणीनें त्यक्ता कांमगुणान् वरान्वरप्रधान कामभोग त्यजीनेतपो ग्रहीत्वायथाख्यातं तीर्थंकरभाषितं तीर्थंकरनो भाषीतपऽंगीकारकरीने घोरं रौद्रः घोरपराक्रमी संतो चक्रतुः घोरपराक्रमीं करीनें ५० एवं अमुना प्रकारेण ते षडपी जीवाः क्रमेण बुद्धाः

विग्नाः जन्ममरण भीति भीताः पुनस्ते सर्वे किं कर्तुमिच्छवः दुःखस्यान्तं गवेषिणाः दुःखस्यान्तं मोक्षं गवेषणः मोक्षाभिलाषिणः इत्यर्थः ५१ सासणे विगयमोहाणं पुव्विं भावणं भाविया अचिरेणेव कालेणं दुक्खस्सन्तमुवागया ५१ पुनस्ते षडपि जीवाः अचिरेण एवस्तोक कालेन दुःखस्य संसारस्य अन्तं अवसानं अर्थान् मोक्षं उपागताः मोक्षं प्राप्ताः कीदृशास्तेविगत मोहानां वीतरागाणां शासने तीर्थे पूर्वं पूर्वस्मिन् भवे भावनया सम्यक् क्रिया भ्यास रूपया द्वादश विधमनः परिणति रूपया भावितारंजितात्मानः ५१ अथ तेषां सर्वेषां षण्णां अपि जीवानां नामान्याह राया सह देवीए माहणोय पुरोहिओ माहणीदारगा चेव सव्वे ते परिनिव्वुडे त्तिबेमि ५२ राजा इषु कारीदेव्या षट् राज्ञा कमलया सह ब्राह्मणो भृगुनामा पुरोहितो राज्ञः पूज्यः पुनर्ब्राह्मणी पुरोहितस्य पत्नी यशा च पुनर्दारको ब्राह्मण ब्राह्मण्योः पुत्री एते सर्वेपि परिनिर्वृताः मोक्षं प्राप्ताः इति अहं ब्रवीमि इति सुधर्मास्वामीजं

सूत्र

जम्ममच्च,भओ व्विग्गा दुक्खस्संत गवेसिणो ॥५१॥ सासणे विगयमोहाणं पुव्वंभावणं भाविया। अचिरेणेवकालेणं दुक्खस्संत मुवागया ५२॥राया सहदेवीएमाहणोय पुरोहिओ। माहणी दारगाचेव सव्वे ते परिनिव्वुडेत्तिवेमि ५३॥

भाषा

इणां प्रकारेतेछहजीवप्रतीबोधपाम्यां सर्वेऽपि धर्मपरायणा जाताः तेसगलाइ धर्मने विषे तत्परहुआ जन्ममृत्यु भयोद्विग्ना जन्ममरणनाभयथीउभगाछे दुक्खस्यांतगवेषिणी मोक्षाभिलाषीण दुक्खनो अंतकरवावांछेछे मोक्षवांछेछे ५१ शासने विगतमोहानां अर्हतां जिनशासननेविषेगत मोहहुआछे पूर्वजन्मभावनायाभाविता पूर्वजन्मजातिस्मरण ज्ञानजपनोतिणे करीने आत्माभावितहुई संवेगजपनां स्लोकेनैवकालेन थोडाकालमांहिं दुःखयां तं मोक्षं उपागता प्राप्ताः दुक्खनो अंतकीधो मुक्ते पुंहता ५२ राजादेव्या सह राजा रांणी ब्राह्मणश्चः पुरोहीत वांभण पुरोहीत ब्राह्मणीं दारको वा

बूस्वामिनं प्राह ५२ इति इषुकारीयं अध्ययनं चतुर्दशं सम्पूर्णं ॥१४॥ इति श्रीमदुत्तराध्ययन सूत्रार्थ दीपिकायां उपाध्याय श्रीलक्ष्मी कीर्त्तिगणि शिष्य लक्ष्मी कीर्त्तिगणि शिष्य लक्ष्मीवल्लभगणि विरचितायां इषुकारी यस्याध्ययनस्यार्थः संपूर्णं ॥१४॥ अथ पंचदशं प्रारभ्यते ॥ चतुर्दशेऽध्ययनेनिर्निदा नस्य गुणः प्रोक्तः स च निर्निदान गुणो हि मुख्य ब्रह्मचारिणोरेव भवति अतोभिक्षोर्लक्षणमाह मोणञ्चरिस्सामि समेच्च धम्मं सहिए उज्जुकडेनियाणछिन्ने सन्थवं जहेज्ज अकामकामी अन्नायएसो परिव्वएजेसभिक्खू १ य एतादृशस्सन् परिव्रजेत् अनियतां अप्रतिबद्धं यथा स्यात्तथा विहरेत् विहारं कुर्यात् सभिक्षुरुच्यते स इति कः यः पूर्वं मनसि एवं जानाति अहं मौनं मुनीनां कर्म्ममौनं साधु धर्मं चरिष्यामि श्रामण्यं अङ्गीकरिष्यामि किं कृत्वा धर्मं दशविधं पञ्च महाव्रत दीक्षां समेत्यप्राप्य पुनर्योदीक्षां गृहीत्वा संस्तवं पूर्वपश्चात्संस्तवं परिचयं कुटम्ब स्नेहं जह्यात् त्यजेत् परं कौटिल्यः सन् सहिए इति सहितः स्वविरैर्वेद श्रुतैः साधुभि सहितः साधुर्हि एकाकीनतिष्टेत् इक्कस्सकओ धम्मोइत्युक्तत्वात् अथ वा कथं भूतः सन् स्वहितः सन् स्वस्यहितं यस्य स स्वहितः आत्माहिताभिलाषी पुनः कौटिल्यः उज्जुकडे ऋजु सरलकृतं मायारहितत्वो येन स ऋजु कृतः अयठानुष्ठानकारीइत्यर्थः पुनः कौटिल्यः नियाणछिवे छिन्ननिदानः निदानशल्यरहित इत्यर्थः पुनः कौटिल्यः अकामकामः न विद्यते कामस्य कामोऽभिलाषो यस्य स अकामकामः कामाभिलाष

सूत्र

उसुयारिज्जं समत्तं ॥ १४ ॥ मोणं चरिस्सामि समेच्चधम्मं सहिएउज्जु कडेनियाण छिन्ने । संथवं जहेज्ज अकामकामे

भाषा

ब्राह्मणी आदीके जीव ब्राह्मणनावेटावेइ सर्वे ते षडपिपरीनिर्वृता मोक्षंप्राप्ताः सर्वेपीक्षइए जीवमोक्षपाम्यां ५२ इति श्रीचक्रदमा अध्ययननेविषेराजा इषुकारनो अध्ययनटव्वार्थसंपूर्णम् ॥ १४ ॥ अहं मौनं सेविष्यामिइं मौनं अंगीकार करूं इति चिंतयिला समिंचारित्र धर्मं प्राप्यचारित्र अंगी कारकरीने अन्यः साधुभिः सहितः रिजूस्वभाव निदान रहितः अनेरा साधुसघाते सरलस्वभावथकोनीयाणेकरीरहितनीयाणेनकरे स्वजनैः सह

रहितः पुनः कौटश्यः अन्नाएसी अज्ञातैषी यत्र कुले तस्य साधोस्तपोनियमादि गुणेन ज्ञातस्तत्र एषयते ग्रासादिकं ग्रहीतुं वाञ्छते इत्येवं शीलः अज्ञातैषी य एवं विधः सभिक्षुरित्युच्यते अनेन सिंहतयानिः क्रम्यसिंह तयाविहरणं भिक्षु त्वनिबन्धनं प्रोक्तं साधुनां चतुर्भङ्गी यथा सिंहत्ताए निक्खमन्ति सिंहत्ताए विहरन्ति सियालत्ताएनिक्खमन्ति सियालत्ताए विहरन्ति सिंहत्ताए निक्खमन्ति' सियालत्ताए विहरन्ति सियालत्ताए निक्खमन्ति सिंहत्ताए विहरन्ति एवं चतुर्भंगी उक्ता तत्र सर्वोत्तमासिंहतयानि क्रमणं सिंहतया पालनं तच्च यथास्यात्तथा पुन राह १ रागो वरयं चरेज्जलाढे विरएवेय वियायरक्खिए पन्ने अभिभूयसव्वदंसी जेकम्भिविनमुच्छिए सभिक्खू१ पुनः सभिक्षु रित्युच्यते स इति कः योरागो परतं यथा स्यात्तथा रागरहितं यथा स्यात्तथा चरेत् परं कौटश्यः सन् विरतः असंयम मार्गाद्वि रक्तः पुनः कौटश्यः सन् वेदविदात्मरक्षितः वेद्यते ज्ञायतेऽर्थोऽनेनेति वेदः सिद्धान्तस्तस्य वेदनं वित् ज्ञानं वेदवित् सिद्धान्तज्ञानं तेन आत्मारक्षितो दुर्गति पतनात् येन स वेदविदात्मरक्षितः पुनः कौटश्यः पन्ने प्राज्ञः हेयो पादेय बुद्धिमान् पुनर्यः अभि भूय परीषहान् जित्वा तिष्टतीति अध्याहारः पुनः कौटश्यः सर्वदर्शी सर्वं प्राणि गणं आत्मवत्पश्यतीति सर्वदर्शी पुनर्यः कस्मिंश्चित्सचित्ताचित्तवस्तु नि न मूर्छितः अलोलुपः इत्यर्थः १ अक्को स बहं विदित्तुधीरे मुणी चरेलाढेनिच्चमायगुत्ते अविग्गमणे असम्मूहिट्ठे जेकम्मिणं अच्छियासए सभिक्खू २ पुनः

सूत्र

अन्नायएसी परिव्वए स भिक्खू ॥१ रागोवरयंचरेज्जलाढे विरए वेय वियाय रक्खिए। पन्ने अभिभूय सव्वदंसी

भाषा

परिचयं न करोतो कामाभिलाषरहितः सगास्यु परीचय न करे कांमाभीलाष रहितथको अज्ञातकुलं पश्यन् अनित्यतं विहरे साधुः अज्ञात कुलने विषे विचरे अनित्यविहारिथको १ रागरहितं यथा स्यादेवं विहरेत् लाढः प्रधानः रागरहितं थको विचरे क्रीयाकरे विरतः संजयान्वितः आगमवेत्ता आत्मरक्षकः संसारथी विरक्तथयाछे सिद्धांतनाजांण आपणाआत्माने भलीरीतेराखेछे प्राज्ञाः आत्मानं पराजित्य सर्वदर्शी पंडित आत्मानेजीते सर्ववस्तुने

सभिक्षुरित्युच्यते स इति कः यः आक्रोशस्य वधस्य अनयोः स माहारः आक्रोशवधं वाक् तर्जनताडनं विदित्वा स कर्म फलं ज्ञात्वा धीरस्तदा क्रोशवधादि सह न शीलो मुनि वाग्गुप्ति युक्तः सन् चरेत् साधु वर्त्म निविहरेत् पुनः कौटश्यः सन् लाढः साध्वनुष्टानेतत्परः पुनः कौटश्यः नित्यं आत्मागुप्तः गुप्तः असंयमस्थानेभ्योरक्षित आत्मायेनस गुप्तात्मा प्राकृतत्वा द्विपर्ययः पुनः कौटश्यः अव्यग्रमनाः अनाकुलचित्तः पुनः कौटश्यः असं प्रहृष्टः आक्रोशादिषु न प्रहर्षवान् कश्चित्कदाचित् कस्मैचित् दुर्वचनैनिर्भत्सयति तदा हर्षितो न भवतीत्यर्थः पुनर्यः क्षतक्षं समस्तं आक्रोशवधं अध्यास्ते सहते सम हृत्तिर्भवति स साधुरित्यर्थः ३ पं तं सयणासणं भइत्तासी उन्हं विविहं चदं समसगं अव्वगमणे असं पहिट्ठे जेकसिणं अहियासएसभिक्खू ४ पुनर्यः प्रान्तं असारं अग्रधानं सयनं आसनं उपलक्षणत्वात् भोजनाच्छादिनादिकं भजित्वासेवयित्वा पुनः शीतोष्णच्च पुनर्विविधन्दं समयकं रुधिरपानकरं जन्तु गणं सकलं प्राप्य अव्यग्रमनाभवेत् स्थिरचित्तोभवेत् पुनर्यः सम्यक् अयना सनभोजनाच्छादनलाभात् शीताद्युप द्रव रहितस्थानलाभात् तथादंशमशकादिरहित स्थानलाभात् असंप्रहृष्टो भवति हर्षितोनभवति सम दुःख सुखो भवति एतादृशः सन् एतत् सर्वं अध्यास्तेसभिक्षुरित्युच्यते ४ नो सक्रियमिच्छईनं पूयं नोवियवं दणगंकओपसंससेसच्चए सुच्च एतवस्सीसहिए आयगवेसएसभिक्खू ५ सभिक्षुर्भवेत् स इति कः यः सत्कृतं सत्कारं आत्मनः सम्मुखं जनानां

सूत्र — जेकम्हि विनमुच्छिए स भिक्खू २॥ अक्कोसवहंविदित्तुधीरे मुणीचरे लाढे निच्चमाय गुत्ते अवग्गमणे असंपहिट्ठे

भाषा — जाणे जीवा जीवादिवस्तुनिमूर्च्छानकरोति साधुः सचित्त अचित्त वस्तुउपरि मूर्च्छानकरते साधुकहीइ २ आक्रोशवधं कर्मफलं प्रतिवधं ज्ञात्वा आक्रोशे निर्भत्से मारे कोइ तो न करे क्रोध कर्मबंधनुं हेतुछे इमजाणी धीर क्रोधछांडे स मुनिः चरेत् प्रधानोनित्य असंयमस्थानेभ्यः गुप्तः मुनी विचरे वीहार करे प्रधानथकोजे असंयमनास्थानकतेहथकी गुप्त अलगाछे उद्विग्नमनाः संसारचिंतारहिताः मन आपणोठामिराखे संसारनी चिंता मांहि पड्यो नही

आगमनं अभ्युत्थानादिकं विहारं कुर्वतोऽनुगमनेन संप्रेषणं इत्यादिकं नोइच्छति पुनर्यः पूजां वस्त्रपात्राहारादि भिरर्चां न इच्छति अपि च पुनर्वन्दनकं द्वादशावर्त्त पूर्वकं नमनं तदपि नवांछति कुतश्चित्पुरुषात् प्रशंसां अपिनो इच्छति स संयतः सम्यक् यतने साध्वनुष्ठाने यत्नं करुते इति संयतः पुनः क्रोट्यः सुव्रतं शोभन व्रतधारकः पुनर्यः सहितः सर्वजीवेषु हितान्वेषी अथवा ज्ञानदर्शनाभ्यां सहितः पुनर्यः आत्मानं कर्ममलापहारेण शुद्धं गवेषयतीति आत्मगवेषकः पुनर्यः तपस्वी ५ जे पुण्णजहाइ जीवियं मोहं वाकसिणंनि अच्छई नरनारिंपजहेस यातवस्सी नयको जहत्तं उवेई स भिक्खू ६ यः पुनस्तं हेतुं जहातितं कं येन हेतुना येन कृतेन जीवितं संयम जीवितव्यं जहाति पुनर्येन कृत्वा मोहं वा मोहनीयं कर्मकषायनो कषाय रूपं

जे कसिणं अहियासए स भिक्खू ॥ ३ ॥ पंतं सयणासणं भइत्तासी उनहं विविहंच दंसमसगं अवग्गमणे असंपहिट्ठे जेकसिणं अहियासए स भिक्खू ॥४॥नोसक्किय मिच्छईन पूयं नोविय बंदणगं कओपसंसं। ससंजए सुव्वए तवस्सी

सूत्र

अहंकार न करे यःक्षमनं पूर्वं आक्रोशवधादिसहेत् साधुः जेसवत्तो आक्रोश वचनताडनादि सर्वसहे ते साधु कहिइ ३ प्रांतं सर्वथा अधमंशय नाशनं सेवित्वाप्रांतं भूंडासणरानहींइत्याद्यशयन आसनसेवेलिइ शीतोष्णं विविधं दंसमसगंसहेतः शीतोष्णडांसमसाखटमल आवीलागांधकांसहे अनाकुल चित्तः असंप्रहर्षः अनाकुल चितथकोरहित क्रोधे हर्षने दुक्ख न करे यः कृत्स्नं समस्तं सहते सभिक्षुः जे सघलुं सहेतेसाधूकहीजे ४ नो सत्कारमिच्छतिनपूजां सत्कारपणिवांछे नहीं पूजापणिवांछे नहीं नापिवंदणगं कुर्वतः प्रसंसावांछति वंदनाकरतां गृहस्थाने प्रसंसान वांछे स संयतः सुव्रतः तपस्वी ते संयत सुव्रत तपस्वीकहीइं संयमसहितः आत्मागवेषकः स भिक्षुः संयमसहित आत्मानोगवेषकते साधूकहीइं५ येन हेतुना पर्यंते जीवं

भाषा

कृत्स्नं संपूर्णं नियच्छति बध्नाति तादृशं नरं नारीं स्त्रीं सदा सर्वदा प्रजह्यात् कोर्थः येन पुरुषस्त्र्यादिना कृत्वा संयमं याति येन कृत्वा मोह कर्मो दयः स्यात् तं प्रति यस्त्यजेत्तमिक्षु रित्यर्थः पुनर्यस्तपस्वी तपोनिरतः पुनर्यः कौतूहलंस्त्र्यादि विषयं अथवा नारकेंद्रजालानि कौतूहलं न चोपसेव्येत स भिक्षु रित्युच्यते ६ छिन्नं सरं भोममं तलिक्षं सुविणं लक्खण दंडवत्थु विज्जं अंगवियारं सरस्सविजयं जोविज्जाहिं न जीवई स भिक्खू ७ पुनः स भिक्षु रित्युच्यते सः कः यः इत्यादिभिर्विद्याभिर्न जीवति आजीविकां न करोति ताः काः विद्याः क्रियते इति छिन्नं वस्त्रादिनां मूषकादिना दग्धनं अग्न्यादि प्रज्वलनं कज्जल कर्दमादिना लिंपनं स्फटनं इत्यादि शुभाशुभविचार सूचिका विद्या छिन्न मित्युच्यते यदाहि वस्त्रे नूतने किञ्चिद्विकारे सति विचारः क्रियते यदुक्तं रत्नमालायां निवसन्त्यमराहि वस्त्रकोणे मनुजाः पार्श्वदशांत मध्ययोश्च अपरेपि च रक्षसां क्षयोंशाः शयनेचा शनपादुकासु चैवं १ कज्जल कर्दम गोमयलिप्ते वाससि दग्धवति क्षुरिते वा चिन्त्यमिदं नवधा विहितेस्मिनिष्ट मनिष्ट फलञ्च सुधीभिः २ भोगप्राप्तिर्देवतांशे नरांशे पुत्राप्तिः स्याद्रा क्षसांशे च मृत्युः प्रांते सर्वांशेप्यनिष्टं फलं स्यात् प्रोक्तं वस्त्रे नूतने साध्वसाधुः इत्यादि विद्यया जीविकां न कुर्यात् स साधुः पुनर्यः सरं इति स्वरविद्यां

मूल

सहिए आय गवेसए स भिक्खू ५॥ जेण पुणो जहाइ जीवियं मोहंवाकसिणं नियच्छई। नरनारिंपजहे सया तव स्सीनय कोऊहलं उवेइ स भिक्खू ६॥ छिन्नं सरंभोम मंतलिक्खं सुविण लक्खण दंडवत्थु विज्जं। अंगवियारं सरस्स

भाषा

त्यजति संयमजीवितेन जे वातकरी संयमजीवित थकुटे ते वात न करे छांडीने कषायादिरूपं मोहनीयं संपूर्णं नेच्छती मोहनीयकर्मसर्वथा न वांछे सर्वथा न करे नरनारीसंगंप्रजहाती स तपस्वी पुरुष नारिनो संगछांडे ते तपस्वी कहीये छोडे सदा न च कुतूहलं करोति स भिक्षू कुतूहल तमासा

प्रयुंक्ते स्वरंहि षड्ज ऋषभगांधार मध्यमः पञ्चमस्तथा धैवतो निषधः सप्ततंत्री कण्ठोद्भवाः स्वराः षडजंरीति मयूरो पञ्चमरागेण जल्पते पर भृत् इत्यादि विद्या इत्यादि सङ्गीतशास्त्रं पुनर्भौमं भूमौ भवंभौमं भूकम्पादि ऋतुं विना वृक्षादिफलनं इत्यादि लक्षणं इत्यादि विद्या पुनरांतरिक्षं अन्तरिक्षे आकाशे भवं आन्तरिक्षं उल्कापात धूमकेतु प्रमुखाणां उदय विचार विद्या स्वप्नं स्वप्नगतं शुभाशुभलक्षणं स्वप्नविद्यां लक्षणं स्त्रीपुरुषाणां सामुद्रक शास्त्रोक्तं तुरग गजादीनां शालिहोत्र गजपरीक्षादिशास्त्रोक्तं दण्डं दण्डविद्या वंशदण्डादि पर्वसंख्याफलकथनं वास्तुविद्या प्रासादानां गृहाणां विचारकथनं वास्तु शास्त्रोक्तं अङ्गविद्या शरीर स्पर्शनस्य नेत्रादीनां स्फुरणस्य वा विचारोक्त विचार शास्त्रं पुनः स्वरस्य विजयः दुर्गा शृगाली वायसतित्तरादीनां स्वरस्य विजयस्तस्य स्वरस्य शुभाशुभ निरूपणाभ्यासः य एताभिर्विद्याभिराजीविकां न करोति सभिक्षुरित्यर्थः ७ मन्तं मूलं विविहं विज्जचिन्तं वमण विरेयण धूमनेत्तसिणाणं आउरे सरणन्ति गच्छियच्च तं परिचाय परिव्वए समिक्खू ८ पुनः सभिक्षुरित्युच्यते स इति कः य एतत् सर्वं परिज्ञाय परिसमन्तात् ज्ञात्वा परिज्ञाय परिव्रजेत् साधु मार्गे चरेत् जाणियव्वानोसमायरितव्वा इत्युक्तेः एतत् किं किं मन्त्रं ओं ह्रीं प्रभृतिकं स्वाहान्तं देवाराधनं मूलं मूलिकाराज हिंसीग्रंथ पुष्पाग्रपुंखादि गुण सूचकं शास्त्रं पुनर्विविधं नाना प्रकारं वैद्यचिन्तावैद्यकशास्त्रस्य औषधचिकित्सालक्षणस्य चिन्तनं वर्जयेद्विदलं

सूत्र

विजयंजो विज्जाहिं न जीवई स भिक्खू ॥ ७ मंतं मूलं विविहं विज्जचिंतं वमण विरेयण धूमनेत्त सिणाणं आउरे

भाषा

नकरेतेसाधू कहोजे६नखवस्त्र दंतादीनांछेदनंपडजातिरागं वस्त्रादिछेदवानालक्षण भूमिकंपहोइतारासुटे उल्कापातहवेआकाशनीवातकहे स्वप्नलक्षणं दंड लक्षणं वास्तुविद्याप्रासादलक्षणंसु पनविचारवस्त्रिसलक्षणपुरुषानां वास्तुकविद्याघरप्रसाददेहरातेहनालक्षणपसुलक्षणघरलक्षणअंगस्फुरणं स्त्रंगालादिशब्दस्य अभ्यासंअंगफरकवानोविचारशियालनावचनसब्दनोविचारयःएताभिः विद्याभिःनजीवति सभिक्षुःजेकोइएतलीविद्याकरीआजीविकानकरे ते सधुकहीजे७

सूत्र

भाषा

सूली कुष्टीमांसों ज्वरोष्टतं इत्यादि पुनर्वमनं वमनादिकरणोपायं अथ वा वमन फलं ज्वरादीवमनं श्रेष्ठं तथा विरेचनं विरे च गुण कथनं तद्दौषध प्रयोगचिन्तनं धूमो मन: शिलादि सम्बन्धी भूत त्रासनादिक: नेत्र शब्देन नेत्र संस्कारकं गुटी चूर्णादिकं स्नानं अपत्यार्थं मन्त्रौषधीभि: संस्कृतजलै र्मूलादि स्नानं अथ वा रोगमुक्त स्नानं वा पुन: आतुरे इति आतुरस्य रोगादि पीड़ितस्य हा मात: इत्यादि स्मरणं आत्मनश्चिकित्सितं रोग प्रतीकार चिन्तनं परित्यजेत् एतत्सर्वं परिज्ञाय आत्मन: परस्य वा उभ यथा परिव्रजेत् साधु मार्गं यायादित्यर्थ: ८ खत्तियगण उग्गराय पुत्तामाहणभोइय विविहायसिप्पिणो नो ते सिंवय इसि लोग पूइयं तं परिन्नाय परिव्वए सभिक्खू ८ सभिक्षुरित्युच्यते स इति क: यस्तेषां गाथा पूर्वोक्तानां श्लोक: कीर्त्ति र्यथा एते भव्या पूजाइति एते पूजा योग्या: एतेषां पूजा कर्त्तव्या: एतेषां कीर्त्तिकरणे एतेषां पूजाया उपदेशे च न कश्चिल्लाभ: स्यात् साधुना एतेषां कीर्त्ति पूजेन कर्त्तव्ये इत्यर्थ: एतेके के येक्षत्रिया: राजान: तथा गणा: मल्लादीनां समूहा: पुनरुग्रा: कोट्टपाला:राज पुत्रा: राजकुमारा: ब्राह्मणा: प्रसिद्धा भोगिनो भोग वंशोद्भवा: अथ वा भोगिनोविषयभोक्तार: च पुनर्विविधानाना प्रकारा: शिल्पिनश्चित्रकर सूत्रधार स्वर्णकारलोहकारादयो ये वर्त्तन्ते

सरणंतिगिच्छियंच । तं परिन्नाय परिव्वए स भिक्खू ॥ ८ खत्तिय गणउग्गरायपुत्तमाहण भोइय विविहाय सिप्पिणो

मंत्रमूलिका विविध वैद्यचिंता मंत्रहरिणे गमेषि प्रमुख मूलं जडी बूटी भांतीनीवैद्यपणानी चिंताकरे औषधकाढाप्रमुखवमनविरेचनधूम्रप्रयोगं स्नान औषधदेईनेवमनकरावे वीरेचादीए गुदाद्वधूआदेई रोगमुक्तिने अर्थे स्नानकरावे आतुरे रोगादीमातपीत्रादिस्मरणंआत्मन:चिगिच्छांरोग आव्या थकां मावापसंभारे एतलां पोताने रोग आव्याथकां न करे अने बीजाने पणिऔषधनकरे एतानि परित्यक्ता परिव्रजेत्सभिक्षु: एतलां वांनाछांडे न करेते साधुकहीइ ८ क्षत्रियादि समूहं उग्र राजपुत्रा: क्षत्रियना समूह कोटवाल राजपुत्रा: राजानना वेटा ब्राह्मणभोगिनिश्रय ब्राह्मण नृपामात्यादय:

तान् परिज्ञाय उभ यथा ज्ञात्वा साधुः साधुमार्गे परिव्रजेत् ९ गिहिणोजे पव्वइएण दिट्ठा अपव्वइएणवसंथुया हविज्जा तेसिं इहलोइय फलट्ठा जोसंथवं नकरेइ सभिक्खू १० यस्तैः गृहस्थैः सह लोक फलार्थं संस्तवं परिचयं न करोति प्राकृतत्वात् तेसिं इति तृतीयास्थाने षष्ठी ते गृहस्थैः कैः ये गृहस्थाः परिव्रजितेन नग्नहीत दीक्षेण दृष्टाःचशब्दः पुनरर्थे पुनरप्रव्रजितेन अगृहीतदीक्षेण गृहस्था अमस्थितेन संस्तुताः कृत परिचयाः तैः सह आलाप संलापं इह लोक स्वार्थायन कुर्यात् स साधुरित्यर्थः १० जङ्किंचि आहारपाणगं विविहं खाइ मसाइमं परेसिंलद्धुं जोतन्तिविहेणनाणु कम्मो मणवयण कायसुसम्बुडे सभिक्खू ११ सभिक्षुर्नभवति सकः यः परेसि इति परेभ्यः गृहस्थेभ्यः आहारं अन्नादिकं पानकं दुग्धादिकं पुनर्विविधं नाना प्रकारं खादिमंखर्जूरादिकं लभ्यतं इति तेन अशनपान खादिमस्वादिमादिना चतुर्विधेन त्रिविधेन मनोवाक्काय योगेन न अनुकम्पते ज्ञानबालादीन्

नोतेसिं वयइ सिलोग पूयं तं परिन्नाय परिव्वए स भिक्खू ॥९॥ गिहिणोजे पव्वइएण दिट्ठा अपव्वइ एणवसंथुया हवेज्जा तेसिंइहलोइय फलट्ठा जो संथवं न करेइ स भिक्खू १०॥ सयणा सणपाण भोयणं विविहं खाइमसाइमं

सूत्र

वीज्ञानोपजीविनः ब्राह्मण राजामेहेता आददेईने प्रधानादिक नीव क्षत्रियादीनां वदति एतेभ्यः ते क्षत्रियादिकनि प्रशंसा न करे एभलापूजवीकरे एसववानांजाणोनेकाडें करे नहो ते भीक्षुसाधूकहीइं ९ ये गृहस्थाः प्रव्रजितेन दृष्टाः जे केईगृहस्थयतीइंदिख्यालेईने दीठाछे परीचयइओछे गृहस्था वस्थायांसुपरिचोताभवंतो अथवा गृहस्थावस्थानापूरा परीचीतछे तेषां इहलोक फलार्थं तेहस्युं इहलोकनेअर्थे यः संस्तवं परिचयं न कुर्यात् स भिक्षुः जे परिचयनकरे ते साधू १० अशनाशनपानभोजनांपाटी वाजोठपाटीया आहारपांणीः विविधं खादिमस्वादीमं परेभ्यः नानाप्रकारना खादि

भाषा

न उप कुरुते कोर्थः यः अशनपानखादिमस्वादिमाहारं लब्धा बालवृद्धानां साधूनां तेनाहारेण सम्विभागं न करोति स साधुर्नभवतीत्यर्थः असम्वि भागीनहु तस्यमोक्खं इत्युक्तेः पुनः साधुः कीदृग् भवति मनो वाक्काय योगेन सुतरां संवृतः पिहिता अवद्वारः ११ सयणा सणपाणभोयणं विविहं खाद्मसाइमं परेसिं अदए पडिसेहि एनियंठे जेतत्थनपउस्सई सभिक्खू १२ पुनर्यः शयनासनपान भोजनं पुनर्विविधं खादिमस्वादिमं परेण गृहस्थेन अदत्ते अथ वा गृहे साधौ प्रतिषिद्धे सति तस्मिन् गृहस्थे प्रद्वेषं न करोति न प्रद्वेषि कोर्थः यदा कश्चित्साधुः कस्यचिद्गृहस्थस्य गृहेगतस्तस्य च गृह स्थस्य गृहे प्रभूतं शयनं शय्याश्च अशनं मोदकादिकं पानं खर्जूरद्राक्षादि पानीयं शर्करादि जलं प्रासुकं तण्डुल प्रक्षालन जलं वा भोजनं तण्डुलदा ल्यादि पुनर्विविध नाना प्रकारं खादिमं खर्जूरनालकेरगरिमादिकं स्वादिमं लवङ्गएलाजातीफलतजादिकं वर्त्तन्ते परं स गृहस्थः साधवेन प्रद दाति अथ पुनर्निवारयति रेभिक्षो अत्रनागन्तव्यं इति तद्वाक्यं श्रुत्वा इति न जानातिधिग्एनं गृहस्थं दुष्टं यः प्रभूते वस्तुनिसतिमक्षं न ददाति

सूत्र

परेसिं अदए पडिसेहिए नियंठे जेतत्थनपओ सई स भिक्खू ॥११॥ जं किंचि आहारपाणं विविहंखाद्मसाद्मं परेसिं लद्धुं जोतंतिविहेणनाणु कंपेमण वयकाय सुसंवडेस भिक्खू ॥१२॥ आयामगंचेव जवोदगंच सीयंसो वीरंच

भाषा

मस्वादिम गृहस्थनों यांनोपनांछे आदेभ्यः प्रतिषिद्धो निग्रंथः यतीजाई जभारक्षा गृहस्थबोल्याजा परहो तुझने नहोद्यां निग्रंथ यः तत्र नग्रहे स्थेत् सभिक्षुः इमसांभलीयतो रौसनकरे कोपनकरे गृहस्थ उपरे ११ यत्किंचित् आहारपाणंच जेकेई आहारपानीं विविधं खादिमस्वादिमंलब्धागृहस्थेभ्यः नानाभांतिनाखादिम गृहस्थनाघरथकीयतोइं लीधाछे लब्धा गृहस्थेनः यः तेन आकारेण विविधेन नानुकंपेत् न निंदयेत् मनोवाक्कायेससंवृतःसः

अथ च मां निवारयति इति द्वेषं न विधत्ते स साधुभिक्षुरित्युच्यते १३ आयामगञ्चैव जवोदगञ्च सौवीरंचजवोदगञ्च नो हीलएपिंडंनीर सन्तुपन्त कुलाइंपरिव्वए सभिक्खू १४ यः प्रान्तानि कुलानि परिव्रजेत् प्रान्तानि दुर्बलानि चित्तवित्ताभ्यां दुर्बलानि एतादृशानि कुलानि आहारार्थं परिव्रजेत् सर्वदाधनिनां एव कुलेषु यो न याति सर्वदादानशौंडानामेव कुलेषु न याति ततो हि नियतपिंडसेवनात् साधोर्धर्महानिः स्यात् तु पुनर्यः आयामकं धान्यस्य अव श्रावणञ्च पुनर्यवोदनं यव भक्तं पुनः शीतं चिरकालीनं पुनः सौवीरं काञ्जिकं पुनर्यवोदकं यव प्रक्षालनजलं इत्यादिकं पुनर्यन्नीरसम्पिंडं सर्वथारसवर्जितं एतादृशं आहारं पानीयं गृहस्थानां गृहालब्धं यो नहीलयेत् न निन्देत् कदन्नमिदं कुत्सितपानीय मेतत् इत्यादि वचनं न ब्रूते स साधुभिक्षुरित्युच्यते १४ सदाविविहाभवन्ति लोए दिव्वामाणुस्सया तहातिरिच्छाभीमाभयभेरवाउरालाजे सुद्धान विहिज्जई सभिक्खू १५ य एतादृशान् शब्दान् श्रुत्वा न विहिज्जई न व्यथते धर्मध्यानान्न चलते सभिक्षुरुच्यते एतादृशान् कीदृशान् ये शब्दा लोके दिव्याः दिविभवादिव्याः देवैर्भयाय कृताः पुनर्ये शब्दाः मानुष्यकाः मनुष्यैः कृताः मानुष्यकाः तथा ये शब्दाइति तिरश्चीनोस्तिरश्चास्तिर्यग्भ्यो भवास्तिरश्चीनाः

सूत्र

जवोदगंच नोहीलए पिंडं नीरसंतु पंतं कुलाइं परिव्वए स भिक्खू ॥१३॥ सदा विविहाभवंतिलोए दिव्वामाणुस्साय

षाभा

भिक्षुः भलो भुंडो आहारपाम्याथके मनवचनकायाइं करीने निंदे नहीं ते साधुकहीजे १२ उष्ण पय अवश्रमण निश्चयेन उसामणि निश्चयपणि यव धान्योदनं वा जवधां नतुं ओदनकहीये आहार शीतलं भक्तं काजिकंच नहीलयेत् पिंडनीरसधां नतुं उसामणजवनुं धोअणसीतलपांणी कांजीनुं पांणीनोरसलाधुंहो ले नही निंदे नहीं दरिद्र गृहाणि परिव्रजेत् स भिक्षुः निरसघरने विषेगोचरीकरे ते साधु कहीइं १३ शब्दा विविधाः भवंति लोके शब्दलोकने विषेभांत२ नाछेदेवकृताःमनुष्यकृताः तथातिर्यग्कृता देवता संबंधिया मनुष्य संबंधिया तिर्यंच संबंधिया रौद्राःअत्यंतभयकराः उदाराः रौद्र

भवन्ति तान् श्रुत्वानचीभं प्राप्नोति कौटश्याः शब्दाः भय भैरवाः भयेन भैरवाः भय भैरवाः अत्यन्तसाध्वसोत्पादकाः पुनः कौटश्याः उदाराः महान्तो भवन्ति १५ वायं विविहंसमेच्चलोए सहिए खेयाणु गए यकोवियप्पापत्ते अभि भूय सव्वदंसी उवसन्ते अविहेडएसभिक्खू १६ यः पुनर्लोके विविधं वादं समेत्य अविहेठको भवेत् कस्य चिद्बोधको न भवेत् कस्य चित्यच्चपातं न कुर्यात् लोके हि बहुनिदर्शनानिसन्ति ते परस्परं वादं कुर्वन्ति अन्योन्यं मतं दूषयन्ति भुंडाजटाधारिभिर्नग्ना वस्त्र धारिभिर्गृहस्थावनवासिभिः इत्यादि स्वस्य मताभिग्रय वचन रूपं वादं कृत्वा कस्यापिं बाधां न कुर्यात् इत्यर्थः कौटश्योयः सहितः ज्ञान दर्शनचारित्र सहितः पुनः कौटश्यः खेदानुगतः खेदयतिमन्दीकरोति कर्म अनेनेति खेदः संयमस्तेन अनुगतः खेदानुगतः सप्तदशविध संयमरतः पुनः कौटश्यः कोविदात्मा कोविदोलब्ध शास्त्र परमार्थं आत्मायस्येति कोविदात्मा पुनः कौटश्यः प्राज्ञः प्रकर्षेण अन्येभ्यः आधिक्येन जानातीति प्राज्ञः सारबुद्धिमान् पुनः कौटश्यः अभि भूय सर्वदर्शी अभि भूय परीषहान् जित्वा रागद्वेषौ निवार्य सर्वजन्तुगणं आत्मसदृशं पश्यतीत्येवं

सूत्र

तहातिरिक्का। भीमाभयभेरवा उरालाजे सोच्चा न विहिज्जइसभिक्खू ॥१४॥ वायं विविहं समेच्चलोएसहिएखेयाणु गए कोवियप्पा। पन्ने अभिभूय सव्वदंसी उवसंतेअविहेडए स भिक्खू ॥१५॥ असिप्पजीवीअगिहेअमित्तेजि

भाषा

वीहामणा भयनाकरणहार उदार प्रधां न यस्तान् श्रुत्वा न विभेति स भिक्षु: जतीयानें सांभलीने धरमध्यां नथी न चले न वीहे ते साधु कहीजे १४ वादं विविधं समेत्य ज्ञात्वा वादव्याकरणना तर्कना बादमत घणाछे लोकने विषे भांति भांतिनाछे गुणैः सहितः संयमवार्ताविचक्षणः आत्मा सर्वागमवेत्ता गुणेकरिसहित संयमनो पालणहार सर्वशास्त्रनो जांण चारित्र सहीत तत्वनांजाण प्राज्ञः बुद्धिमान् परीषहान् जित्वा सर्वदर्शी सर्व आत्मवत् पश्यति उप

शीलः सर्वदशो पुनः कौटश्यः उपशान्तः कषायरहितः स्यात् सभिक्षुरित्युच्यते १६ असिप्प जीवी अगिहे अमित्ते जिइं दिए सव्वओ विप्पमुक्के अणुक्क साईलहुअप्प भक्खो चिच्चागिहं एगचरे स भिक्खुत्तिबेमि १६ स भिक्षुर्भवेत् स इतिकः योगृहं द्रव्यभावभेदेन द्विविधं त्यक्त्वा एकः एकाकी रागद्वेष रहितः असहायो वा चरतीत्येक चरः स्यात् कथंभूतः सः अशिल्पजीवी शिल्पेन विज्ञानेन जीविते आजीविकां करोतीति शिल्पजीवी न शिल्पजीवी अशिल्पजीवी चित्रकरणादिविज्ञाने आजीवीकां न करोतीत्यर्थः पुनः कौटश्यः अगृहः न विद्यते गृहं यस्य स अगृहः स्त्रीपरिचयरहितः अथवा गृहस्थैः सह परिचयरहितः पुनः कौटश्यः अमित्र शत्रुमित्ररहितः पुनः कौटश्यो जितेन्द्रियः पुनः कौटश्यः सर्वतो विप्रमुक्तः बाह्याभ्यंतर संयोगाद्विप्रमुक्तो सर्वपरिग्रहरहितः पुनः कीदृश्यः अणुकषायः मन्दकषायो इत्यर्थः पुनः कौटश्यः लब्धल्पभक्षी लघूनि निःसाराणि वल्लचणनिः पावक कुलत्थमाषादि प्रासुकाहाराणि तानि स्तोकानि भक्षितुं शीलं यस्य स लघुल्प भक्षीनीरसस्तोकाहारकारीत्यर्थः अथवा लघुप्रासुकंच तत् अल्पञ्च लघुल्पं तदाहारं भक्षितुं शीलं यस्य स लघुल्पभक्षी अथ वा लघुः क्षीणकर्मांस चासौ अल्पभक्षी च लघुल्प भक्षी इत्यहं ब्रवीमि इति श्रीसुधर्मास्वामीजंबूस्वामिनं प्राह १६ इति भिक्षुलक्षणाध्ययनं संपूर्णं १५ इति श्रीमदुत्तराध्ययन सूत्रार्थ-दीपिकायां उपाध्याय श्रीलक्ष्मी कीर्त्तिगणि शिष्य लक्ष्मीवल्लभगणिविरचितायां

सूत्र

इंदिए सव्वओविप्पमुक्के अणुक्कसाईलहु अप्पभक्खी। चिच्चागिहं एगचरे स भिक्खूत्तिबेमि ॥१६॥ भिक्खूज्झयणं

भाषा

शांतः हिंसारहितः न कुत्रापि विरोधकारकः स भिक्षु १५ शिल्पैश्चित्रादिभिर्नजीवति चौत्रामकरीवेची आजीविकानकरे अणगारःअमित्रः जितेंद्रियः सर्वतोविप्र मुक्तः इंद्रिजीत्यांके बाह्याभ्यंतर जेगांठिते इथीमूंकाणाके स्वल्पकषायःलघु अल्पजीवी थोडो कषाय थोडो जीमेके त्यक्ताग्रहं रागद्वेषं रहितः विचरेत् स भिक्षः घरछोडीने रागद्वेषरहित विचरेते साधु कहीजे १६ इति भिक्षु अध्ययनं संपूर्णम् १५ श्रुतंमया हे आयुष्मन् हे चिरंजीवी शिष्यमें

भिक्षु लक्षणाध्ययनं पञ्चदशं संपूर्णं १५ अथ षोड़शं अध्ययनं प्रारभ्यते ॥ पञ्चदशेऽध्ययने हि भिक्षु गुणा उक्ताः ते भिक्षु गुणा हि ब्रह्मचर्ययुक्तस्य साधोर्भवन्ति अतः षोड़शे अध्ययने ब्रह्मचर्यस्य समाधिस्थानानि उच्यन्ते सूत्रं सुअंमे आउसन्तेणं भगवया एव मक्खायं इह खलुथेरेहिं भगवन्तेहिं दसबंभचेर समाहिट्ठाणापन्नत्ताजेभिक्खू सुच्चानिसम्म संजमबहुले संवर बहुले समाहि बहुले गुत्ते गुत्तिन्दिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा श्रीसुधर्मा स्वामी स्वशिष्यं जंबुस्वामिनं प्राह हे आयुष्मन् मे मया श्रुतं तेणं इति तेन भगवताज्ञानवतातीर्थ करेण आख्यातं श्रीमहावीरेण स्वामिना उक्तं आसन्नत्वात्तस्यैवग्रहणंपुनरिह श्रीजिनशासनेस्थविरैर्गणधरैर्भगवद्भिर्माहात्म्यवद्भिस्तीर्थकरोक्तार्थधारणशक्तिमद्भिर्दश ब्रह्मचर्यसमाधिस्थानान्युक्तानि ब्रह्मचर्यस्थैर्यस्य कारणान्युक्तानि कोर्थः मम एषाबुद्धिर्नास्ति किन्तु तीर्थकरैः पुनर्गणधरैर्गौतमादिभिः स्वापेक्षया वृद्धैरेवमुक्तं तथैवमयोच्यते यानिब्रह्मचर्यसमाधिस्थाना निभिक्षुः श्रुत्वा शब्दतः श्रवणेकृत्वानिश्चम्य अर्थतो मनसि अवधार्यसंयम बहुलः सन् बहुलः प्रधान प्रधानतर स्थानप्राप्तया उत्तमः संयमो यस्य स बहुल संयमः वर्द्धमान परिणामचारित्रः सन् विहरेत् पुनर्यानि ब्रह्मचर्य समाधिस्थानानि श्रुत्वा भिक्षुर्गुप्तो मनोवाक्काय गुप्तियुक्तः सन् अतएव गुप्तं नवगुप्ति

सूत्र

समत्तं १५॥ सुअंमेआउसंतेणं भगवया एवमक्खायं इहखलुथेरेहिं भगवंतेहिंदसबंभचेर समाहिठाणापन्नत्ताजेभिक्खू सोच्चानिसम्म संजम बहुले संवरबहुले समाहिबहुले गुत्तेगुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जा कयरे

भाषा

सांभल्यो भगवता एवं अख्यातं कथीतं भगवंते श्रीमहावीरे इमकह्यु इह प्रवचने निश्चयेनस्थविरैः भगवद्भिः इहजिन शासनने विषेस्थविर भगवंते ते दसब्रह्मसेवन समाधिस्थानानि कथितानि दशब्रह्मचर्यना समाधिस्थानकप्ररूप्या ऋषिश्वरेकह्या १ यानि भिक्षुः श्रुत्वा ये साधु भगवंत

सेवनात् गुप्तं सुरक्षितं ब्रह्मचर्यं चरितुं सेवितुं शीलं यस्य स गुप्त ब्रह्मचारीस्थिर ब्रह्मचर्यधारकः सन् सदासर्वदा अप्रमत्तः अप्रमादी सन् विहारं कुर्यात् यतो हि पूर्वं यः साधुर्ब्रह्मचर्यसमाधिस्थानानि शृणोति स साधुर्ब्रह्मचर्यपालनेस्थिरोभवति यदुक्तं सुच्चा जाणइ कल्लाणं सुच्चाजाणइ पावगं उभयंपिजाणई सोच्चा जंसेयन्तं समायरे इति श्रुत्वाजंबूप्राह कयरेखलुथेरेहिं भगवन्तेहिं दसबम्भचेर समाहिट्ठाणापन्नत्ता जेभिक्खू सुच्चानिसम्म सञ्जमबहुले सम्बरबहुले समाहि बहुले गुत्ते गुत्तिं दिए गुत्तबम्भयारी सया अप्प मत्ते विहरेज्जा हे स्वामिन् यानि ब्रह्मचर्यसमाधि स्थानानि भिक्षुः साधु शब्दतः श्रुत्वा अर्थतः हृदयवधार्य संयम बहुलः सम्बर बहुलः समाधि बहुलः गुप्तो गुप्तेन्द्रियः गुप्त ब्रह्मचारी सदा अप्रमादी विहरेत् तानि खलु निश्चयेन कतराणिकानि ब्रह्मचर्य समाधि स्थानानि तैः स्थविरैर्भगवद्भिर्दश ब्रह्मचर्यसमाधिस्थानानि प्रतिपादितानि यानि भिक्षुः श्रुत्वानिशम्य संयम बहुलः

सूत्र

खलुतेथेरेहिंभगवंतेहिं दसबंभचेरसमाहिठाणापन्नत्ता जेभिक्खूसोच्चानिसम्मसंजमबहुलेसंवरबहुले समाहि बहुले गुत्ते गुत्तिंदिए गुत्तबंभयारीसयाअप्पमत्तेविहरिज्जा इमेखलुते थेरेहिंभगवंतेहिंदसबंभचे रसमाहिठाणापन्नत्ताजे

भाषा

निशम्य अवधार्यहियांमांहे अवधारीने समाधि बहुलः संजमपाले पापनेरोकता संवरबहुलः संवरकरे समाधि बहुलः आपणोचित्तठामिराखे गुप्तः गुप्तेंद्रियः शरीरपांचेंइंद्रीगोपवीराखे गुप्तब्रह्मचर्यधारी गुप्तब्रह्मचर्यनोधारी सदा अप्रमत्तो विचरेत् सदासर्वदा अप्रमत्तथको विचरे २ कतराणि निश्च येनस्थविरेगणधरे ते शिष्यपूछे हे पूज्यतेस्थानकस्थविर भगवंते दशब्रह्मसेवनस्थान समाधीस्थानानि कथीतानि दशब्रह्मचर्यनास्थानकह्यां ३ अमुनि निश्चयेन स्थविरैः भगवद्भिःए निश्चयस्युं स्थविरे भगवंत दश ब्रह्मसेवन समाधिस्थानानि कथितानि दशविध ब्रह्मचर्य समाधिस्थान कह्या यः भिक्षुः

सम्वर बहुलः गुप्तः गुप्तेन्द्रियो गुप्त ब्रह्मचारी सदा अप्रमत्तः सन् विहरेत् इति जंबूस्वामिनः प्रश्नवाक्यं श्रुत्वासुधर्मास्वामी प्राह इमे खलु तेथेरेहिं भगवन्तेहिं दसबम्भवेरसमाहिट्ठाणा पन्नत्ता जेभिक्खू सुच्चानि सम्मसंयमबहुले सम्वर बहुले समाहि बहुले गुत्ते गुत्तिं दिए गुत्तबम्भयारी सया अप्पमत्ते विहरेज्जा हे जंबू इमानि प्रत्यक्षं वक्ष्यमाणानि खलुनिश्चयेन तानिस्थविरैर्भगवद्भिर्दशब्रह्मचर्य समाधिस्थानानि श्रुत्वा श्रुत्वानि श्रुत्व अर्थतोऽभ्युपधार्यभिक्षुः साधुः संयम बहुलः समाधि बहुलो गुप्तोगुप्तेन्द्रियो गुप्त ब्रह्मचारी सर्वदा अप्रमत्तः अप्रतिबद्धविहारीसन् विचरेत् तानि समाधि स्थानानि निरूपयति तं जहा विवित्ताइं सयणासणा इं से विज्जा सेनिग्गंथेनो इत्थी पसुपंडगसंसत्ता इस यणासणाइं सेवित्ताहवइ सेनिगन्थे तद्यथा तानि यथा सन्ति तथा निरूपयामि हे जंबूसनिग्रन्थो भवेत् स इति कः यो विवक्तानि स्त्री पशु नपुंसकपंडगादिभि विरहितानि श्रयमानि पटिकासंस्तारकादीनि अर्थात् श्रयना

भिक्खू सोच्चानिसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्तेगुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरिज्जातं जहा विवित्ताइं सयणासणाइं सेविज्जा सेनिग्गंथेनोइत्थीपसुपंडग संसत्ताइं सयणासणाइं सेवित्ता हवइ तं

स्थानानि श्रुत्वा अर्थतो निसम्य संजम बहुले साधूचारित्रि या जेस्थानकनेसांभली संयमपाले आश्रवेकरीरहित घणी समाधिसहित गुप्तेंद्रियः इंद्री गुप्तकीधांछे नवगुप्ति सेवनात् नववम्हचर्यनी वाडिपाले सदा अप्रमत्तो विहरेत् सदासर्वदा अप्रमत्तथकोविचरे तं जहा ४ विवित्तानि श्रयनासनादि फलकपादप्रोंछनानिसेवते विविक्त कहतां एतलेवनेरहित उपाश्रयादिक सेवेतेनि ग्रंथ साधू कहीये स्त्रिपसूपंडके करीअना कीर्ण अध्यासरहीत नोस्त्रीपशुत्रोवश्यासानि श्रयनासनानि नहीस्त्रीतिरयंचनपुंसकेकरी श्रयनासन व्याप्तछआछे श्रयनासनादी सेव्यमानस्य श्रयनासन सेवताथका

दीनां स्थानानि सेवेत कायेन अनुभवेत् अयं अन्वयार्थः यः स्त्री पशु पंडकादि रहितस्थानानि सेवेत सनिग्रन्थो भवेत् इत्यर्थः अथ व्यतिरेकेण अर्थमाह यस्मिन् सति यद्भवेत् सोन्वयः यस्मिन् असति यत्र भवेत्सव्यतिरेकः व्यतिरेकं दर्शयति नो इत्थी पसुपंडगसं सत्ताइं सयणासणाइं सेवित्ताहवइसेनि गन्थे हे जंबूसनिग्रन्थो नो भवेत् सकः यः स्त्री पशुपंडकादिभिः सेवितानां शयनासनानां सेविता उपभोक्ता भवेत् इति वचनं श्रुत्वा शिष्यः प्राहः तमिति आयरियाह हे स्वामिन् तत् पूर्वोक्तं कथं केनोत्पत्ति प्रकारेणेति चे देवं यदि मन्यसे इति शिष्येण प्रष्टव्ये सति आचार्य आह निग्गन्थस्सखलु इत्थि पसुपण्डगसंसत्ताइं सयणासणाइं सेवमाणस्सबम्भयारिस्सबम्भचेरेसङ्कावाकङ्कावाविति शिच्छावा समुप्पज्जिज्जा भेयंवालभेज्जउम्मायं वापा उणिज्जादीहकालियंवा रोगायंकंहविज्जा केवलिपण्णत्ताओ धम्माओभंसेज्जा तम्हाखलुनो इत्थि पसुपण्डगसंसत्ताइं सयणासणाइं सेवित्ताहवइसे निग्गन्थे १ हे शिष्यखलु निश्चयेन स्त्री पशुपण्डकादिभिः संसक्तानिशयनासनानि सेव्य मानस्य निग्रन्थस्य ब्रह्मचर्यधारिणोपि साधोर्ब्रह्म चर्यशङ्का उत्पद्यते इमां स्त्री सेवेवानसे वे वा अथ वा अन्येषा मपि स्त्रीपशुपण्डकादि सहितं स्थाने स्थितं ब्रह्मचारिणं साधुं दृष्ट्वा शङ्काउत्पद्यते कि मयं एतादृशो विरुद्धानां शयना सनानां सेवी ब्रह्मचारो भवेत् नवा आत्मनस्तु स्त्यादिभिरत्यंन्तापहृत चित्ततयामिथ्यात्वो दयादेव स्त्री सेवने मैथुने नवलक्ष्य सूक्ष्म जीवानां बधोजिनैः प्रोक्तः

सूत्र

कहमितिचेआयरिआह निग्गंथस्सखलु इत्थि पसुपंडग संसत्ताइं सयणा सयणाइं सेवमाणस्सबंभयारीस्स बंभचेरेसं

षाभा

तियेंकरोसंसक्त आकीर्ण व्याप्तसहित शयनाशनादिसेवणहारहुवे नहीं ते निर्ग्रंथ साधुहुवे ५ आचार्याः आहः गुरुकहेछे निर्ग्रंथस्य निर्ग्रंथ साधुने निश्चयेन खलु स्त्रीतीवपशुव्याप्ता निस्त्रीपशु नपुंसकसहित शय्याशनादि सेव्यमानस्य शयन आसन सेवतां सेव्यमानस्य ब्रह्मचारिणः ब्रह्मचारीने ब्रह्मचर्ये ब्रह्मचर्यने विषे शंका उपजे कंखावांछा उपजे एषैव एव विधा स्वरूपाइति स्त्यादीनां वांछाकिमेतत्कष्टफलभावि विगतेच्छावेति समुत्पद्येत चारित्रस्य

तत्सत्यं वा इत्यादि रूपः संशय उत्पद्यते पुनर्ब्रह्मचारिणः कांक्षा स्त्री पशुषण्डकादिभि मैथुनेच्छा उत्पद्यते पुनर्ब्रह्मचारिणः साधोर्ब्रह्मचर्यं विचिकित्सा उत्पद्यते मया ब्रह्मचर्यपालने एतावन्महत्कष्टं विधीयते तस्य ब्रह्मचर्यकष्टस्य फलं भविष्यति नवा तस्मादहमेतेषां सेवनं एतेषां सेवने नतु सांप्रतं मम सुख जायते एतादृशीमतिः समुत्पद्येत वा अथ वा भेदश्चारित्रस्य विदारणं विनाशं लभेत् वा अथ वा उन्मादं कामिन पारवश्यं प्राप्नुयात् वा अथ वा तादृशे स्त्यादि सहितानि स्थानानि सेव्य मानस्य साधोर्दीर्घकालिकं प्रचरकाल भाविस्त्यादि सेवनाभिलाषोत्कर्षतः आहारादौ अरुचिर्निद्रारात्रित्वादि दोषै रोगोदाघज्वरादिः आतंकः शीघ्र घाती शूलादिः रोगश्च आतङ्कश्च अनयोः समाहारो रोगातंकशरीरे भवेत् यतो हि कामाधिक्यात् कामिनांशरीरे दशकाम भावाजायन्ते यदुक्तं प्रथमे जायते चिन्ताद्वितीये द्रष्टुमिच्छति तृतीये दीर्घनिः श्वास चतुर्थे ज्वरमादिशेत् पञ्चमे दग्धे ते गात्रं षष्टे भक्तं नरो चते सप्तमेच भवेत्कम्प उन्मादश्चाष्टमे तथा नवमे प्राण सन्देहो दशमे जीवितत्यजेत् कामिनं मदनोद्दिगा दशसञ्जायतेह्यमी इति स्त्री दर्शनादशभावा

कावा कंखावा वितिगिच्छावा समुप्पज्जिज्जा भेयंवालभिज्जा उम्मायंवा पाउणिज्जा दीहकालीयंवारोगायंकं हविज्जा केवलिपन्नत्ताओ धम्माओभंसिज्जा तम्हाखलुनोइत्थिपसुपंडग संसत्ताइंसयणासणाइं सेविज्जा भवइ सेनिग्गंथे ॥१॥

सूत्र

भाषा

विनाशलभेतेफलप्रति संदेहऊपजे होयके न होइ भेदचारित्रनो नासपामे उन्मादं कामग्रहं वा अथवा प्राप्नुयात् उदमाद उपजे प्रभूतकालिभावी दीर्घकालताइं दाघज्वरादिशूलकादिरोगातंकोभवेत् दाघज्वरादीक रोग ऊपजे केवली प्रज्ञप्तात् धर्मात् भ्रंश्यते केवलीनो भाषो धर्मथी भ्रष्टहवे तस्मात् न पशु क्लीव व्याप्तानि तस्मात् तिणे कारणे निर्ग्रंथ स्त्री पशु नपुंसक शयनासनादि सेवनात् शयनासन सेवेनही स निर्ग्रंथो

उत्पद्यन्ते अथ पुनः केवलि प्रज्ञप्तात् केवलि प्रणीतात् धर्मात् श्रुत चारित्र रूपात्भ्रश्येत् धर्माद्भ्रष्टो भवेत् तस्मात् एतेषां दूषणानां प्रादुर्भावात् खलु निश्चयेन स्त्री पशु पण्डक संसक्तानांशयनासनस्थानानां सेविता उपभोक्ताभिक्षुर्नोभवेत् सनिग्रन्थो भवेत् इति प्रथमं ब्रह्मचर्य समाधिस्थानं एषा प्रथमा ब्रह्मचर्यतरोर्वाटिका १ नो निग्गन्थे इत्थीणं कहं कहेत्ता हवइसे निग्गन्थेतं कहं मिति चेआयरियाह निग्गन्थस्स खलु इत्थीणं कहं कहेमाणस्सबम्भया रिस्स बम्भचेरेसङ्काशाकङ्खावाविति किच्छा वा समुप्पज्जिज्जा भेयं वालभेज्जा उम्मायं वा पाउणिज्जादीहकालियं वारोगायं कंहविज्जा केवलिपन्नत्ताओ धम्मा ओ भंसेज्जा तम्हा खलु निग्गन्थे नोइत्थीणं कहं कहेज्जा २ सनि ग्रन्थो भवति स इति कः यः स्त्रीणां अर्थात् एकाकिनीनां स्त्रीणां एव कथां वाक्य प्रबन्ध रूपां वार्त्तां अथ वा स्त्रीणां जाति कुलनैपथ्य विषयां पद्मिनी चित्रिणी हस्तिनी शङ्खिनी मुग्धामध्या प्रौढादि रूपां कार्णाटलाट सिंहल देशोद्भवानां नारीणां वर्णना रूपां वा कथां प्रति कथयितान भवति स साधुर्भवतीत्यर्थः स्त्रीणां एकां कथां अथवा स्त्रीणां एव वर्णनं करोति स साधुर्नस्यादिति भावः इत्युक्ते शिष्यः प्राह तत्कथमिति चेदेवं यदि मन्यसे आचार्य आह हे शिष्य खलु निश्चयेन निग्रन्थस्य साधोः स्त्रीणां कथा कथ मानस्य ब्रह्म

नोनिग्गंथेइत्थीणं कहंकहित्ता हवइसेनिग्गंथेतंकहमितिचेआयरियाह । निग्गंथस्स खलुइत्थीणं कहंकहेमाणस्स बंभ यारिस्स बंभचेरे संकावा कंखावाविति गिच्छावा समुप्पज्जिज्जा भेयंवालभिज्जा उम्मायंवापाउणिज्जादीहकालियंवारो

भवति तेनिग्रंथ साधूहोइ ६ न स्त्रीणां कथां कथयिता भवति निग्रंथः साधु भगवंत स्त्रीनीं कथा न कहे ते निग्रंथ तत् कथमितीचेत् शिष्यपूछे स्वामीस्त्रीनी कथाकां न कहे आचार्य्या आहुः गुरुकहे निग्रंथस्य साधो खलु निश्चयेनः स्त्री कथां वार्त्तां कथयतोयती स्त्रीनीं कथाकहतुयको ब्रह्म चारिणः ब्रह्मचारिने ब्रह्मचर्य ब्रह्मवर्यनेविषे शंका स्त्रीं सेवेनवा कांक्षाशंका ब्रह्मचर्य पालन फल भविर्थाति नवाइति धर्मे संदेह समुत्पद्यते सम्यक्

चारिणीपि ब्रह्मचर्ये शङ्का एनां सेवामि न सेवामि वा इत्यादि रूपा वाऽथवा आकांक्षाऽऽदयेतनानां पदानां पूर्ववदेय अर्थोज्ञेय: नवरं तस्मा इति तस्मात् शङ्कादि दोष प्रादुर्भावात् खलु निश्चयेन निग्रन्थः स्त्रीणां एवाग्रे स्त्रीणामिव वा केवलां कथां न कथयेत् २ इति द्वितीयं ब्रह्मचर्य समाधिस्थानं एषाद्वितीया वा टिका अथ तृतीया माह नोनिग्गन्थो इत्थीहिं सद्धिं संनिसिज्जागए विहरित्ताहवइसेनिग्गन्थे तं कहमिति चेत् आयरियाहनिग्गन्थस्स खलु इत्थीहिं सद्धिं सन्नि सिज्जागयस्स विहरमाणस्स बम्भयारिस्स बम्भचेरेसङ्का वा तम्हा खलुनो निग्गन्थे इत्थीहिं सन्नि सिज्जागए विहरेज्जा ३ सनिगन्थो भवेत् यः

गायंकंहविज्जा केवलिपन्नत्ताओ धम्माओभंसिज्जा तम्हाखलुनोनिग्गंथे इत्थीणं कहं कहेज्जा ॥२। नोनिग्गंथोइत्थीहिंस द्धिंसंनिसिज्जागए विहरित्ता हवइसेनिग्गंथे तं कहमितिचे आयरिआहनिग्गंथस्स खलुइत्थीहिंसद्धिंसंनि सिज्जागयस्स

सूत्र

अथ राज्ञा मुनीश्वरण वन्दना कृता ततो नन्तरं स भगवान् जानाति यय युक्तो नगारः साधुर्मौनेन ध्यानं आश्रितः सन् पिण्डस्थ पदस्थ रूपस्थ रूपातीता दिकं ध्यायन् अथ वा धर्मध्यानं आश्रितः सन् राजानं संयत भूपं प्रति न निमंचयति न जल्पयति ततस्तस्मात्कारणात् मुनेरभाषणात् राजा भय द्रुतो भयभ्रान्तो भूत् इति वक्ति च ९ सञ्जओ अहमस्मीति भयवं वाहराहिमे कुद्धे तेएण अणगारे डहेज्जनरकोडिए १० किं वक्ति तदाह राजामनसि एवं जानातिस्म अयं साधुर्मानीं चांज्ञात्वा किञ्चिद्विरूपं त्वरितं मा कुर्यात् तस्मात् स्वकीयं नृपत्वं स्व नाम सहितं अवादीत् इति भावः हे भगवन् अहं संयतो राजास्मि इति हेतो हे भगवन् मैव्याहरमाञ्जल्पय हे स्वामिन् भवादृशः साधुः क्रुद्धः सन् तेजसा तेजो लेश्यादिनानरकोटिन्दहेत् तस्मात् स्वामिना क्रोधो न विधेय १० अभयं पत्थि वा तुज्झं अभयदाया भवाहिय अणिच्चेजीवलोगं मिकिं हिं साएपसज्जसि ११ तदा मुनि राह हे पार्थिव हे राजन्

सूत्र

यवं अणगारेज्झाणमस्सिए। रायाणं नपडिमंतेइतओराया भयद्दुए ९॥ संजओ अहमस्मीति भयवं वाहराहिमे।
कुद्धे तेएण अणगारे डहेज्ज नरकोडीओ १०॥ अभयं पत्थिवातुज्झं अभयदाया भवाहिय। अणिच्चे जीवलोगंमि

भाषा

सन् स भगवान् हवेते साधूमौनकरीवैठाछे अणगारो ध्यानमाश्रितः स्थितः साधूध्यानध्यायछे ध्यानमाहिं वर्त्तेछे राजानंनप्रतिमंत्रयति तिणेकारणे राजाने बोलाव्यो नहीं ततो राजा भयद्रुतभयभीतोजातः तिवारेराजा भयभ्रांत हुओ ९ संयतोनामा अहमस्मि संयतनामे राजाहुंकुं अनेरोनथी हे भगवन् आलापय मांव्याहरमुझने बोलावो मुझस्युंवातकरो कुपितः सन्तेजसा अणगारकोप्योथको यतीतेजे करीनेदहेश्वर कोटी: मनुष्यनीकोडिने बाले १० ऋषि रुवाचःअभयदानंभोपार्थिव तुभ्यं भो राजा तुझने अभयदानछे अभयदाता भवभवानपिजिममेतुझनेअभयदानदीधुतिमतुं सर्वजीवने अभयदानदे अनित्ये

तुभ्यं अभयं भयं मा भवतु त्वमपि अभय दाता भवाहि इति भव च इति पाद पूरणे जीवानां अभयदानं देहि जीवानां हिंसां माकुरु इत्यर्थः हे राजन् अनित्ये जीवलोके संसारे किं इति किमर्थं हिंसायां प्रसज्जसि प्रकर्षेण सज्जो भवति जीवलोकस्य अनित्यत्वेत्वमपि अनित्योसि किमर्थं प्राणि वधं करोषि इत्यर्थः ११ जया सव्वं परिच्चज्ज गन्तव्वमवसस्सते अणिच्चे जीवलोगंमि किं रज्जंमिपसज्जसी १२ हे राजन् यदा सर्व्वं अन्तः पुरादिकं कोष्टागार भण्डागारादिकं परित्यज्यते तव परलोके गन्तव्यं वर्त्तते कथं भूतस्य ते अवशस्य परवशस्य मरण समये जीवोजानाति न म्रियते परं किं करोति जीवः परवशः सन् स्वेच्छांविना एव जीवो म्रियते यदुक्तं सव्वे जीवावि इच्छन्ति जीविओनमरिज्जओ तेन हे नृप तव सर्वं परित्यज्यमर्त्तव्यमस्ति तदा अनित्ये जीवलोके अनित्ये संसारे किं राज्ये प्रसज्जसि प्रसङ्गं करोषि गृद्धो भवति १२ जीवियं चेव रूवञ्च विज्ज सम्पायञ्चञ्चलं जत्थतं मुज्झसीरायं पिच्चत्थं ना

सूत्र

किंहिंसाए पसज्जसी ११ ॥ जयासव्वं परिच्चज्ज गंतव्व मवसस्सते । अणिच्चे जीवलोगंमि किंरज्जंमि पसज्जसी १२
जीवियंचे वरूवंच विज्जुसंपायचंवलं जत्थतं मुज्झसीरायं पेच्चत्थं नावबुज्झसे १३ ॥ दाराणिय सुयाचेव मित्ताय तह

भाषा

जीवलोके अनित्यके जीवलोक मनुष्य पणुं कथं हिंसयांसज्जो भवसि कांहिंसाने विषे आसक्तथाइके ११ हे राजन् यस्मात् सर्वंपरित्यज्यजिणे कारणे सघलुं छांडोने गंतव्य अवश्यते तयाते अवश्य परलोक जावुंछे अनित्ये जीवलोकेएअनित्य जीवलोक मनुष्य पणुं किं राज्ये प्रसज्जसि अहो राजाए राज्यने विषे आसक्तइओछे १२ हे राजन् जीवितव्यं रूपंच अहो राजाएआउखूने रूप विद्युत्संपात वच्चंचलंवर्त्तते वीजलीनोझबकारते सरिषुंचंचलछे यत्वं मुह्यसे हे राजन् हे राजा एह जीवितव्यने विषे तूं मोहपामेछे मूर्छाइछे परलोकार्थंत्वं न जानासि परलोकार्थ तुंकांइ समझतू नथी १३

वबुज्झसि १३ हे राजन् जोवितं आयुः च पुनः रूपं शरीरस्य सौन्दर्यं विद्युत्सम्पातचञ्चलं वर्त्तते विद्युतः सम्पातश्चलनं तद्वत् चञ्चलं वर्त्तते हे राजन् यत्र यस्मिन् आयुषि रूपे चलं मुह्यसे मोहं प्राप्नोषि प्रेत्यार्थं परलोकार्थं नावबुध्यसे न जानासि १३ दाराणि य सुया चेव मित्तायतहबन्धवा जीवं तमणु जीवन्ति मयं नाणुव्वयन्ति य १४ हे राजन् दाराः स्त्रियः च पुनः सुताः आत्मजाः पुनर्मित्राणि तथा बान्धवाः ज्ञातयो भ्रातृ प्रमुखा एते सर्वेपि जीवन्तं मनुष्यं अनुजीवन्ति जीवतो धनवतः पुरुषस्य पृष्टे उदर पूर्त्तिं कुर्वन्ति तस्य द्रव्यं भुञ्जन्ति इत्यर्थः परं तं पुरुषं मृतं न अनुव्रजन्ति मृतस्य तस्य पुरुषस्य पृष्टे केपिन व्रजन्तीत्यर्थः तदा अन्यद् हादिकं किं पुनः सहयास्यतीति अतः कृतघ्नेषु आदरो न विधेयः तस्मात्परिकरेकोरागः कर्त्तव्यः १४ नीहरन्ति मयं पुत्तापि पयरं परमदुक्खियापि पयरोवितहा पुत्तो बन्धूरायातवं चरे १५ हे राजन् पुत्राः मृतं पितरं नीहरन्ति गृहान्निः कासयन्ति कीट्टशाः

बंधवा। जीवंत मणुजीवंति मयंनाणुव्वयंतिय १४ ॥ नीहरंति मयंपुत्ता पियरं परमदुक्खिया। पियरोवि तहा पुत्ते बंधूरायं तवंचरे १५ ॥ तओतेणज्जिएदव्वेदारेय परिरक्खिए कीलंतन्ने नरायं हट्ठतुट्ठ मलंकिआ १६ ॥ तेणा

स्त्रीयःस्त्री सुताः पुनः पुत्रतिमः मीत्राणि तथा बांधवाः मित्र तथा भाई तदुपार्जितं वित्ताद्युप भोगं अनुगच्छंति जीविते जीवतांथकां पुठे लागे सेवाकरे मृतेनानुगच्छंति साई पणिमूयापछी सांथे कोइ नजाइं १४ निष्काशयंति मृतं पुत्राः पिताभरे तिवारे पुत्र कहे वेगोकाढो पितरं परमदुक्खिताः पिताने परमदूक्खिथका पितरोऽपि तथापुत्रान् निष्कासयति पितापणि पुत्रने काढो मूआने बांधवाः वंधून् भो राजन् तस्मात्तपश्चर भाइ भाईने काढे तिणि कारणे राजा तप करि १५ ततो मरणानंतरंतेनार्ज्जितेनद्रव्येण तिवारे पछी पुत्र ते तात नो उपायो द्रव्य दारेषु च परिरक्षितेषुः अने स्त्रीभली परिराखी

पुत्राः परम दुःखिताः अत्यन्तं शोकार्दिताः पितरोपि जनका अपि तथा तेन प्रकारेण पुत्रान् मृतान् निःकाशयन्ति एवं बान्धवाः बान्धवान् मृतान् निःकाशयन्ति तस्मात् एवं ज्ञात्वा हे राजन् तपश्चरेत् तपः कुरु इत्यर्थः १५ तओतेणेज्जिएदव्वे दारेय परिरक्खिए कोसं तत्थे नरारायं हट्ठं तुट्ठ मलं किया १६ ततो निःसरणानन्तरं ते नैव पित्राद्यर्जितधनेन च पुनर्दारेषु स्त्रीषु हे राजन् अन्ये नराः क्रीडन्ति स्वामिनिमृते सति तस्य धने तस्य स्त्रीषु च अपरे मनुष्याः हृष्ट तुष्टं यथास्यात्तथाहर्षिताः सन्तुष्टाः सन्तः अलङ्कृताः अलङ्कारयुक्ताः सन्तश्च क्रीडां कुर्वन्ति कथं भूते धने परिरक्षिते समस्त प्रकारेण चौराग्नि प्रमुखेभ्यः रक्षिते यावत् स जीवति तावत् धनस्य स्त्रीणाञ्च रक्षां कुरुते मृते सति अन्ये भुञ्जन्ति धन स्त्री प्रमुखाः पदार्थास्तत्रैव तिष्टन्ति न च सार्धं समायान्ति कोर्थः वराकोजनः दुःखेन द्रव्यं उत्पाद्य यत्नेन रक्षति दारान् अपि जीवितव्य मिवरक्षति अलङ्कारैर्नवैर् जयति तस्मिन् मृते सति ते नैव वित्तेन तैरेवदारैश्च अन्ये हृष्टाः शरीरे पुलकादिमन्तः तुष्टा आन्तर प्रीतिभाजोलङ्कृता विभूषिताः सन्तोरमन्ते यतः ईदृशी भव स्थितिरस्ति ततो हे राजन् तपश्चरेत् तपः कुर्यादिति संबंधः १६ तेणा विजं कयं कम्मं सुहं वाज इवा दुहं कम्मुणातेण संजुत्तो गच्छई उपरं भवं १७ तेनापि मरणोन्मुखेन जीवेन यत् शुभं कर्म अथ वाऽशुभं कर्म कृतं भवेत् सुखं दुक्खं वा उपार्जितं स्यात् तेन शुभाशुभ लक्षणेन कर्मणा संयुक्तः सन् स जीवः परं भवं गच्छति एतावता जीवस्य सार्धं अन्यत् किं मपि नायाति स्वोपार्जितं शुभाशुभं कर्म सार्धं समागच्छति १७ सोऊण तस्सतो धम्मं अणगारस्स अन्तिए महया

विजं कयं कम्मं सुहं वा जइ वा दुहं। कम्मुणा तेण संजुत्तो गच्छई उ परं भवं १७॥ सोऊण तस्स सो धम्मं अणगारस्स

इती भो राजन् अन्ये नराः क्रीडंति भुंजंतिते द्रव्य अने स्त्री तेहने वीजा पुरुष भोगवे रुष्टा तुष्टा अलंकृताः हर्षितहुआथका संतोष पामें भलांकूरडा यहणापहरे १६ येनापि यत्कृतं कर्मजोणि जीवे जे कर्मकीधांछे शुभं अथवा अशुभं भलुं अथवा भूंडुं कर्मतेनेव संयुक्तः तेजकर्म साथे गच्छति परंभवं

सव्वेयनिव्वेयं समावन्नो नराहिवो १८ स संयतो राजा महयाइति महासव्वेगं निर्वेदं समापन्नः सव्वेगस्य निर्वेदस्य सव्वेगनिर्वेद सम्वेगोमोक्षाभि लाषः निर्वेदः संसारादुद्विग्नता स राजा उभयं प्राप्तः इत्यर्थः किं कृत्वा तस्य अनगारस्य साधोः अन्तिके समीपे धर्मं श्रुत्वा १८ संजओ चइउं रज्जं निक्खंतोजिणसासणे गद्दभालिस्सभगवओ अणगारस्स अन्तिए १९ संयतो राजा गर्दभालि नाम्नोऽनगारस्य अन्तिके समीपे जिनशासनेवीतराग धर्मे निःक्रान्तः समागतः संसाराद्गृहाश्रमे स्थितः जैनीं दीक्षामाश्रितः किं कृत्वा राज्यन्त्यक्त्वा १९ चिच्चारज्जं पव्वइओ खत्तिओ परिभासई जहातेदीसई रूवं पसन्नं ते महामणो २० अत्र वृद्ध संप्रदायो अयमस्ति स संयतराजर्षिर्गर्दभालिनामाचार्यस्य शिष्योजातः पश्चाद्गीतार्थोजातः समस्त साध्वाचारवि

अंतिए। महया संवेग निव्वेयं समावन्नो नराहिवो १८॥ संजओ चइओरज्जं निक्खंतो जिणसासणे। गद्दभालिस्स भगवओ अणगारस्स अंतिए १९॥ चिच्चारज्जंपव्वइए खत्तिए परिभासई। जहाते दीसईरूवं पसन्नं ते तहामणो २०

जीवः ते जीव परलोकने वीषे जाइ १७ श्रुत्वा तस्य साधोः वचनं गर्दभिल्ल आचार्यना वचन सांभलीनेअणगारस्य समीपेतेयतीपासे धर्म सांभलीनेजहतां संवेगेन निर्वेदंभवोद्विग्नना मोक्षेच्छा घणोसंवेग ऊपनो संसारथी ऊभगो रूपं समापन्नः संप्राप्तः नराधिपः मोक्षनीं इच्छाहई राजाने १८ संयती राजा राज्यंत्यक्त्वा संयतीराजा राज्यक्रीडोनेनिःक्रांन्तः चारित्रंप्रपन्नः जिनशासने चारित्रलीधो जिनशासननेविषे गर्दभालि भगवंतः गर्दभालि भगवंतने अनगारस्य समीपे साधू समीपे १९ त्यक्त्वादेशादिकां प्रव्रज्यांच ग्रहीत्वा किंचित्नगरेगतः तत्र क्षत्रियः सुरभवात् मनुष्य भवे समागत्य सच पूर्व भवस्मृत्वा प्रव्रजितः स ऋषिः संयतस्य मिलितः ततस्वरूपमाहः यथा न च दृश्यते रूपं विकाररहितं क्षत्रिय राजऋषि संयतीने पूछे छे जेहवुंताहरुं रूपदीसेछे

चारदत्तो गुरोरादेशेन एकाकी विहरन् एकस्मिन् ग्रामे एकदा समागतोऽस्ति तत्र ग्रामे क्षत्रियराजर्षिमिलितः स क्षत्रिय साधुः संयत मुनिं प्रतिभाषते वदति परं स क्षत्रिय मुनिः कोऽयमस्ति सहि पूर्वजन्मनि वैमानिक आसीत् ततश्च्युत्वा एकस्मिन् क्षत्रिय कुले समुत्पन्नः तत्र कुतश्चित्तथा विधनिमित्त दर्शनादुत्पन्न जाति स्मृतिस्तत्तः समुत्पन्न वैराग्यो राज्यत्यक्ता प्रव्रजितः सक्षत्रियराजर्षिर निर्दिष्टनामाक्षत्रिय जाति विशिष्टत्वात् क्षत्रिय मुनिर्जातिस्मृति ज्ञानवान् स संयतं मुनिं दृष्ट्वा परिभाषते संयतस्य ज्ञानपरीक्षां कर्तुं संयत मुनि मित्यध्याहारः किं परि भाषते तदाह हे साधो यथा येन प्रकारेण ते तव रूपं बाह्याकारं दृश्यते तथा तेन प्रकारेण तव मनः प्रसन्नं विकार रहितं वर्त्तते अन्तः कालुष्ये हि एवं प्रसन्नताऽसम्भवात् २० पुनः किं परिभाषते इत्याह किं नामे किं गुत्ते कस्सट्ठा एव माहणे कहं पडियरसी बुद्धे कहं विणीएत्ति वुच्चसि २१ हे साधो तव किं नाम तव किं गोत्रं पुनकस्सट्ठाए इति कस्मै अर्थाय वा त्वं माहनः प्रव्रजितोसि हे साधो त्वं बुद्धान् कथं प्रति चरसि त्वं आचार्यान् केन प्रकारेण सेवसे पुनः हे साधोत्वं कथं विनीत इत्युच्यसे अहं त्वां पृच्छामि २१ सञ्जओ नाम नामेणं तहा गुत्तेण गोयमो गद्दभाली ममा यरिया विज्जाचरण पारगा: २२ अथ क्षत्रिय साधोः प्रश्नानंतरं संयत साधु रुवाच हे साधो अहं संयत इति नाम्ना अभिधानेन नाम प्रसिद्धोऽस्ति तथा पुनरहं गोत्रेण गौतमोस्ति मम आचार्या

सूत्र

किंनामे किंगुत्ते कस्सट्ठाएवमाहणे । कहंपडिय रसीबुद्धे कहं विणीएत्ति वुच्चसि २१ ॥ संजओ नामनामेणं तहा

विकाररहितं मनः वर्त्तते तेहयोताहरो विकाररहित मनवर्त्तते २० किंनामा किंगोत्रः ताहरं नामस्तु ते तारुगोत्रस्तु ते कस्मै अर्थादमा मुनिःजातः तुं किस्ये अर्थं जतोऽहंतेकथंकेन प्रकारेण प्रतिचरसी बुद्धे आचार्यादिकनी सेवाकिमकरे कथंविनीतः इत्युच्यते कोणप्रकारि विनीत वाहोइ २१ संयतः प्राहः अहंनाम्नाः संयतः संयती कहेछे संयतीमाहरोनाम तथागोत्रेण गोत्तमः गोतमगोत्र गर्दभालिनामानो मम आचार्याः

गुरुवोगर्दभालिनामः कोट्टगा मम गुरवः विद्याचरण पारगाः विद्या च चरणं च विद्याचरणे तयोः पारगाः विद्याचरण पारगाः विद्याः श्रुतज्ञानं चरणं चारित्रं तयोः पारगामिनः अयं आशयः अर्हतैर्गर्दभालि नामाचार्यो जीवघातान्निवर्त्तित स्तन्निवृत्ती मुक्तिफलं उक्तञ्च ततस्तदर्थं माहनोस्मि यथा तदुपदेशं गुरुन् प्रतिचरामि तदुपदेश सेवनाच्च विनीतोस्मि इतिभावः अथ तद्गुण बहुमानतोऽपृष्टोपि क्षत्रियमुनिराह २२ किरियं अकिरियं २ विनयं ३ अज्ञाणञ्च ४ महामुणी एएहिं चउहिंठाणेहिं मेयन्ने किंप भासइ २३ हे संयत महामुने एतैश्चतुर्भिः स्थानैर्मिथ्यात्वाधार भूतैर्हेतुभिः हत्वा मेयन्नाः किं प्रभाषंते मेयं जीवादिवस्तुजानंतीति मेयज्ञाः पदार्थज्ञाः कुतीर्थ्यावादिनः कुत्सितं प्रजल्पन्ति एतावता एतेचतुर्भि हेतुभिर्मिथ्यात्विनः सर्वेचि षष्ठ्युत्तर त्रिशतभेदाः पाषण्डिनो यथावस्थित तत्वं अज्ञानाना यथा तथा प्रलापिनः सन्तितेत्वया ज्ञातव्याः तानिकानि चत्वारिस्थानानि क्रिया

मूल

गोत्तेण गोयमो गद्दभाली ममायरियाविज्जा चरण पारगा २२ ॥ किरियं २ अकिरियं २ विणयं ३ अन्नाणंच महा मुणी एएहिं चउहिंठाणेहिंमेयन्ने किंपभासई२३॥ दुद्दपाउकरे बुद्धे नायए परिनिव्वुए। विज्जाचरण संपन्ने सच्चेसच्च

भाषा

गर्दभालिनामें आचार्य माहरो गुरुछे विद्याचारित्रपारगामिनः विद्याअने चारित्रपारगामीछे २२ अथ अप्रष्टोपि चत्रीआह क्रियावादी १ अक्रि यावादी २ विनयवादी ३ अज्ञानवादी ४ पुनः महामुने एतैः चतुर्भिस्थानैः तत्ववेत्ता एचिहुं स्थानके जे मुक्ति कहे ते झूठ मृषावाद बोले कुत्सितः भाष्य ते मिथ्याभाषिणेत्यर्थः २३ इति प्रादुरकार्षीत् प्रकटीकृत ज्ञात तत्वः सन् तत्वनेजाणे श्रीमहावीरे इमकह्यो ज्ञातकः मोक्षं गतः ज्ञातकुलनो ऊपनोमोक्षगयो तथा विद्याचरणाभ्यां संपन्नः सहितः विद्या अनेचारित्र तिणेकरीसहित ज्ञानछे सत्यबोले सत्य पराक्रमः सांचोछे जेहने पराक्रम २४

जीवादिसत्तारूपा १ पश्चात् अक्रियाजीवादिपदार्थानां अक्रियानास्तित्वरूपाः २ विनयं सर्वेभ्यो नमस्कारकरणं ३ अज्ञानं सर्वेषां पदार्थानां ज्ञेयं ४ एतेहि एकान्तवादित्वेन मिथ्यात्विनोज्ञेयाः कुत्सितभाषणंहिएतेषां विचारस्य असहत्वात् यतोहि सर्वथा सर्वत्र सत्तायाः सत्वात् सर्वत्रजीवः स्यात् अजीवेपि जीव बुद्धिः स्यात् १ पुनर्नास्तित्वे आत्मनो नास्तित्वेऽस्य प्रमाणबाधितत्वात् च जीवाजीवयो रुभयोरपि सादृश्यं नास्तित्वं स्यात् २ सर्वत्र विनये क्रियमाणे निर्गुणे विनयस्य अशुभफलत्वात् विनयोपिस्थाने एव कृतः फलदः तस्मात् एकान्तं विनयोपि न श्रेष्टः ३ अज्ञानं हि मुक्तिसाधने कारणं नास्तिः मुक्तेर्ज्ञान स्यैवकारणत्वात् हेयोपादेय पदार्थयोरपि ज्ञानेनैव साध्यत्वात् ज्ञानं विनाहितंअपि न जानाति तस्मात् अज्ञानमपि न श्रेष्टं ४ तस्मात् क्रियावादिनः १ अक्रियावादिनः २ विनयवादिनः ३ अज्ञानवादिनः ४ सर्वेप्येते एकान्तवादिनो मिथ्यात्विनः कुतीर्थिनः कुत्सितभाषिणोज्ञेयाः एतेषां पाषण्डिनां सर्वेभेदाः ३६ ३ त्रिषष्ठ्युत्तरत्रिशती प्रमिताभवन्ति तत्र क्रियावादिनां १८० अक्रियावादिनां ८४ विनयवादिनां ३२ अज्ञानवादिनां ६७ कुत्सितभाषितं हि नचै तत् स्वाभिप्रायेण किंतु भगवद्वचसा एतेषां कुत्सितभाषित्वं तदाह १३ इइपाउ करेवुडे नायए परिनिव्वुए विज्जा चरण संपन्ने सच्चे सच्च परिक्कमे २४ इत्येते क्रियवादिनः कुत्सितं प्रभाषन्ते इत्येवं रूपं वचनं बुद्धोज्ञाततत्वोज्ञापकः श्रीमन्महावीरः प्रादु २ करोत् प्रकटी चकार कौटश्योज्ञातकः परिनिर्वृतः कषाया भावात् परिसमन्तात्शीतो भूतः पुनः कीदृशोज्ञातकः विद्याचरणसंपन्नः विद्याशब्देन ज्ञायकोत्तमज्ञानं चरणं यथाख्यात चारित्रं ताभ्यां संपन्नः सहितः पुनः कीदृशः सत्यवचनवादी पुनः कीदृशः सत्यपराक्रमः सत्यवीर्यसहितः २४ तेषां फलमाह पडंति

परक्कमे २४ ॥ पडंति नरएघोरे जेनरा पावकारिणो दिव्वंच गयं गच्छंति चरित्ता धम्ममारियं २५ ॥ माया बुदूय

पतंति नरके घोरे पडे घोरनरकने विषे ये नराः पापकारिणः जे मनुष्य पापनाकरणहारछे दिव्यं प्रधानगतिं गच्छंति देवता संबधिनी गतिने विषे

नरएघोरे जेनरा पावकारिणो दिव्वंच गइगच्छन्ति चरित्ता धम्ममारियं २५ पुनः क्षत्रिय मुनिर्वदति हे महामुने ये पापकारिणोनराः पापं असत्यरू
पणं कुर्वन्तोति इत्येवं शीलाः पापकारिणो ये नरा भवन्ति ते नराः घोरे भीषणे नरकेपतंति च पुनधर्मं सत्यरूपणारूपचरित्ता आराध्य दिव्यंदिव:
सम्बन्धिनीं उत्तमांगतिं गच्छन्ति कथंभूतं धर्म्मं आरियं आर्यं वीतरागोक्तं इत्यर्थं अत्रपापं असत्यवचनं ज्ञेयं धर्मं सत्यवचनं ज्ञेयं एवंज्ञात्वा भोसंयत
भवता सत्यप्ररूपणापरेणैव भाव्य मित्यर्थः २५ कथमपि पापकारिण इत्याह माया वुइयमेयंतु मुसाभासा निरत्थिया संजममाणोवि अहं वसामि इरि
यामिय २६ एतत्क्रियाऽक्रिया विजय अज्ञानवादिनां मायोक्तं मायया कपटेन उक्तं मायोक्तं ग्राह्योक्तं ज्ञेयं एते सर्वेपि कपटेन मृषाभाषन्ते इत्यर्थः
एतेषां क्रियावादिनान्तु तस्मात्कारणात् मृषाभाषां असत्याभाषा निरर्थका सत्यार्थ रहिता अपि निश्चयेन तेनैवकारणेन हे साधो संयच्छन् पापात् निव
र्त्तितः सन् तेषां पाषण्डिनां असत्यरूपणातो निवर्त्तितः सन् अहं वसामि निरवद्योपाश्रयादौ तिष्ठामि अथाहं पाषण्डिनां वाक्यरूपपापात् निवृत्तः
तिष्ठामि इत्युक्तं तत् तस्य स्थिरोकरणार्थं यथाहं असत्प्ररूपणात् निवृत्तस्तथा त्वयापि निवर्त्तितव्यमित्यर्थः यतः साधुः स्वयंसाधुमार्गेस्थितः अपरं
अपि साधुमार्गेस्थापयति च पुनः हे साधो अहं इरियामि इरे ईर्यया गच्छामि गोचर्यादौ भ्रमामि २६ सव्वे ते वेइया मज्झं मिच्छादिठी अणारिया

सूत्र

मेयंतु मुसा भासा निरत्थिया । संजममाणोवि अहं वसामि इरियामिय ॥ २६ ॥ सव्वेते वेइया मज्झं मिच्छदिट्ठी

भाषा

जाये क्षत्रिय साधु कहे संयतीने एक्रियावादी सर्वमे जाणाछे मिथ्या

विज्जमाणे परेलोए सव्वं जाणामि अप्पयं१७ हे साधो ते सर्वेपि क्रिया अक्रिया विनया ज्ञानवादिनः चत्वारोपि पाषण्डिनो मया विदिताज्ञाताः एतेचत्वारोपि मिथ्या दृष्टयो मिथ्यादर्शन युक्ताः पुन रेते चत्वारोपि अनार्याः अनार्यकर्म कर्त्तारः सम्यग् मार्ग विलुम्पकाः मया एतेया दृशाः सन्ति तादृशा ज्ञाताः पुनर्हेमुने परलोके विद्यमाने सम्यक् प्रकारेण अप्यहं आत्मानं स्वस्य परस्य च जानामि आत्मापर लोकात् आगतः ततोहं पर लोकं आत्मानं च सम्यक् जानामि ते कुतोर्थिनोपि सम्यक् ज्ञातास्तेन कुतीर्थिनां सङ्गं न करोमि कथं जानामीत्याह अहमासि महापाणेऽ इमं वरिस सओवमो जासापाली महापाली दिव्वावरि स सओवमा १८ हे मुने अहं महाप्राणे विमाने पञ्चमे ब्रह्म लोके देव आसं कथं भूतः अहं द्युति मान् द्युति विद्यते यस्य सद्युति मान् तेजस्वी पुनः कथं भूतोहं वर्षशतोपमः वर्षशत जीविनः पुरुषस्यो पमायस्या सौवर्ष शतोपमः कोर्थः यथा इह वर्षशतजीवी इदानीं परिपूर्णायु

अणारिया। विज्जमाणे परेलोए। सम्मं जाणामि अप्पयं॥ २७॥ अह मासि महापाणे जुइमं वरिस सओवमे। जा सा पाली महापाली दिव्वा वरिस सओवमा २८॥ सेचुए बंभलोयाओ माणुस्सं भव मागओ। अप्पणोय

दृष्टयो अनार्याः मिथ्यात्वो अनार्यते पुर स परलोक नथी जाणे जीवसहजेइ पेंदाहोयछे विद्यामाने परलोके परलोक विद्यमानछे सम्यक् आत्मानं जानामि आत्मानेपणिभलोपरिजाणंकु २७ अहं बभूव ब्रह्म देवलोकेहुं ब्रह्म देवलोकनेविषेहुओ द्युतिमान् वर्षशतोपमे महाकांतिनोधणी वर्षसोनीं उपमाइ या सापल्योपमाः पल्योपमः सागरोपमादि महापालो सागरोपमः देवसंबंधिनो वर्षशतोपमा देवता संबंधिनीं सोवरसनी उपमा २८ च्युतो ब्रह्मलोकात् ब्रह्म देवलोकयो च वीने मानुष्यं भवमागतः मनुष्यने भविआव्यो आत्मानश्च परेषां आपणो अने बीजानो आयुर्जानामि यथा भवन्ति तथा

रुच्यते तथाहं तत्र विमाने परिपूर्णायुरभूवं तद च या पालिर्महापालिश्चसादिव्या स्थिति र्मे अभूत् इति शेषः पालि शब्दस्य कोर्थः पालिरिव पालि र्जीवित जल धारणात् पालि शब्देन भव स्थितिः कथ्यते सा चेह पल्योपम प्रमाणा महापालो सागरोपम प्रमाणस्थितिः कथ्यते दिवि भवादिव्यादेव भव सम्बन्धिनो स्थितिरित्यर्थः कथम्भूतापालिर्महापालिश्च वर्षसतोपमा वर्षशतैः केशोद्धारहेतु भिरुपमीयते या सा वर्षशतोपमाद्विविधापिदिव्या भवस्थिति स्तचास्तिपरं मे महापालोदिव्या भवस्थिति रासीदिति आम्नायः दशसागरायुरहमासमित्यर्थः१८ सेचुओ बम्भलोगाओ माणुस्सं भवमागओ अप्पणोयपरे सिंच आउं जाणे जहातहा१९ से इति सोहं इत्यध्याहारः सोहं ब्रह्मलोकात्पच्च मदेवलोकात् च्युतः सन् मानुषं भवं नरसम्बन्धि जन्मसमागतः आत्मनः च पुनः परेषां च यथा तथा आयुर्जीवितं वर्त्तते तथा जानामि यस्य मानवस्य येन प्रकारेण आयुरस्ति तस्य तेन प्रकारेण सर्वं जानामि परं विपरीतं न जानामि सत्यं जानामि १९ नाणारुइं च छन्दन्तु परिवज्जेज्जसञ्जए अणट्ठाजेय सव्वट्ठा इइ विज्जामणु सञ्चरे ३० हे मुने संयतः साधुनानारुचि क्रिया वाद्यादि मत विषयमभिलाषं परिवर्जयेत् च पुनः छन्दः स्वमति कल्पिताभि प्रायं नानाविधं परिवर्जयेत् च पुनर्ये अनर्थाः अनर्थ हे तवोये सर्वार्थाः अशेष हिं सादयो गम्य त्वात्तान् परिवर्जयेदिति सम्बन्धः इत्येवं रूपां विद्यां सम्यग्ज्ञान रूपां अनुलची क्रत्य सञ्चरे स्वं संयमा ध्वनियायाः अहमपि इति विद्यां ज्ञानं ज्ञात्वा अङ्गीकृत्य संयम मार्गेया मीति त्वयापि तथैव संचरितव्य मिति हार्दम् ३०

सूत्र परेसिंच आउं जाणे जहा तहा ॥ २९ ॥ नाणारुइं च छंदं च परिवज्जेज्ज संजए। अणट्ठा जेय सव्वत्था। इइ

भाषा जिमआउखुं छेतिम जाणुकुं २९ क्षत्रिय मुनिरुवाचः पुनः नानारुचं च परतीर्थिकानां अभिलाष अभिप्रायं परिवर्जयेत् स्वेच्छापणुं साधुवर्ज्जे अनर्थ हेतुत्वात् ये च हिंसादयः अनर्थनां कारणछे इत्येव रूपाविद्याः परित्यज्यः अनुचरेत् साधुः ते सर्वछांडीने तपकरुंकुं अहीसंयतसाधु ३० निर्वस्तेहं

पडिक्कमामि पसिणाणं परमन्तेहिं वा पुणो अहो उट्ठिओ अहोरायम् इइ विज्जातवंचरे ३१ पुनः स्वाचारं वक्ति हे मुने अहं पसिणाणम् इति प्राकृतत्वात् विभक्तिव्यत्ययः प्रश्नेभ्यः शुभाशुभ सूचकाङ्गुष्टादि पृच्छाभ्यः प्रति क्रमामि पराङ्मुखोभवामि वा अथवा पुनः परमन्त्रेभ्यः प्रतिक्रमामि प्रतिनिवर्त्ते परस्य गृहस्थस्य मन्त्राणि कार्यालोचनानि तेभ्यः परमन्त्रेभ्यः एभ्यः सर्वेभ्यः पराङ्मुखोभवामि अहो इति आश्चर्ये अहोरात्रम् उत्थितः धर्मं प्रत्युद्युतः कश्चिदेव महात्मा एवम्विधः स्यात् इति विद्वान् इति जानन् तपश्चरेः नतु प्रश्नमन्त्रादिकश्चरे ३१ जं च मे पुच्छसीकाले सम्मंसुद्धेण चेयसा ताइंपाउकरे बुद्धे तं नाणं जिणसासणे ३२ अथ संयतमुनिना पृष्टं त्वं आयुः कथं जानासि तदा पुनः क्षत्रियमुनिराह हे संयत त्वं मां काले इति कालविषयम् आयुर्विषयं ज्ञानं पृच्छसि कौटिल्य त्वं सम्यक् शुद्धेन निर्मलेन चित्तेन उपलक्षितः तां इति

सूत्र

विज्जा मणु संचरे ॥ ३० पडिक्कमामि पसिणाणं परमंतेहिं वा पुणो। अहो उट्ठिए अहो रायं इइ विज्जा तवं चरे ३१ ॥ जंच मे पुच्छसी काले। सम्मं सुद्धेण चेयसा। ताइं पाउ करे बुद्धे। तं नाणं जिणसासणे ॥ ३२ ॥

भाषा

प्रश्नेभ्यः क्षिवेद्दं प्रश्नथकी निवर्त्यो कोइने प्रश्न कहं नही मंत्रेभ्यः गृहकार्यालोचेभ्यः गृहस्थाना आलोचतेहथकी निवर्त्योकुं अहो इति विस्मये उत्थितः जळोथकी सावधानहुओथको] अहोरात्रं इति विद्या तपपश्चरेत् रात्रिदिन विद्याऽनेतपसमाचरंकुं करंकुं ३१ भो संयतः यच्चमां पृच्छसि क्षत्रियराज ऋषिकहेके संजतीने जेतूं पूछेके आउखातुज्ञान सम्यक्शुद्धेन चेतसा मनसा शुद्धभले मनिकरीने तत्तु प्रादुः क्षतवान् प्रकटितवान् बुद्धे तीर्थं करे जीको ज्ञान तीर्थं करे प्रगटकीधाछे तत् ज्ञानं जिनशासने वर्त्तते तेज्ञानजिन सासननेविषेछे ३२ सदनुष्टानं रुचिं कुर्याद्धीरः धीर वीरपुरुष भलो

सूचत्वात् तत् ज्ञानं बुद्धः श्रीमन्महावीरः अथवा बुद्धः श्रुत ज्ञानवान् प्रादुरकरोत् पुनस्तच्चज्ञानं श्रीजिन शासनेजानीहि न अपरस्मिन् कुत्रापि दर्शनेऽस्ति ततोहं तत्र स्थितः तत् प्रसादात् बुद्धोऽस्मि इति भावः ३२ किरियञ्चरोएधीरो अकिरियं परिवज्जए दिट्ठीए दिट्ठि सम्पन्ने धम्मञ्चरसु दुच्चरम् ३३ धीरः अक्षोभ्यः क्रियां जीवस्य विद्यमान तां जीवसत्तां रोचयति स्वयं स्वस्मै अभिलषयति तथा परस्मै अपि अभिलषयतीत्यर्थः अथवा क्रियां सम्यक् अनुष्टान रूपां प्रतिक्रमण प्रतिलेखनारूपां मोक्षमार्ग साधनभूतां ज्ञानसहितां क्रियां रोचयति पुनः अक्रियां जीवस्य नास्ति त्वं जीवे जीवस्य अविद्यमानतां परिवर्जयेत् अथवा अक्रियां मिथ्यात्विभिः कल्पितां कष्टक्रियाम् अज्ञानक्रियां परित्यजेत् पुनर्धीरः पुमान् दृष्ट्वा सम्यक् दर्शनात्मिकया दृष्टि सेम्पन्नो भवति दृष्टिः सम्यग् ज्ञानात्मिका बुद्धि स्तया सम्पन्नः सहितो दृष्टिसम्पन्नः सम्यक् दर्शनेन सम्यक् ज्ञान सहित इत्यर्थः तस्मात्त्वमपि सम्यग्दर्शन ज्ञान सहितः सन् सुदुश्चरं कर्तुमशक्यं धर्मञ्चारित्र धर्मञ्चर अङ्गीकुरु ३३ एयं पुण्णपयं सोच्चा अत्थधम्मोवसोहियं भरहो विभारहं वासं चिच्चा कामाइ पव्वइए ३४ अथ क्षत्रियमुनिः संयतमुनिं प्रति महापुरुषाणां धर्ममार्ग प्रवर्त्तितानां दृष्टां तेन दृढीकरोति हे मुने भरतोपि भरतनामा चक्रापि भारतं भारतं क्षेत्रं षट्खंडर्द्धिं त्यक्त्वा पुनः कामान् कामभोगान् त्यक्त्वा प्रव्रजितो दीक्षां प्रपन्नः इत्यर्थः किं कृत्वा एतत् पूर्वोक्तं पुण्यपदं श्रुत्वा पुण्यञ्च तत्पदञ्च पुण्यपदं पुण्यं पवित्रं अर्थात् निःकलङ्कं निर्दूषणम् अथवा पुण्यं पुण्यहेतुभूतम् एतादृशं पदं पद्यते ज्ञायते अर्थोऽनेनेति पदं सूत्रं जिनोक्तमागमं

सूत्र

किरियंच रोयए धीरे। अकिरियं परिवज्जए। दिट्ठीए दिट्ठि संपन्ने। धम्मं चरसु दुच्चरं ॥ ३३ ॥ एयं पुन्न पयं

भाषा

क्रिया ऊपरि रुचिकरे रुचकरे अक्रीयां परिवर्जयेत् भुंडी क्रियानेवर्जे दृष्टा सम्यक् दर्शनेन संपन्नः सहितः सम्यक् दर्शन सम्यक्त तिणेकरी सहित धर्मं चारित्र धर्मं सेवेसु दुष्करं दुष्कर जे चारित्रधर्मछे ते सेवेकरि ३३ अथ संयतेन क्षत्रियेन पृष्टः कथं त्वं अथ पूर्वं मुनीनां दृष्टांतानि कथयती

क्रियावाद्यादि नानारुचि वर्जन निवेद शब्दसूचना लक्षणं तत् श्रवणविषयाकृत्य अथवा पूर्णं पदं पूर्णपदं सम्पूर्णं ज्ञानं पदशब्देन ज्ञानमप्युच्यते कौटुम्बं पुण्यपदम् अर्थं धर्मोपशोभितम् अर्थ्यते प्रार्थ्यते इति अर्थः स्वर्गापवर्ग प्राप्तिकारणभूतः अर्थश्च धर्मश्च अर्थधर्मौ ताभ्याम् उपशोभितम् अर्थ धर्मोप शोभितम् एतादृशं जिनोक्तं सिद्धान्तम् अर्थं धर्मसहितं श्रुत्वा यदि भरतचक्रधरस्सम्पूर्णं भरतक्षेत्र षट्खण्ड स्वाज्यमुक्त्वा दीक्षां अयाह तदा त्वया प्यस्मिन् जिनोक्तागमे चलितव्यं महाजनो येनगतः स पन्था इत्युक्तत्वात् स कल नृपेषु ऋषभं पुत्रो भरतो मुख्य स्तेनायं मार्गः समाश्रितः इत्यर्थः इथात्र भरत चक्रिणः कथा अयोध्यां नगर्यां श्रीरिषभदेव पुत्रः पूर्वभवकृत सुनिजन वैयावृत्यर्जित चक्रिभोगः प्रथमचक्री भरतनामास्ति तस्य नवनिधानानां चतुर्दशरत्नानां द्वाचिंशत् सहस्र नरपतीनां द्विसप्तति सहस्र पुरवराणां षण्णवति कोटिग्रामाणां चतुरशीति सहस्रहयगजरथानां षट्खण्डभरतस्य ऐश्वर्यं कुर्वतः स्वसंपत्त्यानुसारेण साधर्मिकवात्सल्यं कुर्वतः स्वयं कारिताष्टापदगिरः संस्थित चतुर्मुख योजनायामजिनायतनमध्यस्थापितनिज २ वपु प्रमाणो पेत श्रीऋषभादि चतुर्विंशति जिन प्रतिमावन्दनार्चनं समाचरतः श्रीभरत चक्रिणः पञ्चपूर्वलक्षाण्यति क्रान्तानि अन्यदा महाविभूत्या उद्वर्त्तितदेहः सर्वालङ्कारविभूषितः सभरत चक्री आदर्श भुवनेगतः तत्र स्वदेहं प्रेक्ष्यमाणस्य अङ्गुलीय कम्पतितं तत्र तेन न ज्ञातं आदर्शभित्तौ स्व देहं पश्यतातेन पतितामुद्रिकास्वकराङ्गुली अशोभमानां दृष्ट्वा ततो द्वितीयां गुलीतोपि मुद्रिकाऽपनीता साप्य शोभमानादृष्टा ततः क्रमात्सर्वाङ्गाभरणानि उत्तारितानि

सोऊण । अत्थ धम्मो वसोहियं । भरहोवि भारहं वासं । चिच्चा कामाइ पव्वइए ॥ ३४ ॥ सगरोवि सागरं तं ।

एतत्पुन्यपदं श्रुत्वा एपुन्यनुपद सांभलीने आयुर्जानासि इति पृष्टे चक्रियाह कौटुम्बं पदं अर्थधर्माभ्यां उपशोभितं अर्थ अने धर्मतिहकरी सहितके भरतोपि चक्रवर्त्ती भारतवर्षं भरत चक्रवर्त्ति भरतखेत्रने छोडीने त्यक्ता कामाश्च दीक्षां प्रपन्नः वली कामभोग छोडीने दीक्षालीधी ३४

तदा स्वशरीरं अतीवाशोभमानं निरीक्ष्य संवेगमापन्नश्चक्री एवं चिंतितुं प्रवृत्तः अहो आगन्तुकरूक्षे रेवेदंशरीरं शोभते न स्वभावसुन्दरं अपि च एतच्छरीरसङ्गेन सुन्दरमपि वस्तु विनश्यति उक्तं च मद्यं असणं पाणं विविहं खाइ मसा इमं शरीरसङ्गमावन्नं सव्वंपि असुई भवे १ वरं वस्त्रं वरं पुष्पं वरं गन्धं विलेपणं विणस्सए शरीरेण वरंसयणमासणं २ निहाणं सव्वरोगाणं कयग्घमथिरं इमं पक्षालनूतभूमयं अयकपरिकप्पणं ३ तत एतच्छरीरं त्यक्ते सर्वथान युक्तं अनेकपाप कर्मकरणेन मनुष्य जन्महारणं यत उक्तं लोहायनावच्चलधीभिनत्ति सूत्राय वैडूर्यमणिं दृणाति स चन्दनं क्षीणति भस्म राशेर्यीमानुषत्वं नयतीन्द्रियार्थैं १ इत्यादिकं चिंतयतः तस्य भरतस्य प्राप्तभावचारित्रस्य प्रवर्द्धमानशुभाध्यवसायस्यक्षपक श्रेणि प्रपन्नस्य केवल ज्ञान मुत्पन्नं शक्रस्यासनमायातः कथयति च द्रव्यलिङ्गं प्रयच्छ येन दीक्षा उत्सवं करोमि ततो भरतकेवलि नास्वमस्तकेपञ्चमौष्टिको लोच कृतः शासन देवतया चर जोहरणोपकरणानि दत्तानि दशसहस्रराजभिः समं प्रव्रजितो भरतः शेष चक्रिणस्तु सङ्ख्य परिवारेण प्रव्रजिताः ततः शक्रेण वन्दितो सौ ग्रामाकरनगरेषुभ्रमन् भव्य सत्वान् प्रतिबोधयन् एकपूर्वलक्षं यावत् केवल पर्यायं पालयित्वा परिनिर्वृतः तत्पट्टे च शक्रेण आदित्ययशानृपोभिषिक्तः इति भरत दृष्टांतः ३४ पुनस्तदेव महापुरुष दृष्टांतेन दृढयति सगरोविसागरं तं भरहवासवराहिवो इत्थरियं केवलं हित्ता दयार परिनिव्वुओ ३५ हे सुवे सयरोपि सगरनृ मानराधिपोपि दयया संयमेन परिनिवृतः कर्मभ्योमुक्तः अत्र नराधिप शब्देन अपि शब्दात् द्वितीयशक्रवर्त्त्यधिकारात् अनुक्तोपि चक्रीव गृह्यते किं कृत्वा भरत वर्षं भरतक्षेत्रं अर्थात् भरतक्षेत्र राज्यत्यक्त्वा पुनः केवलं परिपूर्णं एकच्छत्र रूपं ऐश्वर्यं हित्वात्यक्त्वा कीदृशं भरत वर्षं सागरां तं समुद्रान्त सहितं चुल्लहिमवत् पर्वतं यावत् विस्तीर्णं भरतक्षेत्र राज्यमित्यर्थः अत्र सगर चक्र वर्त्तिदृष्टान्तः तथाहि अयोध्यायां नगर्यां इक्ष्वाककुलोद्भवोजितशत्रु नृपोस्ति तस्य भार्याविजयानाम्नी अस्ति सुमित्रनामाजित शत्रु सहोदरोयुवराजावर्त्तते तस्य यशोमती नाम्नी भार्यास्ति

जङ्घ कुमारोऽवदत् अन्यः कश्चिदष्टापद सदृशः पर्वतोऽस्ति यत्रे दृश्यमन्य चैत्य कारयामः चत सृषु दिक्षु पुरुषास्तद्गवेषणाय प्रेषितास्ते सर्वत्र परिभ्रम्य समायाताः जचुः स्वामिन् दृष्टः पर्वतः क्वापि नास्ति जङ्घनाभणितं यद्येवं वयं कुर्म्म एतस्यैव रचां यतोऽत्रचेत्रे काल क्रमेण लुप्ताः सर्वे नराः भविष्यन्ति अभिनवंकारणात् पूर्वकृत परिपालनं श्रेयः तच्चदण्डरत्नं गृहीत्वा समन्तोष्टापदपार्श्वेषु जङ्घ प्रमुखाः सर्वेऽपि कुमाराः खातुं लग्नाः तच्च दण्ड रत्नं योजन सहस्रं भित्वा प्राप्तं नागवनेषु तेन तानि भिन्नानि दृष्ट्वा नाग कुमाराः शरणङ्गवेषयन्तो गता नागरा जज्वलन प्रभसमीपे कथितः स्व भवन विदारणः वृत्तान्तः सोपि सम्भ्रान्त उत्थितोऽवधिना ज्ञात्वा क्रोधोद्धरः समागतः सगरसुत समीपं भणितवांश्च भोभो किं भवद्भिर्दण्डरत्नेन पृथ्वीविदार्य अस्मद्भवनोपद्रवः कृतः अविचार्यं भवद्भिरेतत्कृतं यत उक्तं अप्पवहाए नूणं होइ बलं उत्तणाण भुवणंमिणियपक्खु बलेणच्चिय पडेइपयङ्गोपईवंमि १ ततो नागराजोपशमननिमित्तं जङ्घनाभणितं भो नागराज कुरुप्रसादं उपसंहर क्रोध सम्भरं क्षमस्वास्मदपराधमेकं नच्च स्वाभिर्भवता सुपद्रवनिमित्तं एतत्कृतं किं तु अष्टापदचैत्यरक्षार्थं मेषा परिखा कृता न पुनरेवं करिष्यावः तत उपशान्तकोपोज्वलन प्रभः स्वस्थानं गतः जङ्घकुमारेण भ्रातृणां पुर एवं भणितं एषा परिखादुर्लङ्घ्यापि जल विरहितानसोभते तत इमां नीरेणपूरयामः दण्डरत्नेन गङ्गां भित्वा जङ्घनाजलमानीतं सृता परिखातज्जलं नागभवनेषु प्राप्तं जल प्रवाह सन्त्रस्तं नागनागिनी प्रकरं इतस्ततः प्रणश्यन्तं प्रेक्ष्य प्रदत्तावधि ज्ञानोपयोगः कोपानलज्वालामाला कुलोज्वलन प्रभ एव मचिन्त यत् अहो एतेषां जङ्घ कुमारादीनां महापापानां मया एकवारमपराधः क्षान्तः पुनरधिकतरं उपद्रव कृतः ततो दर्शयाम्येषामविनय फलं इति ध्यात्वाज्वलन प्रभेण तद्वधार्थं नयन विषा महा फणिनः प्रेषिता स्तैः परिखाजलान्तर्निर्गत्यनयनैस्ते कुमाराः प्रलोकिताः भस्मराशीभूताः सर्वेऽपि सागरसुताः तथा भूतां स्तान् वीक्ष्यसैन्ये हाहारवोजातः मंत्रिणाउक्तं एतेतु तीर्थरक्षां कुर्वतोऽवश्य भावितया इमा मवस्थां प्राप्ताः सङ्गतावेव

भविष्यन्तीति किं शोचसि अतस्त्वरितमितः प्रयाणः क्रियते गम्यते महाराज चक्रि समीपं सर्वसैन्येन मन्त्रि वचनमङ्गीकृतं ततस्त्वरितप्रयाण करणेन क्रमात् प्राप्तं स्व पुरसमीपे ततः सामन्तामात्यादिभि रेवं विचारितं समस्त पुत्र बन्धोदन्तः कथं चक्रिणो वक्तुं पार्यते ते सर्वेदग्धा वयं चाप्यतां गाः समायाताः एतदपि प्रकामन्वपाकरं ततः सर्वेपि वयं प्रविशामोऽग्नौ एवं विचारयतां तेषां पुरः समायातः एकोद्विजः ते नेदमुक्तं भो वीराः किमेवमाकुलीभूताः मुञ्चतविषादं यतः संसारेन किञ्चित्सुखं दुःखं अत्यन्तमद्भुतमस्ति भणितञ्च कालंमि अणाईए जीवाणं विविहकम्मवसगाणं तं नत्थि संविहाणं जंसंसारेन सम्भवइ १ अहं सगरचक्रिणः पुत्रवधञ्चति करं कथयिष्यामि सामन्तादिभिस्तदचः प्रतिपन्नं ततः स द्विजोमृतं बालकं करे कृत्वा दृष्टोस्मीति वदन् सगर चक्रि गृहद्वारेगतः च क्रिणातस्य विलापशब्दः श्रुतः चक्रिणासद्विज आकारितः केन दृष्टोसीति चक्रिणापृष्टः स प्राहः देव एक एवमेसुतः सर्पेणदृष्टोमृत एतद्दुःखेनाहं विलपामीति करुणासागरत्वामेनं जीवय अस्मिन्नवसरे तत्र मन्त्रि सामन्ताः प्रार्थिताः प्राप्ताः चक्रिणं प्रणम्य उपविष्टाः तदानीं चक्रिणा राजवैद्यमाकार्यमुक्तं एनं निर्विषं कुरु वैद्येन तु चक्रि सुतमारणं श्रुतवताउक्तं राजन् यस्मिन् कुले कोपिनमृतः तत् कुलाद्भस्मयद्यानयसि तदैनमहं जीवयामि द्विजेन गृहे २ प्रश्न पूर्वकं भस्ममार्गितं गृह मनुष्याः स्वमात्रपि लब्धात्तदुद्दिश्य प्रमुख कुटम्बमारणान्याचख्युः द्विजश्चक्रि समीपे समागत्य उवाच नास्ति वैद्योपदिष्टतादृश्य भस्मोपलब्धिः सर्व गृहे कुटम्बमनुष्यमरण सद्भावात् यद्येवं तत् किं स्व पुत्रं शोचसि सर्व साधारणमिदं मरणं उक्तं च किं अत्थिकोइ भुवणे जस्स जायाइन्नेव पायाइं नियकम्म परिणईए जम्मण मरणाइं संसारे १ ततो ब्राह्मण मारुद शोकं मुञ्च आत्महितं कार्यं चिन्तय यावत्त्वमपि एवं मृत्युसिंहेन न कवली क्रियसे विप्रेण भणितं देवाहमपि जानाम्येवं परं पुत्रमन्तरेणसां प्रतिमे कुलक्षयं तेनाहं मतीवदुःखितः त्वं तु दुःखिताऽनाथवत्सलोऽप्रतिहत प्रतापश्चासि ततो मे देहि पुत्र जीवितदानेन मनुष्यभिक्षां च क्रिणाभणितं भद्र

इद मयक्त प्रतीकारं उक्तं च सीयन्ति सव्व सत्ताइं एत्थनकथन्तिमन्ति तं ताइं भदिइयइरगओविडिमकिं धीर सहु धइ १ ततः परित्यज्यशोकं कुरु परलोकहितं मूर्खएवहते नष्टे मृते करोति शोकं विशेष भणितं महाराज सत्यमेतत् न कार्योत्र जनकेनशोकः ततस्त्व मपि मा कुर्याः शोकमस आवनीयं भवतः शोक कारणं जातं संभ्रांतेन चक्रिणा दृष्टं भो विप्र कौटथं मम शोक कारणं जातं विप्रेण भणितं देव तव षष्टि सहस्रः पुत्राः काल कृताः इदं श्रुत्वा चक्रीवज्र प्रहाराहतइवनष्ट चेतनः सिंहासनाम्नि पतितो मूर्छितः सेवकै रुपचरितश्च मूर्छावसानेच शोकातुरमनासुक्तकण्ठे मरुरोद एवं विलापान् चकार हा पुत्रा हा हृदयदयिता हा बन्धुवत्सलाः हा शुभस्वभावाः हा विनीताः हा सकलगुणनिधयः कथमामनाथं मुक्ताथूर्यंगताः युष्मत् विरहार्त्तस्य ममदुर्जनंदहतः हानिर्दयपापविधे एकपदेवैव सर्वान् बालकान् संहरतस्तव किं पूर्णं जातं हा निष्ठुरहृदयत्वं असह्य सुतमरणदुःख सन्तप्तं किं न शतखण्डं भवसि एवं विलपामश्चक्री तेन विप्रेण भणितः महाराजत्वं मम सांप्रत्येवं उपदिष्टवान् स्वयंच कथं शोकं गच्छसीति उक्तश्च परवसणं मिसुहेणं संसारा सायरं कइइलोओणिय बन्धुजणविणासो सव्वसविच लद्धीरत्तं १ एक पुत्रस्यापि मरणं दुःसहं किं पुनः षष्टिसहस्र पुत्राणां तथापि सत्पुरुषाव्यसनं सहन्ति पृथिव्ये वज्रनिपातं सहति नापरइति अवलंब्य सुधीरत्वं अलमत्र विलपितेन यत उक्तं सोयं ताणंविनोताणं कम्मबन्धोउ केवली लो॰पच्छिया नसोयन्ति जाणन्ता भवरुवयं १ एवमादि वचनविन्यासैर्विप्रेण स्वस्थीकृतो राजा भणितावतेनैव सामन्तमन्त्रिणः यदस्तु यथाहत्तं षष्टिसहस्र पुत्र मरणव्यतिकरं तैरुक्तः सकलोपितद्वातिकरः प्रधानपुरुषैः सर्वैरपि राजाधीरतांनीतः उचित ज्ञात्वं कृतवान् अवान्तरेऽष्टापदासन्नवासिनोजनाः प्रणत शिरस्कावक्रिण एवं कथयन्ति यथा देवयो युष्मदीयसुतैरष्टापदरक्षणार्थं गङ्गाप्रवाह आनीतः स आसन्न ग्रामनगराण्युपद्रवान् प्रसरतीतितं भवान् निवा रयतुदेवः अन्यस्य कस्यापि तन्निवारणशक्तिर्नास्तीति चक्रिणा स्व पौत्रो भगीरथोभणितः वत्स नागराज मनुज्ञाप्य दण्डरत्नेन गङ्गाप्रवाहं नय

समुद्रं ततो भगीरथि रष्टापद समीपंगतः अष्टमभक्तेन नागराजा आराधितः समागतो भणति किंते सम्पादयामि प्रणामपूर्वं भगीरथिनाभ णितं तव प्रसादेनामुं गङ्गाप्रवाहं उदधिं नयामि अष्टापदासन्न लोकानां महानुपद्रवोस्तीति नागराजेन भणितं विगतभयस्त्वं कुरुस्व समीहितं निवारयिष्याम्यहं भरतनिवासिनो नागान् इति भणित्वा नागराजः स्वस्थानङ्गतः भगीरथिनापि कृतानागानां बलि कुसुमादिभिः पूजातः प्रभृति लोकानागबलिंकरोति भगीरथिदण्डेन गङ्गाप्रवाहमाकर्षन् भंजंश्च बहून्स्थल शैलप्रवाहान् प्राप्तः पूर्वसमुद्रन्त ावत तारिता गङ्गा तत्रनागानां बलि पूजाविहिता यत्र गङ्गासागरे प्रवाहिता तत्र गङ्गासागरतीर्थं जातं गङ्गा जह्नुनानीतेति जाह्नवी भगीरथिनीतेति भागी रथी भगीरथिस्तदा मिलितैर्नागैः पूजितोगतोऽयोध्यां पूजितश्चक्रिणानुष्टेन स्थापितः स्वराज्ये सगर चक्रवर्तिना श्रीअजितनाथ समीपे दीक्षा गृहीता क्रमेण कर्मक्षयं कृत्वा सगरः सिद्ध अन्यदा भगीरथिना राज्ञा कश्चिदतिशयज्ञानी पृष्टः भगवन् किं कारणं तत् जह्नुप्रमुखाः षष्टिसहस्रा भ्रातरः सम कालं मरणं प्राप्ताः ज्ञानिनाभणितं महाराज एकदा महान् संघश्चैत्यवंदनार्थं समेत पर्वते प्रस्थितः अरण्यमुल्लंघ्य अन्तिमं ग्रामं प्राप्तः तन्निवासिना सर्वेण अनार्यजनेन अत्यन्त सुपहृतो दुर्वचनेन वस्त्रान्न धनहरणादिना च तत् प्रत्ययं तद्ग्रामवासिलोकैर शुभं कर्म बद्धं तदानीमेकेन प्रज्ञप्ति भद्रकेण कुम्भकारे णोक्तं मा उपद्रवत् इमं तीर्थयात्रागतं जनं इतरस्यापि निरपराधस्य परिक्लेशनं महापापस्य हेतुर्भवति किं पुनरेतस्य धार्मिकजनस्य ततोयद्येतस्य संघस्य स्वागत प्रतिपत्ति कर्तुं न शक्तास्तदा उपद्रवन्तु रक्षत इति भणित्वा कुम्भकारेण निवारितः सग्रामजनः संघस्तत्रगतः अन्यदा तद्ग्राम निवासिना एकेन नरेण राजसन्निवेसे चौर्यं कृतं ततो राजनियुक्तैः पुरुषैः सग्रामो द्वारपिधान पूर्वकं ज्वालितः तदा स कुम्भकारं साधु प्रसिध्या ततो निष्कासितोऽन्यस्मिन् ग्रामेगतः तत्र षष्टि सहस्र जनादग्धाः उत्पन्नाविराट विषयेतिमग्रामेकोद्विग्ने नताः को द्रव्यएकत्र पुञ्जीभूताः स्थिताः सन्ति तत्रैकः करी समायातः

तच्चरणेनता: सर्व्वा अपि महिता: ततो मृतास्तेनानाविधासुख दु:ख प्रवरासुयोनिषु सुचिरं परिभ्रम्य अनन्तर भवे किञ्चित् शुभकर्म उपार्ज्जसगर चक्रि सुतत्वेनोत्पन्ना: षष्टि सहस्र प्रमाणा अपि ते तत्कर्म शेषवशेन तादृग्मरणं व्यसनं प्राप्ता: सोपि कुम्भकारस्तदा स्वायु: क्षयेमृत्वा एकस्मिन् सन्निवेशेधन समृद्धो वणिग्जात: तत्र कृतसु कृत सञ्चाती मृत्वा नर पतिस्तच शुभानु बन्धेन शुभकर्मोदयेन प्रतिपन्नो मुनि धर्मं शुद्धं च परिपाल्य ततो मृत्वा सुरलोकं गत: ततश्च्युतस्त्वं जह्नु सुतोजात: इदं भागीरथ: श्रुत्वा सम्वेगमुपागतस्त्वं अतिशयज्ञानिनं नत्वागत: स्वभवनं इदं च भगीरथि पृच्छासम्विधा नकं प्रसङ्गत उक्तं इति सगर दृष्टान्त: २ ॥२५ च इत्ता भारहं वासचक्कवट्टीमहड्ढिए पव्वज्जमभ्युवगओ मघवं नाम महायसो २६ पुनर्मघवानामा तृतीय चक्र वर्त्ती प्रव्रज्यां दीक्षां अभ्युपगत: चारित्रं प्राप्त: कोट्टशो मघवामहर्द्धिक: चतुर्दश रत्न नवनिधान धारको वै क्रियर्द्धिधारीवा पुन: कोट्टशो महायशा: विस्तीर्णकीर्त्ति: अत्र मघवाख्यस्य चक्रिण: दृष्टांत: इहैव भरतक्षेत्रे श्रावस्त्यां नगर्यां समुद्रविजयस्य राज्ञो भद्रादेव्या: कुक्षौ चतुर्दश महास्वप्न सूचितो मघवानामासमुत्पन्न: स च यौवन स्थोजन केन वितीर्ण्णराज्य: क्रमेण प्रसाधितभरतक्षेत्र स्तृतीयश्च क्रवर्त्तीजात: सुचिरं राज्य मनुभवतस्तस्य अन्यदा भव विरक्तताजाता स एवं भावयि तुं प्रवृत्त: येऽत्र प्रतिबन्ध हे तवोरमणीया: पदार्थास्ते स्थिरा: उक्तं च हिय इत्थिया उदारा सुआविणी यामणोरमा भोगा विउला लच्छोदेहो निरामओ दीहजीवित्तं १ भव पडि बन्धनि मित्तं एगा इवत्थु नवरसव्वंपि कइवय दिणावसाणे सुमिणो भोगुव्वनहि किञ्चि१ ततोहं धर्मकर्मणि उद्यमं करोमि धर्म एव भवान्तरानुगामी एवमादिकं परिभाव्य पुत्र निहितराज्यो मघवा चक्री परिव्रजत: काल क्रमेण विविध तपश्चरणेन कालं क्षत्वा सनत् कुमारो कल्पेगत: इति मघ वा दृष्टांत: २६ सणं कुमारीमणुस्सिन्दो चक्कवट्टी महड्ढिए पुत्तं रज्जे ठविउणं सोविरायातवं चरे २७ अत्र सनत् कुमार दृष्टांत: अस्त्यत्र भरतक्षेत्रे कुरुजङ्गलजनपदे हस्तिनाग पुरं नाम नगरं तत्राश्वसेनोनाम राजा तस्य भार्या सहदेवी नाम्नी

तयोः पुत्रश्चतुर्दश स्वप्न सूचितश्चतुर्थश्चक्रवर्त्तीसनत् कुमारो नाम तस्य सूरिकालिन्दी तनयेन महेन्द्रसिंहेन परम मित्रेण समं कलाचार्य समीपे सर्वकला भ्यासो जातः सनत् कुमारो यौवन मनुप्राप्तः अन्यदावसंतमासेऽनेकराज पुत्र नगर लोक सहितः सनत् कुमारः क्रीडार्थमुद्यानेगतः तत्राश्व क्रीडां कर्तुं सर्वे कुमाराः अश्वारूढाः स्वस्वमश्वङ्गे लयन्ति सनत् कुमारोपि जलधिकल्लोलाभिधानं तुरङ्गमारूढः समकालं सर्वैः कुमारैर्मुक्तास्तो विपरीत शिक्षितेन कुमाराश्वेन तथा गतिः कृत्वा यथा अपर कुमाराश्वाः प्राक् पतिताः कुमाराश्वस्तु अदृश्यो भूतः ज्ञातवृत्तान्तो राजा स परिकरस्तत् पृष्टो चलितः अस्मिन्नवसरे प्रचण्ड वायुर्वातुं लग्नः तेन तुरङ्गपदमार्गो भग्नः महेन्द्रसिंहो राजान्नां मार्गयित्वा उन्मार्गेणैव कुमारमार्गणाय लग्नः प्रविष्टो भीषणां महाटवीं तत्र भ्रमतस्तस्य वर्षमेकमति क्रान्तं एकस्मिन् दिवसेगतः स्तोकं भूमि भागं तावत् तावदेकं महत्सरोवरं दृष्टवान् तत्र कमलपरिमल माघ्रातवान् श्रुतवांश्च मधुरगीतवेणुरवं यावन्महेन्द्रसिंहोऽग्रे गच्छति तावत्तरुणीगणमध्य संस्थितं सनत् कुमारं दृष्टवान् विस्मितमनामहेन्द्रसिंहश्चिन्तयति किं मयाएषविभ्रमो दृश्यते किं वा सत्य एवायं सनत् कुमारः यावदेवं चिन्तयन् महेन्द्रसिंहस्तिष्टति तावत्पठित मिदं बन्दिना जय २ आसंसेण न हय लमयङ्क कुरुभुवण लग्गणिस्सं भजयति हुयणनाहसणं कुमारः जयलङ्कमाहप्पं १ ततो महेन्द्रसिंहः सनत्कुमारोयमिति निश्चितवान् अथ प्रकामं प्रमुदितमनाः सनत् कुमारेण दूरादागच्छन् दृष्टः सनत् कुमारोप्यत्यायाभि मुख माययौ महेन्द्रसिंहः सनत् कुमार पादयोः पतितः सनत् कुमारेण समु

सूत्र

ज्जमझ्झुवगओ मघवंनाम महायसो ॥ ३६ ॥ सणंकुमार मणुसिंदोचक्कवट्टी महिड्ढिओ पुत्तं रज्जे ठवेऊण सोविराया

भाषा

सनत्कुमारो सनत्कुमारनामे मनुष्येंद्र मनुष्यमाहिं इंद्र चक्रवर्त्तिः-महर्द्धिकः चक्रवर्त्ति महाऋद्धीवंत पुत्रं राज्ये स्थापयित्वा पुत्रने राज्यदेईने सोपि राजा दोक्षमान् तपंचरेत् तिणे राजाइं तपआदर्यो ३७ त्यक्ता भारतं वर्षं त्यजीने भरतक्षेत्र चक्रवर्त्ति महर्द्धिकः चक्रवर्त्ति महाऋद्धिनो धणी थाति

स्थापितो गाढमालिङ्गितश्च द्वावपि प्रमुदितमनस्कौविद्याधरदत्तासने उपविष्टौ विद्याधर लोकश्च तयोः पार्श्वे उपविष्टः अथानंदजल पूरितनयने न सनत् कुमारेण भणितं मित्र कथमेकाकी त्वं अस्यामटव्यामागतः कथं चात्रस्थितोहं त्वया ज्ञातः किञ्च करोति मद्विरहे ममपितामाता च कथितः सर्वो वृत्तान्तो महेन्द्रसिंहेन ततो महेन्द्रसिंहो वरविलासिनीभिर्मज्जितः स्नापितश्च भोजनं द्वाभ्यां सममेव कृतं भोजनावसाने च महेंद्रसिंहेन सनत् कुमारः पृष्टः कुमारतदात्वं तुरङ्गमेणापहृतः क्वगतः क्वस्थितश्च कुतएतादृशी ऋद्धिस्त्वया प्राप्ता सनत्कुमारेण चिन्तितं न युक्तं निजचरित्र कथनं निज मुखे नेति संचिन्त्य स्वयं परिणीता खेचरेन्द्र पुत्रीविपुलमतीनाम्नी स्व प्रिया साकुमार वृत्तान्तं स्व विद्याबलेन कथयितुं प्रवृत्ता तदानीं कुमारो भवदादिषु पश्यत्सु कुमारस्तु रङ्गमेणापहृतो महाटव्यां प्रविष्टः द्वितीयदिनेऽपि तथैव धावतोश्वस्य मध्याह्न समयेजातः क्षुधापि पासाकुलितेन आन्तेन अश्वेन निष्कासिताजिह्वा कुमारस्तत उत्तीर्णः सोश्वस्तदानी मेव मृतः कुमारस्ततः पादाभ्यामेव चलितः तृषाक्रांतश्च सर्वत्र जलं गवेषयन्नपि न प्राप ततो दीर्घाध्वश्रमेण सुकुमारत्वेन चात्यन्तमाकुलो भूतो दूरदेशस्थितं सप्तच्छदं वृक्षं पश्यन् तदभि मुखं धावन् कियत् कालानन्तरं तत्र प्राप्तः च्छायायामुप विष्टः पतितश्च लोचने भ्रामयित्वा कुमारः अत्रावसरे कुमार पुण्यानुभावेन वन वासिनाय क्षेणजलमानीतं शिशिरशीतलजलेन सर्वाङ्गं सिक्तः आश्वा सितश्च लब्धचेतनेन च कुमारेण जलं पीतं पृष्टश्च कस्त्वं कुतो वा नीतं जल मिदं तेन भणितं अहो यक्षोत्तनिवासी सलिलं चेदं मानसरोवरादानीतं कुमारेणोक्तं यदि मान्तद्दर्शयसि तदा तत् मानसरोवरे प्रक्षालयामि तदाभद्रपुरुषापोपनयति तच्छ्रुत्वायक्षेण करतल संपुटे गृहीत्वानीतोमानसरोवरं तत्र व्यसनापतितोयमिति ज्ञात्वा क्रुद्धेन वैताढ्य वासिनासितयक्षेण समं कुमारस्य युद्धं जातं तथाहि यक्षेण प्रथमं मोटितरुः प्रचण्डः पवनोमुक्तः तेन नभस्तलम्बहु लध्वान्ध कारितं ततो विमुक्ताट्टहासाज्वलनज्वालापिङ्गलकेशापिशाचामुक्ताः कुमारस्तैर्मनाक् न भीतिं गतः ततो नयनज्वाला

स्फुटिङ्कवर्षभिर्नागपाशैः कुमारोयच्चेण बद्धः जीर्णरज्जुबन्धनानिचतान् त्रोटयतिस्म कुमारः ततः करास्फालनं पूर्वं मुष्टिमुदयम्य यक्षः समायातः तावतामुष्टि प्रहारेण कुमारस्तं खण्डोक्तवान् पुनर्यक्षः स्वस्थो भूत्वा गुरुमत्सरेण कुमारं घन प्रहारेणहतवान् तत् प्रहारार्त्तः कुमारश्छिन्न मूलद्रुम इव भूमौ निपतितः ततो यक्षेणदूरमुत् क्षिप्यगिरवरः कुमारस्यो परिक्षिप्तः तेन दृढपीडितां गोनिश्चेतनोजातः अथ किं यत्कालानन्तरं लब्ध संज्ञः कुमारस्तेन समं बाहुयुद्धं चकार कुमारेण करमुद्गराहतो यक्षः प्रचण्डवाताहत चूत इव तथा भूमौ निपतितः यथा मृत इव दृश्यते परं देवत्वात्तन मृतः आराटिं कुर्वाणः स यक्षस्तथा नष्टो यथा पुनर्नदृष्टः कौतुकान्नभस्थागतविद्याधरैः पुष्प वृष्टिर्मुक्ताः उक्तं च जितोयक्षः कुमारेणेति ततोमानस सरसि यथेष्टं स्नात्वा उत्तीर्णः कुमारो यावत् स्तोकां भूमिभागं गतः तावत्तत्र वनमध्य गता अष्टौ विद्याधर पुत्रीर्दृष्टवान् तापिरम्यासौ स्निग्धदृष्ट्या विलोकितः कुमारेण चिंतितं एताः कुतः समायाताः संति पृच्छाम्यासां स्वरूपमिति पृष्टं कुमारेण तासां समीपे गत्वा मधुरवाण्या कुतोभवत्य आगता किमर्थं मेतत् सून्यमरण्य मलङ्कृतं ताभिर्भणितं महाभाग इतोनाति दूरे प्रियसङ्गमाभिधानास्माकं पुरी अस्ति त्वमपि तत्रैवागच्छेति भणितिः किङ्करी दर्शितमार्गस्तासां नगरीं प्राप्तः किञ्चिकिपुरुषैः राजभुवनन्नीतः दृष्टश्च तत्रनगरस्वामिनाभावुवेगराज्ञा अभ्युत्थानादिनासत् कृतश्च उक्तं राज्ञा महाभाग त्वं एतासां ममाष्टकन्यानां वरोभव पूर्वं हि आत्राया तेन अर्चिमालिनाम्ना मुनिनाएव मादिष्टं योसिताच्चं यच्चं जेष्यति स एतासां भर्त्ताभविष्यति ततस्त्व मेता परिणयेति नृपेणोक्ते कुमारेण तथेति प्रतिपन्नं राज्ञा महामहः पूर्वकं विवाहः कृतः कङ्कण कुमारकरेबद्धः सप्तसप्ततीभिः सार्द्धं रतिभुवने कुमारः पल्यङ्कोपरि निद्रावगमेवात्मानं भूमौपश्यति किमेतदिति चिंतितवांश्च करबद्धं कङ्कणं पश्यति ततः खिन्नमनाः कुमारस्ततो गंतुं प्रवृत्तः अरण्यमध्ये च गिरिवरशिखरे मयस्तम्भ प्रतिष्ठितं दिव्यभुवनं दृष्टं कुमारेण चिंतितं इदमप्यालप्याल प्रायश्चविष्यतीति तदासत्रेयाबद्धुं प्रवृत्तः कुमार स्तावत्

तद्भवनान्तः करुणस्वरेण रुदन्त्या एकस्यानार्याः शब्दं श्रुतवान् प्रविष्ट स्तद्भवनान्तः समभूमिमारूढः रुदन्त्या तत्र एकया कन्यया भणितं कुरुजनपद नभस्तल मृगाङ्क सनत्कुमार त्वं भवान्तरेपि मम भर्त्ता भूया इति वारं २ भणती पुनर्गाढं रोदितुं प्रवृत्ता ततो रुदन्त्यैवतयासनं दत्तं तत्रोपविश्य कुमार त्वां दृष्टवान् सनत्कुमारेण सहतवकः सम्बन्धः येन त्वं तमेवं स्मारयसि सा प्राह मम स मनोरथ मात्रेण भर्त्ता कथमिति कुमारेणोक्तं सा प्राह अहं हिरण्याकेत पुरस्वामि सुरथनामनरेन्द्र भार्या चन्द्रयशा पुत्री अस्मि अन्यदाहं यौवनं प्राप्ता पित्रा चमत्कृतेऽनेक राजकुमार चित्रपटरूपाणि दूतैरानीय दर्शितानि एकमपि चित्रपटरूपं मम न रुचते एकदा सनत्कुमार चित्रपटरूपं दूतै रानीय मे दर्शितं तदत्यन्तं मेरुरुचे मोहिताचाहं तद्रूपमेव ध्यायन्ती स्वगृहे तिष्ठामि तावदहमेकेन विद्याधरेण पितृगृहादपहृता क्वानीता स्वयं विकुर्व्वितेस्मिन्नावासेमां मुक्त्वा स क्वचित् गतोस्ति या वक्ष्या कन्या एवं वदन्त्यस्मि तावत् अग्निवेग सुत वज्र वेगेण विद्याधरेण तत्रागत्य सनत्कुमार उत्क्षिप्तो गगनमण्डले सा च कन्या हाहारवं कुर्वाणा मूर्च्छापरा धीना निपतिता पृथिवी पीठे तावदाकाशमार्गादागत्य सनत्कुमारेण स विद्याधरो मुष्टिप्रहारेण व्यापादितः सनत्कुमारेण तस्या वृत्तान्तः कथितः परिणीता च सा सुनन्दाभिधाना कन्या सास्य स्त्रीरत्नं भविष्यति स्तोकवेलायां तत्र वज्रवेग विद्याधरभगिनी सन्ध्यावली समागता भ्रातरं व्यापादितं दृष्ट्वा कोप मुपागता पुनरपोदं नैमित्तिकंवचः स्मृतिपथमागतं यथा तव भ्रातृवधकस्तव भर्त्ता भविष्यतीति मत्वा कुमारस्यैवं विघ्नमिं चकार अहमिहत्वां विवाहार्थमायाताम्मीति सनत्कुमारेण सा तत्रैव परिणीता अत्रांतरे सनत्कुमारसमीपे द्वौविद्याधर नृपौ समायातौ ताभ्यां प्रणामपूर्वं कुमारस्यैवं भणितं देव अग्निवेग विद्याधरो विद्याबलमज्ञात पुत्र मरणवृत्तान्तस्वया समंयोद्धुमायाति तदत्यन्तचंद्र वेगभानुवेगाभ्यां आवां हरिचंद्र सेनाभिधानौ निजसुतौ प्रे षितोरहसि संनाहश्चप्रे षितः आवां अस्मत्पितरौभवतो वार्त्तं संप्राप्ता: तदनन्तरं तत् समागतौ चन्द्रवेगभानुवेगौ सनत्कुमारस्यसाहय्याय कन्यावल्या प्रस्थौ

वियाहृत्ता चन्द्रवेग भानुवेग सहितः सनत्कुमारः संग्रामाभिमुखं चलितः तावता शनिवेगः सैन्यहृतः समायातस्तेन समं प्रथमचन्द्रवेग भानुवेगौ युद्धं प्रवृत्तौ चिरकालं युद्धं कृत्वा तयोर्बलं भग्नं ततः स्वयमुत्थितः सनत्कुमारस्तेन अशनिवेगेन समंघोरं युद्धमारब्धं प्रथमं महोरगास्त्रं कुमारस्याभिमुखं मुक्तं तच्च कुमारेण मुष्टिनैवनिहितं पुनस्तेन आग्नेयं शस्त्रं मुक्तं तत्कुमारेण वरुणास्त्रेण निहतं पुनस्तेन वायव्यास्त्रं मुक्तं कुमारेण शैलास्त्रेण प्रतिहतं ततो गृहीत धनुर्बाणान् मुञ्चन् कुमारस्तं निर्जीवमिव चकार पुनर्गृहीत करवालः स सनत्कुमारेण छिन्न दक्षिणकरः कृतः ततो द्वितीय करेण बाहुयुद्ध मिच्छतस्तस्याभिमुख माया तस्य कुमारेण शिरश्छिन्नं तदानीं अशनिवेग विद्याधर लक्षौरनेक विद्याधरैः सहिता सनत्कुमारेण संक्रान्ता ततोऽशनिवेगं विद्याधर परिवृतः सनत्कुमारो नभोमार्गाद्विद्याधर रथेन स्वपुरीयं तदावासे पुनरायातः दृष्टस्तत्र हर्षिताभ्यां उक्तश्च ताभ्यां आर्यपुत्र स्वागतं अत्र च समस्त विद्याधरैः सनत्कुमारस्य राज्याभिषेकः कृतः सुखेनातृ विद्याधर राजसेवितः सनत्कुमारस्तिष्ठति अन्यदा चंद्र वेगेन विज्ञप्तः यथा सनत्कुमारः देव ममपूर्व अर्चिमालि मुनिना एवमादिष्टं यथेदं तव कन्या शतंभानुवेगस्य चाष्ट कन्यायः परिणेष्यति सोऽवश्यं सनत्कुमारनामा चतुर्थचक्री भविष्यति सद्दतोमासमध्ये मानसरोवरे समेष्यति तत्र व्यसनापतितं सरसिस्नानं असिताचोदत्तः पूर्वभववैरीद्रक्ष्यति स पूर्व भववैरी कथमिति सनत्कुमारेण पृष्टे चंद्रवेगोमुनिमुखश्रुतं तत्पूर्व भववृत्तान्तं प्राह अस्तिकाञ्चनपुरं नाम नगरं तत्र विक्रमयशोनाम राजा तस्य पञ्चशतानान्तः पुर्यावर्त्तन्ते तत्र नागदत्त सार्थवाहोस्ति तस्य रूपलावण्य सौभाग्य यौवनगुणैः सुरसुन्दरीभ्योऽधिका विष्णुसिरीनाम भार्यास्ति सान्यदा विक्रमयशो राज्ञा दृष्टा मदनातुरेण तेन स्वान्तः पुरेचिप्ता ततो नागदत्तस्तच्चिन्तया उन्मत्ती भूतएवं विलपतिहा चन्द्रानने क्वगता दर्शनंमे देहीति विलपन् कालं नयति विक्रमयशो राजानुमुक्त सकल राजकार्योऽगणितजनापवादस्तया विष्णुश्रियासह अत्यन्तरति प्रसक्तः कालं नयति पञ्च

यतान्तः पुरोणां नामानि गृह्णाति अनादाताभिः कार्मणादियोगेन विश्वुश्रौर्व्यापादिता ततो राजा तस्या मरणेनात्यन्तं शोकार्त्तोऽभूत अश्रुनयनो नागदत्तएवोन्मत्तोभूतो विष्णुश्रीकलेवरं वह्नि साकर्तुं न ददाति ततो मन्त्रिभिर्नृपः कथमपि वञ्चयित्वाऽरण्ये तत्कलेवरं त्यक्तं राजा च तत् कलेवर मपश्यन् परिहृतान्नपान भोजनः स्थितः मन्त्रिभिर्विचारितं एष तत्कलेवर दर्शन मंतरेण मरिष्यतीति अरण्ये नीत्वाराज्ञ स्तत्कलेवरं दर्शितं राज्ञा तदानीं तत्कलेवर गलत्पूतिनिवहं निर्यत्कृमिजालं वायस कर्षित नयनयुगल चञ्च खगतुण्डखण्डितं दुरभिगन्धं प्रेक्ष्य एवमात्मानं निन्दितुमारब्धं रेजोवयस्य कृते त्वया कुलसीलजाति यशो लज्जाः परित्यक्ताः तस्ये दृशी अवस्थाजाता ततो वैराग्यमार्गं प्राप्तो राजाराज्यं राष्ट्रं पुरं स्वजनवर्गञ्च परिहृत्य सुव्रताचार्य समीपे निष्क्रान्तः ततश्चतुर्थ षष्टाष्टमादि विचित्रतपः कर्मभिरात्मानं भावयन् प्रान्ते संलेखनां कृत्वा सनत् कुमारदेव लोकगतः ततश्च्युतो रत्नपुरे श्रेष्टि सुतोजिन धर्मीजातः स च जिनवचन भावितमनः सम्यक्त्वमूलं द्वादशविधं श्रावक धर्मं पालयन् जिनेन्द्र पूजारतः कालं गमयति इतश्च सनागदत्तः प्रिया विरह दुखितो भ्रान्त चित्त आर्त्तध्यान परिचिन्न शरीरो भूत्वा बहुतिर्यग्योनिषु भ्रान्त्वा ततः सिंह पुरेनगरेऽग्नि शर्मनामाद्विजो जातः कालेनविदण्डि व्रतं गृहीत्वाद्विमासक्षपणरतो रत्न पुरमागतः तत्र हरिवाहनो नाम राजा तापस भक्तस्तेन तपस्वी आगतः श्रुतः पारणकदिने राज्ञानि मन्त्रितः स गृहमागतः अत्रान्तरे सजिन धर्म्मनामा श्रावकस्तत्रागतः तं दृष्ट्वा पूर्वभवजात वैरानुभावेनरोषारुण लोचने न मुनिनाएव मुक्तराज्ञः यदा त्वं मां भोजयसि तदास्य श्रेष्टिनः पृष्टीस्थालं विन्यस्यमां भोजय अन्यथा नाहं भोक्ष्ये राज्ञा उक्त मसौ श्रेष्टीमहान् वर्त्तते ततोऽपरस्य पुरुषस्य पृष्टौ त्वं भोजनं कुरु स प्राह एतस्य पृष्टा वेव भोजनं करिष्येना यरस्येति राज्ञा तापसानुरागेण तत् प्रतिपन्नं राज्ञो वचनात् श्रेष्टिना पृष्टौ स्थालमारो पितं तापसेन तत् पृष्टौ दाह पूर्वकभोजनं कृतं श्रेष्टिना पूर्वभव दुष्कर्म फलं ममोपस्थिति मिति मन्यमानेन तत्सम्यक् सोढ मिति स्थालीदाघेन तत्

पृष्टौचतं जातं ततः सतापस्तथा भुक्ता स्व स्थानेगतः श्रेष्ठापि स्व गृहे गत्वा स्व कुटम्बवर्गं प्रतिबोध्यजैनदीक्षां जग्राह ततो नगरान्निर्गतोगिरि शिखरेगत्वा न शनमुच्चचार पूर्वदिगभि मुखं मासार्द्धं यावत्कायोत्सर्गेणस्थितः एवं शेषास्वपि दिक्षु ततः पृष्टिचते काक शिवादिभिर्भक्षितः सम्यग् तत्पीडां सहमानो मृत्वासौ धर्म्मे कल्पे इंद्रोजातः सतापसोपि तस्यैव वाहनं ऐरावणोजातः ततश्चुतोऽय ऐरावणो नरतिर्यक्षु भ्रान्त्वाऽसिताद्रौ जातः शक्रोपि ततश्चुत्वाहस्तिनाग पुरे सनत् कुमारो च क्रीजातः एवं असिताद्रयद्यस्य भवता सह वैरकारणमिति मुनि नोक्ते मयातवान्तरया स निमित्तं भानुवेगं विसर्जयित्वा प्रियसङ्गम पुरीनिवेश पूर्वं तव भानुवेगेन कन्यापरिणायिता सुतो मयैव कारणेनत्वं तद्वन्दने एवं करिष्याम इति विचार्य तदा विद्याधरास्तत्कृतवन्तः ततो विज्ञपयामि देवमन्य स्व मैकन्याशतपाणि ग्रहणं ता अपि तत्र भवन्मुख कमलं पश्यति एवं भवत्विति कुमारायोक्ते स चन्द्रवेगः कुमारेण समं स्व नगरेगतः तत्र कुमारेण कन्या शतं परिणीतं पुनरत्रागतश्च दशोत्तरेण कन्याशतेन सह भोगान् भुंक्ते कुमारः अथ पुनरेव मुक्तः कुमारेण यथाद्य गन्तव्यं यत्रास्माभिर्यत्नोजितः साम्प्रतमत्रायातस्य कुमारस्य पुरः प्रेक्षणं कुर्वता अस्माकं कुमार पत्नीनां भवद्दर्शनं जातमिति अत्रांतरेरति गृहशय्या उत्थितः कुमारः महेन्द्रसिंहेन समं विद्याधरपरिवृतो वै ताढ्यं गतं अवसरं लब्ध्वा महेन्द्रसिंहेन विज्ञप्तं कुमारतव जननी जनकौ त्वद्विरहार्त्तौ दुःखेन कालं गमयतः ततस्तद्दर्शन प्रसादः क्रियतां इति महेन्द्रसिंह वचनानन्तरमेव महतागमनस्थित विद्याधर विमानहयगजादि वाहनारूढ विद्याधर वृन्दसं वृतेन हस्तिनागपुरे संप्राप्तः कुमारः आनन्दिताश्च जननी जनक नागरजनाः ततो महत्याविभूत्याख्य सेन राज्ञा सनत् कुमारः स्व राज्ये अभिषिक्तः महेन्द्र सिंहश्चसेनापतिः कृतः जननी जनकाभ्यां स्थविराणामन्तिके प्रव्रज्यां गृहीत्वा स्वकार्यमनुष्ठितं सनत् कुमारोपि प्रवर्द्धमानकोश बलसारो राज्य मनुपालयति उत्पन्नानि चतुर्दशरत्नानि नवनिध यश्च कृता च तेषां पूजा तदनंतरं चक्र रत्नदर्शित मार्गोमागधवरदां

मप्रभासस्मिन् खण्ड प्रतापादि क्रमेण भरतक्षेत्रं साधितवान् कुमारः हस्तिनागपुरे चक्रवर्त्ति पदवीं पालयन् यथेष्टं सुखानि भुंक्ते शक्रेणावधि ज्ञान प्रयोगात्तं पूर्वभवे स्वपदाधि रूढं ज्ञात्वा महताहर्षेण वै श्रमणोऽनुज्ञप्तः सनत् कुमारस्य राजाभिषेकं कुरु इमं च हारं वनमालां छत्रं रुकुटं चामरयुगलं कुण्डलयुगं दूष्य युगं सिंहासनञ्च पादपीठञ्च प्राभृतं कुरुशक्रेण तव वृत्तान्तः पृष्टोस्मीति ब्रूयाः वै श्रमणोपि शक्र दत्तं गृहीत्वागज पुरनगरे समागत्य तत् प्राभृतं चक्रिणः पुरोमुक्तवान् शक्र वचनं चोक्तवानिति पुनः शक्रेण तिलोत्तमारम्भे देवांगने तत्र तदभिषेक करणाय प्रेषिते चक्रि णोनुज्ञाग्टहीत्वा विकुर्वितयोजन प्रमाण मणिपीठो परिरचितमणिमण्डपान्तः स्थापि ते मणि सिंहासने कुमारं निवेश्यकनक कलशाहृतक्षीरोदजल धाराभिर्वलगोतानि गायन्तो देवोदेवाभ्यषिञ्चन् रम्भाति लोत्तमादेव्यो तदानीं नृत्यं कुरुत महामहोत्सवेन कुमारमभिषिच्च वै श्रमणादयः स्व लोकं जग्मुः चक्रापि भोगान् भुञ्जन् कालं गमयति अन्यदा सुधर्म सभायां सौधर्मेन्द्रः सिंहासने अनेक देव देवीसेवितः स्तितोस्ति अत्रांतरे एकईशान कल्प देवः सौधर्मेन्द्र पार्श्वे आगतः तस्य देह प्रभया सभास्थितः देव देह प्रभाभर सर्वतोनष्टः आदित्योदये चन्द्र ग्रहादय इवनिः प्रभाः सर्वे सुराजाताः तस्मिन् पुनः स्वस्थानेगते देवैः सौ धर्म्मेन्द्रः पृष्टः स्वामिन् केन कारणेन अस्य देवस्ये दृशीप्रभाजातास्ति शक्रः प्राहः अनेन पूर्वभवे आचाम्ल वर्द्धमानतपोखण्डं कृतं तत् प्रभावादस्य देहे प्रभा ईदृशी जातास्ति देवैः पुनरिंद्रः पृष्टः अन्योपि कश्चिदीदृशो दीप्तिमानस्ति नवा इंद्रेण भणितं यथा हस्ति नागपुरे कुरुवंशेस्ति सनत् कुमारनामा चक्री तस्य रूपं सर्वदेवेभ्योप्यधिकमस्ति इदं शक्र वचो अद्दधानो विजय वै जयन्तो देवौ ब्राह्मण रूपौ आगतौ प्रतीहा रेण मुक्त द्वारौ गृहान्तः प्रविष्टौ राजसमीपं गतौ दृष्ट्वतैलाभ्यङ्गं कुर्वन् राजातीवविस्मितौ देवौ शक्रवर्णितरूपाधिक रूपन्तौ पश्यन्तौ राज्ञा पृष्टौ किमर्थं भवन्तौ अत्रायातौ तौ भणतः देव भवद्रूपं त्रिभुवने वर्ण्यते तद्दर्शनार्थं कौतुकेन आवां अत्रायातौ ततोति रूपगर्वितेन राज्ञा तौ उक्तौ भो भो

विप्रीयुवां किं मद्रूपं दृष्टं श्लोक कालं प्रतीक्षेथा यावदहमाख्यान सभामुपविशामि एवमस्त्विति प्रोक्तनिर्गतौ द्विजौ चक्रापि शीघ्रं मज्जनं कृत्वा सर्वां गोपाङ्ग शृंगारं दधत् सभायां सिंहासने उपविष्टः अकारितौ द्विजौ ताभ्यां तदा चक्रि रूपं दृष्ट्वा विषण्णाभ्यां भणितं अहो मनुष्याणां रूप लावण्य यौवनानित्यत्व दृष्ट नष्टानि तयोर्हि जयोरेतद्वचः श्रुत्वा चक्रिणा भणितं भोकिमेवं भवन्तौ विषण्णौ मम शरीरं निन्दतः ताभ्यां भणितं महाराज देवानां रूप यौवन तेजांसि प्रथमवयादारभ्यषण्मासशेषायुः समयं यावदवस्थितानि भवन्ति यावज्जीवं नश्यन्ति भवतां शरीरे तु आश्चर्यं दृश्यते यत्तद्रूपलावण्यादिकं साम्प्रतमेव दृष्टं नष्टं राज्ञाभणितं कथमेवं भवद्भ्यां ज्ञातं ताभ्यां शक्रप्रशंसादिकः सर्वोपि वृत्तान्तः कथितः चक्रिणा तु केयूरादि विभूषितं बाहुयुगलं पश्यताहारादि विभूषित मपि स्व वक्त्रः स्थलं विवर्णमुपलक्ष्य चिन्तितं अहो अनित्यता संसारस्य असारताशरीरस्य एतावन्मात्रे णापि कालेन मच्छरीरस्य यौवन तेजांसि नष्टानि अयुक्तो रस्मिन् भवे प्रतिबन्धः शरीरमोहोऽज्ञानं रूप यौवनाभिमानो मूर्खत्वं भोगासेवनं उन्मादः परिग्रहो ग्रह इव तत एतत्सर्वं व्युत्सृज्य परलोकहितं संयमं गृह्णामीति विचार्य चक्रिणा पुत्रः स्वराज्येऽभिषिक्तः स्वयं संयमग्रहणाय उद्यतो जातः तदानीं देवदेवीभ्यां भणितं अण्ण हरियं धीर तु मे चरियं निय यस्स पुव्व पुरिसस्स भरह महानरवइणो तिहु अणविक्खायकित्तिस्स १ इत्यादुक्त्वा देवौ गतौ चक्र्यपि तदानी मेव सर्वं परिग्रहं परित्यज्य विरता चार्यसमीपे प्रव्रजितः ततः स्त्रीरत्न प्रमुखाणि सर्वरत्नानिशेषाश्चरमण्डः सर्वेपि नरेन्द्राः सर्वसैन्य लोकानवनिधवश्च षण्मासान् यावत्तन्मार्गानुलग्नाः तेन संयमिनासिंहावलोकननायेन दृष्ट्यापि न विलोकिता। षष्ट भक्तेन भिक्षानिमित्तं गोचर प्रविष्टस्य प्रथम मेव अजातकल्पस्य गृहस्थेन दत्तं तद्गृहीतं द्वितीय दिवसे च षष्टं एव कृतं पारणके प्रान्तनीर साहारकरणात्तस्यैते रोगा आदुर्भूताः कण्डू १ ज्वरः १ कासश्वासः४ स्वरभङ्गः ५ अक्षिदुःखं ६ उदरव्यथा ७ एता सप्त व्याधयः सप्तशत वर्षाणि यावदध्यासिता उग्रतपः कुर्वतस्तस्य

आमर्षौषधी १ खेलौषधी १ विप्पौषधी ३ जल्लौषधी ४ सर्वौषधी ५ प्रभृतयो लब्धयः सम्यक्त्वाः तथाप्यसौ स्व शरीर प्रतीकारं न करोति पुनः शक्रेणैकदा एवं प्रशंसितः अहो पश्यन्तु देवाः सनत्कुमारस्य धीरत्वं व्याधिकदर्थितोप्ययं न स्वपुः प्रतीकारं कारयति एतदिन्द्रवचन मश्रद्दधानौ तावेवदेवौ वैद्यरूपेण तस्य मुनेः समायातौ भणितवन्तौ च भगवन् तव वपुष्यावां प्रतीकारं कुर्वः सनत्कुमार स्तदानीं तूष्णीं कएवस्थितः पुनस्ताभ्यां भणितं तथैव मुनिर्मौनभाक् जातः पुनः पुनस्तथैव तौ भणतः तदा मुनिना भणितं भवन्तौ किं शरीर व्याधिस्फेटको किम्वा कर्म्मव्याधिस्फेटको ताभ्यां भणितं आवां शरीर व्याधिस्फेटको तदानीं सनत्कुमारमुनिना स्वमुखथूत्कृतेन घर्षिता स्वाङ्गुली कनकवर्णादर्शिता भणितञ्च अहं स्वयमेव शरीरव्याधिं फेटयामि यदिमे सहनशक्तिर्नस्यात्तदेति युवां यदि संसार व्याधिस्फेटनसमर्थौ तदातंस्फेटयथः तौ देवौ विस्मित मनस्कोप्रकटितस्वरूपौ एव मूचतुः भगवन् त्वमेव संसारव्याधिस्फेटन समर्थोसि आवाभ्यांतु शक्रवचनमश्रद्दधानाभ्यामिहागत्यत्वं परीक्षितो यादृशः शक्रेण वर्णि तस्तादृश एवत्वमसीत्युक्ता प्रणम्य च स्वस्थानं गतौ भगवान् सनत्कुमारस्तु कुमारत्वे पञ्चाशद्वर्ष सहस्राणि चक्रवर्त्तित्वे वर्षलक्षं श्रामण्ये च वर्षलक्ष मेकं परिपाल्य संमेत शैलशिखिरङ्गतः तत्र शिलातले आलोचना विधानपूर्वं मासिकेन भक्तेन कालंकृत्वा सनत्कुमार कल्पे देवत्वेनोत्पन्नः ततश्च्युतो महाविदेहे वासे सेत्स्यति इति सनत्कुमार दृष्टान्तः ३७ चइत्ता भारहं वासं चक्कवट्टी महड्ढिओ सन्ती सन्ती करेलोए पत्तोगइ मणुत्तरं ३८ पुनः शान्तिः शान्तिनाथः प्रस्तावात्यञ्चमश्चक्री अनुत्तरां गतिं प्राप्तः मोक्षप्राप्तः कथम्भूतः शान्तिः लोके शान्तिकरः शान्तिं करोतीति शान्तिकरः इति विशेषणैन

तवं चरे ॥३७॥ चइत्ता भारहं वासं चक्कवट्टी महड्ढिओ संतीसंति करेलोए पत्तो गइ मणुत्तरं ॥ ३८ ॥ इक्खागरायवस

करोलोके शांतिनामाचक्रवर्त्ति शांतिनो करणहार प्राप्तः गतिं अनुत्तरां अनुत्तर प्रधान मुक्ति गत्तिंतोहां प्राप्तहुवो३८इक्ष्वाकुवंश ऋषभ समः इक्ष्वाकुवंसने

तीर्थं करत्वं प्रतिपादितं षोडशः स्तीर्थकरः शान्तिनाथोमोक्षं जगाम इत्यर्थः किंकृत्वा भारतंवासं त्यक्त्वा भरतस्य इदं भारतं भरतक्षेत्र संबन्धिवासं इति राज्यवासं कोटशः शान्तिश्चक्रवर्त्ती महर्द्धिकः इत्यनेन शान्तेश्चक्रवर्त्तित्वं तीर्थं करत्वंच प्रतिपादितं ३८ अत्र शान्तिनाथदृष्टान्तः इहैव जम्बूद्वीपे भरत क्षेत्रे वैताढ्य पर्वते रथनूपुर चक्रवालंनाम नगरं अस्ति तत्र राजा मिततेजसः परिवसति तस्य सुतारानामं भगिनी वर्त्तते साच पोतनाधिपतिना श्रीविजयराज्ञा परिणीता अन्यदाऽमित तेजराजा पोतनपुरे श्रीविजयसुतारा दर्शनार्थंगतः प्रेक्षते च प्रमुदित उच्छ्रित पताकं सर्वमपिपुरं विशेषतश्च राजकुलं ततोविस्मितलोचनोमित तेजराजा गगनतला दुत्तीर्णः गतश्च राजभवनं अभ्युत्थानादि सत्कृतः श्रीविजयेन कृतसुचितं करणीय सुपविष्टः सिंहासनेऽमित तेजराजा पप्रच्छ नगरोत्सवकारणं यतः श्रीविजय एवप्राह यथा इतोष्टमे दिवसे मदन्तिके एको नैमित्तिकः समायातः मदनुज्ञाते सिंहा सने उपविष्टः पृष्टश्चमया किमागमन प्रयोजनं ततस्तेन भणितं महाराज मया निमित्तमवलोकितं यथा पोतनाधिपतेरुपरिइतो दिवसात्सप्तमे दिवसे मध्याह्नसमये विद्युत्पतिष्यति इदञ्च कर्णकटुकंवचः श्रुत्वा मन्त्रिणाभणितं तदानींतवोपरि किं पतिष्यति तेनोक्तं माकुप्यत यथामयोपलब्धं निमित्तं भवतां कथितं नचात्र ममकोपि भावदोषोऽस्ति ममोपरि तस्मिन्दिवसे हिरण्यवृष्टिः पतिष्यति मया भणितं त्वयै तन्निमित्तं कथंठितं तेन भणितं मया त्रिपृष्ट वासुदेव भ्रातृ अचलबलदेवदीक्षा समयेपित्रा समं मयापि प्रव्रज्या गृहीता तत्रानेकशास्त्राध्ययनं कुर्वता मयाष्टाङ्ग निमित्त मध्यधीतं ततोहं प्राप्तयौवनः पूर्वदत्त कन्या भ्रातृभिरुत्प्रव्राजितः कर्मपरिणतिवशेन सा मया परिणीता तेन मया सर्व्वज्ञ प्रणीत निमित्तानुसारेण प्रलोकितं यथा सप्तमेदिवसे पोतनाधिपतेरुपरिविद्युत्पातो भविष्यति एवं तेन नैमित्तिनोक्तं एकेन मन्त्रिणा भणितं यथा महाराज समुद्रमध्ये वाहनान्तर्भवद्भिः सप्तम दिवसान् यावत्स्थेयं तत्र विघ्नवरा भवति अन्येन मन्त्रिणा भणितं दैवयोगोनाथा कर्तुं न तीर्यते यत उक्तं धीरित्यादृन्तो सागरो विक्षोल

भिन्न कुलसेलो नइ अन्नजम्म निम्मिअ सुहासुहो कम्म परिणामो १ अपरेण मन्त्रिणाभणितं पोतनाधिपतेर्बधोनेम समादिष्टो न पुनः श्रीविजयराज्ञः ततः सप्तमदिवसान् यावदपरः कोपि पोतनाधिपतिर्विधीयते सर्व्वैरप्युक्तमयमुपायः साधुमयोक्तं मज्जीवित रक्षाक्रतेऽपरजीवबधः कथं क्रियते सर्व्वैरुक्तं तर्हि यत्र प्रतिमायाराज्याभिषेकः क्रियते एवं मन्त्र यित्वा सर्व्वेपि यत्र प्रतिमापोतन पुरेराज्येऽभिषिक्ता सप्तदिवसान् यावत् मया पौषधागारेगत्वा पौषधा एव क्रता सप्तमदिवसमध्याह्न समये गगन मार्गेऽकस्मान् मेघः समुत्पन्नः स्फुरितविद्युल्लता इतस्ततः परिभ्रम्य यत्र प्रतिमाविनामिता अष्टमे दिवसेचाहं पौषध शालातोनिर्गत्यचैत्येन स्व भुवने स मायातः तं नैमित्तिकं कनकरत्नादिभिः पूजितवान् पुनरहं नागरिकैः पोतनराज्ये अभिषिक्तः तदिदमस्मिन्नगरे विविध महोत्सव कारणमिति श्रीविजयेनोक्तेऽमित तेज प्राह अविसम्बादनिमित्तं सोभनोरक्षणो पाय इत्युक्तामित तेजराजा स्वस्थानं गतवान् अन्यदा श्रीविजयराजा सुतारया समं वनेरन्तुं गतः सुतारया तत्र कनक मृगो दृष्टः श्रीविजयस्योक्तं स्वामिन्ममैनं मृगं आनीयदेहि मम क्रीडार्थं भविष्यति ततः श्रीविजयराजा तद्ग्रहणार्थं स्वयमेव प्रधावितो नष्टो मृगस्तत् दृष्टिं राजानत्यजति कियन्तो भुवं गत्वा उत्पतितो मृगः तावता सुतारा कुर्कुट सर्पेण दष्टा पूत्कार अहं कुर्कुटसर्पेण दष्टाहाप्रियमांत्रायस्वेति श्रुत्वा श्रीविजयस्त्वरितं पश्चादायातः तावतासुतारापरलमुपागता राजा च शोकपरवशस्तया समं चितायां प्रविष्टः उद्दीप्तोज्वलनः तावतास्तोक वेलायां समागतौ द्वौ विद्याधरौ तत्र एकेन सलिलमभिमन्त्र्य चितासिक्ता वैतालिनी विद्यानष्टा स्वस्थवान् राजाजातः बभाण च किमिदमिति विद्याधराभ्यां भणितं आवां अमिततेजस्य स्वकीयौ जिन वन्दननिमित्तं आकाश मार्गेभ्रमन्तौ अग्निघोष विद्याधरेण पच्यमाणायाः सुतारायाः आक्रन्द शब्दं श्रुतवन्तौ तन्मोचनार्थं आवाभ्यां युद्धमारब्धं ततः सुतारया च प्रोक्तं अलं युद्धेनयथा महाराज श्रीविजयो वैतालिनी विद्यामोहितो जीवितं परित्यजति तथा तदुद्यानं गत्वा शीघ्रं कुरुततत आवां इहा यातौ दृष्टस्त्वं वैता

लिन्या समं चितारूपः अभिमन्त्राजलेन सिक्ताचिता नष्टासादुष्टवैतालिनी स्वस्थावस्थस्वमुत्थितः इति अपहृतां सुतारांज्ञात्वाविषण्णः श्रीविजयोराजा भणितश्चताभ्यां राजन् खेदं माकुरु स पापः क्वयास्यसि इत्यादि वचनैः श्रीविजय राजानमाश्वास्यतौ विद्या धरौ अमित तेज समीपं गतौ ततोऽमित तेजप्रेषित विद्याधर रचित विमानैः स श्रीविजयोपि अमित तेज समीपं गतः अमित तेज श्रीविजयाभ्यां स सैन्याभ्यां गत्वा तन्नगरं वेष्टितं अग्नि घोषांतिके दूतः प्रेषितः तयो रागमनं श्रुत्वाऽग्नि घोषो नष्टः उत्पन्नकेवलस्य अचलस्य समीपेगतः अमित तेज श्रीविजयावपि तत् पृष्ठौ तत्रा यातौ सर्वेपि गतमत्सराधर्मं शृण्वन्ति एकेन अमित तेज विद्याधरेण सुतारापितत्रानोता लब्धा वसरेणाग्नि घोषेण भणितं न मया दुष्टभावेन सुताराऽपहृता किं तु विद्यां साधयित्वा गच्छता मया इयं दृष्ट्वा पूर्वस्नेहेन इमां त्यक्तुं न शक्नोमीति वैतालिन्या विद्यया श्रीविजयं मोहित्वासुतारां गृहीत्वा स्व नगरे गतः नास्याः शीलभङ्गमकार्षं तथापि ममात्रार्थे योपराधः सत्यं तव्य इत्याकर्ण्य अमित तेजेन भणितं भगवन् किं पुनः कारणं एतस्य अस्यां स्नेहो भूत् ततोऽचल केवली कथयति मगधदेशेऽचलग्रामे धरणी जटी नाम विप्रस्तस्य कपिलानाम चेटी तस्याः पुत्र कपिलो नाम तेन कर्ण श्रवण मात्रेण विद्याश्चिन्तिताः गतश्च देशान्तरेरत्न पुरं नाम नगरं तत्र कस्य चिदुपाध्यायस्य मठेगतः उपाध्यायेन पृष्टः कस्त्वं कुत आगतः कपिले नोक्तं अचलग्रामे धरणजटविप्रसुतः कपिल नामाहं विद्यार्थी अत्रायातस्तवसमीपमिति उपाध्यायेन स बहुमानं स्व गृहे रचितः विद्यामध्याप्य स्वपुत्रीतस्य दत्तासत्यभामा नाम्नी अन्यदा वर्षा काले स कपिलो रात्रौ स्ववस्त्राणिकक्षायां कृत्वा वर्षत्येव मेघे स्व गृहद्वारे समायातः सत्यभामा च अयंस्तिमित वस्त्रो भविष्यतीति चिन्तयन्ती अपराणि वस्त्राणि गृहीत्वा गृहद्वारे सन्मुखमायाता कपिलेन तस्या उक्तं अस्ति मम प्रभावो येन वस्त्राणि नस्तिम्यन्ति तावताविद्युत्प्रकाशे तया सनग्नो दृष्टः ज्ञातं चायं नग्न एव समायातो वस्त्राणि कक्षायां च निहित वा नित्यवश्य मयं हीन कुल इति सा कपिले मन्दस्नेहाजाता अनादा

धरणि जटीविप्रस्तत्रकपिल समीपे समायातः सत्यभामा च पित्र पुत्रयोर्विरुद्धमाचारं दृष्ट्वा परमार्थं पृष्टोधरणि जट विप्रः तेन यथार्थं कथितं तच्छ्रुत्वो द्विग्नासत्यभामाकाममोगेभ्योनिर्विण्णा प्रव्रज्याग्रहणनिमित्तं पृष्टः कपिलः नमुंचत्वेषः कपिलः तदा दृयं गतातन्निवासि श्रीषेणराज्ञः समीपं बभाण च भोराजन् मां कपिल समीपान्मोचय येनाहं दीक्षां गृह्णामि राज्ञा कपिलस्योक्तं कपिलो न मन्यते राज्ञा पुनस्तस्या उक्तं तावत् त्वं मम गृहेतिष्ठयावत् कपिलं बोधयामीति अनादा स राजा स्व पुत्री गणिकानिमित्तं युध्यमानौ दृष्ट्वा वैराग्येण विषं भक्षितवान् ततः सिंहनिन्दिताऽपि निन्दितानाम्नी श्रीषेण नृपस्य भार्यां कपिलस्य भार्या सत्यभामा च विष प्रयोगेण कालङ्गताः चत्वारोप्यमीजीवादेव कुरुषु युगलत्वेनोत्पन्नाः ततः सौधर्मे कल्पे गताः ततश्च्युत्वा श्रीषेण जीवोऽमित तेजो जातः अभिनिन्दिता जीवः श्रीविजयो जातः सत्यभामा जीवः सुताराजाता स कपिल जीवस्तिर्यग् भवेषु चिरकालं भ्रान्त्वा क्वचित्तथा विधमनुष्ठानं कृत्वाऽग्नि धोषः समुत्पन्नः सुतारश्च सत्यभामा ब्राह्मणी जीवं दृष्ट्वा पूर्वस्नेहेनापहृत्यगतः पुनरप्यमित तेजेन पृष्टं भगवन्नहं किं भविको न वा अचल केवलिनाकथितं त्वं भविक इतश्च नवमे भवेतीर्थं करो भविष्यसि एषोपि श्रीविजयस्तव गण धरो भविष्यति तत एवमाकर्ण्यमित तेज श्रीविजय नृपौ अचलकेवलिनं वन्दित्वागतौ स्व स्वस्थानं अन्यथामित तेज श्रीविजयाभ्यां उद्यानगताभ्यां चारण श्रमणाभ्यां अवधिज्ञानेन ज्ञात्वा उक्तं यथा षड्विंशति दिनानि भवतोर्द्वयोरप्यायुः ततस्ताभ्यां मेरौगत्वा कृतो अष्टाह्नि कामहोत्सवः स्व स्वराज्ये च गत्वा स्व स्व पुत्री अभिषिच्य अभिनिन्दिताजगन्नन्दन मुनि समीपे पादपोपगमनं अनशनं विहितं विधिनाकालं कृत्वा प्राणते कल्पे विंशति सागरोपमायुर्देवत्वे नोत्पन्नो ततश्च्युतौ इहैव जम्बूद्वीपे पूर्व विदेहेरमणी विजये शीतायामहा नद्यादक्षिण कूलेसुभगायां नगर्यां प्रेमसागरस्य राज्ञो वसुन्धरा अनङ्ग सुन्दर्योर्महागर्भे क्रमेण कुमारत्वे नोत्पन्नौ अमित तेज जोवोऽपराजितनामाश्रीविजयजीवोऽनन्त वीर्यनामाजातः तत्रापि प्रतिशत्रुदमितारं व्यापाद्य

क्रमेण बलदेवत्वं वासुदेवत्वमापन्नौ तयोश्चपिता प्रव्रज्याविधानेन मृत्वाऽसुर कुमारेचमरेन्द्रत्वेनोत्पन्नः अमन्त वीर्यस्तु कालं कृत्वा द्विचत्वारिंशत्सागरोपमायुर्नारकः प्रथम पृथिव्यामुत्पन्नः चमरस्तु पुत्रस्नेहेन तत्र गत्वावेदनोपशमं चकार सोपि सम्भ्रमः सम्यक् सहते अपराजितो बलदेवोभ्रातृविरहदुःखितो निक्षिप्त पुत्र राज्ये जगद्गुरुगणधर समीपे निष्क्रान्तः शुद्धां प्रव्रज्यां परिपाल्य अच्युतेन्द्र त्वेनोत्पन्नः अनन्त वीर्यस्तु नरकादुद्धृत्य वैताढ्ये विद्याधरत्वेनोत्पन्नः अच्युतेन्द्रेण स प्रति बोधितो सौप्रव्रज्यां गृहीत्वाऽच्युतकल्पे इन्द्रः सामानि कत्वेनोत्पन्नः अपराजितोऽच्युतेन्द्रस्तच्युत्वा इहैव जम्बूद्वीपे शीतामहानदी दक्षिण कूले मङ्गलावती विजयेरत्न सञ्चय पुर्यां क्षेमं करोराजा तस्य भार्यारत्न माला तयोः पुत्रोवज्रनाभिधानोजातः इतश्च श्रीविजयजीवो देवायुरनुपाल्य तस्यैव पुत्रत्वेनोत्पन्नः सहस्रायुध इति तस्य नाम प्रतिष्ठितं अन्यदापौषधशालायास्थितो वज्रायुधो देवेन्द्रेण प्रशंसितः यथायं वज्रायुधो धर्माच्चालयितुं न शक्यते देवैर्दानवैश्च तत एको देवस्तदाख्यमश्रद्धानः परापतरूपं विकुर्व्यभयभ्रान्तो वज्रायुधमाश्रितः वज्रायुध तव शरणं ममास्तु इति मनुष्यभाषया उवाच वज्रायुधेन तस्य शरणं दत्तं स्थितस्तदन्तिके पारापतः तदनन्तरं तत्रैवगतो लावकः तेनापि भणितंयथा महासत्व एषमया क्षुधाक्रान्तेन प्राप्तः ततो मुञ्चैनं अन्यथा नास्ति ममजीवितमिति ततस्तद्वचनमाकर्ण्य वज्रायुधेन भणितं नयुक्तं शरणागत समर्पणं तवापिन युक्तमेतत् यतः-हंतुणपरप्पाणे अप्पाणंजोकरेइ सप्पाणं अप्पाणं दिवसाणं कएसनासेइ अप्पाणं१ यथा जीवितं तव प्रियं सर्व्वेषामपि जीवानां तथैवास्ति भयभ्रान्तदीनं व्यापादयितुं तव न युक्तं धर्म्मकुरु पापं मुञ्चलावकः प्रतिभणति राजन्नहं बुभुक्षितः ममे मनसि धर्म्मस्तिष्ठति ततः पुनरपि भणितं राज्ञा भो महासत्व यदि बुभुक्षितस्त्वं ततोऽन्यत्तवमांसं ददामि लावकः प्रतिभणतिस्वयव्यापादित जीवमांस दुर्ललितोहं न च रोचते मह्यंपरव्यापादितमांसं राज्ञा भणितं यावत्कार्षं पारापतस्तुलति तावत्तावत् ददामि सोप्यवदत् यदि त्वं स्वदेहा दुत्कीर्यमांसं ददासि तदाहं मुञ्चामि तद्राजा प्रतिपन्नं ततस्तुष्टो लावकः राज्ञा चतुला आनायिता एकस्मिन्पार्श्वे

पारापतः प्रक्षिप्तः एकस्मिन्पार्श्वे स्वदेहा दुत्कीर्णमांसारोपीविहितः राजा यथा २ तत्र मांसं प्रक्षिपति तथा २ अन्यत्रपार्श्वे पारापतो गुरुतरो देवमा यया भवति राजा पुनः २ स्वदेहमांस मनात्रक्षिपति तं दृष्ट्वा राजलोकः समस्तो हाहारवं चकार पारापतपार्श्वे गुरुभारमवेक्ष्य स्वमांसपार्श्वे राजा स्वयमारूढः एतादृशं वज्रायुधस्य सत्वं दृष्ट्वा विस्मितोदेवः स्वंरूपं प्रकटीकृत्य प्रकामं स्तुत्वा च स्वस्थानंगतवान् अनादृा वज्रायुध सहस्रायुधौ पितृपुत्रौ क्षेमङ्करगणधर समीपे जात वैराग्यौ सहस्रायुध सुतंबलिराज्ये भिषिच्य प्रव्रजितौ प्रव्रज्या पर्यायञ्च परिपाल्यपादपोपगमन विधिना कालं कृत्वा द्वावपि जनो परितनग्रैवेयके एकस्मिंग्रत्सागरोपमस्थितकौ अह देवौ जातौ अहमिन्द्रसौख्य मनुभूय ततश्च्युतौ इहैव जम्बूद्वीपे पूर्वविदेहे पुष्कलावती विजये पुण्ड रीकिण्यां नगर्यां घनरथोराजा तस्यदे महादेव्यौ पद्मावती मनोरमती च तयोगर्भेजातौ वज्रायुधो मेघरथः सहस्रायुधो दृढरथश्चेति ह्रद्धिङ्गतौ ततो कृत ताभ्यां कलाग्रहणं तौ द्वौराज्ये स्थापयित्वा घनरथः स्वयं दीक्षां गृहीत्वा केवल ज्ञानमुत्पाद्य तीर्थंकरोजातः तयोर्मेघरथ दृढरथयोः पूर्व भवभ्यासतो जिन धर्मदृढताऽभूत् अधिगत जीवाजीवादिभावौ तौ सुश्रावकौ जातौ अन्यदापितुस्तीर्थं करस्य समीपे द्वावपि जनौनिजपुत्रं राज्येभिषिच्य प्रव्रजितौ तत्राधीत सूत्रार्थेन मेघरथेन विंशति स्थानकैः समर्जितं तीर्थङ्करनाम गोत्रं दृढरथेन शुद्धं चारित्रं आराधितं द्वावपि संलेखनाविधिना कालं कृत्वाऽनु त्तरोपपातिकेषु देवेषु उत्पन्नौ तत्र सर्वार्थसिद्ध विमानेऽनर्गलं सुखमनुभूय मेघरथ कुमारस्ततश्च्युत्वा इहैव जम्बूद्वीपे भरतक्षेत्रे हस्तिनागपुरे विश्वसेनस्य राज्ञोऽचिरादेव्याः कुक्षौ भाद्रपद कृष्णसप्तमी चतुर्दश स्वप्नसूचितः पुत्रत्वेनोत्पन्नः पुनर्ज्येष्ट कृष्णत्रयोदश्यांदिनेजन्मसंजातः चतुषष्टि सुरेन्द्रैरपि जन्माभिषेकः कृतः उचितसमये गर्भस्थेवास्मिन् भगवति सर्वदेशेषु शान्तिर्जातेति शान्तिरितिनामकृतं मातृपितृभ्यां क्रमेणासौ सर्वकलाकुशलोजातः यौवनं प्राप्तः विवाहितः प्रवरराजकन्याः क्रमेण राज्ये स्थापितः पिताचारित्रं गृहीतं शान्तिश्चक्रवर्त्ति पदवीसमायाता उत्पन्नानि चतुर्दशरत्नानि साधितं भरतं अखण्डं

षड्खण्डराज्यं परिपाल्य उचितावसरे स्वयं संबुद्धोपि लोकान्तिकामरैः प्रतिबोधितः संवत्सरं दानं दत्वा ज्येष्ठ कृष्णचतुर्दश्यां चक्रिभोगांस्त्यक्त्वानिष्क्रांतः चतुर्ज्ञान समन्वितस्य उद्यतस्य उद्यतविहारं कुर्व्वतः पौष शुद्ध नवम्यां केवलज्ञानं समुत्पन्नं देवैः समवसरणं कृतञ्च भगवता धर्मदेशना प्रारब्धा प्रव्राजिता गणधराः प्रतिबोधिता बहवः प्राणिनः क्रमेण विहृत्य भरतक्षेत्रे बोधिबीजं उप्त्वाक्षीण सर्वकर्मांशो ज्येष्ठ कृष्णत्रयोदश्यां मोक्षंगत इति अस्य भगवतः कुमारत्वे पञ्चविंशति वर्ष सहस्राणिमाण्डलिकत्वेपि पञ्चविंशति वर्ष सहस्राणि चक्रित्वे पञ्चविंशति वर्षसहस्राणि श्रामण्येव पञ्चविंशति वर्षसहस्राणि दीक्षापर्याय सर्व्वायुश्च वर्षलक्षमेकं जातमिति इति शांति नाथ दृष्टान्तः दृक्ष्वागरायवसहो कुन्थू नाम नरेसरो विक्खायकित्तीभयवं पत्तोगइ मणुत्तरं३९ पुनः कुन्थुनामानरेश्वरः षष्टचक्री अनुत्तरां सर्वोत्कृष्टां गतिः प्राप्तः कीदृशः कुन्थूर्भगवान् ऐश्वर्यज्ञानवान् पुनः कीदृशः कुन्थुः इक्ष्वाकुराज वृषभः इक्ष्वाकुवंशीय भूपेषु वृषभो वृषभ समानः प्रधानइत्यर्थः पुनः कीदृशोविख्यातकीर्त्तिः अत्र भगवान् इति विशेषणे नाष्ट महाप्रातिहार्याद्यैश्वर्ययुक्तः समवशरण स्तीर्थंकरः षष्टचक्रीकुन्थु ज्ञेयः अत्र कुंथुनाथ दृष्टांतः हस्तिनाग पुरेसूरराज्ञः श्रीदेवीभार्यातस्याः कुक्षौ भगवान् पुत्रत्वेनोत्पन्नः जन्ममहोत्सवानन्तरं च स्वप्नेजननीरत्नस्तूपः कुक्षौदृष्टः गर्भस्थे च भगवति पित्राग्रहवः कुन्थवत् दृष्टाः इति कुंथुनाम कृतं पिता प्राप्तयौवनश्चायं विवाहितो राजकुमारकाभिः काले च भगवत्तंराज्ये व्यवस्थाप्य सूर राजा स्वयं दीक्षां जग्राह भगवांश्च उत्पन्न चक्ररत्न प्रसाधित भरतः चक्र वर्त्तिभोगान् बभुजेतीर्थं प्रवर्त्तमान

भोकुंथूनाम नराहिवो विक्खाय कित्तीभयवं पत्तोगइ मणुत्तरं ३९ ॥ सागरंतंचइत्ताणं भरहं नरवरीसरो । अरोय

सूत्र

विषें वृषभसमान कुंथुनामा नराधिपः कुंथूनाथइत्येनामे राजा विख्यातकीर्त्तिः भगवान् विख्यातकीर्त्तिछे भगवंतनी प्राप्त गतिं अनुत्तरां उत्तम गति पाम्यो १ । ३९ सागरांतं त्यक्ता सागरांत पृथ्वी छांडीने भरतनरेश्वरः चक्रवर्त्तिः सघलो भरतक्षेत्र मनुष्यनो ईश्वर अरनामा अरजप्राप्तः अरनामा

भाषा

समये च निःक्रम्य षोडशवर्षाणि चोग्रविहारेण विहृत्य केवल ज्ञान भाग् जातः देवाश्च समवसरणमकार्षुः प्रव्राजिताः केवल पर्यायेणधनकालं विहृत्य संमेतगिरि शिखरेमोक्षमगमत् तस्य भगवतः कुमारत्वे त्रयोविंशति वर्ष सहस्राणि माण्डलिकत्वे च त्रयोविंशति वर्ष सहस्राणि चक्रित्वे त्रयो विंशति वर्षसहस्राणि श्रामण्ये च त्रयोविंशति वर्षसहस्राणि सार्द्धानि च सप्तशतानिवर्षाणि अभवन् सर्व्वायुर्हि नवति वर्षसहस्राणि सार्द्धसप्तशतानि चास्य बभूव इति श्रीकुन्थुनाथ दृष्टान्तः सागरन्तं च इत्ताणं भरहं नरवरी सरो अरोय अरयं पत्तो पत्तोगइमणुत्तरं ४० च पुनः अरो अरनामानरवरेश्वरः सप्तमचक्रीसागरान्तं समुद्रान्तं भरतक्षेत्रं षट् षण्डराज्यन्यक्त्वा अरजस्त्वं प्राप्तः सन् अनुत्तराङ्गतिं सिद्धिगतिं प्राप्तः मोक्षं गत इत्यर्थः चक्री भूत्वातीर्थं करपदं भुक्त्वा मोक्षं गतइत्यर्थः अत्र अरनाथ दृष्टांतः अरनाथस्तुत्तराध्ययन हत्तिर्द्यपि नास्ति तथापि ग्रंथांतराल्लिख्यते प्राग् विदेह विभूषणे मङ्गलावतीविजयेरत्न सञ्चया पुरी अस्ति तत्र महीपालनामा भूपालोस्ति प्राज्यं राज्यं भुंक्ते अन्यदा गुरुमुखाद्धर्मं श्रुत्वा स वैराग्य मागतः स तृणमिव राज्यन्यक्त्वादीक्षां लली गुर्वंतिके एकादशाङ्गानि अधीत्यगीतार्थो बभूव बहुवत्सरकोटीः स संयममाराध्य विंशत्र विंशति स्थानकैः अर्हन्नामकर्म बबंध ततो मृत्वा सर्वार्थसिद्धविमाने देवो बभूव ततश्च्युत्वा इह भरतक्षेत्रे हस्ति नागपुरेसुदर्शननामा नृपो बभूव तस्य राज्ञो देवीनाम्नी बभूव तस्याः कुक्षौ सोऽवततार तदानीं रेवती नक्षत्रं बभूव तया चतुर्दश स्वप्नादृष्टाः ततः पूर्णेषु मासेषु रेवती नक्षत्रे तस्य जन्म बभूव जन्मोत्सवस्तदाघट् पश्चाद्यत् दिक् कुमारिकाभिः चतुः षष्टिसुरेन्द्रैर्निर्मितः ततः सुदर्शन राजापि स्व पुत्रस्य जन्मोत्सवं विशेषाचकार अस्मिन् गर्भगते मात्रा प्रौढारत्न मयोऽरस्वप्ने दृष्टः ततोपित्रास्याऽरइति नाम कृतं देव परिवृतः स वयसा गुणैश्चवर्द्धतेस्म एकविंशति सह स्रवर्षेषु अरकुमारस्य पित्रा राज्यं दत्तं एकविंशति वर्षसहस्राणि यावद्राज्यं भुक्तवतः तस्या शस्त्र कोशे चक्र रत्नं समुत्पन्नं ततो भरतं साध्य

राज्ञाट्टष्टः पृष्टाश्च सेवकाः अकालयात्रया क्वायं लोको गच्छति ततो नमुचिमं त्रिणाभणितं देव अत्र उद्याने श्रमणाः समागताः तेषां यो भक्तो लोकः स तदन्दनार्थं गच्छति राज्ञाभणितं वयमपि यास्यामः नमुचिना उक्तं तर्हित्वया तत्र मध्यस्थेन भाव्यं यथाहं वादं कृत्वातान्नि रुत्तरी करोमि राजा नमुचि सहितस्तत्रगतः नमुचिनाभणितं भो श्रमणायदि यूयं धर्मं तत्वं जानीथतर्हिवदथ सर्वेपि मुनयः क्षुद्रोयमिति कृत्वा मौने न स्थिताः ततो नमुचिर्भूयं रुष्टः सूरिं प्रतिभणति एष वयस्यः किं जानाति ततः सूरिभिर्भणितं भणामः किमपि यदि'ते मुखं खर्जूति इदं वचः श्रुत्वा अनेकशास्त्र विचक्षणे न क्षुल्लकशिष्येण भणितं भगवन् अहमेवैनं निराकरिष्यामि इत्युक्त्वा क्षुल्लकेन सवादेनिरुत्तरीकृतः साधूनामुपरिद्वेषं गतः रात्रौ च चरहत्या एकाकिनं मुनि बधार्थमागतो देवतयास्तम्भितः प्रभाते तदाश्चर्यं दृष्ट्वा राज्ञालोकेन च भृशन्तिरस्कृतो विलक्षो भूतो गतो हस्तिनागपुरं महापद्म युव राजस्य मन्त्रीजातः इतश्च पर्वतवासी सिंहबलोनाम राजा स च कोट्टाधिपति रिति महापद्म देशं विनाश्यकोट्टे प्रविसति ततोरुष्टेन महापद्मेन नमुचि मंत्री पृष्टः सिंहबलराजग्रहणे किञ्चिदुपायं जानासि नमुचिनोक्तं सुष्टुजानामि ततो महापद्म प्रेरितः सैन्यद्युतोगतोनिपुणोपायेन दुर्गं भंक्त्वा सिंहबलो बद्ध आनीतश्च महापद्मान्तिके महापद्मे नोक्तं नमुचेयत्तवेष्टं तन्मार्गय नमुचिनोक्तं सांप्रतं वरः कोप्येऽस्तु अवसरेमार्गयिष्यामि एवं यौवराज्यं पालयतो महापद्मस्य कियान् कालोगतः अन्यदा महापद्ममात्रा जाला देव्याजिनरथः कारितो अपरमात्रा च मिथ्यात्ववासितयाजिन धर्मप्रत्यनीकयालक्ष्मीनाम्ना ब्रह्मरथः कारितोभणितश्च पद्मोत्तरो नाम राजा यथा एष ब्रह्मरथः प्रथम नगर मध्ये परिभ्रमतु जिनरथः पश्चात्परिभ्रमतु इदं च श्रुत्वा जाला देव्या प्रतिज्ञा कृता यदि जिनरथः प्रथमं न भ्रमिष्यति तदा परजन्मनि ममाहारः ततो राज्ञा द्वावपि रथौ निरुद्धौ महापद्मे न स्वजननयाः परमाम धृतिं दृष्ट्वानगरान्निर्गतः केनापि न ज्ञातः परदेशे गच्छन् महाटव्यां प्रविष्टः तत्र च परिभ्रमन् तापसालयेगतः तापसैर्दत्त सन्मानस्तत्रतिष्ठति इतश्च

पायां नगर्यां जनमेजयो राजा परिवसति स च कालनरेन्द्रेण प्रति रुद्धः ततो महान् संग्रामो बभूवजनमेजको नष्टः तस्यान्तः पुरमपीतस्ततो नष्टं जनमेजकस्य राज्ञो नागवतो नाम भार्या सामदनावली पुत्रया समं नष्टा आगतातंतापसा श्रमं समाश्वासिता कुलपतिना तत्रैवस्थिता कुमार मदनावल्योः परस्परमनुरागोजातः कुलपतिनातन्मात्रा च तयोः परस्पर मनुरागोज्ञातः कुलपतिनागवत्यामात्रा च भणिता मदनावली यथा पुत्रित्वं किं नस्मरसिनैमित्तिकवचनं यथा चक्रवर्त्तिनस्त्वं प्रथमपत्नी भविष्यति ततः कथं यत्र तत्रानुरागं करोषि कुलपति नापि कुमारस्य विसर्जनार्थं मुक्तं कुमारत्वमितोगच्छ तदानीं त्वरितमेव ततोनिर्गतः कुमारः एव मनोरथं चकार यथाह मेतस्याः सङ्गमेन भरताधिपो भूत्वा ग्रामाकरनगरादिषु सर्वत्रजिनभवनानिकारयिष्यामीति भ्रमन् कुमारोऽथ प्राप्तः सिंधुनंदनं नाम नगरं तत्रोद्यानि कामहोत्सवेनगरान्निर्गतानरानार्यश्च विविध क्रीडाभिः क्रीडन्ति अस्मिन्नवसरे राज्ञः पट्ट हस्ती आलानस्तम्भं उन्मूल्य गृह हट्टभित्तिभङ्गं कुर्वन् नगराद्दहिर्यंवती जनमध्ये समायातः तावतं तथा विधं दृष्ट्वा दूरतः प्रधावितुं असमर्थाः तत्रैवस्थिताः यावदसौतासामुपरिशुण्डापातं करोति तावतादूरदेशस्थितेन महापद्मेन करुणा पूर्णहृदयेनहक्कितो सौ करी सोपि वेगेन चलितः कुमाराभि मुखं तदानीं ताः सर्वा अपिभणंति हाहाऽस्य द्रक्षणार्थं प्रवृत्तोयं करिणाहंस्यते एवं तासु प्रलपन्तीषु पश्यन्तीषु चतयोः करिकुमारयो र्घोरः संग्रामो बभूव सर्वोपि नागरजनस्तत्रा यातः सामन्त भृत्यसहितो महसेनराजापि तत्रायातः भणितं च नरेन्द्रेण कुमार अनेनसमं संग्रामं माकुरु कृतान्त इव रुष्टो सौतवविनासकरिष्यतीति महापद्म उवाच राजन् विश्वस्तोभव पश्यममकलामित्युक्त्वाक्षणेन तं मत्तकरिणं स्वकलयावशी कृतवान् आरूढश्च तं मत्तगजं महापद्मः स्वस्थानेनीतवान् साधुकारेण तं लोका पूजितवान् यथा एष कोपि महापुरुषः प्रधान कुलसमुद्भवोस्ति अन्यथा कथमीदृशं रूप विज्ञानं चास्य भवति ततो राज्ञा स्वगृहे नीत्वा कुमारस्य विविधोपचारकरण पूर्वकं कन्याशतं दत्तं तेन समं विषयसुख मनुभवतस्तस्य

महापद्म कुमारस्य दिवसास्तत्र सुखेन यान्ति तथापितां मदनावलि हृदयान्नविस्मारयति अन्यदाराजन्यां ग्रथ्यातो सौ वेगवत्याविद्याधर्याऽपहृतः निद्रा क्षयेसातेन दृष्टा सृष्टिं दर्शयित्वा साकुमारेणभणिता किं त्वमेवं मामपहरसि तया भणितं कुमार शृणु वैताढ्ये सूरोदयनामनगरमस्ति तत्रेन्द्रधनुर्नाम विद्याधराधिपतिरस्ति तस्य भार्या श्रीकान्तावर्त्तते तस्या पुत्रीजयचन्द्रानाम्नी वर्त्तते सा च पुरुषद्वेषिणीनेच्छति कथमपि वरं ततो नरपत्याज्ञयामयासर्वत्र वरनरेन्द्रान् विलोक्य२ पट्टिकायां लिखिताः सर्वेपि तस्यादर्शितानकोपिरूचितः अनयादामयातस्यस्वरूपं दर्शितंतद्दर्शनानन्तरमेवसाकामावस्थयागृहीता भणितं च तया यद्येष भर्त्तान भविष्यति तदा वश्यं मयामर्त्तव्यं अन्य पुरुषस्य मम यावज्जीवं निवृत्तिरेव एष तस्या व्यति करोमया तस्मात्पितरौ ज्ञापितः ताभ्यां त्वदानयनायअहं प्रयुक्ता अविश्वस्त्यास्तस्याविश्वासार्थं मया इयंप्रतिज्ञा कृता यद्यहंतं त्वरितं नानयामि तदा ज्वाला कुलेज्वलने प्रविशामि ततः कुमारयदितव प्रसादेन मम मरणं न सम्पद्यते यथा च मे प्रतिज्ञानिर्वाहो भवति तथा प्रसादंकुरु ततस्तदा ग्रया तया महापद्मः सूर्योदये तत्र नीतः पतिर्मिलितः तेन च सुमुहूर्त्ते तस्याः पाणिग्रहणं कारितः पूजिता च वेगवती इतश्च जयचन्द्रायामातुल भ्रातरौ गङ्गाधरमहीधरनामानौ विद्याधरौ खेचराधिपतिप्रचण्डौ इमंव्यतिकरं ज्ञात्वा अनेक भट सहितौ महापद्मेनसमं संग्रामार्थमागतौ महा पद्मोपि तयोरागमनंश्रुत्वा सूरोदयपुरादहिर्विद्याधर भट परिवृतोनिर्गतः संलग्नस्तयोः संग्रामः तदानीं महापद्मेन स्वन्दनाः कुञ्जराः अश्वाः सुभटाः परबल सत्काः सर्वेपि बाणैर्विद्धाः भग्नं स्वसैन्यं दृष्ट्वा गङ्गाधरमहीधरौ स्वयमुत्थितौ महापद्मेन उभा वपि हतौ ततो लब्ध जयः समहापद्मः उत्पन्न स्त्री वर्ज सर्वरत्नः प्राप्तनवनिधिर्द्वात्रिंशत्सहस्र मुकुटबद्ध चमरेन्द्रसेवितपादपद्मः परिणीत एको न चतुः षष्टि सहस्रान्तः पुरो हयगजरथपदातिकोश सम्पन्नो नवम चक्रवर्त्ती जातस्तदापि षट् खण्डभरतराज्यं समदनावल्यारहितं नीरसं मन्यते अन्यदातस्मिन्वा श्रमपदे गतस्य तस्य महापद्म चक्रिणः तापसैर्महान् सत्कारः कृतः जनमेजयेनापि राज्ञामदनावली

श्री अनन्तनाथ चरित्र भाग ४ ० ० ०

तस्य दत्तातेन परिणीतास्तोरत्नं बभूव ततो महापद्मः चक्रवर्त्ति ऋद्धि समेतोहस्तिनागपुरं प्राप्तः प्रणनाम जननीजनकपदान् ताभ्यामधिकर्द्धेन प्रेक्षित अत्रांतरेतत्रैव समवसृतो मुनि सुव्रतस्वामिशिष्यो नागसूरी ततोनिर्गतः स परिवारः पद्मोत्तरराजातंवन्दित्वा पुरोनिषण्णः गुरुणा च तत् पुरो भव निर्वेदजननो देशनाकृता तां श्रुत्वा वैराग्यमापन्नो राजा गुरुं प्रत्येवमुवाच भगवन्नहं राज्यं स्वस्यं कृत्वा भवदन्तिके प्रव्रजिष्यामि गुरुणाभणितं माविलम्बं कुर्व्विति गुरुं प्रणम्य नगरे प्रविष्टोराजा आकारितामन्त्रिणः प्रधानपरिजनाविष्णु कुमारश्च सर्वेषा मपि राज्ञा एवमुक्तं भो भो श्रुयतां भवद्भिः संसारासारताहमेतावत्कालं वञ्चितः यच्छ्रामण्यं नानुष्ठितवान् ततः सांप्रतं विष्णुकुमारं निजराज्येभिषिच्य प्रव्रज्यां गृह्णामि ततो विष्णु कुमारेण विज्ञप्तं तात ममापि किं पाकोपमैर्भोगैः कृतं तवमार्गमेवानुसरिष्यामि ततो विष्णु कुमारस्य दीक्षानिश्चयं ज्ञात्वा पद्मोत्तरराज्ञा महापद्म आकारितो भणितश्च पुत्र ममेदं राज्यं प्रतिपद्यस्वविष्णु कुमारोहं च प्रव्रज्यां प्रतिपद्यावः अथ विनीतेन महापद्मेन च भणितं तात निजराज्याभिषेकं विष्णुकुमारस्यैव कुरु अहं पुनरेतस्यैवाज्ञा प्रतीच्छको भविष्यामि राज्ञाभणितं वत्समयोक्तोप्ययं राज्यं न प्रतिपद्यते अवश्य मयं मया समं प्रव्रजिष्यते ततः शोभनदिवसे महापद्मस्य कृतो राज्याभिषेकः विष्णुकुमारस्सहित पद्मोत्तरराजा सुव्रतसूरिसमीपे प्रव्रजितः ततो महापद्मोविख्यात शासनश्चक्रवर्त्तीजातः स्वमातृ अपर मातृकारितौ तौ द्वावपिरथौ तथैवस्तः महापद्मचक्रिणातु जननीसत्को जिनरथोनगरीमध्ये भ्रामितः जिनप्रवचनस्य कृता उन्नतिः तत्प्रभृति बहुलोको धर्मोद्यममतिर्जिन शासनं प्रतिपन्नः तेन महापद्मचक्रिणा सर्वस्मिन्नपि भरतक्षेत्रे ग्रामाकर नगरोद्यानादिषु कारितानि जिनायतनानेक कोटिलक्ष प्रमाणानि पद्मोत्तरमुनिरपि पालित निःकलङ्क श्रामण्यः शुद्धाध्यवसायेन कर्म्मजालं क्षपयित्वा समुत्पन्न केवलज्ञानः संप्राप्तः सिद्धिमिति विष्णुकुमारमुनि रपि उग्रतपोविहारनिरतस्य वर्द्धमान ज्ञानदर्शनचारित्र परिणामस्य आकाशगमनादि वैक्रियलब्धयः उत्पन्नाः स कदाचिच्चैवक्तं गदेहो गगने व्रजति

कदाचिन्मदनवत् इति रूपवान् भवति एवं नानाविधलब्धिपात्रः संजातः इतश्चते सुव्रताचार्याः बहुशिष्यपरिवृता वर्षा रात्रस्थित्यर्थं हस्तिनागपुराद्यानं समायाताः ज्ञाताश्च तेन विरुद्धेन न सुचिना अवसरं ज्ञात्वा राज्ञा विज्ञप्तं यथा पूर्वप्रतिपन्नं मम वरंदेहि चक्रिणा उक्तं यथेष्टं मार्गय नमुचिना भणितं राजन्नहंवेद भणितेन विधिनायज्ञं कर्तुमिच्छामि अतो राज्यंमेदेहि चक्रिणानमुचिः स्वराज्येभिषिक्तः स्वयमंतपुरे प्रवेश्य स्थितः नमुचिर्यज्ञपाटकमागम्य यागनिमित्तं दीक्षितो बभूव राज्येभिषिक्तस्य तस्य वर्द्धापनार्थं जैनयतीन् वर्जयित्वा सर्वेपि लिङ्गिनोलोकाश्च समायाताः नमुचिना सर्वलोक समक्षं उक्तं सर्वेपिलोका मम वर्द्धापनार्थं समायाता जैनयतयः कोपिनायाताः एवंच्छलं प्रकाश्य सुव्रताचार्या आकारिताः आगताः नमुचिनाभणिताः भो जैनाचार्यायो यदा ब्राह्मणोवा क्षत्रियोवा राज्यं प्राप्नोति स तदा पाषण्डकैरागत्य दृष्टव्यः इयंलोकस्थितिः यतो राजरक्षितानि तपोधनानि भवंति यूयं पुनः स्तब्धाः सर्वे पाषण्ड दूषकाः निर्मर्यादामां निंदथः अतो मदीयं राज्यं मुक्त्वाऽनाद्य यथासुखं व्रजतयोयुष्माकं मध्ये कोपिनगरे भ्रमन् दृश्यते समेबध्यो भविष्यति सुव्रताचार्यैरुक्तं राजन्नस्माकं राजवर्द्धापनाचारो नास्ति तेन वयं तद्वर्द्धापन कृते नायाताः नचवयं किञ्चिन्दामः किंतु समभावा स्तिष्टामः ततः नरुष्टामः प्रतिभणति यदि श्रमणं सप्तदिनोपरि अहं द्रक्ष्ये तमहमवश्यं मारयिष्यामि नात्र सन्देहः एतन्नमुचिवाक्यं श्रुत्वाचार्याः स्व स्थानमायाताः सर्वेपि साधवः पृष्टाः किमत्र कर्त्तव्यं तत एकेन साधुना भणितं यथा सदासेवित तपोविशेषो विष्णुकुमारनामा महामुनिः सांप्रतं मेरु पर्व्वतचूलास्थो वर्त्तते स च महापद्मचक्रिणो भ्रातास्ति ततस्तद्वचनादय मुपशमिष्यति आचार्यैरुक्तं तदाकारणार्थं यो विद्यालब्धि संपन्नः स तत्रव्रजतु ततः एकेन साधुना उक्तं अहं मेरुचूलां यावद्गनेगन्तुं शक्नोम्यि पुनः प्रत्यागन्तुं न शक्नोम्यि गुरुणा भणितं विष्णुकुमार एवत्वामिहानेष्यति तथेति प्रतिपद्य स मुनिराकाशे उत्पतितः क्षणमात्रेण मेरुचूलायां प्राप्तः तमायातं दृष्ट्वा विष्णुकुमारेण चिन्तितं किञ्चिदुरुकं संघकार्यं समुत्पन्नं यदयं मुनिर्वर्षाकाल

मध्येऽजायातः ततः समुनिविष्णुकुमारं प्रणम्य आगमन प्रयाजनं कथितवान् विष्णुकुमारस्तं मुनिं गृहीत्वास्तोकवेलया आकाशमार्गेण गजपुरे प्राप्तः वंदितास्तेन गुरवः गुर्वाज्ञया साधुसहितो विष्णुकुमार मुनिर्नमुचि पर्षदिगतः सर्वैः सामन्तादिभिर्वंदितः नमुचिस्तु तथैव सिंहासने तस्थिवान् नमनाक् विनयं चकार विष्णुना धर्मकथन पूर्वं नमुचेरेवं भणितं वर्षाकालं यावन्मुनयोत्र तिष्ठन्ति नमुचिना भणितं किमत्र पुनः पुनर्वचन प्रयासेन पञ्चदिवसान् यावन्मुनयोत्र तिष्ठन्तु विष्णुना भणितं तव उद्याने मुनय स्तिष्ठन्तु ततः संजातामर्षेण नमुचिनारेवं भणितं सर्वपाषण्डाधर्मैर्भवद्भिर्नमद्राज्ये स्थेयं मद्राज्यं त्वरितंत्यजत यदि जीवितेन कार्यं ततः समुत्पन्नकोपानलेन विष्णुनाभणितं तथापि त्रयाणां पदानं स्थानं देहि ततो भणितं नमुचिनादत्तं त्रिपदीस्थानं परंयन्त्रि पदा बहिर्द्रक्ष्यामि तस्य शिरश्छेदं करिष्यामि ततः स विष्णुकुमारः कृत नानाविधरूपो वृद्धिं गच्छन् क्रमेण योजनलक्ष प्रमाणरूपोजातः क्रमाभ्यां दर्दरं कुर्व्वन् ग्रामाकरनगर सागराकीर्णां भूमिं अकम्पयन् शिखरिणां शिखराणिपातयतिस्मत्रिभुवने क्षोभं कुर्व्वन् स मुनिः शक्रेणज्ञातः तस्य कोपोपशान्तये शक्रेण गायनदेव्यः प्रेषिताः ताश्चैवं गायन्तिस्मसपरसन्तावओ धम्मवणदावओदुग्गइगमणहेउ कोवोताओवसमंकरेसु भयवंति एवमादीनि गीतानितावारंवारं श्रावयन्तिस्म समुनि नमुचिसिंहासनात्पातितवान् दत्तवान् पूर्वापर समुद्रपादः सर्वजनं भापयतिस्म ज्ञातवृत्तान्तो महापद्मचक्री तत्रा यातःतेन समस्तसंघेन सुरासुरैश्च शान्तिनिमित्तं विविधोपचारै रुपशमितः तत्प्रभृति विष्णुकुमारस्त्रिविक्रम इतिख्यातः उपशान्तकोपः समुनिरालोचितः प्रतिक्रान्तः मुद्दः यतउक्तं आयरिए गच्छंमिकुलगणसङ्घे अचेइ अविणासेआलोयपडिक्कन्तो सुद्धाजन्निज्जराविउला१निष्कलङ्कं श्रामन्यमनुपाल्य समुत्पन्नकेवलः स विष्णुकुमार सिद्धं गतः महापद्म चक्रवर्त्त्यपि क्रमेण दीक्षां गृहीत्वा सुगतिभागभूत् इति महापद्म दृष्टान्तः एगछत्तं पसाहित्ता महिं माणनिसूरणो हरिसेणो मनुस्सिन्दो पत्तोगइमणुत्तरं ४० पुनर्हे मुने हरिषेणो मनुष्येन्द्रो हरिषेणनामा नवमश्चक्री अनुत्तरां गतिं सिद्धिगतिं प्राप्तः किंकृत्वा महीपृथ्वीं

एकक्कवां प्रसाध्य प्रपाल्य कौट्टयो हरिषेणो माणनिसूरणः अहङ्कारि शत्रुमानदलनः ४२ अत्र हरिषेण दृष्टान्तः काम्पिल्यनगरे महाहरि राज्ञो मेरा देव्याः कुक्षौ चतुर्दश स्वप्न सूचितो हरिषेणनामा चक्रवर्त्ती समुत्पन्नः क्रमेण यौवनं प्राप्तः पित्राराज्ये स्थापितः उत्पन्नानि चतुर्दशरत्नानि प्रसाधितश्च भरतं कृत षट्खाभिषेको हरिषेण उदारान् भोगान् भुञ्जन्काल गमयति अन्यदा लघुकर्म तया भववासाद्विरक्तः एवं चिन्तितुं प्रवृत्तः पूर्वकृत सुकृत कर्मवशेनमयाचेट्टयोरिद्धिः प्राप्ताः पुनरपि परलोक हितं करोमि उक्तञ्च मासैरष्टभिरब्दावा पूर्वेण वयसा यथा तत्कर्त्तव्यं मनुष्येण यथान्ते सुखमेधते १ एवमादि परिभाव्य पुत्रं राज्ये निवेश्य निष्क्रान्त उत्पन्नकेवलश्च सिद्धिङ्गतः पञ्चदशधनुषि उच्चत्वं दशवर्षसहस्रायुश्च संजातमिति हरिषेण चक्री दृष्टान्तः अन्निओ राय सहस्सेहिंसुपरिच्चाईदमद्धरे जयनामो जिणक्खायं पत्तोगइ मणुत्तरं ४३ जयनामा एकादशश्चक्री जिनाख्यातं जिनोक्तं धर्मं चरित्वा च अनुत्तराङ्गतिं प्राप्तः कौट्टयो जयनामा राज सहस्रैरन्वितः नृपसहस्रेण परिवृतोजैनींदीक्षां अचरत् पुनः कौट्टयो जयनामासु परित्यागी सम्यक् परित्यागी ४३ अत्र जयनामचक्रवर्त्तिदृष्टान्तः राजगृहे नगरेवप्रगायाराज्ञाः कुक्षौ चतुर्दश स्वप्नसूचितो जयनामा पुत्रोजातः क्रमेण संसाधित भरतश्चक्रीजातः राज्यश्रिय मनुभवन् भोगेभ्यो विरक्तोजातः एवं चिन्तितवान् सुचिरमपि उषित्वास्यात् प्रियैर्विप्रयोगः सुचिरमपि चरित्वा

सूत्र

एगक्कत्तं पसाहित्तामहिमाणनिसूरिणो हरिसेणो मणुस्सिंदोपत्तोगइमणुत्तरं ४२॥ अन्निओरायसहस्सेहिंसुपरिच्चाईदमं

भाषा

पृथ्वो भोगवोने महिं अरिमांनदलनः पृथ्वीने विखेवैरीनोमानतेहनो दलणहार हरिषेणो मनुष्येंद्रः हरिषेण मनुष्यमांहि इंद्रप्राप्तः गतिं अनुत्तरां उत्तमां उत्कृष्टांपोहतापधानगतमांहिं ४२ अन्वितः राजसहस्रैर्युतः हजारराजवियां साथे सुष्टुपरित्यागी दानशीलः संयमंचकार राज छोडीनेंदिक्षालीधी

नास्तिभोगेषु तृप्तिः सुचिरमपि विचिन्त्यत्रायमेकोहि धर्म्मः एवं संवेग मुपागतो निष्क्रान्तोऽनुक्रमेण सिद्धः द्वादशवर्षदेहमानो वर्षसहस्रायुश्च एषा आसोदिति जयचक्रिदृष्टान्तः दसन्नरज्जं मुद्दयंचदूत्ताणं मुणीचरे दसन्नभद्दो निक्खन्तो सक्कसक्केण चोइओ ४४ दशार्णभद्रोराजा साक्षात् शक्रेण चोदितः प्रेरितः सन् निःक्रान्तः गृहस्थावस्थातो निस्सृतः पुनर्मौनी सन् अचरत् मुनेः कर्म मौनं मौनं अस्यास्तीति मौनि मुनिर्भूत्वा विहारं अकरोत् किं कृत्वा दशार्ण राज्यं त्यक्त्वा दशार्णानां देशानां राज्यं दशार्णराज्यं कीदृशं दशार्णराज्यं मुदितं समृद्धं अत्र दशार्णभद्रदृष्टान्तः अस्तिवराटदेशे धनपुरं नाम सन्निवेशे तत्रैकोमदहर पुत्रोस्ति तस्य भार्या दुश्शीलानगरा रक्षकेण समं चौर्यरतिं कुर्वन्त्यस्ति अन्यदा तत्रा सन्निवेशे नटैर्नाट्यं प्रारब्धं तत्रैकोन र्त्तकः स्त्रीवेषं कृत्वा नृत्यन्नस्ति घनोलोकः दर्शनार्थं मिलितोसि सापि तत्रगतास्ति सास्त्रीरूपधरं तं नर्त्तकं प्रेक्ष्य पुरुषञ्च ज्ञात्वा कामविह्वलाजाता एकं तत्पुरुषं प्राह यद्यसौ अनेन वेषेण एषमद्गृहे समागत्य मया समं रमते तदाहमस्मै अष्टोत्तरशतं द्रव्यं ददामि तेन प्रतिपन्नं भणितं त्वंयाहि एष तव पृष्ठीत्वरितमेव समायास्यति ततः सा स्वगृहेगता एषोपि तत् पृष्ठी तद्गृहेगतः तया पादशौचनंदत्तं स भोक्तु मुपविष्टः तया क्षीरेण्याभृतं भाजनं यावदसौ भुंक्ते तावतारक्षक स्तत्रायातो वदत् कपाटमुद्घाटयेति सा नटपुरुषमुवाच त्वं तिलगृहोदरे प्रविश्यावदेनं निवर्त्तयामि सतिल गृहोदरे प्रविष्टः बुभुक्षितः सन् कोणस्थान् तिलान् पूत्कृत्यखादति आगतः कपाटं निधीयतला रक्षः क्षीरेयोभृतं पात्रं दृष्ट्वा सभोक्तु मुपविष्टः यावज्जेमतिता

सूत्र

चरे जयनामो जिणक्खायं पत्तोगइ मणुत्तरं ४३ ॥ दसन्नरज्जं मुद्दयंचदूत्ताणं मुणीचरे। दसन्नभद्दो निक्खंतो सक्कं

भाषा

जयनामा चक्रवर्त्तिः जिनैः आख्यातं कथितं प्राप्तः गतिं अनुत्तरां अनुत्तरगतिं मोक्षतिहांपीहता ४३ दशार्णराज्यं त्यक्तं दशार्ण भद्रराजाद्दं राज्य क्रीडीने त्यक्तामुनिः चरेत् त्यजीनेयतीहओ दशार्ण भद्रराजा प्रव्रजितः दशार्णं भद्रदीक्षालीधी साक्षात् शक्रेण प्रेरितः प्रत्यक्ष इंद्रे प्रेक्षो ४४ नमि

वत्तस्याः पतिर्द्वारे समायातः तया उक्तं तलारत्नस्य शीघ्रमुत्तिष्ठ प्रविशास्मिन् तिलगृहोदरे परंदूरे नगन्तव्यं कोपि सर्पस्तिष्ठति त्वया तत्र प्रदेशेन गन्तव्यं प्रविष्टस्तलारत्नस्तिल गृहोदरे पतिस्तत्रायातः चौरेयीपात्रं दृष्ट्वा तेन पृष्टं किमेतत् तया उक्तं बुभुचितास्मीति जेमामि स उवाच त्वं तिष्ठ अहं पथ श्रान्तत्वादिशेषतो बुभुचितो स्मीति प्रथमं जेमामि तया उक्तं अद्याष्टमीवर्त्तते कथमज्ञातो जेमसि ते नोक्तं त्वं ज्ञानासीति तवज्ञाने न मम ज्ञान जातमिति प्रोच्च स भोक्तुमुपविष्टः इतश्चतलारत्नक नट पूत्कार श्रवणे सर्पोयमिति पूत्करोतीति भीतस्तलारत्नतिलोदरान्निर्गतो नष्टस्तीयकैवावसर इति ज्ञात्वा स्त्री वेष धरोनरोपि नष्टः पत्याघृष्टासास्त्री किमेतत् तया उक्तं मयात्वं सास्मतमेव वारितः यद्यष्टम्यामद्यत्वमज्ञातोमाभोजनं कुरुत्वया चाज्ञा नेनाद्यभोजनं कर्त्तुमारब्धं अतस्त्वयातद्गृहे सदावसन्तौ इमौ पार्वती महेश्वरौ नंद्यागतौ मदहर उवाच ह्यदुष्ट कृतं मया तं पश्चात्तापं कुर्वन् पुनस्तां उवाच कोप्यस्त्युपायः यदेतौ पुनरायातः सा उवाच यदिन्यायेनवित्तं उपार्ज्य पूजां कुर्य्यास्तत पुनरेतौ तव गृहे समायास्यतः ततो गतोमदोहरोदेशान्तरे दशार्णदेशे इक्षुवाटक कर्म्मणि लग्नः दशगद्यानक सुवर्णं लब्धं तथाप्यल्पमिति ज्ञात्वा न तुष्टिं प्राप इतस्ततो भ्रमन् एकदाटव्यां प्रविष्टः पिप्पलतरुमूले विश्रामं गृह्णाति अत्रांतरे अश्वापहृतो दशार्णभद्रस्तत्रायातस्तं दृष्ट्वा राज्ञापृष्टं कस्त्वं किमर्थमत्रायातः स उवाच यथा स्थितं वृत्तान्तं राज्ञाचिंतितं असौस्त्रियाविप्रतारितः परदेशे भ्रमत्यस्ति ततस्तस्य स्त्री चरितं उज्ज्वलगृहेनीत्वा भोजनादिविहितं राज्ञाचिंतितं अहो असत्यदेवेपीश्वरादौ कीदृशी भक्तिर्वर्त्तते मया सत्यदेवेपि श्रीमहावीरेविद्यमानेपि तादृशं भक्ति प्रपञ्चनं न विहितमिति राजायावच्चिंतयति तावदेक प्रतिहार पुरुषेण राज्ञोग्रे एव मुक्तं भगवान् श्रीमहावीरः समायातः राजापरितुष्टश्चिन्तयति यदिनामैष मदहर पुत्रो विशिष्टविवेकरहितोपि निजदेव पूजा सम्पादनार्थमेव परिक्लिश्यते ततोस्माभिरीदृशैः सारासारविवेचन विचक्षणैः समयसामयिकत्रिभुवनचिन्तामणि कल्पस्य श्रीमहावीरस्य विशेषेण पूजाकार्येति ततः कल्पेहं

सर्वदा तथा श्रीमहावीरं वन्दित्वे यथा केनाप्येवं न वन्दितः पूर्वः ततोद्वितीय दिवसे कृत प्रभात कृत्यः स्नान विलिप्तालङ्कृत देहः स्मारूप यौवन लावण्यनेपथ्ययुक्तः सर्वाङ्गोपांगालंकृतयाचतुरङ्गयासेनया सहितो बहुभिर्मन्त्रि सामन्तैः श्रेष्टिसार्थवाहैश्च परिवृतः भंभादि वादित्र श्रेणिबधिरिति दिगन्तरालो गन्धर्वै गीयमानगुणो नृत्यंतीभिविलासिनीभिः पोषित नेत्ररसो गजेन्द्रारूढो दशार्णभद्र भूपतिर्भगवतो वन्द नार्थं मायातः विशुद्धभावेन भगवान् वन्दितः राजा मद्दहरपुत्रश्च हर्षितवान् अत्रान्तरे शक्रेण चिन्तितं मत्कृतया महाविभूत्यासौ दशार्णभद्रः प्रति बोधं यास्यतीति शक्र ईदृशीं विभूतिं विकुर्वितवान् तथाहि ऐरावण हस्तिनोष्टौ दन्ता विकुर्विताः दन्ते २ अष्टौ पुष्करिणो विकुर्विताः पुष्क रिणां २ अष्टौ २ पद्मानि पद्मे २ ष्ट २ पत्राणि पत्रे २ द्वात्रिंशद्बद्धनाट्यानि अनया विभूत्या ऐरावणारूढेन शक्रेण प्रदक्षिणी कृत्य भगवान् वन्दितः तं तादृग्यं दृष्ट्वा दशार्ण भद्रेण चिन्तितं अहो खलु तुच्छोहं यदृच्छया विभूत्यागर्वं कृतवान् यत उक्तं अहिट्ठ भद्दाधीवेणविहुन्ति उत्तणाणीयाणवइ उत्तालकरोहु मूसगोवाहिमासज्ज १ अनेन शक्रेण प्राग्भवे शुद्धो धर्मः कृतः तत ईदृशीलब्धिर्लब्धा ततोहमपितमेव धर्मं करोमि किं ममाद्य विषादेन उक्तञ्च समसंख्या वयवः सन् पुरुषः पुरुषं किमनु मन्येति पुण्यैरधिकतरः चेन्नानुसोपि करोतु तान्येव १ इत्यादि संवेगभावनया प्रतिबुद्धः क्षयोपशमं प्राप्तचारित्रमोहनीयोभगवन्तं प्रत्येवं दशार्णभद्रोऽवादीत् भगवन् भवचारकादहं निर्विण्णोस्मि ततश्चारित्र प्रदानेनानुग्रहं मम कुरुभगवता तदानीमेव मद्दहरेण समं स दशार्णभद्रोदीक्षितः शक्रेण तदावंदितः उक्तं च श्रमणमार्गग्रहणेनत्वयैवजितं येने दृशी ऋद्धिः सहसापरित्यक्ता पूर्वं त्वयाभिमान ग्रस्तेन द्रव्य वन्दनं कृतमिति त्वमेव धन्योनाहमिति दशार्णभद्रमुनेः प्रशंसां कृत्वाशक्रः स्वस्थानं गत वा निति दशार्णभद्र दृष्टांतः नमीनमेइ अप्पाणं सक्कं सक्केण चोईओ चइऊणगेहं वइदेही सामन्ने पज्जवट्ठिओ ४५ पुनर्हे मुनेविदेहेष् भवो वैदेही विदेहदेशस्वामीनमिनामानृपोगेहं मुक्त्वासन्यक्ताश्रामण्य

सूत्र

भाषा

साधु धर्मं पर्युपस्थितः चारित्रयोग्यानुष्ठानं प्रत्युद्युतो भूदित्यर्थः पुनः समुनिः साक्षात् ब्राह्मण रूपेण शक्रेण प्रेरितः सन् ज्ञानचर्यायां परिचितः सन् आत्मानं नमि इति नयेत्थापयति क्रोधादिकषायरहितो भवतीत्यर्थः ४५ अथ द्वाभ्यां गाथाभ्यां चतुर्णां प्रत्येकबुद्धानां एकसमये सिद्धानां नामान्याह करकण्डूकलिंगेसु पञ्चालेसु यदुम्मुहो नमीरायाविदेहेसु गन्धारेसुयनिग्गई ४५ एवं नरिन्दवसहा निक्खन्ताजिणसासणे पुत्ते रज्जे ठवेऊणं सामन्नेपज्जु

सक्केण चोइओ ४४॥ नमीनमेइ अप्पाणं सक्खं सक्केण चोइओ। चइऊणगेहंवइ देहीसामन्ने पज्जुवट्ठिओ ४५॥ कर कंडुकलिंगेसु पंचालेसु यदुम्महे। नमीराया विदेहेसुगंधारेसु यनग्गई ४६॥ एवं नरिंद वसहा निक्खंताजिणसासणे पुत्तं रज्जे ठविऊणं सामन्ने पज्जुवट्ठिया॥ ४७॥ सोवीर राय वसहो चइऊणं मुणीचरे। उदायणो पव्वइओ

राजर्षिः आत्मानं नयति नमिराजाइं आपणो आत्माने नमे साक्षात् शक्रेणप्रेरितः प्रत्यक्षइंद्रे प्रेखो त्यक्षा गृहवैदेही घरछांडीने बिदेहदेश छांडो श्रामण्ये पर्युपस्थितः चारित्रने बिखे ऊद्यो ४५ करकंडूः कलिंगेषू करकंडू राजाइं कलिंगदेश छांडो पंचालेषु पंचालदेशेषु दुमुखो बभूव पंचालदेशने बिखे दुम्महहओनमीराजा विदेहेषु विदेहदेशेषु नमीराजाइं विदेहदेशनो राज्यछांडो गंधारेषु नग्गतिः गंधारदेश नग्गई राजाराज्य छोडो ४६ एवं नरेंद्र वृषभाः एतलाए राजा वृषभ समानधीरो निष्क्रांताः जिनशासने जिनशाशनने बिखे दीक्षालीधी पुत्रं राज्ये स्थापयित्वा पुत्रने राज्य देईने श्रामण्ये पर्युपस्थिताः चारित्रलेइ सावधान धर्मने बिखे उद्यत हुआ ४७ सोवीरराज राजा वृषभः सोवीरदेशनो राजा वृषभसमान त्यक्षा मुनिः चरेत् त्यजीने मुनीश्वर हुआ उदायनराजा राज्यं त्यक्षाः प्रव्रजितः उदाई राजाइं राज्य छोडीने दीक्षालीधी प्राप्तोगतिं अनुत्तरां प्राप्त हुओ उत्तमगति ४८ तथैव

वट्टिया ४६ हे मुने करकण्डूराजाकलिङ्गेषु देशेषु अभूदित्याध्याहारः च पुनः पाञ्चालेषु देशेषु द्विमुखोनृपोभूत् विदेहेषु देशेषु नमीराजाभूत् च पुनर्गन्धारेषु गन्धारनाम सुदेशेषु निर्गतिनामाराजाभूत् एते चत्वारः करकण्डू १ द्विमुख २ नमि३ निर्गतिनामानोनरेन्द्र वृषभाः राजमुख्याः पुत्रान् राज्ये स्थापयित्वा पश्चात् जिनशासने जिनाज्ञायां श्रामण्ये चारित्रे पर्युपस्थिताः चारित्र योग्य क्रियानुष्ठानतत्पराः सन्तोनिःक्रान्ताः संसारात् निःसृताः भवभ्रमणात् विरता आसन् इत्यध्याहारः सिद्धिं प्राप्ता इति भावः एतेषां चतुर्णां प्रत्येक बुद्धानां कथा प्रसङ्गतः पूर्व नमिरध्ययनतोज्ञेया सौवीरराजवसभो च इत्ताणं मुणीचरे उदायणो पव्वइओ पत्तोगइ मणुत्तरं ४८ सौवीर राजवृषभः सौवीराणां देशानां राजा सौवीरराजः सचासौवृषभश्च सौवीरराज वृषभोराज्यभार धरण समर्थः सौवीरदेश भूपमुख्यः एतादृश उदाय न नामाराजा वीतभयपत्तनाधीशो मौनं मुनिधर्मं आचरत् किं कृत्वा राज्यं परिहृत्य सच उदायनः प्रव्रजितः सन् अनुत्तरां प्रधानां गतिं प्राप्तः अत्रोदायन भूपदृष्टान्तः भरतक्षेत्रे सौवीरदेशेवीतभयनाम नगरे उदायनो नाम राजा तस्य प्रभावतो राज्ञी तयोर्ज्येष्ठपुत्रोअभीचिनामाऽभवत् तस्य भागिनेयः केशीनामाभूत् स उदायनराजा सिन्धुसोवीर प्रमुख षोडशजनपदानांवीत भय प्रमुख त्रिशत त्रिषष्टि नगराणां महासेन प्रमुखाणां दशराज्ञां बद्धमुकुटानां क्षत्राणां चामराणां च ऐश्वर्यं पालयन्नस्ति इतश्चंपायां नगर्यां कुमारनन्दी नाम सुवर्णकारोस्ति स च स्त्रीलंपटो यत्र २ सरूपां दारिकां पश्यति जानाति वा तत्र पञ्चशत सुवर्णानि दत्वा तां परिणयति एवञ्चतेन पञ्चशतकन्याः परिणीताः एकस्तम्भं प्रासादं कारयित्वा ताभिस्सम क्रीडति तस्य च मित्रं नागिलोनाम श्रावकोस्ति अन्यदा पञ्चशैलद्वीप वास्तव्यहासाप्रहासाख्यं तर्यौस्तः तयोर्भर्त्ता विद्युन्मालो नाम देवोस्ति सोन्यदाच्युतः ताभिश्चिन्तितं कथमपि व्युद्ग्राहयामः सोऽस्माकं भर्त्ता भवति स्वयोग्यपुरुष गवेषणाय इतस्ततो व्रजं तीभ्यां ताभ्यां चम्पानगर्यां कुमारनन्दी सुवर्णकारः पञ्चशत स्त्री परिवृतो दृष्टः ताभ्यां चिन्तितं एषः स्त्रीलम्पटः सुखेन व्युद्ग्राहयिष्यते

कुमारनन्दी भणतिके भवंत्यौ कुतः समायाते ते आहतु आवां हासा प्रहासा देव्यौ तद्रूप मोहितः कुमारनन्दी सुवर्णकारस्तेदेव्यौ भोगार्थं प्रार्थित वान् ताभ्यां भणितं यद्यत्प्रयोगकार्यं तदा पञ्चशैलद्वीपं समागच्छेः एवं भणिते देव्यौ तत्यतिते गते स्वस्थानं राज्ञः सुवर्णदत्त्वापटहं वादय तिस्र कुमारनन्दि सुवर्णकारं यः पञ्चशैलद्वीपं नयति तस्य स धनकोटिं ददाति एकेन स्थविरेण तत्पटहः पृष्टः कुमारनन्दिना तस्य कोटि धनं दत्तं स्थविरोपि तद्धनं पुत्राणां दत्वा कुमारनन्दिना सहयान पात्रमारूढः समुद्रमध्ये प्रविष्टः यावद्दूरेगत स्तावदेकं वट दृष्टवान्स्थविर उवाच तस्य वटस्याध इदंवाहनं निर्गमिष्यति तत्र जलावर्त्तोस्तीतिवाहनं भंक्ष्यति त्वंतु एतद्वटशाखामाश्रये वटेन पञ्चशैलद्वीपात् भारण्ड पक्षिणस्त्रि मायास्यन्ति संध्यायां तत्चरणेषु स्वंवपुः स्ववस्त्रेण दृढं बध्नीयाः ते च प्रभाते दूत उड्डीना पञ्चशैलं यास्यन्ति त्वमपितैः समं पञ्चशैलं गच्छेः स्थविरेण एव मुच्यमाने तद्वाहनं वटाधोगतं कुमारनन्दिना वटशाखावलम्बनं कृतं भग्नञ्च तद्वाहनं कुमारनन्दी तु भारण्डपक्षि चरणावलम्बेन पञ्चशैले गतः हासा प्रहासाभ्यां दृष्टः उक्तञ्च तव एतेन शरीरेण नावाभ्यां भोगो विधीयते स्व नगरे गत्वां गुप्तत आरभ्य मस्तकं यावज्ज्वलनेन स्व शरीरंदह यथा पञ्चशैलाधीशो भूत्वाऽस्मद्भोगेहां पूर्णौ कुरु तेनोक्तं तत्राहं कथं यामि ताभ्यां करतले समुत्याप्य स नगरोद्याने मुक्तः ततोलोकस्तं पृच्छति किं त्वया तत्राश्चर्यं दृष्टं स भणति दृष्टं श्रुतं अनुभूतं पञ्चशैल द्वीपं मया यत्र प्रथस्तेहासा प्रहासाभिधे देव्यौस्तः अत्र कुमारनन्दिना तत्र स्वांगुष्ठेऽग्निमाच यित्वा मस्तक यावत् स्व शरीरं ज्वालयितु मारब्धः तदा मित्रेणायं वारितः भोमित्र तवेदं कापुरुषजनो चितं चेष्टितं न युक्तं महानुभाव दुर्लभं मनुष्य जन्म माहारयः तुच्छमिदं भोगसुखमस्ति किं च यद्यपि त्वं भोगार्थी तथापि स धर्मानुष्ठानमेव कुरु यत उक्तं धणओ धणच्छियाणं कामत्थीणञ्च सव्व कामकरो सग्गपवग्गसंगमहेउ जिणदेसिओ धम्मो १ इत्यादि शिक्षावादैर्मित्रेण सवार्यमाणोपि दुःखिनी मरणेन मृतः पञ्चशैलाधिपतिर्जातः तस्मित्रवस्थ

श्रावकस्य महान्खेदोजातः अहो भोगकार्ये जनाइत्थं क्लिश्यन्ति जानन्तोपिवयं किमत्र गार्हस्थेस्थिताः स्म इति स श्रावकः प्रव्रजितः क्रमेण कालं कृत्वा अच्युत देवलोके समुत्पन्नः अवधिनास स वृत्तान्तं जानातिस्म अन्यदा नन्दीश्वर यात्रार्थं सर्वे देवेन्द्रावलिताः स श्रावकदेवोपि अच्युतेन्द्रेण समं चलितः तदा पञ्चशैलाधिपते स्तस्य विद्युन्मालिनाम्नो देवस्य गले पटहोलग्नः उत्तारिनोत्तरति हासा प्रहासाभ्यां उक्तं इयं पञ्च शैलद्वीपवासिनो स्थितिः यत् नन्दीश्वरद्वीपयात्रार्थं चलितानां देवेन्द्राणां पुरः पटहं वादयन् विद्युन्मालि देवस्तत्रयाति ततस्त्वं खेदं माकुरुगललग्नं इमं पटहं वादयन् गीतानि गायन्तीभ्यां आवाभ्यांसह नन्दीश्वरद्वीपे याहि ततः स तथा कुर्व्वन् नन्दीश्वरद्वीपोद्देशेन चलितः श्रावकदेवस्तं स खेदं पटहंवादयन्तंदृष्ट्वा उप योगे नोपलक्षितवान् भणति च भोत्वं मां जानासि स भणतिक: शक्रादिदेवान् न जानाति ततस्तं श्रावकदेवः तस्य स्व प्राग्भवस्वरूपं दर्शयतिस्मसर्वं पूर्वं वृत्तान्त माख्याति ततः संवेगमापन्नः सदेवो भणति तदानीमहं किं करोमि श्रावकदेवो भणति श्रीवर्द्धमान स्वामिनः प्रतिमां कुरु यथा तव सम्यक्त्वं सुस्थिरं भवति यत उक्तं जोकारवेइ जिण पडिमंजिणाण जियरागदोस मोहाण सो पावेइ अत्तभवे सुहजणणं धम्मवररयणं १ अन्यच्च दारिद्दं दोहग्गं कुजाइं कुसरीर कुगइ कुमईओ अवमाणरोयसोआ नहुन्ति जिण बिंबकारिणं २ ततः स विद्युन्मालो महाहिमवच्छिखराग्रो शीर्ष चन्दन दारुच्छे दयित्वा श्रीवर्द्धमानस्वामि प्रतिमां निर्वर्त्तितवान् ताच्चमंजूषायां क्षिप्तवान् तस्मिन्नवसरेषण्मासान् यावदितस्ततो भ्रमत्वाहनं वायुभिरास्फाल्य मानं विलोकितवान् तत्रगत्वा चासौ तं उत्पातं उपशमितवान् सां यात्रिकाणां चतां मंजूषादत्तवान् भणितवांश्च देवाधिदेव प्रतिमाचात्रास्ति यत्रचेयं विशेष पूजामाप्नोति तत्रेयंदेवा देवाधिदेवनाम्नैवेय मुद्घाटिथति भवद्वाहनेस्यां स्थितायां न कोप्युपद्रवो भविष्यति ततस्तां लात्वा सां यात्रिकावीतभय यत्नं प्राप्ताः तत्रोदायन राजा तापसभक्तस्तस्य सामंजूषादत्ता कथितश्च सुरवचनं मिलितश्च तत्र ब्राह्मणादिको भूरिलोक भणति च गोविन्दाय

नमः इत्युक्ते मंजूषानोद्घाटिता तत्र केचिद्भणन्ति अत्र देवाधिदेवश्चतुर्मुखो ब्रह्मास्ति अन्ये केचिद्वदन्ति अत्र चतुर्मुखोविष्णुरेवास्ति केचिद्भणंति अत्र महेश्वरो देवाधिदेवोस्ति अस्मिन्नवसरे तत्रोदायन राजपट्टराज्ञी चेरकराजा पुत्री प्रभावती नाम्नी श्रमणोपासिका तत्रायाता तया तस्या मंजूषायाः पजां कृत्वा एवं भणति गयराग दोसमोही सव्वन्नू अट्ठपाडहेरसंजुत्तो देवाहिदेव गुरुओ अइरामि दंसणंदेउं १ एवं उक्ता तया मंजूषायां हस्तेन परशु प्रहारोदत्तः उद्घाटिता सामंजूषा तस्यां दृष्ट्वातीव सुन्दरा स्नान पुष्पमालालंकृता श्रीवर्द्धमानस्वामि प्रतिमाजात जिनशासनोन्नतिः अतीवानन्दिता प्रभावती एवंबभाण सव्वन्नु सव्वदंसण अपुण्ण भवभविय जिणमणाणंदजय चिन्तामणिजय गुरुजय २ जिणवीर अकलङ्को१ तत्र प्रभावत्या अन्तःपुरं मध्ये चैत्यगृहंकारितं तत्रेयं प्रतिमास्थापिता तां चत्रिकालं सा पवित्रा पूजयति अन्यदा प्रभावतीराज्ञी तत्प्रतिमायाः पुरोनृत्यति राजा च वीणां वादयति तदानीं स राजा तस्यां मस्तकं न पश्यति राज्ञोऽष्टतिर्जाता हस्ताद्वीणा पतिता राज्ञा पृष्टं किं मयादुष्टं नर्त्तितं राजा मौनमालंब्यस्थितः राज्ञा अति निर्बंधे उक्तवान् यत्तव मस्तकमपश्यन्नहं व्याकुलीभूतो हस्ताद्वीणां पातितवान् सा भणति मया सुचिरं श्रावकधर्मः न काचिन्मम मरणा द्भीतिरस्ति अन्यदा तत् प्रतिमा पूजनार्थं स्नाता सा राज्ञी स्वचेटीं प्रतिवस्त्राण्यानयेत्युवाच तया च रक्तानि वस्त्राण्यानी तानि राज्ञी क्रुद्धाप्राह जिनगृहे प्रविशंत्या मम रक्तानि वस्त्राणि ददासीत्युक्ता चेटीं आदर्शेण हतवती मर्मणि तत्प्रहार लग्नात् सा मृता प्रभावत्या चिन्तितं हामया निरपराधत्रस जीव बधकरणाद्व्रतं भग्नं अतःपरं किमे जीवतव्येन ततस्तया राज्ञाराज्ञ उक्तं अहं भक्तं प्रत्याख्यामि राज्ञानैवेति प्रतिपादितं तया पुनस्तथैवोच्यते तदा राज्ञा उक्तं यदित्वं देवी भूत्वा मां प्रतिबोधयसि तदा त्वं भक्तं प्रत्याख्याहि राज्ञा तद्वचोंगी कृतं भक्तं प्रत्याख्याय समाधिना मृता देवलोकंगता देवीभूत् तांच प्रतिमां कुब्जा देवदत्तादासी त्रिकालं पूजयति प्रभावती देवस्तु उदायनं राजानं प्रतिबोधयति न च सतं बुध्यते राजा तु तापसभक्तोतः

सदेव स्तापस सरूपं कृत्वाऽमृतफलानि गृहीत्वागतो राज्ञे दत्तवान् राज्ञा तानि आस्वादितानि पृष्टश्च तापसः क्व एतानि फलानि तापसो भणति एतन्नगराभ्यर्णेऽस्मदाश्रमस्ति तत्रैतानि फलानि सन्ति राजा तेन समं एकाक्येव ततृगतः तापसैस्समाचारैः सहन्तु मारब्धः राजा ततो नष्टः तस्मिन्नेव वने जैन साधून् ददर्श तेषामसौशरणमाश्रितः भयं माकुर्वित राज्ञासितः तापसा निवृत्ताः साधुभिश्च तस्यैवं धर्म उक्तः धम्मोचेवेत्थ सत्ताणं सरणं भवसायरे देवं धम्मं गुरुं चेव धम्महत्थीय परिक्खए १ दस अट्ठ दोसरहिओ देवोधम्मो विनिउणदय सहिओ सुगुरुयबंभयारी आरंभ परिग्गहावरओ२ इत्यादिकोपदेशेन स राजा प्रतिबोधितः प्रतिपन्नो जिनधर्मं प्रभावतीदेव आत्मानं दर्शयित्वा राजानं च स्थिरीकृत्वा स्वस्थानेगतः एवं उदायन राजा श्रावकोजातः इतश्च गन्धारदेश वास्तव्यः सत्यनामा श्रावकः सर्वत्र जिनजन्म भूम्यादितीर्थानिवन्दमानो वैताढ्यं यावद्गतः तत्र शाश्वत प्रतिमा वन्द नार्थं उपवासत्रयं कृतवान् तपस्तुष्टया तदधिष्टात्र देव्यास्तस्य शाश्वतजिन प्रतिमादर्शिताः तेन च वन्दिताः अथ तया देव्यास्तस्मै श्रावकायकामित गुटिकादत्ता ततः स निवृत्तो वीतभयपत्तने जीवितस्वामि प्रतिमां वन्दितु मायातः गोशीर्ष चन्दमयीं तां ववन्दे दैवात्तस्यातीसारो रोग उत्पन्नः कुजया दास्या प्रतिचरितः स निरुग्जातः तुष्टेन तेन तस्यै कामगुणिता गुटिकादत्ता कथितश्च तासां चिन्तितार्थ साधक प्रभावः अन्यदासादासौ अहं सुवर्ण वर्णा सुरूपा भवामीति चिन्तयित्वा एकां गुटिकां भक्षितवती सुवर्णवर्णा सुरूपा च जाता ततस्तस्याः सुवर्णगुलिकेति नाम जातं अनाद्दा सा चिन्तयति भोगसुख मनुभवामि एष उदायन राजा ममपिता अपरेमत्तुल्याः केपि राजानो न सन्तीति चण्डप्रद्योतमेव मनसि कृत्वा द्वितीयां गुटिकां भक्षितवती तदानीं तस्य चण्डप्रद्योतस्य स्वप्ने देवतया कथितं वीत भयपत्तने उदायनराज्ञो दासी सुवर्णगुलिकानाम्नी सुवर्णा वर्णोऽतीव रूपवती त्वत्योग्यास्ति चण्डप्रद्योतेन सुवर्णगुलिकायाः समीपे दूतःप्रेषितः दूतेन एकान्ते तस्या एवंकथितं चण्डप्रद्योतस्वामी हते तया भणितं अत्र चण्डप्रद्योतः प्रथम मायातुतं

पश्यामि पश्चाद्यथा रुच्यातेन सहायास्यामि दूतेन गत्वा तस्या वचनं चण्डप्रद्योतस्योक्तं सोपि अनिलगिरि हस्तिनमधि रुह्यरात्रौ तत्रायातः दृष्टस्तया रुचितश्च सा भणति यदीमां प्रतिमां सार्द्धं नयसि तदाह मायामि नानयेति ततस्तेन तत्स्थान स्थापनयोग्यान्या प्रतिमा, तदानीं नास्तीति तस्यां रात्रौ तत्र उषित्वा स्व नगरे पश्चाद्गतः तत्र तादृशीं जिन प्रतिमां कारयित्वा पुन रत्नायात स्तां प्रतिमां तत्रस्थापयित्वा मूल प्रतिमां दासीं च गृहीत्वा उज्जयिनींगतः तत्रानलगिरिणा मूत्र पुरीषे कृते तद्गन्धेन वीत भयपत्तन सत्का हस्तिनो निर्मदाजाता उदायनराज्ञा तत्कारणं गवेषितं अनल गिरि हस्तिनः पदं दृष्टं उदायनेन चिन्तितं स किमर्थं मत्तायातः गृहमानुषैरुक्तं सुवर्णगुलिकान दृश्यते राजा उक्तं चेटी चण्डप्रद्योतेन गृहीता प्रतिमां विलोकयततैरुक्तं प्रतिमादृश्यते परं पुष्पाणि म्लानि दृश्यन्ते राज्ञा गत्वा स्वयं प्रतिमाविलोकिता पुष्पम्लान दर्शनेन राज्ञाज्ञातं नेयं सा प्रतिमा किं त्वनेनेति विषन्नेन राज्ञा दूतश्चण्ड प्रद्योतांतिके प्रेषितः मम दास्या नास्तिकार्यं प्रतिमां त्वरितं प्रेषयेति दूतेन चण्डप्रद्योतस्योक्तं चण्डप्रद्योतः प्रतिमां नार्पयति तदा सैन्येन समं ज्येष्टमास एवोदयनश्चलितः यावन्मरुदेशे तत्सैन्यमायातं तावज्जला प्राप्तया तत्सैन्यं तृषाक्रान्तं व्याकुली बभूव तदानीं राज्ञा प्रभावती देवश्चिन्तितं तेन समागत्यत्रीणि पुष्कराणि कृतानितेषु जललाभात् सर्व्वं सैन्यं सुस्थं जातं क्रमेण उदायन राजा उज्जयिनींगतः कथितवांश्च भो चण्डप्रद्योत तव ममचसाक्षात् युद्धं भवतु लोकेन मारितेन अश्वस्थेन रथस्थेन वा त्वया मया च युद्धमंगी कुरुचण्ड प्रद्योतेनोक्तं रथस्थे नैव त्वया मया चयोद्धव्यं प्रभाते चण्डप्रद्योतः कपटं कृतवान् स्वयं अनलगिरि हस्तिन मारुह्य संग्रामांगणे समायातः उदायनस्तु स्वप्रतिज्ञानि र्वाहो रथारूढः संग्रामांगणे समायतः तदानी मुदायनेन चण्डप्रद्योतस्य उक्तं त्वमसत्य प्रतिज्ञोजातः कपटं च कृतवानसि तथापि तव मत्तो मोक्षो नास्तीति भणता उदायनेन रथो मण्डल्यां क्षिप्तः चण्ड प्रद्योतेन तत् पृष्टौ अनलगिरि हस्तीवेगेन क्षिप्तः स च हस्तीयंयंपाद

मुत्क्षिपति ततः उदायनः शरैर्विध्यते यावत् हस्तोभूमौनिपतितः तत् स्कन्धादुत्तरन् प्रद्योतोबद्धः तस्य ललाटे मम दासीपतिरित्यक्षराणि लिखितानि तत उदायनराज्ञाचण्ड प्रद्योतदेशेस्वाधिकारिणः स्थापिताः स्वयं तु चण्ड प्रद्योतं काष्ट पञ्जरेक्षिप्ता सार्द्धं च नीत्वा स्वदेशं प्रति चलितः साप्रतिमा तु ततो न उत्क्षिप्तोति तत्रैव सामुत्ता अवच्छिन्न प्रयाणैश्चलितस्य अन्तरावर्षा कालः समायातस्तेन रुद्धोदग्गभिराजभिर्भूली प्राकारं कृत्वा मध्ये सरक्षितः सुखेन तत्र तिष्ठति यत्स्वयंभुंक्ते तत् चण्डप्रद्योतस्यापि भोजयति एकदापर्युषणादि नमायातंतदा उदायनेन उपवासः कृतःसूपकारैः चण्डप्रद्योतः पृथग् भोजनार्थं पृच्छ्यते तैरुक्त मद्यपर्युषणादिने उदायनराजा उपोषितो स्तोति यद्भवतो रोचते तत्पच्यते चण्डप्रद्योते नोक्तं ममाप्यद्योपवासोस्तिनज्ञातं मया यपर्युषणादिनं सूपकारैश्चण्ड प्रद्योतस्य उक्तं उदायनराज्ञः तेनापि चिंतितं जानाम्यहं यथायं धूर्त्तसाधर्म्मिकोस्ति तथाप्यस्मिन् बद्धे मम पर्युषणान शुध्यति चण्ड प्रद्योतोमुक्तः स्वामितश्च तदक्षराच्छादननिमित्तं रत्न पट्टस्तस्य मूर्द्धि बद्धः स्वं विषयञ्चतस्यदत्तः ततः प्रभृति पट्टबद्धा राजानोजाताः मुकुटबद्धाश्च पूर्वमप्यासन् वर्षा रात्रे व्यतिक्रान्ते उदायनराजातत: प्रस्थितः व्यापारार्थं योवणिग् वर्गस्तत्रायातः सतत्रैवस्थितः दशभीराजभिर्वासितत्वा दशपुरं नाम नगरं प्रसिद्धं जातं अन्यदा स उदायनराजा पौषधशालायां पौषधिकः पौषधं प्रतिपालयन् विहरति पूर्वरात्र समये च तस्यैताद्दशीभि प्रायः समुत्पन्नः धन्यानि तानि ग्रामाकरनगराणि यत्र श्रमण भगवान् श्रीमहावीरो विहरति धन्यास्तेराजेश्वर प्रभृत योये श्रमणाभगवतः श्रीमहावीर स्यांतिके केवल प्रज्ञप्तं धर्मं शृण्वन्ति पञ्चाणु व्रतिकं सप्तशिक्षा व्रतिकं द्वादशविधं श्रावकधर्मञ्च प्रति पद्यन्ति तथा मुण्डीभूत्वा आगारात् अनगारितां व्रजन्ति ततो यदि श्रमण भगवान् श्रीमहावीरः पूर्वानुपूर्व्याचरन् यदीहागच्छेत् ततोहमपि भगवतोन्तिके प्रव्रजामि उदायनस्यायमध्यवसायो भगवताज्ञातः प्रातस्तम्यातः प्रतिनिष्क्रम्यवीत भय पत्तनस्य मृगवनोद्याने भगवान् समवसृतः तत् पर्षन्निर्गता उदायनोपि तत्रायातो भगवदन्तिके

शाखाछेदनोया तस्याः फलानि अद्यस्तूनि कुर्मः २ तदा श्रुत्वा तृतीयः कापोतलेश्यावान् प्राह किमर्थं भो अस्य वृक्षस्य महाशाखाछिद्यते एकायाः प्रतिशाखायाः अपि फलैः सर्वेषां तृप्तिः स्यात् तस्मादेकालघ्वी प्रतिशाखैवच्छेदनीया ३ ततश्चतुर्थस्तेजोलेश्यावान् अवादीत् किमर्थं प्रतिशाखायाः च्छेदः वहवोगुच्छाः सन्ति तेन गुच्छा एव ग्राह्यास्तैरेव तृप्तिर्भविष्यति ४ ततः पञ्चमेन पद्म लेश्यावताचैवमूचे किमर्थं भोगुच्छाः पात्यन्ते गुच्छेषु तुकच्चान्यपि फलानि भवन्ति तस्मात्पक्वानेवफलानि गृहीत्वा अद्मः ५ ततः षष्टः शुक्ललेश्यावान् पुमानाह किमर्थं भो वृक्षात् फलानि पात्यन्ते वहून्येवाध एव पतितानि सन्ति तै रेवक्षुधाया उपशमोभावीति ६ एवं लेश्योदाहरणं ज्ञेयं ३२ अथ लेश्यानां स्थानानाह [असंखिज्जाणोसप्पिणीउ उसप्पिणीओजेसमया संखाइयालोगालेसाणंहवन्तिठाणाइ ३३) लेश्यानां सर्वेसान्तावन्ति स्थानानि भवन्ति स्थानानि प्रकर्षापकर्षकृतानि अशुभानां लेश्यानां संक्लेशरूपाणि शुभानां लेश्यानां विशुद्धरूपाणि भाजनानीत्यर्थः लेश्यानां कियन्ति स्थानानि भवन्ति यद्वा असंख्येया उत्सर्पिण्योवर्द्धमानभावरूपास्तथा पुनरसंख्येया अवसर्पिण्होहीयमान भावरूपाः तासां उत्सर्पिणीनां यावन्तः समयाभवन्ति पुनर्यावन्तोऽसंख्येयालोकाकाश प्रदेशा भवन्ति तावन्ति लेश्यानां स्थानानि आरुहन्ति आरुहन्ति पतन्ति पतन्ति च शुभानि अशुभानि निर्मलानिकलुषाणि च स्थानानि भवन्तीत्यर्थः ३३ अथ लेश्यानांस्थिति माह

सूत्र असंखिज्जाणो सप्पिणीण उसप्पिणीण जेसमया। संखाईया लोगा लेसाणं हवंति ठाणाइं ३३॥ मुहुत्तद्धंतु जहन्ना

भाषा सहित तेशुक्ललेश्याने परिणामे परिणमे ३२ असंख्याता जे उत्सर्पिणी जिहां २ समे २ चढता २ भाव तथा असंख्यातीजे अवसर्पिणी जीहां समे २ पडता २ भाव हुइ तेहना समयने विखे असंख्याता लोकाकाशना जेप्रदेश तेतलांस्थानक लेश्यानांछे चढता पडता शुभ अशुभादि जाणवा ३३

[मुदुत्तइं तु जहन्नातित्तीसंसागरामुहुत्तहिया उक्कोसाहोइठिई नायव्वाकिन्हले साए ३४] कृष्णलेश्यायाइति स्थितिर्ज्ञातव्या जघन्यामुहूर्त्ताधिं केचिदं शैक्ष्युनं घटिकाद्वयं अन्तर्मूहूर्त्तं एव कृष्णलेश्यायास्थितिर्भवति तथा उत्कृष्टास्थिति स्त्रयस्त्रिंशत्सागरोपमाणि मुहूर्त्ताधिकानि अथ सम्प्रदायात् मुहूर्त्तशब्देन अन्तर्मूहूर्त्तं गृह्यते त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मूहूर्त्ताधिकानि परमास्थितिः कृष्णलेश्यायाभवन्ति ३४ (मुहुत्तइं तु जहन्नादसउदही पलियमसंखभागमब्भहिया उक्कोसाहोइठिई नायव्वानीललेसाए ३५] नीललेश्यायाः जघनंग्रस्तोककालं चेत् स्थिति र्भवति तदा अन्तर्मूहूर्त्तं एव उत्कृष्टास्थितिश्चदशसागरोपमानि पल्योपमासंख्येयभागाधिकानि नीलायास्थितिर्भवतीति जघन्याउत्कृष्टास्थितिर्ज्ञातव्या इयं स्थितिश्च पञ्चम पृथिव्याः धूमप्रभाया उपरितन प्रस्तटमाश्रित्योक्ता ३५ (मुहुत्तइंन्तुजहन्नातिन्नुदहीपलियमसंखभागमब्भहिया उक्कोसाहोइठिई नायव्वाकाउलेसाए ३६) कापोत लेश्यायाः इयं स्थिति र्ज्ञातव्या जघन्यास्थिति स्तुकापोतलेश्यायाः अन्तर्मुहूर्त्तं भवति तथा पुनः कापोतलेश्यायाः त्रीणिसागरोपमाणि पल्योपमासंख्येय भागाधिकानुगत् कृष्टास्थितिर्भवतीति ज्ञातव्याइति दृतीयनरकपृथिव्यावालुकाया अपेक्षयाउक्तास्ति ३६ [मुहुत्तइंन्तु जहन्नादोउदही पलियमसंख

सूत्र

तित्तीसं सागरा मुहुत्तहिया। उक्कोसा होइ ठिई नायव्वा किन्ह लेसाए ३४ ॥ मुहुत्तइंतु जहन्ना दस उदही पलीय मसंखभागमब्भहिया। उक्कोसा होइ ठिई नायव्वा नीललेसाए ३५॥ मुहुत्तइंतु जहन्नातिन्नुदही पलिय मसंखभाग

भाषा

अंतर्मुहूर्त्तवे घडी माठेरी जघन्य थिति तेत्रीस सागरोपम अंत मुहूर्त्त अधिको मुहूर्त्त नोएकदेश लीजे उत्कृष्टी थिति हुई तेजाणवी कृष्ण लेश्यानी ३४ अंतर्मूहूर्त्त जघन्य थिति दस सागरोपम अने पल्योपमने असंख्यातमे भाग उत्कृष्टी थिति हुई ते जाणवी नीललेश्यानी ३५ अंतर्मूहूर्त्त

भागगमब्भहियाउक्कोसाहोइठिई नायव्वाति उलेसाए ३७ तेजो लेश्यायाजइयं स्थिति ज्ञातव्याजघनया तु अन्तर्मुहूर्त्तं उत्कृष्टाचतेजो लेश्याया ही उद धीइं सागरोपमेपल्योपमासंख्येयभागाधिके परमास्थितिर्ज्ञातव्या इयं तु ईशानदेवलोकापेक्षयाप्रोक्तास्ति ३७ [मुहुत्तद्धं तु जहन्नादसउदहीहोन्ति मुहुत्त मब्भहिया उक्कोसाहोइठिई नायव्वापद्मलेसाए ३८] पद्मलेश्यायाइयं स्थितिर्ज्ञातव्या जघनया तु अन्तर्मुहूर्त्तं एव स्थितिर्भवति उत्कृष्टा तु दशसागरोप मानि अन्तर्मुहूर्त्ताधिकानि परमास्थितिरेतावतीपद्मलेश्यायाभवति इयं ब्रह्म देवलोकापेक्षयाउक्तास्ति १८ मुहुत्तद्धं तु जहन्नातित्तीससंसागरामुहुत्तहिया उक्कोसाहोइठिई नायव्वासुक्कलेसाए ३९] शुक्ललेश्यायाइयं स्थितिर्ज्ञातव्या जघन्यास्थितिरन्तर्मुहूर्त्तं शुक्ललेश्यायास्त्रयस्त्रिंशत्सागरोपमानि मुहूर्त्ताधिकानि

सूत्र

मब्भहिया। उक्कोसा होइ ठिई नायव्वा काउ लेसाए ३६॥ मुहुत्तद्धं तुजहन्ना दुन्नुदही पलिय मसंखभाग मब्भहिया। उक्कोसा होइ ठिई नायव्वा तेउ लेसाए ३७॥ मुहुत्तद्धं तु जहन्ना दस उदही हुंति मुहुत्त मब्भहिया। उक्कोसा होइ ठिई नायव्वा पम्ह लेसाए ३८॥ मुहुत्तद्धं तु जहन्ना तित्तीसं सागरा मुहुत्तहिया। उक्कोसा होइ ठिई नायव्वा सुक्क

भाषा

जघन्य थिति तीन सागरोपम पल्योपमने असंख्यातमे भागे अधिक ईशान देवलोकनी अपेक्षाये अत्कृष्टी थिति हुइ तेजाणवी कापोत लेश्यानी ३६ अंतर्मुहूर्त्त जघन्य थिति वे सागरोपमने असंख्यातमे भागे अधिक ईशान देव लोकनी अपेक्षाइं उत्कृष्टी थिति हुई तेजाणवी तेजो लेश्यानी ३७ अंतर्मुहूर्त्त जघन्यथिति दस सागरोपमहोइ अंतर्मुहूर्त्त अधिक पांचमा देवलोकनी अपेक्षाइ उत्कृष्टी थिति हुइ तेजाणवी पद्मलेश्यानी ३८ अंतर्मुहूर्त्त जघन्य थिति तेत्रीस सागरोपम मुहूर्त्त अधिक सर्वार्थ सीद्धनि अपेक्षाइ उत्कृष्टी थिति हुइ ते जाणवी शुक्ल लेश्यानी ३९ एह खलु

उत्कृष्टास्थितिर्भवति ३९ [एसाखलुलेसाणं ओहेणंठिई उवन्नियाहोइ च उसुविगईसु एत्तो लेसाणंठिई ओवोच्छामि ४०] एषालेश्यानां यस्यां अपिओघेन सामान्य प्रकारेण गतिं विवक्षां विनास्थितिर्वर्णिताभवति इतश्चतसृषुगतिषु लेश्यानां सर्वासांस्थितिं वक्ष्यामि ४० [दसवास सहस्साइं काऊएठिईजहन्निया होइतिन्नुदहीपलिओवममसंखभागं च उक्कोसा ४१] कापोतायाः कापोतलेश्यायाः दशवर्षसहस्राणि जघन्यिकास्थितिर्भवति प्रथमायां पृथिव्यांरत्न प्रभायां प्रथमप्रस्तरे अस्ति तत्र स्थानांहि जघन्यतोदशवर्षसहस्रायुष्कात् उत्कृष्टास्थितिस्तुकापोतलेश्यायाः त्रीणि सागरोपमाणि पल्योपमासंख्येयभाग युक्तानि इयं तु स्थिति स्तृतीय पृथिव्याः वालुकप्रभायाउपरितनप्रस्टटनारकाणां एतावतीस्थितिरस्तीति४१ (तिन्नुदहीपलिओवम मसंखभागं जहन्ननील ठिईदसउदहीपलिओवम मसंखभागच्च उक्कोसा ४२) नीलायाः जघन्यास्थितिः त्रीणि सागरोवमाइं पल्योपमासंख्येय भागयुक्तानि इयतीजघन्यास्थिति स्तृतीयायां वालुकप्रभायाः पृथिव्याः अपेक्षयाज्ञेया पुनर्नीललेश्यायाश्च दससागरोपमाणि पल्योपमासंख्येयभागयुक्तानि उत्कृष्टास्थिति र्ज्ञेया इयमपि

सूत्र

लेसाए ३९॥ एसा खलु लेसाणंओहेणं ठिईओ वन्नियाहोइ। चउसुवि गईसुएत्तो लेसाणं ठिईओ वोच्छामि ४०॥दस वास सहस्साइं काऊए ठिईजहन्नियाहोइ। तिन्नु दही पलिओवममसंखभाग च उक्कोसा४१॥ तिन्न, दही पलिओवम

भाषा

निश्चे लेश्यानी सामान्य प्रकारे थिति वर्णवीछे चार गतने विषे एतला थके लेश्यानी थीती थीतकहेसुं ४० दसहजार वरसनी कापोत लेश्यानी स्थिति जघन्य रतन प्रभा पृथिवी पहेले पाथडे मध्यम वीजे तीन सागरोपम अने पल्योपमनो असंख्यातमो भाग अधिक उत्कृष्टी थिति कापोत लेश्यानी त्रीजी पृथिवीना ऊपरि त्यापाथडानी अपेक्षाइ ४१ तीन सागरोपम अने पल्योपमनो असंख्यातमो भाग अधिक नीललेश्यानी

पञ्चम्याधूमप्रभायाः पृथिव्या उपरितनप्रस्तटापेक्षयाज्ञेया ४२ (दसउदहीपलिओवमम संखभागं जहन्निया होइ तेत्तीससागराइं उक्कोसाहोइकिन्हाए ४३) कृष्णायाः कृष्णलेश्यायाः दशसागरोपमाणि पल्योपमासंख्येय भागयुक्तानि जघन्यिकास्थितिर्भवति इयं तु पञ्चम्याः धूमप्रभायाः नरकपृथिव्याः अपेक्षया ज्ञेया कृष्णायाः पुनरुत्कृष्टास्थिति स्त्रय स्त्रिंशत् सागरोपमानि इय मपि उत् कृष्टास्थितिः कृष्णलेश्यायास्तु सप्तम्यास्तमतमः प्रभायाः नरकपृथिव्याऽपेक्षयाज्ञेया ४३ (एसानेरइयाणं लेसाणंठिई उवखियाहोइ तेणपरं वुच्छामितिरियमणुयाणदेवाणं ४४) एषानैरयिकाणां नरकवासिनां जीवानां लेश्यानां जघन्योत्कृष्टभेदेनस्थितिर्वर्णिताभवति तेणपरमिति ततः परं तिर्यग्मनुष्याणांतिरश्चां तथा मनुष्याणां च देवानां च स्थितिं वक्ष्यामि ४४ [अन्तो

सूत्र

मसंखभागोय जहन्ननीलठिई। दस उदहीपलिओवममसंखभागं चउक्कोसा ४२॥ दसउदही पलिओवममसंखभागजहन्निया होइ। तित्तीस सागराओ उक्कोसा होइ किन्हाए ४३॥ एसा नेरइयाणं लेसाणं ठिईउ वन्निया होइ। तेण परं वोच्छामी तिरिय मणुयाण देवाणं ४४। अंतोमुहुत्तमद्धा लेसाणं ठिई जहिं २ जाओ। तिरियाण नराणं च

भाषा

जघन्य थिति त्रीजी पृथिवीनी अपेक्षाइ दससागरोपम अने पल्योपमनो असंख्यातमो भाग अधिक उत्कृष्टी थिति नील लेश्यानी पांचमी पृथिवीनी उपरि ज्यापाथडानी अपेक्षा ४२ दस सागरोपम अने पल्योपमनो असंख्यातमोभाग जघन्य थितिछइ कृष्णलेश्यानी पांचमी पृथिवीनी अपेक्षाइ तेत्रीस सागरोपम उत्कृष्टी स्थितिछइ कृष्णलेश्यानी पृथिवी सातमीनी अपेक्षाइ ४३ एनारकी समस्तने लेश्यानी स्थिति वर्णवीछे तिवार पछीछं कहीयुं तिर्यंचनी १ मनुष्यनी २ देवतानी ३ लेश्यानी थिति ४४ अंतर्मुहुर्त्तकाल लेश्यानी स्थित जघन्यादि पृथिव्यादिकने जेहने २ जे कृष्णादि तिर्यंचने

मुहुत्तमद्धालेसाणंठिई जहिं जहिं जाओतिरियाणनराणञ्च वज्जित्ताकेवलं लेसा ४५] यस्मिन् यस्मिन् पृथ्वीकायादौतिरश्चां यस्मिन् २ स्थाने संमूर्छिमनराणाञ्च यास्तु कृष्णाद्याः लेश्यावर्त्तन्ते तासांलेश्यानां जघन्याउत्कृष्टा च स्थितिरन्तर्मुहूर्त्ताद्धाज्ञेया अन्तर्मुहूर्त्ताद्धाज्ञेयाः अन्तर्मुहूर्त्त अद्धाकालो यस्याः सा अन्तर्मुहूर्त्ताद्धा जघन्यापि अन्तर्मुहूर्त्तकालं स्थितिः उत्कृष्टापि अन्तर्मुहूर्त्तकालमेव स्थिति रस्ति किं कृत्वा केवलाशुक्लां लेश्यांवर्जयित्वा तत्र शुक्ललेश्याया: अभावोवर्त्तते अन्याः कृष्णाद्याः क्वचित् २ कास्यित् २ लेश्यासम्भवन्तीति भावः तत्र पृथिव्यप् वनस्पतीनां कृष्णादि लेश्या चतुष्टयं तेजोवायुविकलसंमूर्छिमतिर्यग्मनुष्य नारकाणां प्रथमलेश्यात्रयं भवतीत्यर्थः ४५ [मुहुत्तद्धं तु जहन्ना उक्कोसाहोइ पुव्वकोडीओ नवहिंवरसेहिंऊणा नाय व्वासुक्कलेसाए ४६] शुक्ललेश्याया जघन्यास्थितिर्मुहूर्त्ताद्धाइति अन्तर्मुहूर्त्तकालं स्थितिर्ज्ञातव्या तथा पुनः शुक्ललेश्याया उत्कृष्टास्थितिस्तु पूर्वकोटी नववर्षैन्यूनाज्ञातव्या इह यद्यपि कश्चिदष्ट वार्षिकोपि पूर्वकोट्यायुर्व्रतपरिणाममाप्नोति तथापि नैतावद्वयस्यस्य नववर्षपर्यायादर्वाक् शुक्ललेश्या सम्भवति अतोनववर्षोना पूर्वकोटिरुक्ता४६ [एसातिरिय नराणं लेसाणंठिई उवन्नियाहोइ तेण परं वुच्छामिलेसाणंठिई उदेवाणं ४७] एषास्थिति

मूल

वज्जित्ता केवलं लेसं ४५। मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडीओ। नवहिं वरिसेहिं ऊणा नायव्वा सुक्क लेसाए ४६। एसा तिरिय नराणं लेसाणं ठिईओ वन्निया होइ। तेण परं वोच्छामी लेसाणं ठिईउ देवाणं ४७।

भाषा

समूर्छिम मनुष्यने वर्जी टाली केवल शुक्ललेश्या ४५ अंतर्मूहूर्त्त जघन्य स्थिति उत्कृष्टी इड स्थिति पूर्वकोड १ ते नवेवरसे ९ ऊणा: नव वरसउणी तेजांणवी शुक्ललेश्यानीथिति ४६ तिर्यंचनी मनुष्यनी लेश्यानी थिति विस्तर पणे वर्णवीके तिवार पछीइं कहिस्युं लेश्यानी थिति देवतानी ४७

स्तिरश्चांनराणां च वर्णितभवति तेषेति पञ्चमीस्थाने प्राकृतत्वात् तृतीया ततः परं देवानां लेश्यानां स्थितिं वक्ष्यामि ४७ [दसवास सहस्साइं किन्हाए ठिई जहन्नियाहोइ पलियमसंखिज्जइमो उक्कोसाहोइ किन्हाए ४८] कृष्णायाः कृष्णलेश्यायादशवर्षसहस्राणि जघन्यकास्थितिर्भवति पुनः कृष्णलेश्यायाः पल्योपमासंख्येयतमोभागः उत्कृष्टास्थितिर्भवति इयं च द्विविधास्थितिर्भवति भुवनपतिव्यन्तराणां एतावदायुषां अपेक्षया उक्तास्ति ४८ [जाकिन्हाएठिईखलु उक्कोसासाउसमयमब्भहिया जहन्नेणं नीलाए पलियमसंखं च उक्कोसा ४९) या कृष्णायाः कृष्णलेश्यायाः खलु इति निश्चयेन उत्कृष्टास्थितिरुक्तासा एव स्थितिः समयाभ्यधिकासमयेन एकेन अभ्यधिकासमयाभ्यधिका जघन्येन ज्ञेया च पुनर्नीलायाः पल्योपमासंख्येयभागः उत्कृष्टास्थितिर्भवति परं अयमेव विशेषः अयं यः पल्योपमासंख्येयोभागोवर्त्तते स दृहत्तरोभागोज्ञेयः ४९ [जानीलाएठिइखलु उक्कोसासाउ समयमब्भहिया जहन्नेणं काजए पलियमसंखं च उक्कोसा ५०] खलु निश्चयेनयानीलायाउत्कृष्टास्थिति रुक्ता सा पुनः समयाभ्यधिकाजघन्येनकापोतायाः कापोत

सूत्र

दस वास सहस्साइं किन्हाए ठिई जहन्निया होइ पलिय मसंखिज्जइमो उक्कोसा होइ किन्हाए ४८। जाकिण्हाए ठिई खलु उक्कोसा साउ समय मब्भहिया। जहन्नेणं नीलाए पलिय मसंखंच उक्कोसा ४९। जा नीलाए ठिई खलु

भाषा

दशहजार वरस कृष्णलेश्यानी थिति जघन्य होइछेअंतर भवन पतिनी अपेक्षाइ पल्योपमनो असंख्यातमो भाग उत्कृष्टी छवे स्थिति कृष्णलेश्यानी४८ कृष्णलेश्यानी जे उत्कृष्टी स्थिति तेथे उत्कृष्टी तेवली एके समे अधिक एतली जघन्य नील लेश्याना थिति पल्योपमनो असंख्यातमो भाग नील लेश्यानी उत्कृष्टी पहेलोनी अपेक्षा ४९ जे नीललेश्यानी थिति तेथे उत्कृष्टी ते समय एक अधिक जघन्य कापोत लेश्यानी स्थिति पल्योपमनो

लेश्याया:स्थिति र्न्यूना च पुन: कापोतलेश्यायाः पल्योपमासंख्येयोभाग उत्कृष्टा स्थितिर्भवति परं अयमपि पल्योपमासंख्येयो भागोऽहन्त भागोन्नेय: इत्यनेन भवनपतिव्यन्तराणां एतावदायुषां लेश्यात्रयं दर्शितं ५० [तेण परं वुच्छामि तेजलेसाजहासुरगणाणं भुवणवइवाणमन्तर जोइसवेमाणियाणञ्च ५१] तत: परं भुवनपति वाणमन्तरज्योइसवेमाणियाणं इति भुवन पतिव्यन्तरज्योतिष्कवैमानिकानां सुरगणानां यथा येन प्रकारेण तेजोलेश्याजघन्योत् कृष्टस्थित्याभवति तथाहं वक्ष्यामि ५१ [पलिओवमञ्जहन्ना उक्कोसासागराउदोन्निहिया पलियमसंखिज्जेण होइ भागेण तेऊए ५२] तेजोलेश्याया: जघन्यास्थिति: पल्योपमं भवति उत्कृष्टास्थितिस्तु द्वेसागरोपमे पल्योपमासंख्येय भागयुक्ते इयं परमास्थिति स्तेजोलेश्यायाभवति

सूत्र

उक्कोसा साउ समय मब्भहिया। जहन्नेणं काऊए पलिय मसंखंच उक्कोसा ५०। तेण परं वोच्छामी तेऊ लेसा जहा सुर गणाणं। भवणवइ वाणमंतर जो इस वेमाणिवाणंच ५१॥ पलिओवमं जहन्नं उक्कोसा सागराओ दुन्निहिया पलिय मसंखिज्जेणं होइ भागेण तेऊए ५२ ॥ दसवास सहस्साइं तेऊए ठिई जहन्निया होइ। दुन्नुदही पलिओवम

भाषा

असंख्यातमो भाग उत्कृष्टी कापोत लेश्यानो पहिली थकी भाग मोटो ५० एतलानंतरं कहे छे तेजो लेश्या जिम देवताना समूहनेछे तिम भवन पतिने जघन्य वरस सहस्र १० उत्कृष्टी सागर १ अधिक थ्यंतरने जघन्य वरस सहस्र १० उत्कृष्टपल्योपम ज्योतिषीने जघन्य पल्योपमनो भाग आठमो उत्कृष्टपल्य१ वरस लाख १ वैमानि कनो ५१ जघन्य पल्योपम उत्कृष्ट सागर २ अधिक तेजो लेश्यानी थिति पहेले विजे देवलोके साधिक तेऊतलांपल्योपमने असंख्यातमे भागे अधिक तेजो लेश्यानी ५२ दसहजार वरस तेजो लेश्यानी थिति जघन्यत: होइ भवनपति

इयं च सामान्योपक्रमेपि वैमानिकनिकायविषया तदा ज्ञेया तत्र सौधर्मे ग्रानदेवानां जघन्योत्कृष्टाभ्यां एतावदायुर्वर्त्तते उपलक्षणाच्चैषनिकायामपि तेजोलेश्यायास्थितिर्ज्ञेया ५२ [दसवाससहस्साइं तेऊए ठिईओ जहण्णियाहोइ दोण्णुदहीपलिओवम असंखभागच्च उक्कोसा ५३] तेजोलेश्यायाः स्थिति दशवर्ष सहस्राणि जघन्यामभवति तथा पुनर्द्वेसागरोपमे पल्योपमासंख्येय भागयुक्ते उत्कृष्टास्थिति स्तेजोलेश्यायाभवति तत्र व्यन्तरभवनपतिदेवान् आश्रित्यतेजो लेश्याया स्थितिर्दशवर्ष सहस्राण्युक्ता पुनर्द्वे सागरोपमेपल्योपमासंख्येय भागयुक्ते इयंतु द्वितीय देवलोका पेक्षया तेजो लेश्याया उत्कृष्टा स्थितिरुक्तेति तात्पर्यं ५३ [जातेऊएठिईखलुउक्कोसासाउसमयमब्भहियाजहन्नेणंपम्हाएदसउमुहुत्ताहियादुउक्कोसा५४] या तेजोलेश्यायाः खलुनिश्चयेन उत्कृष्टास्थितिवर्त्तते सातुसाएवस्थितिः समयाभ्यधिका पद्मलेश्यायाःस्थितिर्ज्ञेयादृयंतुपद्मलेश्या जघन्य स्थितिस्तृतीय सनत्कुमार देवलोकापेक्षयाभवति उत्कृष्टातुपद्मलेश्यायाः दशसागरोपमाणि अन्तर्मुहूर्त्ताधिकानि स्थितिर्भवति इयञ्चपद्मलेश्यायाः स्थितिपञ्चमब्रह्मदेवलोका पेक्षयाज्ञेया५४(जापम्हाएठिई

असंख भागं च उक्कोसा ५३ ॥ जा तेऊए ठिई खलु उक्कोसा साउ समय मब्भहिया। जहन्नेणं पम्हाए दसउ मुहुत्ता हियाइं उक्कोसा ५४ ॥ जा पम्हाए ठिई खलु उक्कोसा साउ समय मब्भहिया। जहन्नेणं सुक्काए तित्तीस मुहुत्त मब्भ

सूत्र

भाषा

व्यंतरआ श्री सागरोपम २ अने पल्योपमनो असंख्यातमो भाग उत्कृष्टी जे तेजो लेश्यानी थिति बीजा देवलोकनी अपेक्षा ५३ तेजो लेश्यानी थिति निश्चे स्युं उत्कृष्टी तेह समय एक अधिक जघन्य पद्मलेश्यानी थिति सागरोपम १० अंतर्मुहूर्त्त अधिक उत्कृष्टी स्थिति पद्मलेश्यानी ब्रह्म देवलोकनी अपेक्षाइ ५४ जे पद्मलेश्यानी थिति निश्चे स्युं उत्कृष्टी तेह समय अधिक जाणवी जघन्य शुक्ललेश्यानी थिति छट्ठा देवलोकनी अपेक्षाइ

खलु उत्कोसासाउ समय मब्भहिया जहन्नेणं सुक्काए तेत्तीसं मुहुत्त मब्भहिया ५५] या पद्मलेश्यायाः खलु निश्चयेन उत्कृष्टा स्थितिर्वर्त्तते सा एवस्थितिः एक समयाभ्यधिका जघन्येन शुक्लायास्थितिर्भवति इयं शुक्लेश्यायाः स्थितिः षष्टस्यलांतक देवलोकस्यापेक्षया उक्ता अथः पुनः शुक्लेश्यायाः उत्कृष्टा स्थय स्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानि स्थितिर्भवति इयं स्थिति सुपंचानुत्तरविमानापेक्षयाज्ञेया ५५ अथ लेश्यानां गतिद्वारमाह [किन्हा नीलाकाऊ तिन्निविएयाओ अहमले साओएयाहिंतिहिंविजीवो दुग्गइ उववज्जई५६] कृष्णानीलाकापोता एतांतिस्रोपिलेश्याः अधमाज्ञेयाः एताभिस्ति स्रभिर्जीवोदुर्गतिं उपपद्यते ५६ [तेउपम्हासुक्का तिन्निविएयाओधम्मलेसाओ एयाहिंतिहिंवि जीवोसुग्गइ उववज्जई ५७] तेजस्पाद्याः तेजः पद्म शुक्ला एतास्तिस्रोपि लेश्याधर्म्माधर्मनिबन्धिन्यो ज्ञेयाः एताभिस्तिसृभिर्लेश्याभिर्जीवः सद्गतिं उपपद्यते ५७ [लेसाहिंसव्वाहिं पढमे समयंमि परिणयाहिं तु नइक्कसविउववाओ पर भवे अत्थि जीवस्स ५८] (लेसाहिं सव्वाहिं चरमेसमयंमि० ५९) सर्वाभिर्लेश्याभिः कृष्णनीलकापोत तेजः पद्मशुक्लाभिः षड्भिः

सूत्र

हिया ५५ ॥ किन्हा नीला काऊ तिन्निवि एयाओ अहम लेसाओ । एयाहिं तिहिंवि जीवो दुग्गइं उववज्जई ५६ ॥
तेऊ पम्हा सुक्का तिन्निवि एयाओ धम्म लेसाओ । एयाहिं तिहिंवि जीवो सुग्गइं उववज्जई ५७ ॥ लेसाहिं सव्वाहिं

भाषा

तेतीस सागर मुहुर्त्त अंतर्मूहूर्त्त अधिक उत्कृष्टी शुक्ललेश्यानी अनुत्तर विमाननी अपेक्षा ५५ इवे लेश्यानी गत कहेछे कृष्णलेश्या नील कापोत लेश्या त्रिण एअधर्म्मरूप लेश्या महापाप आवि वा ना कारण भणी एतीन लेश्याइ जीव नरक तिर्यंच गतिरूपदुर्गती उपजे ५६ तेज पद्म शुक्ल लेश्या तीनए धर्म्मलेश्या कहे नोर्मल धर्म्मना कारण भणी एत्रिहुं लेश्या जीव मनुष्य देवलोक रूप सद्गतिं भलि उपजे ५७ लेश्या कृष्णादिक सर्व पडिवर्जिवा आत्री

प्रथमसमये तत्प्रतिपत्ति कालापेक्षया परिणताभिरात्मरूपत्वं प्राप्ताभिः सतीभिः परभवैकस्यापि जीवस्य उपपातो नास्ति न भवतीत्यर्थः उपपत्तिर्नभवति इत्यनेन प्रथमसमये लेश्यासु उत्पन्नासु परभवे जीवोनोत्पद्यते ५८ सर्वाभिर्लेश्याभिश्चरमसमये ऽंतसमये परिणताभिः आत्मरूपतामापन्नाभिः सतीभिः परभवैकस्यापिजीवस्य उपपातोनास्तीतिगाथाद्वयार्थः५८ अथकदाउत्पद्यतेतदाह(अन्तोमुहुत्तंमि०६०)लेश्याभिः परिणताभिःसतीभिःशुभाशुभाभिःषड्भिः सतीभिः अन्तर्मुहूर्त्तेगतेसतिअन्तर्मुहूर्त्तेचशेषेसतिजीवाःपरलोकं परभवंगच्छन्तिइत्यनेनजीवस्य मरणकालेआगामिभवेलेश्याअन्तर्मुहूर्त्तं यावत्अवश्यं भवति तथा पुनर्जीवस्य उत्पत्तिकालेऽतीतभवलेश्या अन्तर्मुहूर्त्तं यावदवश्यंभवति अन्यथा नराणान्तिरश्चांचदेवत्वे नारकत्वे चउत्पद्यत्समानानां मृत्युकाले अन्तर्मुहूर्त्तं उत्तरभवलेश्याः कथं सम्भवन्ति तथा देवानां नारकाणां च श्रवनादनन्तरं नरतिर्यञ्चु उत्पन्नानां प्राग्भवेलेश्याः अतर्मुहुर्त्तं कथं सम्भवन्ति तस्मादन्तर्मुहूर्त्तावशेष आयुषि परभवलेश्यापरिणामो भवत्येव यदुक्तं आगमे तिरिनर आगामिभवेलेसाए अट्ठ गएसुरानिरया पुव्वभवलेससेसे अन्तमुहुत्ते

पढमे समयम्मि परिणयाहिंतु । नहु कस्सइ उववाओ परभवे अत्थि जीवस्स ५८ ॥ लेसाहिं सव्वाहिं चरिमे समयम्मि परिणयाहिंतु । नहु कस्सवि उववाओ परभवे अत्थि जीवस्स ॥ ५९ ॥ अंतोमुहुत्तंमि गए अंतोमुहुत्तं मि सेसएचेव ।

पहेला समयने विखे परिणमायेछे छतीह जीवने प्रथम अजीणेसमे लेश्या आवी तिणे समये कोई जीवने उपजवो नही इह पर अनेरा भवने विखे मरीवो जे भविनजाइ ५८ कृष्णलेश्यादिक सर्व ६ लेश्याइ चरम समयने विखे परिणमी जीव पणेइंतेणीं न होइ कोइने संसारी जीवने उपजिवो पर अनेरा भवने विखे जीवने ५९ लेश्याने अंतर्मूहूर्त्त गये परिणम्ये थके तथा अंतर्मूहूर्त्त थाकतेथके लेश्या रूडी पाडूई परिणमीइ आव्ये जीव

मरणमिति १ अतएव देवानां नारकाणां लेश्यायाः प्रागुत्तरभवान्तर्मुहूर्त्तद्वयसहितनिजायुःकालं यावत् स्थितिमत्वमुक्तं ६० सम्प्रत्यध्ययनार्थं उप संहारपुराह (तम्हाएयासिंलेसाणं अणुभागे वियाणिया अप्पसत्थाओवज्जित्ता पसत्थाओ अहिट्ठि एत्तिबेमि६१) मुनिस्तस्मात् कारणात् अप्रशस्तालेश्या दुर्गतिकारणं प्रशस्ताः लेश्याः सद्गति हेतोः सर्वासांप्रशस्तानां लेश्यानां अनुभागान् रसान् विज्ञाय अप्रशस्तालेश्याः कृष्णनीलकापोताख्यास्ति स्रोवर्जयि त्वाप्रशस्ताः तेजः पद्म शुक्लाख्यास्ति स्रोलेश्या प्रशस्ताधितिष्टेत भाव प्रतिपत्त्या आश्रयेत् इति सुधर्मा स्वामीजम्बूस्वामिनं प्राह हे जम्बूस्वामिन् अहं श्रीवीरवाक्यादिति ब्रवीमि ६१ इति श्रीमदुत्तराध्ययन सूत्रार्थदीपिकायां उपाध्याय श्रीलक्ष्मीकीर्त्तिगणि शिष्य लक्ष्मीवल्लभगणि विरचितायां चतुस्त्रिंश मध्ययनं संपूर्णं ३४ अथ पञ्चत्रिंशमध्ययनं प्रारभ्यते पूर्वस्मिन् अध्ययने अप्रशस्तालेश्यास्त्याज्याः प्रशस्तालेश्याग्राह्याः इत्युक्तं अत्र तनेऽध्ययने च भिक्षूणां गुणा उच्यन्ते प्रशस्तालेश्याहि गुणवतांभिक्षूणां एव सम्भवन्ति इति पूर्वापरयोः सम्बन्धः [सुणेहमेएगग्गमणे मग्गं बुद्धेहिं देसियं जमायरन्तोभिक्खू दुक्खाणं

सूत्र

लेसाहिं परिणयाहिं जीवागच्छंति परलोयं ६०॥ तम्हा एयासिं लेसाणं अणुभावे वियाणिया। अप्पसत्थाओवज्जित्ता पसत्थाओ अहिट्ठए मुणित्तिबेमि ६१ ॥ लेसज्झयणं समत्तं ३४ ॥ सुणेहमे एगग्ग मणे मग्गं बुद्धेहिं देसियं। जमाय

भाषा

जाइ परलोकने गति नरकतीर्यंच मनुष्य देवगति ६० ते कारण थकी एभली पाडूई सर्वलेश्याना अनुभाग रसरूप जाणीने कृष्णादिक पाडूई वर्ज्जीने प्रशस्त तेजो लेश्यादि भली ३ अधिष्टे भाव थुं आश्रे साधुयतीश्च धर्मा स्वामी जंबूने कहे ६१ इति श्री लेश्याध्ययननोटब्बो संपूर्णम् ॥ ३४ ॥ सांभलो मुझ कहतां प्रति हे शिष्य एकाग्रचित्त थको मोक्षमार्ग प्रते बुद्ध तीर्थं करे देखाड्यो जे मार्ग आदरतं साधु दुःखते सर्वथापरूपने हणे चयकरे १

तकरोभवे १] हे शिष्याः मम कथयतोयूयं एकाग्रमनसः सन्तस्तं मार्गं गुणवत् साधुमार्गं शृणु ततं इति किं यं मार्गं समाचरन् भिक्षुर्दुःखानां अंतं करोति कीदृशं तं मार्गं बुद्धैस्तीर्थंकरैर्देशितं विस्तरत्वेन प्रकाशितं १ [गिहवासं परिचज्ज पव्वज्जामस्सिओमुणी इमे सङ्गेवियाणिज्जाजेहिंसज्जन्ति माणवा २] गृहवासं परित्यज्य प्रव्रज्यां आश्रितोमुनिः इमान् वक्ष्यमाणान् तान् सङ्गान् पुत्रकलत्रादीन् संसारहेतून् विज्ञानीयात् तान् कान् सङ्गान् यैः सङ्गैर्बन्धने कृत्वा मानवाः सज्यन्ते कर्मबन्धनैः कृत्वा संसारिणो बध्यन्ते इत्यर्थः २ (तहेव हिंसं अलियं चोज्जं अबम्भसेवणं इच्छाकामं चलोहं च सज्जओपरिवज्जए ३) ते के सङ्गाः मुनिनात्याज्याः इत्याह संयतः एतान् सङ्गान् परिवर्जयेत् प्रथमं हिंसा तथैव शब्दः पदपूरणे पुनरलीकं मृषाभाषणं चौर्यं तथा अब्रह्म सेवनं मैथुनसेवनं इच्छाकामवाञ्छारूपः कामं भोग सुखं लोभं परिग्रहरूपं परिवर्जयेत् समन्तात् त्यजेत् ३ (मणोहरं चित्तघरं मल्लधूवेण वासियं सकवाडपण्डुरुल्लोयं मणसाविनपत्थए ४) पुनर्मनोहरं चित्त गृहं विचित्र मन्दिरं चित्रैः सहितं गृहं वा चित्रगृहं पुनः कथंभूतं गृहं मल्लधूपन वासितं माल्यानि च धूपनानि माल्यधूपनानि तैर्वासितं माल्यधूपवासितं तच माल्यानिग्रथित पुष्पाणि धूपनानि हादशाङ्गादीनितैः सुगन्धीकृत

रंतो भिक्खू दुक्खाणंत करो भवे १॥ गिहिवासं परिचज्ज पवज्जा मस्सिए मुणी। इमे संगे वियाणिज्जा जेहिं सज्जंति माणवा २॥ तहेवहिंसं अलियं चोज्जं अब्बंभसेवणं। इच्छा कामंचलोहंच संजओ परिवज्जए३॥ मणोहरंचित्त घरं मल्ल

घरनो वास छांडीने दिक्षा लिये आयवो साधु इम एसंग जाणी ने पुत्रपौत्रादि जिणे संगे सिज्झति कर्म बंधाइ मनुष्य अनेरापीण जीव २ तिमे ज जीवहिंसा मृषा बोलवो अदत्तलेवुं विषयनुं सेविवुं इच्छारूप काम लोभ ए तले परि ग्रह सर्व साधु परिहरे ३ मनने हरे एहवो चित्राम सहित

मित्यर्थः पुनः कीदृशं चित्रमन्दिरं सकपाटं कपाटसहितं पुनः कीदृशं पाण्डुरोल्लोचं उज्ज्वलं चन्द्रोपकं साधुरेतादृशं गृहं मनसापि न प्रार्थयेत् अपि शब्दात् वचसान प्रार्थयेत् ४ तादृशे तिष्ठतः साधोः कोदोषस्तमाह (इन्द्रियाणिउ भिक्खुस्स तारिसम्मि उवस्सए दुक्कराइ निवारेउं कामरागविवड्ढणे ५) तादृशेमनोहरेचित्र मालाधूपादि सहिते उपाश्रयेभिक्षोः साधोः इन्द्रियाणि तु निवारयि तुं विषयेभ्यो व्यावर्त्तयितुं दुष्करानि दुःशक्यानि पुनः कीदृशे मन्दिरे काम राग विवर्द्धने कामा इष्टेन्द्रिय विषयास्तेषु रागः स्नेहस्तं विवर्द्धयतीति काम राग विवर्द्धनं तस्मिन् ५ तदा कुत्र स्थातव्य मित्याह (सुसाणे सुन्नगारे वारुक्खमूलेव एगओ पयरिक्के परकडेवा वासन्तत्था भिरोयए ६) एकाकः एकाकी द्रव्यतोभावतश्च द्रव्यतः सहायरहितोभावतो रागादिरहितः परिवार युतोपि मनसाएकत्वं चिन्तयन् साधुस्तत्र तेषु स्थानेषु वासञ्चिवासं रोचयेत् आत्मानं रोचयेत् केषु २ स्थानेषु इत्याह श्मशाने पुनः शून्यागारेवा शब्दस्यार्थे तथा पुनर्वृक्षमूले पुनर्वाऽन्यत्र गृहादौपरिक्रेइति देशीभाषया एकान्ते स्त्री पशुपण्डकादिरहिते पुनः कीदृशे स्थाने परकृते

सूत्र

धूवेण वासियं। सकवाडं पंडुरुल्लोयं मणसावि न पत्थए ४॥ इंदियाणिउ भिक्खुस्सतारिसंमि उवस्सए। दुक्कराइ निवारेउ काम राग विवड्ढणे ५॥ सुसाणे सुन्न गारेवा रुक्खमूलेव एगगो। पइरिके पर कडे वा वासं तत्था भिरो

भाषा

घर फुजे सुगंध कोधो अगरे वास्यो कमाड सहित जीहां चंद्रूआ उजलाछे एहवो मने उपाश्रयादिन वांछे ४ जे मणी पांच इंद्री साधुनां वस पूर्वोक्त उपाश्रयने विखे दोहिलांनि वारवां ब्रह्मव्रत राखवा काम रागनोवधारणहारउपाश्रय ५ रहे श्मशाननेविखे अथवा सूना घरने विखे वृक्षना मूलने विखे रागद्वेष रहित स्त्रियादिक रहित अलगो परो गृह आपणे अर्थे कीधो वसिवुं तीहां रोचवे करे एहवे थान किं साधु रहे ६ प्रासुक अचित्त भूमि विखे

परैरात्मार्थं कृते ६ (फासुयंमि अणाबाहे इत्थी हिं अणभिदुए तत्था संकप्पए वासभिक्खू परमसंजए ७) भिक्षुभिर्याचितः परमसंयतः सप्तदशविध संयमवान् साधुस्तत्र पूर्वोक्तस्थानेऽप्रधानादौवास संकल्पयेत् कुर्य्यात् कथंभूते स्थाने प्रादुकेजीवरहिते अनाबाधेस्वाध्यायान्तराय कारणरहिते पुनः स्त्रीभिरनभिद्रुते अक्लतोपद्रवेस्यादि समीपवासरहिते इत्यर्थः ७ [नसयं गिहाइं कुव्विज्जानेव अन्ने हिंकारए गिहकम्मसमारंभे भूयाणं दिस्सएवहो ८] साधुः स्वयं गृहाणि न कुर्य्यात् न च साधुरन्यैरप्यजानैः कारयेत् साधुर्गृहं न कुर्य्यात् न च कारयेत् तत्र कोहे तु स्वमाह यतो गृहकर्म समारम्भे गृहस्य कर्म इष्टिका मृत्तिका खनन जलाद्यानयन काष्टादि निमित्त वृक्षादिच्छेदनादिकर्म्म गृहकर्म्म तस्य समारम्भो गृहकर्म्म समारम्भ स्तत्र भूतानां प्राणिनां वधो दृश्यते ८ [तसाणं थावराणं च सुहुमाणं बायराणय तम्हागिह समारंभं संजओ परिवज्जिए ९] केषां प्राणिनां वधो दृश्यते गृहकर्म्म समारम्भे त्रसानां द्वीन्द्रिय त्रीन्द्रिय चतुरिन्द्रिय पञ्चेन्द्रियाणां तथा स्थावराणां पृथिव्यप्ते जो वायु वनस्पतीनां सूक्ष्माणां लघुतर शरीराणां अथवा सूक्ष्माणां चर्मचक्षुर गोचराणां बादराणां स्थूल शरीराणां वधो दृश्यते तस्मात् आरम्भस्य प्राणिवधहेतुत्वात् संयतः साधुरारम्भं परिवर्जयेत् ९ अथाहारविधिमाह (तहेव भत्त

सूत्र

यए ६ ॥ फासुयंमि अणाबाहे इत्थीहिं अणभिदुए। तत्थ संकप्पए वासं भिक्खू परम संजए ७ ॥ न सयं गिहाइं कुव्वेज्जानेव अन्ने हिं कारए। गिह कम्म समारंभे भूयाणं दिस्सए वहो ८॥ तसाणं थावराणंच सुहुमाणं बायराणय।

भाषा

आज्ञानेपरे अबाधा पीडा नथाइ स्त्रीजाति रहित एहवे स्थानके तीहां करे वसिवो तेहिज साधु मोटो मोक्षने अभिलाषी ७ स्वयं पोते नवा घर न करे अनेरा पासे करावे नहीं ते अनुमोदेइ नही एणे माटी पांणी आदरे घरना कर्म्म आरंभने विषे एकेंद्रियादिभूत जीवनो वध हिंसा न करे ८ ते जीव

पाणेसु पयणे पयावणेसुय पाणभूय दयट्ठाए न पए न पयावए १०) तथैव साधुर्भक्तपानेषु अन्नपानीयेषु पचनयाचने च त्रसाणां स्थावराणाञ्च बधत्वेन प्राणभूत दयार्थं त्रस थावराणां दयार्थं स्वयं अन्नपानीयं नप चेत्तथा साधुर्न अन्नपानीयं अन्येन याचयेत् १० अन्नपानीय पचनपाचने जीव हिंसां दर्शयति [जलधन्यनिस्रिया जीवा पुढवी कट्ठनिस्रिया हम्मंति भत्तपाणेसु तम्हा भिक्खु न पयावए ११] भक्तपानेषु पच्यमानेषु तथा पच्यमानेषु सत्सु जलधान्यनिश्रिता तत्रस्था जीवा स्तथा पृथ्वीकाष्टनिश्रिता जीवा हन्यन्ते जलञ्च धान्यञ्च जलधान्यं तत्र निश्रिता स्तत्रोत्पन्ना स्तत्रागताः जलरूपा एकेन्द्रिया जीवा स्तथा तत्र भवाः पूतरकादयो जीवा स्ते पचनकाले ततोन्यत्र निश्रिता वाहन्यते यतोहियें जीवा यत्र तिष्टन्ति यत्रोत्पद्यन्ते तत्र स्थितारुव ते सुखिनोभवन्ति तदाश्रयनाशे अपि नाशो भवति एवं पृथ्वी च काष्टञ्च पृथ्वीकाष्टे तत्र निश्रिताः पृथ्वीकाष्टनिश्रिताः पृथ्वीकायिका एकेन्द्रिया स्तदाश्रिताः पनकाद्या अनन्तकायिकाः कुन्थ्वादयो द्वीन्द्रियाद्याश्च जीवाहन्यन्ते तथा काष्टनिश्रिताः घुणाद्या हन्यन्ते भक्तपानकेहि पृथ्वीकाय वनस्पतिकाय

सूत्र

तम्हागिह समारंभं संजओ परिवज्जए ९ ॥ तहेव भत्त पाणेसु पयणे पयावणेसुय । पाणभूय दयट्ठाए नपए नपयावए १० । जल धन्न निस्सिया जीवा पुढवी कट्ठ निस्सिया । हम्मंति भत्तपाणेसु तम्हा भिक्खू नपयावए ११ । विसप्पे

भाषा

त्रसवेंद्रियादि थावर पृथिव्यादिक सूक्ष्मनान्होबादर मोटो जीव तेहनो बध घात ते कारणेथरनोसमारंभसाधु विशेषे परिहरे ९हवेआहार नीविध कहेछे तिम वली भातपाणीने विखे पोते रांधेनही अनेरापासे रंधावे बंधथाइ तेणे प्राणवेंद्रियादिक भूत पृथिवीनी दयाभणी आपरांधे नही बीजापासे रंधावे नही १० पाणिनी निश्राइं पूराधाननी निश्राइ ईत्ती प्रमुख जीव जाणिवा पृथवीने निश्रित वनस्पति आदिकाष्टने निश्रत घुणादि हणाइ भात

योर्विराधनास्या देव तस्मात्व स स्थावर विनाशहेतुत्वाद्विद्युतंनपचेत् नपाचयेदिति भावः ११ अथाग्नेरारम्भो हिंसाकारणं आह [विसप्पे सव्वओधारे बहुपाण विणासणे नत्थि जो दूसमे सत्थे तम्हा जोइं नदीवए १२] साधु तस्मात् कारणात् ज्योतिर्न दीपयेत् अग्निं न प्रज्वालयेत् किं कारणं तदाह ज्योतिः समं अग्नितुल्यं बहु प्राणि विनाशनं अनात् शस्त्रं नास्ति अग्निः सर्वान् प्राणिनो विनाशयति कथम्भूतं ज्योतिः शस्त्रं विसर्पत् विशेषेण सर्वं तीति स्फुरतीति विसर्पत् [प्रसरणशीलं पुनः कीदृशं ज्योतिशस्त्रं सर्वतोधारं सर्वतश्चतुर्दिक्षुधारा शक्तिर्यस्य तत् सर्वतोधारं सर्वदिक्षु स्थित जीव विनाश हेतुक मित्यर्थः प्राकृतत्वादत्रलिङ्गव्यत्ययः पचन पाचनन्तु अग्नि प्रज्वालनं विना नस्या अग्नि प्रज्वालन निषेधन पाचन पचनयो निषेधः पुनरग्नि प्रज्वालन निषेधेन च शीतकालादौ अपि अग्नि समारम्भो निषिद्धः यदा पचनपाचनाग्निना प्रज्वालनादि निषेधो भवति तदा क्रय विक्रयाभ्यां निर्वाह क्रियते अतः साधूनां तन्निषेधोप्युच्यते १२ [हिरण्णं जायरूवंच मणसाविनपत्थए समलेट्ठुकंचणेभिक्खू विरएकय विक्कए १३] [किणंतो कईओहोइ विक्कणं तोयवाणिओ कयविक्कयं मिवट्टंतो भिक्खू हवइ न तारिसो १४] अनयोर्व्याख्या भिक्षुः साधुर्हिरण्णं हेम जातरूपं रूप्यंच शब्दादनधानादि मनसापिन प्रार्थयेत् यदि मनसापिन प्रार्थयेत् तदा कथं गृह्णीयात् कीदृशो भिक्षुः समलेष्टु काञ्चनः लेष्टु च काञ्चनञ्च लेष्टुकाञ्चने

सव्वओ धारे बहुपाणि विणासणे। नत्थि जोइ समे सत्थे तम्हा जोइं नदी वए १२। हिरन्नं जावरूवंच मणसावि

सूत्र

भाषा

पाणीने विखे ते कारण थकी साधु पचावे नही ११ थोडोसो पण थाइ शस्त्रनीपरि सर्वदिसे धाराछे जिहां घणा प्राणीनि विनाशनो करणहार नथी अगि सरिखु बीजू शस्त्र कोई ते कारण थकी अग्नि दीपावे नही १२ हिरण्य रूपो जात रूप सुवर्ण तथा धन प्रमुख मने करी प्रार्थे वांछे नही

समलेष्टुकाञ्चनः यस्य स समलेष्टुकाञ्चनः तुलाकाञ्चन पाषाणः पुनः कीदृशः क्रयविक्रयात् विरतः क्रयश्च विक्रयश्च क्रयविक्रयं तस्माद्विरतो रहितः१३ क्रयविक्रये दूषणमाह (किणंतो० १४) यतोहि साधुः क्रीणन् मूलेन वस्तु गृह्णन् क्रयको भवति इतरलोक वञ्चकको भवति तथा पुनर्विक्रीणानश्च वणिग् भवति क्रयविक्रये वर्तमानो भिक्षुस्त्यागी नभवति भिक्षुगुणयुक्तो नभवति सूत्रे हि भिक्षोर्लक्षणं एतादृशं नास्तीत्यर्थः१४ [भिक्खियव्वं न केयव्वं भिक्खुणा भिक्खुवत्तिणाक्रयविक्रयो महादोसो भिक्षावित्ती सुहावहा१५] भिक्षुणा साधुना भिक्षितव्यं याचितव्यं न तु साधुना क्रेतव्यं मूलेन वस्त्रादौ गृहीतव्यं कौटुम्बेन भिक्षुणा भिक्षवृत्तिना भिक्षयावृत्तिरुदरपूरणं यस्य स भिक्षावृत्तिस्तेन यतोहि भिक्षोः क्रयविक्रययोर्महान् दोषोस्ति साधोर्भिक्षावृत्तिः सुखावहास्ति भिक्षया वृत्तिर्भिक्षावृत्तिः सा सुखं आवहति पूरयतीति सुखावहा सुखपूरका १५ [स मुयाणं उंछमेसिज्जा जहा सुत्तमणिंदियं लाभालाभं मिसं

नपत्थए। समलेट्ठु कंचणे भिक्खू विरए कय विक्कए १३। किणंतो कइओ होइ विक्कणंतोय वाणिओ। कय विक्कयंमि वट्टंतो भिक्खू न हवइ तारिसो १४॥ भिक्खियव्वं नकेयव्वं भिक्खुणा भिक्खुवित्तिणा। कय विक्कओ महादोसो भिक्खावित्ती सुहावहा १५॥ समुयाणं उंछ मेसेज्जा जहा सुत्त मणिंदियं। लाभा लाभंमि संतुट्ठे पिंडवायं चरे

सरिखो पाषाण अने सुवर्ण जेहने एहवो साधु विरम्यो श्रीसरीखे क्रयलेवा थकी विक्रयवेचिवा थकी १३ मोले क्रयाणो लेतु लोक सरीखो ग्राहकहइ क्रयाणादिवे चतुवाणीओ इइ व्यापारि थाइ क्रय लेवो विक्रय वेचतु साधूने होइ तेहवो सूत्रे बोल्यो१४ तुं खुं करतुं भिक्षाइ मांगिवो परं मोलि लेवुं नही चारित्रे भिक्षामांगिवे वृत्तिआ जीविका जेहने क्रय विक्रयतो मोटो दोषछे भिक्षाइं वर्त्तिवो ते सुखनो आपणहारछे १५ घणा घरनि समुदाय

तुट्ठे पिंडवायंचरेमुणी १६] मुनिः साधुर्यथासूत्रं सूत्रोक्तरीत्या अनिन्दितं निन्दारहितं समुदानं भैक्षं भिक्षासमूहं एषयेत् गवेषयेत् कथम्भूतं भैक्षं उंछं इव उंछं अन्यान्य पृथक् २ कणग्रहणमिव स्वल्प स्वल्प मीललेन मधुकरवृत्त्या भ्रमन् दूच्छेत् इत्यर्थः पुनः साधुर्लाभालाभे आहार प्राप्तौ वा सन्तुष्टः सन् सन्तोषी सन् पिण्डपातं भिक्षाटनंचरेत् आसेवेत पिण्डाय भिक्षाग्रहणाय पतनम्पातः पिण्डपाती भिक्षार्थं भ्रमणस्तं आसेवेत् इत्यर्थः १६ अथ भोजनविधिमाह (अलोले नरसे गिद्धे जिभ्हादंते अमुच्छिए नरसट्ठाए भुंजिज्जा जवणट्ठाए महामुणी १७) महामुनिर्यापनार्थं यापना संयमनिर्वाहः यापनाये इति यापनार्थं संयमनिर्वाहार्थं आहारं भुञ्जीत रसोधातु विशेषस्तदर्थं इति रसार्थं धातुवृद्धार्थं स रसाहारं न भुञ्जीत केवलं संयम निर्वा हार्थमेव भुञ्जीतेत्यर्थः कीदृशो महामुनिः अलोलः सरसाहार प्राप्तौ अचपलः पुनः कथंभूतो रसे न गृद्धः मधुरादौ तीव्राभिलाषवान् नास्ति पुनः कीदृशो महामुनिः जिह्वा दांतः प्राकृतत्वात् दांत जिह्वः वसीकृतरसनः पुनः कीदृशः अमूर्च्छितः संनिधेरकरणेन आगामिदिनेषु भक्षणार्थं घृतगुडादि सञ्चय करणरहितः १७ (अवण्णं वेवणञ्चे व वन्दणं पूयणंतहा इड्ढीसक्कार सम्माणं मणसा विनपत्थए १८) पुनः साधुरेतन्मनसापिन प्रार्थयेत् न अभिलषेत्

सूत्र

मुणी १६ ॥ अलोले न रसे गिद्धे जिभ्हा दंते अमुच्छिए। न रसट्ठाए भुंजेज्जा जवणट्ठाए महामुणी १७ ॥ अवण्णं

भाषा

भिक्षा ते पणि तुच्छ थोडा २ गवेषे सूत्रे बोली तेहवी आपणी पारकी निंदाइ रहित आहारादि लहेतुं पणि संतोषी पिंडपात्र भिक्षापात्रे पडे तेल्ये १६ भला अन्न विषे चूंप नहीं घृतादि रस विषे लोभ नहीं दमोहे जिणे घृतादिवासीराखीवे मूर्च्छानहीं शरीरनो रसधातु वृद्धि भणी भोजन न करे संयम निर्वाह भणी आहारल्ये महा साधु १७ फुलादिके पूजा साधियादिकने विषे मननो करवो वांदिवो तिम वली वस्त्रादिके प्रतिलाभवो

यदि मनसापि न प्रार्थयेत् तदा वचन कायाभ्यां दूरतएव अपास्तं तत् किं किं अर्चनं पुष्पादिभिः सत्करणं यथा सेवनं पर्युपासनञ्चैव पदपूरणे पुन र्वन्दनं स्तुतिकरणं तथा पूजनं वस्त्रादिभिः प्रतिलाभनं न प्रार्थयेत् पुनः साधुः ऋद्धिसत्कार सम्मानं मनसापि न प्रार्थयेत् ऋद्धिश्च सत्कारश्च सम्मानश्च ऋद्धिसत्कार सम्मानं ऋद्धिः आज्ञानां सम्यत् अथवा वस्त्रपात्रादि सम्यत् सत्कारो अर्थप्रदानादिः गुणकथनं वा सम्मानं अभ्युत्थानादि एतत्सर्वं साधुर्न अभिलषेत् १८ [सुक्कज्झाणंज्झियाएज्जा अनियाणे अकिंचणे वोसट्ठिकाए विहरिज्जा जावकालस्स पज्जओ १९] साधुः शुक्लध्यानं प्राशुक्लं ध्यायेत् पुनः साधुः अनिदानो निदानरहितः अकिञ्चनः धनादिरहितः पुनर्व्युत्सृष्टकायः सन् शरीर ममत्वरहितः सन् यावत्कालस्य पर्यायः यावन्मृत्योः समय स्तावत् एतादृशः सन् विहरेत् अप्रतिबद्ध विहारत्वेन विचरेदित्यर्थ १९ [निज्जूहि जण आहारं कालधम्मे उवट्ठिए चइऊणमाणुसं बोंदिं पहुदुक्खे विमु च्चई २०] स साधु रेतादृशे मार्गे सञ्चरन्काले धर्मे उपस्थिते सतिमरणे प्राप्ते सतिप्रभुः समर्थः दुक्खात् शरीरमानसात् दुक्खात् विशेषेण मुच्यते मुक्तो भवतीत्यर्थः किं कृत्वा आहारं निज्जूहिऊण इति संलेखनया परित्यज्य पुनः किं कृत्वा मानुषीं बुन्दिमनुत्यज्य औदारिक शरीरंत्यक्त्वा दुःखरहितो

मूल

सेवणंचेव वंदणं पूयणं तहा । इड्ढी सक्कार सम्माणं मणसावि न पत्थए १८ ॥ सुक्कज्झाणं ज्झियाएज्जा अनियाणे अकिंचणे । वोसट्ठ काए विहरेज्जा जाव कालस्स पज्जओ १९ ॥ निज्जूहिऊण आहारं कालधम्मे उवट्ठिए चइऊण माणुसं

भाषा

श्रावक उपगरणलब्धि द्रव्यादिक जभावाद्रवुं इतला मने प्रार्थे नहि तो वचनादिके करी कहे १८ शुक्लध्यानध्याये करी नियाणं तपनी वेचवो न करे धनादिके रहित जिणे कायावो सिरावीछे एहवो साधु प्रतिबंध रहित विचरे जांलगे काल मरणनो प्रस्तावतां लगी १९ संलेखणाने करिये

भवतीत्यर्थः २० [निम्ममो निरहंकारो वीयरागो अणासवो संपत्ते केवलंनाणं सासए परिनिव्वुडेत्तिबेमि २१] एतादृशोयतिः शाश्वतो अविनश्वरो मरण धर्मरहितः केवलं ज्ञानं संप्राप्तः सन् परिनिर्वृतोभवतीतिब्रवीमि कर्माभावात् शीतीभूतो भवति सिद्धि गति भाक् भवतीत्यर्थः कीदृशोयतिर्निर्ममो लोभरहितः पुनः कीदृशो अनाश्रवः प्राणातिपातादिपंचाश्रव रहितः पुनः कीदृशो निरहंकारो अहङ्काररहितः पुनः कीदृशो वीतरागो रागद्वेषरहितः सुधर्मा स्वामी जम्बूस्वामिनं प्रतिवक्ति अहं इति ब्रवीमि वीतराग वचनात् २१ इत्यनगार मार्गाध्ययनं इति श्रीमदुत्तराध्ययन सूत्रार्थ दीपिकायां उपाध्याय श्रीलक्ष्मीकीर्त्तिगणिशिष्य लक्ष्मीवल्लभगणि विरचितायां अनगारमार्गाध्ययनं षट्त्रिंशं अध्ययनं सम्पूर्णं ॥ ३५ ॥ अथ षट्त्रिंशं प्रारभ्यते पूर्वस्मिन् अध्ययने अनगारमार्गः उक्तः स च जीवाजीवादितत्वज्ञानं विनानस्यात् अतो जीवाजीव भक्ताख्यं षट्त्रिंशंअध्ययनं आख्यायते (जीवाजीव विभत्तिं सुणेहमेए गमणाइओ जंजाणि जणभिक्खु सम्मंजयइ संजमे १) भो शिष्याः एकाग्रमनसः सन्तः स्थिरचित्ताः सन्तो यूयन्तां जीवाजीव विभक्तिं जीवाजीवादीनां

सूत्र

वोंदिं पहू दुक्खे विमुच्चई २० ॥ निम्ममो निरहंकारो वीयरागो अणासवो । संपत्तो केवलं नाणं सासए परि निव्वुडे त्तिबेमि २१ ॥ अणगारमग्गंझयणं समत्तं ३५॥ जीवाजीव विभत्तिं सुणेह मे एगमणाइओ। जं जाणिऊण भिक्खू

भाषा

कांधोछे आहार ४ प्रकारे मरणनोकाल अवसरे आव्योथको छांडीने मनुष्यनी वोंदि सरीर समर्थ शरीर मननोदुक्खते थको मुकाइ २० ममता लोभ रहित अहंकार रहित रागद्वेष रहित आश्रव पापरहित पाम्यो केवल ज्ञान सर्वअर्थनो ग्राहक शाश्वतु कर्म खपाविवाथको वीसम्यो शीतली भूत सुधर्मा स्वामि जंबूने कहे२१ इति श्रीअणगारअध्ययनना टव्वा संपूर्ण ३५ एकेंद्रियादि जीव काष्टादि अजीवनी विभक्ति विवरो जांणवो सांभलि हे शिष्य

लक्षणं मे मम कथयतः सतः शृणुत जीवाश्च अजीवाश्च जीवा जीवास्तेषां विभक्तिर्लक्षणा ज्ञानेन पृथक् २ करणं जीवाजीव विभक्तिस्तां उपयोगवान् जीवः एकेन्द्रियादिः उपयोगरहितो अजीवः काष्टादिः इत्यादि जैनमतोक्त लक्षणेन लक्ष्यज्ञानं तां इतिकांयां जीवाजीव विभक्तिं श्रुत्वा भिक्षुः संयमे संयममार्गे सम्यक् यतते यत्नं करुते १ [जीवाचेव० २] जीवाश्चेतना लक्षणात्मकाः च पुनरजीवा अचेतनात्मकाः चकार एवकारश्च पदपूरणे एष लोकोव्याख्यातस्तीर्थंकरैरुक्तः अजीवदेश आकाशं अलोको व्याख्यातः अजीवस्य धर्मास्तिकायादिकस्य देशोंशो अजीवदेशो धर्मास्तिकायादि वृत्तिरहितस्य आकाश स्यैवदेशः स अलोको व्याख्यातः जीवा जीवानां आधेयभूतानांलोकाकाशं आधारभूतं अतो लोकालोक लक्षणं उक्तं २ जीवाजीव विभक्तिर्यथास्यात्तथाह [दव्वओ खित्तओ चेव कालओ भावओ तहा परूवणातेसिं भवे जीवाणम जीवाणय ३] द्रव्यतो द्रव्यं आश्रित्य इदं द्रव्यं इयद्वेदं क्षेत्रतः इदं द्रव्यं एता

सम्मं जयइ संजमे १ ॥ जीवाचेव अजीवाय एस लोए वियाहिए। अजीवो दसमागासे अलोए से विआहिए २ ॥
दव्वओ खित्तओ चेव कालओ भावओ तहा। परूवणा तेसिं भवे जीवाण मजीवाणय ३ ॥ रूविणो चेव रूवीय

सुभ कहतां प्रतिं एकाग्र मनथइ एपांत्रीसमा अध्ययन अनंतर छत्रीसमुं जाणवुं ते अध्ययन सांभली जांणीने साधु तथा श्रावक भली परि यतन करे संयमने विषे १ जीवने वली अजीव कहीये एजच जदराज सर्वने प्रत्यक्ष कह्यो जिने अजीवनो देस आकाश रूप परं धर्मास्तिकायादि तिहां नथी तेहने अलोक कह्यो तीर्थं करे २ द्रव्य थकी जेहना एतलाभेद क्षेत्र थकी ज एतलो आकाश अवगाहि रहेछे काल थकी एहनी एतली थिति तथा भाव थकी जे एहना एतला स्पर्शादि पर्य्याय तेहनी चिह्न प्रकारे प्ररूपणा भेद जीवने अजीवनी थिति ३ अजीवनी प्ररूपणा थोडी ते अर्थे प्रथम

वति क्षेत्रे स्थितकालत इदं द्रव्यं इयत्कालस्थिति महर्त्तते भावतोऽस्य द्रव्यस्य इयन्तः पर्यायाः एवं तेषां जीव द्रव्याणां अजीवद्रव्याणां च द्रव्यक्षेत्र कालभावेन चतुर्धा प्ररूपणा भवेत् ३ अथ तावत् अजीव द्रव्यप्ररूपणायाः स्वल्पत्वात् अजीव द्रव्यस्यैव प्ररूपणा कथ्यते (रूविणोय अरूवीय अजीवा दुविहाभवे अरूवी दसहावुत्ता रूविणो विचउव्विहा ४) अजीवा द्विविधाभवेयुः एके अजीवारूपिणो रूपवन्तः च पुनरन्ये अजीवा अरूपिणो अरूपवन्तः तत्ररूपं वर्णाद्यात्मय भूतं मूर्त्तं तद्स्तियेषु ते रूपिणः तद्व्यतिरिक्ता अरूपिण इत्यर्थः तत्र अरूपिणो अजीवा दशधाउक्ताः रूपिणो जीवा चतुर्विधा प्रोक्ताः ४ पूर्वं दशविधत्वं आह (धम्मत्थिकाए० ५) [आगासे तत्यदेसेय तप्पएसेय आहिए अद्धासमए चेव अरूवी दसहाभवे ६] युग्मं अरूपी अजीव एवं दशधाभवेत् इति द्वितीय गाथयान्वयः प्रथमं धर्मास्तिकायः धरति जीवपुद्गलौ प्रति गम नोपकारेणेति धर्मश्चासौ अस्तयः प्रदेश सद्भावास्तेषां कायः समूहो धर्मास्तिकायः सर्वं देशानुगत समान परिणति मद्द्व्यं इतिभावः १ पुनस्तद्देशस्तस्य धर्मास्तिकायस्यक तमो विभागोदेशस्तृतीय चतुर्थादिभाग स्तद्देशो धर्मास्तिकायदेशः२ तथा पुनस्तत्प्रदेशस्तस्य धर्मास्तिकायविभागस्य अतिसूक्ष्मोनिरंशोंशः प्रदेशोधर्मास्तिकायप्रदेशस्तीर्थकरैः आख्यातः कथितः३ एवं अधर्मो जीव पुद्गलयोः स्थिरकारी धर्मास्तिकायादिरहितो अधर्मास्तिकायः ४ पुनस्तस्य अधर्मास्तिकायस्यापि देशस्तद्देशः एकः कश्चिद्भागो अधर्मो

अजीवा दुविहा भवे। अरूवी दसहा वुत्ता रूविणोवि चउव्विहा ४॥ धम्मत्थिकाए तद्देसे तप्पए सेय आहिए। अह

कहीइं रूपादिके ते रूपी रूपादि नथी ते अरूपी अजीवबेइं भेदे कह्यो ते मांहिं अरूपी दशप्रकारे कह्या जीनेश्वरे सूपीते चिइं भेदे जाणवा ४ धर्मास्तिकाय १ तेहनो विभाग ते देशधरे जीव पुद्गलने गति पणे अनुकूल इइ धर्मेना अस्ति प्रदेसनो काय समूह ते विभागनो अंश जेहनो वलतु

स्तिकायदेशः ५ एवं पुनस्तस्य अधर्मास्तिकायस्य प्रदेशोऽपि स्यात् प्रदेश आख्यातः अधर्मास्तिकाय प्रदेश६ इत्यर्थः इत्यनेन षड्भेदा अरूपिणो अजीवद्रव्यस्य५ अथ शेषावतार उच्यते आगास इति सप्तमोभेदः आकाशं आकाशास्तिकायः जीव पुद्गलयो रवकाशदायि आकाशं ७ तस्य आकाशस्य देशः कतमो विभागः आकाशास्तिकायदेशः ८ तस्य आकाशास्तिकायस्य निरंशोदेश स्यात्प्रदेशः आकाशास्तिकाय प्रदेशः ९ दशमोभेदवाहा समयः अद्धाकालो वर्त्त मानलक्षणस्तद्रूपः समयो अद्धासमयो अस्य एक एव भेदो निर्विभागत्वात् देश प्रदेशौ अपिकालस्य न सम्भवतः १० एवं दशभेदा अरूपिणोज्ञेयाः ६ एतान् अरूपिणः क्षेत्रतः आह (धम्माधम्मेय दोएए लोगमित्ता वियाहिया लोगालोगेय आगासे समए समयखित्तिए ७) धर्माधर्मौ धर्मास्तिकाया धर्मास्तिकायौ एतौ द्वावपि लोकमात्रौ व्याख्यातौ यावत्परिमाणौ लोकस्तावत्परिमाणौ धर्मास्तिकाया धर्मास्तिकायौ चतुर्दश रज्वात्मलोक व्याप्तौ इत्य

मे तस्स देसेय तप्पएसेय आहिए ५। आगासे तस्स देसेय तप्पएसेय आहिए। अद्धा समए चेव अरूवी दसहाभवे ६।
धम्मा धम्मेय दोएए लोगमित्तावियाहिया। लोगालोगेय आगासेसमए समयखेत्तिए७। धम्मा धम्मागासातिन्निवि

भागन होये तेहस्युं मिलतो देसते धर्मास्तिकाय थकी विपरीत अधर्मास्तिकाय तेहनो विभाग ते देस ते देसनो विभागनथाइ एहवो विभाग ते प्रदेस कह्यो ५ मर्यादा सहित आपणे सरूपे योगि पदार्थनोहां रह्यातें आकाशास्ति काय तेहनो विभाग ते भेद ते मांहिं जेहनो भाग नथी ते प्रदेश कह्यो अद्धाकालरूप समयादिक ते अद्धासमय तेहनो विभाग नथी एह वाभणी देस नहीं अरूपी दशेप्रकारे छइ ६ धर्मास्तिकाय अधर्मास्तिकाय एवे द्रव्य लोकमात्र चौदराजव्यापी परं अलोक माहीं नथी ते कह्यो तीर्थं कर देवे लोक चौदराज अलोक चौदराज बाहिर तेहने विखे आकाशास्तिकाय सघले

नेन अलोके धर्माधर्मौ नस्तः आकाशं लोकालोके वर्त्तते इत्यनेन आकाशास्तिकायः चतुर्दशरज्वात्मलोकं व्याप्यस्थितः ततो बहिरलोकं अपि व्याप्य आकाशास्तिकायः स्थित इत्यर्थः समय समयादिकः कालः समयक्षेत्रिको व्याख्यातः समयोपलक्षितं क्षेत्रं सार्द्धद्वय द्वीप समुद्रात्मकं समय क्षेत्रं तत्रभवः क्षेत्रिकः सार्द्धद्वय द्वीपेभ्यो बहिस्तु समय आवलिकादिव समासादि कालभेदाः मनुष्यलोका भावान्न विवक्षितः ७ पुनरेतान् एवकालत आह [धम्मा धम्मागासातितिविएए अणाइया अपज्जवसियाचेव सव्वद्धं तु वियाहिया ८] धर्माधर्माकाशानि एतानित्रीण्यपि सर्वाद्धं इति सर्वकालं सर्वदा स्वस्वरूपा परित्यागेन नित्यानि अनादीनि च पुनरपर्यवसितानि अन्तरहितानि व्याख्यातानि ८ अथ काल स्वरूपमाह (समएविसन्तइं पप्प एव मेव वियाहिया आएसं पप्पसाईए सपज्जवसिए विय ९) समयोपि कालोपि एव एव यथा धर्माधर्माकाशानि अनाद्यनन्तानि तथा कालोपि अनाद्यनन्तः इत्यर्थः किंकृत्वा सन्ततिं प्राप्य अपरापरोत्पत्ति रूपप्रवाहात्मिकां आश्रित्यकोर्थः यदाहि कालस्योत्पत्ति र्विलोक्यते तदा कालस्य आदिरपि नास्ति अन्तोपिनास्तीत्यर्थः पुनरादेशं प्राप्यकार्यारम्भं आश्रित्यकालः सादिकः आदिसहित: तथा सपर्यवसितोऽव सानसहितो व्याख्यातः

एए अणाइया । अपज्जवसिया चेव सव्वद्धंतु वियाहिया ८ । समएवि संतइंपप्प एवमेव वियाहिए । आएसंपप्प

सूत्र

भाषा

व्यापी रह्योछे समयादि काल ते समयक्षेत्र अढी द्वीपमांहि वाहिर नही ७ धर्मास्तिकाय अधर्मास्तिकाय आकाशास्तिकाय तीनए अनादि जे भणी एआदि नही अने अपर्याय वसान जेहनोछे इहोनकहवाइं आश्रताछे तेह भणी सर्वकाल लगी हुइ कहीइं आपणुं स्वरूप छांडे नही ८ समय काल निरंतरउत्पत्तिनी अपेक्षाइ स्रोजी इतिवारे मत्ता आश्री एह पूंठलीपरि अनादि अने अनंत आदेशकार्य आरंभीइ तेह आश्री आदेसहि तत् अने

यदा च यत् किञ्चित् कार्यं यस्मिन् काले आरभ्यते तदा तत्कार्यारम्भवशात्कालस्यापि उपाधिवशात् आदिः एवं कार्यारम्भ समाप्तीकालस्यापि अन्तोव्याख्यातइत्यर्थः ९ अथ रूपिणोऽजीवाश्चतुर्विधाश्चतुर्भेदा उच्यन्ते [खन्धायखन्धदेसाय तप्पएसातहेवयपरमाणुणोय बोधव्वारूविणोवि च उव्विहा१०] रूपिणोप्यजीवाश्चतुर्विधाश्चतुः प्रकाराः के ते भेदास्तान् आह स्कन्धाः यत्र पुञ्जे परमाणवोविघटनात् मिलनात् चन्यूनाः अधिकाअपि भवति एता दृशाः परमाणुपुञ्जाः स्कन्धदेशाः १ तथा तत् प्रदेशास्तेषां स्कन्धानां निर्विभागांशाः स्कन्धप्रदेशाः २ तथैवेति पूर्ववत् च पुनः परमाणवोबोधव्याः पर माणवएव परस्परं अमिलिताइत्यर्थः एवं चत्वारो रूपिणश्चतुर्विधाबोधव्याइति भावः अत्र च मुख्यवृत्त्यापरमाणु द्रव्यस्य द्वौ भेदौ परमाणवः स्कंधाश्चदेश प्रदेशयोः स्कन्धेष्वेवान्तर्भावः १० अथ स्कन्धानां परमाणूनां लक्षणमाह (एगत्तेण पुहुत्तेण खन्धायपरमाणुणो लोएगदेसेलोएय भइव्वातेय खित्तओ इत्तोकालविभागं तु तेसिं वुच्छं च उव्विहं ११ अर्थः एतेस्कन्धाश्च पुनः परमाणवः एकत्वेन पुनःपृथक्त्वेन लोकैकदेशे च पुनर्लोके चैवतोभाज्याः तत्र केचित्

सूत्र

साइए सपज्जवसिएवि य ९ ॥ खंधाय खंधदेसाय तप्पएसा तहेवय । परमाणुणोय बोधव्वा रूविणोवि चउव्विहा १०।
एगत्तेणं पहुत्तेण खंधाय परमाणुणो । लोएगदेसे लोएय भइव्वातेय खित्तओ । इत्तो काल विभागं तु तेसिं वोच्छं

भाषा

पर्यवसान अंतछे ९ परमाणुयाविघटे मिले ते स्कंध तेहनो विभाग ते देश तेहना जे निर्वात अंश ते प्रदेश तिम जाणवा जे परमाणु घणु अणु मान्या ते परमाणु आजांणवा रूपी द्रव्य चिहुं प्रकारे पइसते रूपी द्रव्य जांणवो १० परमाणु आस्युं एक परिणामि परिणमे परमाणूनुं जूजू आपणुं रहिवुं परमाणुंया एकठा मिल्या कि अनंतालग जूजू आते परमाणुया लोकना एकदेशने विषे परमाणुआ रह्याछे स्कंधते लोकमाहि थका लोकना

स्कन्धा परमाणवश्च एकत्वेन समानपरिणतिरूपेण लक्ष्यन्ते अथ च स्कन्धापरमाणवश्च पृथक्त्वेन परमाणुस्तरै रसङ्घातरूपेण लक्ष्यन्ते इति अध्याहारः इति द्रव्यतोलक्षणं उक्तं अथ क्षेत्रतः आह ते स्कन्धाः परमाणवश्च इति तत् स्कन्धपरमाणूनां ग्रहणेपि परमाणूनां एव एक प्रदेशावस्थानत्वात् ते परिमाणवः स्कन्धेषु लोकैकदेशेलोके सर्वत्रभक्तव्याः भजनीयाः दर्शनीइति यावत् ते हि विचित्रत्वात्परिणतेर्बहु प्रदेशेतिष्ठन्ति इतः क्षेत्रप्ररूपणातोऽनन्तरं तेषां स्कन्धानां परमाणूनां चतुर्विधं कालभेदं चतुर्विधं वक्ष्ये सादि अनादि सपर्यवसित अपर्यवसित भेदेन कथयिष्यामि इदं च सूत्रं षट् पादं गाथेत्युच्यते ११ (संतइं पप्पतेणाई अपज्जवसियावियठिइं पडुच्च साइया सपज्जवसियावि य १२] ते स्कन्धाः परमाणवश्च सन्ततिं अपरापरोत्पत्ति प्रवाह रूपां प्राप्य अनादयः आदिरहितास्तथा अपर्यवसिताः अन्तरहिताः स्थितिं प्रतीत्यक्षेत्रावस्थानरूपांस्थितिं अङ्गीकृत्यसादिकाः सपर्यवसिताश्च वर्त्तन्ते १२ सादिसपर्यवसितत्वेपि कियत्कालमेषांस्थितिरित्याह [असङ्खकालमुक्कोसं इक्कं समय जहन्नयं अजीवाणयरूवीणं ठिईएसावियाहिया१३]

सूत्र

चउव्विहं ११॥ संतइं पप्प तेणाई अपज्जवसियावि य। ठिइं पडुच्च साईया सपज्जवसियावि य १२॥ असंख काल मुक्कोसं एक्को समओ जहन्नयं। अजीवाणय रूवीणं ठिई एसा वियाहिया १३॥ अणंतकाल मुक्कोसं एक्कोसमओ

भाषा

प्रदेसने विषे ते स्कंधदेश क्षेत्र आकाश भजिवा अनेक प्रकार करी कहवायेछ प्रदेसी पणे एक ११ प्रदेशे रहे संतति प्रवाहे आश्री तेहअनादि जिणेइं त जे अपर्यवसित अनंत पणे जिणे सद्दाइस्ये थिति नियत क्षेत्र विषे होते आश्री आदि सहित तेसादि अने स पर्यवसित अंत सहित जेहनो नवनवे ठामे उपजे १२ असंख्यातु काल उत्कृष्टस्थित एक समय जघन्यस्थिति अजीवरूपी द्रव्य पुद्गल पृथव्यादिक थिति एह कही तीर्थं करे १३ अनंतोकाल उत्

स्कन्धानां परमाणूनां च उत्कृष्टा असंख्यकालं स्थितिः जघन्यिका एकसमया स्थितिः एषा अजीवानां रूपिणां पुद्गलानांस्थिति व्याख्याता१४ अथ कालतः स्थितिं उक्तातदन्तर्गतं अन्तरमाह (अणन्तकालमुक्कोसं इक्कं समयं जहन्नयं अजीवाणयरूवीणं अन्तरेयं वियाहिया १४] अजीवानां रूपिणां पुद्गलानां स्कन्धदेश प्रदेशपरमाणूनां अन्तरं विवक्षितक्षेत्रावस्थिते प्रच्युतानां पुनस्तत् क्षेत्रप्राप्तेर्व्यवधानं अन्तरं उत्कृष्टं अनन्तकालं भवति जघन्यकं एकसमयं यावद्भवति इदं अन्तरं तीर्थकरैर्व्याख्यातं पुद्गलानां हि विवक्षितक्षेत्रावस्थितितः प्रच्युतानां कदाचित्समयावलिकादि संख्यानकाल तोवापल्योपमादेर्यावदनन्तकालादपितत् क्षेत्रावस्थितिः सम्भवतीति भावः १४ अथ भावतः पुद्गलान् आह (वन्नओगन्धओचेव रसओ फासओतहा संठाणओय विन्नेओ परिणामो तेसिं पञ्चहा: १५) तेषां पुद्गलानां परिणामोवर्णतो गन्धतोरसतः स्पर्शतस्तथासंस्थानतश्च पञ्चधापञ्च प्रकारोज्ञेयः यतोहि पूरणगलनधर्माणः पुद्गलास्तेषां एव परिणतिः सम्भवति परिणमनं स्व स्व रूपावस्थितानां पुद्गलानां वर्णगन्धरस स्पर्शसंस्थानादिरन्यथा भवनं परिणामः

सूत्र

जहन्नयं। अजीवाणय रूवीणं अंतरेयं वियाहियं १४ ॥ वन्नओ गंधओ चेव रसओ फासओ तहा। संठाणओय विन्नेओ परिणामो तेसिं पंचहा १५ ॥ वन्नओ परिणया जेउ पंचहा ते पकित्तिया। किन्हा नीलाय लोहिया हालिद्दा

भाषा

कृष्टी अंतर तीहांथकी वली तीहां जपजे एक समय जघन्यथिति अंतर पछेतो एक समे तीहांनो तिहां आवे अजीवरूपी द्रव्य पुद्गल पृथिव्यादिक अंतरो पूर्वे कह्यो तीर्थं करे १४ वर्णथकी पुद्गल परिणम्या गंध थकी पुद्गल परिणम्या रस थकी परिणम्या फरसथकी परिणम्या तथा वली संस्थान कथकी परिणम्याते जाणवा परिणाम पुद्गलास्तिकायनो पांच प्रकारे इम इह १५ वर्ण परिणामे परिणम्याछे जे पुद्गल पांचे प्रकारे ते कह्या

स पुद्गलानां पञ्चप्रकारत्वार्थः १५ एषामेव प्रत्येकं उत्तरभेदानाह [वण्णओपरिणयाजेउ पञ्चहातेपकित्तिया किण्हानीलायलोहिया हालिद्दासुक्किला तहा १६] जेपुद्गलाः वर्णतः परिणताः सन्तिः ते पुद्गलाः पञ्चधाः प्रकीर्त्तितास्तीर्थकरैः कथितास्तेकेतानाह कृष्णाः कज्जलवर्णाः पुनर्नीलाः शुकपिच्छ निभाः गुलिकासदृशारक्ताहिंगुलवर्णाः तथा हारिद्राः पीताहरितालनिभाः तथा शुक्लाः शङ्ख कुन्दस्फटिकसदृशाः १६ [गन्धओपरिणयाजेउ दुविहातेवियाहिया सुब्भिगन्धपरिणामादुब्भिगन्धातहेव १७] जेतु पुद्गलागन्धतः परिणताः सन्ति ते पुद्गलाद्विविधाव्याख्याताः सुरभिगन्धः परिणामो येषान्ते सुरभिगंध परिणामाः सुगंधत्वेन परिणतास्चन्दनादिवदित्यर्थः तथैव दुरभिगंधाः दुर्गंधत्वेनलशुनादिवत् परिणताः १७ [रसओपरिणयाजेउ पञ्चहातेपकित्तियातित्तकडु आकसाया अम्बिलामहुरातहा १८] ये तु पुद्गलाः पुनरसतः परिणतास्तेपञ्चधा प्रकीर्त्तिताः तिक्ताः निम्बसदृशाः कटुकाःसुण्ठमरिच सदृशाः कषायाः खदिर सदृशाःआम्लानिम्बूकरससदृशाः मधुराःसर्करा सदृशाः१८[फासओपरिणयाजेउ अट्ठहातेपकित्तिया कक्खडाम जयाचेव गुरुआलहुयातहा २०) स्पर्शतश्चये परिणताः पुद्गलास्ते अष्टधाप्रकीर्त्तिताः कर्कशाः अजालोमसदृशाः च पुनर्मृदुकाः सुकुमाला: पट्कूल

सूत्र

सुक्किला तहा १६ ॥ गंधओ परिणया जेउ दुविहा ते वियाहिया। सुब्भि गंध परिणामा दुब्भि गंधा तहेवय १७॥
रसओ परिणया जेउ पंचहा ते पकित्तिया। तित्त कडुय कसाया अंबिला महुरा तहा १८॥ फासओ परिणया जेउ

भाषा

कालानीलाराता पीला धवला तथा १६ गंध परिणामे परिणम्याछे जे पुद्गल बिहुंभेदे ते कह्या तीर्थंकरे सुगंध पणे परिणमाक पूरनी परे दुर्गंध पणे परिणमा लसणनोपरिं तथा वली १७ रसनेपरिणामे परिणमा जे पुद्गल पांचे प्रकारे कह्या तीखा कडूया कसाइ लाखाटा मीठा तथा वली १८

सदृश्याः गुरुकाः लोहपारद सदृश्याः तथा पुनर्लघुकाः अर्कतूलसदृश्याः २० (सीया उन्हायनिद्धाय तहालुक्खाय आहिया इइफासपरिणयाएए पुग्गला समुदाहिया २१] तथा पुनः केचित्पुद्गलाः सीताहिमसदृश्याः च पुनरुष्णा अग्नि सदृश्याः च पुनः स्निग्धाः घृत सदृश्याः तथा रूक्षाश्च आख्याताः इति अमुनाप्रकारेण एतेपुद्गलाः स्पर्शपरिणताः अष्टप्रकारेण तीर्थंकरैरुदाहृता २१ [संठाणपरिणयाजेउ पञ्चहातेपकित्तियापरिमण्डलायवट्टा तं सचउरं समायया २२] ये तु पुद्गलाः संस्थानपरिणतास्ते पञ्चधाप्रकीर्त्तितास्तेकेतानाह परिमण्डलाकङ्कणाकारापुनवर्त्तुलाःलड्डुकाकृतयः पुनस्त्रिकाः संघाटकाकारा: पुन चतुरस्राः चतुष्कोण: चतुष्किकाकारा: तथा पुनरायताः प्रलम्बाः रज्वाकारा:२२ संप्रत्येषां एव परस्परं सम्बंध माह [वण्णओजेभवे

सूत्र

अट्ठहा ते पकित्तिया । कक्खडा मउयाचेव गुरुयालहुयातहा १९ ॥ सीया उन्हाय निद्धाय तहा लुक्खाय आहिया । इइ फास परिणया एए पुग्गला समुदाहिया २० ॥ संठाण परिणया जेउ पंचहा ते पकित्तिया । परिमंडलाय वट्टा तंसा चउरंस मायया २१ । वन्नओ जे भवे किन्हे भइए सेउ गंधओ । रसओ फासओ चेव भइए संठाणओवियर२२।

भाषा

फरसने परिणामे परिणमया जे पुद्गल आठे प्रकारे ते कह्या तीर्थंकरे खरखरा सुंहाला भारी हलुआ तथा वली १९ ताढा जड्डा चोपड्या तथा वली लूखा कह्या इण प्रकारे फरस पणे परिणमया पूराइगलाइते पुद्गल समाक् प्रकारे कह्या तीर्थंकरे २० संस्थानपणे परिणमया जे पुद्गल पांचे प्रकारे ते कह्या परिमंडल चूडीनीपरे वाटली मोदकनीपरि लिखूणा चोखूणा आयतलांबा २१ वर्णथकी जे काली पुद्गलते गंधथकी भजवो भजना रस थकी भजिवो जाणवो सुगंध हुवे तथा दुर्गंध हुइ रसमाहि फरसद कोइ कहुवे कोइकनहोवे संस्थान थकी भजिवो संस्थानमाहि कोइ कहुवे २२

